# व्याकरणसाहित्यशास्त्रदृशा लिङ्गवचनविमर्शः

**(Vyākaraṇasāhityaśāstradṛśā Liṅgavacanavimarśaḥ)**

जवाहरलालनेहरूविश्वविद्यालयीय-Ph.D.इत्युपाध्यर्थम्प्रस्तुतः

शोधप्रबन्धः


शोधनिर्देशकः
डॉ.हरिराममिश्रः

शोधार्थी
नारायणदत्तमिश्रः



संस्कृतप्राच्यविद्याऽध्ययनसंस्थानम्
जवाहरलालनेहरूविश्वविद्यालयः
नवदेहली-११००६७


२०१९

संस्कृतप्राच्यविद्याऽध्ययनसंस्थानम्
जवाहरलालनेहरूविश्वविद्यालयः
नवदेहली- ११००६७

**SCHOOL OF SANSKRIT & INDIC STUDIES**
**JAWAHARLAL NEHRU UNIVERSITY**
**NEW DELHI-110067**

22 July, 2019

## DECLARATION

I **Narayan Dutt Mishra,** hereby declare that this thesis entitled **व्याकरणसाहित्यशास्त्रदृशा लिङ्गवचनविमर्शः (Vyākaraṇasāhityaśāstradṛśā Liṅgavacanavimarśaḥ)** submitted in the School of Sanskrit & Indic Studies, Jawaharlal Nehru University, New Delhi 110067, for the award of degree of Doctor of Philosophy is an original research work and has not been previously submitted ever before, in part or full, for any other degree or diploma of any institution/University.

Narayan Dutt Mishra

**(Narayan Dutt Mishra)**

संस्कृतप्राच्यविद्याऽध्ययनसंस्थानम्
जवाहरलालनेहरूविश्वविद्यालयः
नवदेहली- ११००६७

SCHOOL OF SANSKRIT & INDIC STUDIES
JAWAHARLAL NEHRU UNIVERSITY
NEW DELHI-110067

22 July, 2019

## CERTIFICATE

The Thesis entitled **व्याकरणसाहित्यशास्त्रदृशा लिङ्गवचनविमर्शः (Vyākaraṇasāhityaśāstradṛśā Liṅgavacanavimarśaḥ)** submitted by **Narayan Dutt Mishra** to School of Sanskrit & Indic Studies, Jawaharlal Nehru University, New Delhi 110067, for the award of degree of **Doctor of Philosophy** is an original research work and has not been submitted so far, in part or full, for any other degree or diploma of any University/Institution.

This may be placed before the examiners for evaluation and for award of the degree of Doctor of Philosophy.

Prof. Girish Nath Jha

(Dean)

Dean
School of Sanskrit & Indic Studies
Jawaharlal Nehru University
New Delhi-110067, INDIA

Dr. Hari Ram Mishra

(Supervisor)

Dr. Hari Ram Mishra
Assistant Professor
School of Sanskrit and Indic Studies
Jawaharlal Nehru University
New Delhi-110067, INDIA

सर्वाननशिरोग्रीवः सर्वभूतगुहाशयः।

सर्वव्यापी स भगवांस्तस्मात् सर्वगतः शिवः॥

(श्वेताश्वतरोपनिषद् 3/11)

यं ब्रह्मा वरुणेन्द्ररुद्रमरुतः स्तुन्वन्ति दिव्यैः स्तवै-

र्वेदैः साङ्गपदक्रमोपनिषदैर्गायन्ति यं सामगाः।

ध्यानावस्थिततद्गतेन मनसा पश्यन्ति यं योगिनो

यस्यान्तं न विदुः सुरासुरगणा देवाय तस्मै नमः॥

(श्रीमद्भागवतमहापुराणम् 12/13/1)

विद्याः समस्तास्तव देवि! भेदाः स्त्रियः समस्ताः सकला जगत्सु।

त्वयैकया पूरितमम्बयैतत् का ते स्तुतिः स्तव्यपरापरोक्तिः॥

(मार्कण्डेयपुराणम् 91/05)

# कृतज्ञताज्ञप्तिः

व्याकरणानुसारं लिङ्गं वचनञ्चेत्येतत्तत्त्वद्वयमाधृत्य व्याकरणलक्ष्यस्वभावं ततोऽद्वयमिवैव साहित्यमाश्रित्य भाषिकं विवेचनं विभावयत्यद्वयमपि यथाभक्ति भगवन्तं शिवं रामञ्च द्वयमिव संस्तुवति मयि दैवीवाग्रूपेणाख्यातस्य संस्कृतस्य सुरुचिबीजं वप्तृभ्यः पल्लवयितृभ्यः पुष्पयितृभ्यश्च पूज्येभ्यः पितृवर्य्येभ्यः श्रीशिवकुमारशर्म्मभ्यः पितृव्यवर्य्येभ्यः प्रो.रामकुमारशर्म्मभ्यश्च, अथ श्रद्धेयाभ्यः स्नेहमूर्तिभ्यो मातृपितृव्यावर्य्याभ्यः श्रीमतीदमयन्तीरीनादेवीभ्यश्च सर्वविधकार्तज्ञ्य-वशाल्लघुकृतेर्गोकुलनाथकृत-शिवशतकस्थ-शास्त्रतत्त्वमीमांसायाः पश्चाद् "**व्याकरणसाहित्यशास्त्रदृशा लिङ्गवचनविमर्शः**" इत्येतच्छीर्षकसमन्वितः शोधप्रबन्धोऽयं साम्प्रतमपि समर्प्यते कृतज्ञताज्ञापनक्रमे सर्वादाविति विज्ञाप्यत इह।

राष्ट्रियसंस्कृतसंस्थानस्य हिमाचलप्रदेशस्थाद् गरलीपरिसरात् (वेदव्यासपरिसरात्) प्राक्शास्त्रि-शास्त्रिकक्षयोः संस्कृतविषयं तत्रापि सर्वशास्त्रोपकारकं व्याकरणशास्त्रं स्वीकृत्याधीतवति मयि तत्रत्यैरादरणीयैः स्वस्वशास्त्रपारङ्गतैर्गुरुवर्य्यैर्या व्याकरणादिशास्त्रोपादेयतारूपा सुरुचिः समुत्पादिता, तदर्थं तेभ्यस्तेभ्यो गुरुवर्य्येभ्यः सर्वतः प्रथमं धन्यवादानभ्यर्पये। तत आधुनिकम् एम्.ए. (संस्कृतम्) इत्युपाध्यर्थञ्जवाहरलालनेहरूविश्वविद्यालयीयविशिष्टसंस्कृताध्ययनकेन्द्रं समागते मयि विविधशास्त्रालोडनरूपा सा रुचिरत्रत्यैरादरणीयैर्गुरुवर्य्यैः संवर्धिता सम्पोषिता च।

तत्र च शोधच्छात्रत्वेन चितस्यैतस्य शोधप्रबन्धस्य निर्देशकेभ्यो विद्वद्वरेण्येभ्यो विशेषेण च काव्यव्याकरणशास्त्रपारङ्गतेभ्यश्श्रद्धेयेभ्यो गुरुवर्य्येभ्यो डॉ.हरिराममिश्रमहाभागेभ्यः समर्प्यते सविनयं कार्तज्ञ्यम्, येषां स्नेहासिक्तेन परामर्शविशेषपुरस्सरेण कुशलनिर्देशनेनाथ तदीयव्याकरणकाव्यशास्त्रपरशोधकर्म-प्रभावितेन व्याकरणच्छात्रत्वादपि काव्यव्याकरणशास्त्रसम्पृक्त एव विषयः स्वीकरणीय

इत्येवं सुविचारिततत्कृततत्त्वानुशीलनसत्प्रेरणेन च साधितम्मयेदं शोधविलेखनरूपं कर्म्म।

कृतज्ञताज्ञप्तिसरण्यां ततोऽस्मत्संस्कृतप्राच्यविद्याऽध्ययन-संस्थानस्याचार्याभ्यो विविधशास्त्रनिष्णातेभ्यो गुरुभ्यो मादृशशोधच्छात्रप्रेरकेभ्यो वर्तमानसङ्कायाध्यक्षेभ्यः प्रो.गिरीशनाथझामहाभागेभ्यः, प्रो.रामनाथझामहाशयेभ्यः, प्रो.चौडूर्युपेन्द्रराव्-महोदयेभ्यः, प्रो.सन्तोषकुमारशुक्लमहाभागेभ्यः, डॉ.रजनीशकुमार-मिश्रमहोदयेभ्यः, प्रो.सुधीरकुमारार्यमहाशयेभ्यः, प्रो.ब्रजेशकुमारपाण्डेयवर्येभ्यः, प्रो.सत्यमूर्तिवर्य्येभ्यः, डॉ.टी.महेन्द्रवर्य्येभ्यः, डॉ.गोपालकुमारमीणावर्य्येभ्यश्च सविनयं सश्रद्धञ्च समर्प्यन्ते धन्यवादाः। तत्रभवद्ध्य आचार्येभ्यो वस्तुतो विविधानां शास्त्रतत्त्वानां सारोऽधिगतो मया, अथ यदीयसाहाय्यं सङ्गृह्य च शोधोऽयं विलिखितङ्गतस्तत्रापि सर्वतश्शोधच्छात्रप्रेरणाभूतेभ्यो डॉ.रजनीशकुमारमिश्रेभ्योऽत्र विशेषतो विज्ञाप्यन्ते धन्यवादा येषामेतच्छोधप्रबन्धविषयसम्बद्धैर्विशिष्टैः प्राक्तनपरामर्शैः सन्ततं लाभान्वितोऽहं जातः।

सहितयोश्शब्दार्थयोः सारतत्त्वं गृहीतवतो राष्ट्रियसंस्कृतसंस्थानस्य जयपुरपरिसरे साहित्यविभागाध्यक्षान् प्राक्शास्त्रिकक्षातो विद्यासङ्क्रान्तिद्वाराऽपि गुरुभूतान् मम पितृव्यचरणान् प्रो.रामकुमारशर्मणः प्रति तावद् धन्यवादसरण्यामस्यां विज्ञाप्यते सावनतं विशिष्टं कार्तज्ञ्यम्। एतच्छोधप्रबन्धचयन-तदाधृतलेखन-तत्त्वनिरूपणसम्पृक्तया सुलभया च चर्चया येषाम्मादृशेन छात्रेणापि प्रथमतया लघुशोधात् परं सम्प्रति शोधप्रबन्धविलेखनक्षेत्रान्तः सम्प्रावेशि।

ततश्च जवाहरलालनेहरूविश्वविद्यालय-राष्ट्रियसंस्कृतसंस्थान-लालबहादुर-शास्त्रिराष्ट्रियसंस्कृतविद्यापीठानाम्पुस्तकालयाध्यक्षेभ्यस्तत्रत्यसदस्येभ्यो

भारतीयविद्वत्परिषद्-अभिधान्तर्जालसमवायस्थविद्वत्सदस्येभ्यश्चापि विनम्रा कृतज्ञता समर्प्यते यतो बहुविधशास्त्रालोडनसौविध्यं समुपलब्धम्मया।

न हि प्रबन्धविलेखनसदृशं गभीरं कर्म्म समुचितपरिवेशं मनःसुस्थत्वञ्च विना सम्भवति कथमपीति विदितवेदितव्यानां सुविदितमेवेदम्। तस्माद् धन्यवादसरण्यामस्याम्पारिवारिकाणां सदस्यानाम्मित्राणाञ्च समुल्लेखः सम्प्रतीयते नितरामावश्यकः। पूज्यानां मातापितृचरणानाम्, पितृव्यपितृव्याचरणानाम्, अग्रजाणामनुजानाञ्च सर्वेषां सर्वदा स्नेहादिसिक्तेभ्यः साहाय्यभूतेभ्यो भावेभ्यो मम कार्य्यं सरलीजातं तदर्थं सर्वप्रथममेतेभ्यः पूज्येभ्यः प्रणामाः स्वस्ति चानुजेभ्यो विज्ञाप्यन्ते। तत्रापि पूज्येभ्यः पितृचरणेभ्यो हिन्दीकविभ्यो मत्प्रेरकेभ्यः श्रीशिवकुमारशर्म्मभ्यः, अग्रजेभ्यः सर्वत्र समानगतिस्वभावस्वामिभ्यः श्रीभगवानदत्तमिश्रेभ्यः, सदा मत्सत्प्रेरिकाभ्योऽग्रजाभ्यः श्रीमतीरेणुकामिश्राभ्यः, अनुजायै स्निग्धायै पूर्णिमायै, प्रियाय ज्ञानसिन्धवेऽनुजाय च विशेषतो धन्यवादा इह प्रख्याप्यन्ते यैः सत्प्रेरणविविधोद्धरणानुशीलनरूपसाहाय्येन मम लेखनायासः प्रायशोऽनायासीकृतः।

अथ शोधप्रबन्धविलेखनेऽस्मिन् परोक्षापरोक्षरूपेण साहाय्यकृद्भ्यः संस्कृत-प्राच्यविद्याऽध्ययनसंस्थानस्य प्रियेभ्योऽग्रजेभ्योऽनुजेभ्यः मन्मित्रेभ्योऽन्यत्रस्थेभ्यश्च नाम्नोल्लेखाधिक्यान्नामग्राहं विनैव भूरिशो धन्यवादाः। तेषु परं प्रविधिपाटवपूर्वकमपि साहाय्यमाचारितवते तस्मै कर्तव्यानुष्ठानतत्परायानिलाय विना निलीनं धन्यवादं विशेषवचनसहकृतमेव चाग्रजत्वात् स्नेहराशिमप्यभ्यर्पये। सरण्यां चास्यां व्याकरणपाटवान्वितं सहृदयहृदयाङ्कितं सुहृदमङ्कितं समुत्साहेन च सर्वदा टङ्कणोद्धरणान्वेषणादिकार्ये तत्परीभूताननुजान् अतुलालोकदीपकसदानन्दतरुण-सुभाष-योगेन्द्रजितेन्द्रवशिष्ठविवेकरमेशाकाशावधेशमोहितराहुलचैतन्यानपि हृदा धन्यवचोभिः सभाजयाम्यहम्। ततोऽन्येभ्यः परोक्षरूपेण बहूपकृतवद्भ्यो डी.डी.न्यूज्-

वाहिनीसम्बद्धेभ्यः सुजनेभ्योऽपरोक्षतश्चैव सहपाठिभ्यः पूर्वपरिचितेभ्यो मित्रेभ्यस्तत्रापि यीशहरीशमनीषवन्दनानीहारिकाशिप्राऽऽदिभ्योऽग्रजतुल्येभ्यः कुलदीपमहोदयेभ्योऽपि प्रेरकेभ्यो धन्यवादा यैर्यैः सह यथाकथञ्चिद् विहिताभिश्चर्चाभिर्विलिखितम्मया यथासामर्थ्यं पूर्णतां प्रापितम्।

अन्त्ये तु सर्वतः प्रथिततमेभ्यः मम प्रियक्रीडकेभ्यः जीवने समादर्शस्वरूपेभ्यश्च साम्प्रतिकेभ्यः क्रीडकचरेभ्यो भारतरत्नोपाधिविभूषितेभ्यः सचिनतेन्दुल्करेभ्योऽपि सरण्यामस्यां निःसंशयं समर्प्यन्ते धन्यवादाः यतो यदीयजीवनसमादर्शमाहात्म्यं बाल्यतो ज्ञायं ज्ञायं समानरीत्यैव तदीयकार्यक्षेत्रीयात् क्रीडनसम्पृक्तशतशतकादिरूप-नैकसङ्ख्यागौरवसम्प्रभावात्, सदा सर्वत्र च समाश्रितुकामो भवेऽस्मिन्नभवमहमभिप्रेरितीकृतः। अत एव व्याकरणच्छात्रत्वाद् व्याकरणशास्त्रं तदीयप्रयोगक्षेत्रं साहित्यशास्त्रमप्याधृत्यानयोर्द्वयोश्शास्त्रयोः लिङ्गवचनरूपतत्त्वद्वय-माध्यमेन समानतन्त्रत्वञ्च संसाध्य समत्वप्रतिपादकं यथोत्प्रेक्षितं यथासामर्थ्यं च नूतनं किमपि शोधकार्यं मया विधेयमित्येतत् सुविचार्य शोधप्रबन्धोऽयं विलिखितङ्गतः। एवं विनयावनतः कृतज्ञतां विनीतां विज्ञापयति –

*नारायणदत्तमिश्रः (शोधच्छात्रः)*

संस्कृतप्राच्यविद्याऽध्ययनसंस्थानम्,

जवाहरलालनेहरूविश्वविद्यालयः, नवदेहली-110067

संवादो ह्यन्यसादृश्यं तत् पुनः प्रतिबिम्बवत्

आलेख्याकारवत् तुल्यदेहिवच्च शरीरिणाम्।

तत्र पूर्वमनन्यात्म तुच्छात्म तदनन्तरम्।

तृतीयं तु प्रसिद्धात्म नान्यसाम्यं त्यजेत् कविः ॥

# विषयानुक्रमणिका

**विषयप्रवेशः……...…………………………………….1-37**

*प्रथमोऽध्यायः* – **लिङ्गवचनशब्दार्थविमर्शः…………...……….38-76**

*द्वितीयोऽध्यायः* – **व्याकरणशास्त्रदृशा लिङ्गविमर्शः…………...77-124**

*तृतीयोऽध्यायः* – **साहित्यशास्त्रदृशा लिङ्गविमर्शः…………...125-154**

*चतुर्थोऽध्यायः* – **व्याकरणसाहित्यशास्त्रदृशा वचनविमर्शः…...155-197**

*पञ्चमोऽध्यायः* – **लिङ्गवचनज्ञानोपायविमर्शः….....................198-261**

**उपसंहारः ………………………………………...262-285**

**परिशिष्टम् ………………………………..........286-425**

**सन्दर्भग्रन्थविवरणम्…………………….……….426-440**

क. प्राथमिकानि स्रोतांसि………………………………......426-436

ख. द्वितीयकानि स्रोतांसि……………………………..........436-438

ग. शोधपत्रपत्रिकाऽऽदयः …………………………………………439

घ. कोशग्रन्थाः……………………………………...........439-440

ङ. अन्तर्जालस्रोतांसि……………………………….............440

________)(________

# विषयप्रवेशः

## क. व्याकरणशास्त्रपरिचयः –

**"सर्ववेदपारिषदं हीदं शास्त्रम्"**[1] इत्येतद्वचनं व्याकरणस्य सर्ववेदोपकारकत्वम्प्रदर्श्य वेदाङ्गेष्वस्य कथञ्चिद् विशिष्टमेव स्थानं सङ्केतयतीति सुस्पष्टम्। न च वेदाङ्गमात्रमेवापितु तत्तच्छास्त्रसार-सारमवगन्तुं भवति व्याकरणशास्त्रमनिवार्यम्। अत एव शास्त्रान्तरं श्रोतुमप्यधिकारमात्रप्रतिपादनपरं व्याकरणप्रशस्तिमयमाप्यते वच इदम् -

**"यो वेद वेदवदनं सदनं हि सम्यग् ब्राह्म्याः स वेदमपि वेद किमन्यशास्त्रम्।**

**यस्मादतः प्रथममेतदधीत्य धीमान् शास्त्रान्तरस्य भवति श्रवणेऽधिकारी"॥**[2]

व्याकरणस्योपादेयत्वन्तु वेदस्य रक्षणार्थमिदमध्येयमित्येवं महाभाष्य-वचनमेव[3] प्रमाणयति। वस्तुतस्तु वेदाङ्गमिदं शब्दसम्पृक्तम्, तस्मादेव शब्दानुशासनादिप्रथितवचनैः[4] शब्दशास्त्रतया प्रकीर्त्यते। यद्यपि भाषां स्थिरयितुं व्यवस्थापयितुं वा प्रातिशाख्यादिषु प्राचीनग्रन्थेषु निर्दिष्टेषु सम्प्रति समुपलभ्यन्ते हि कतिचन शब्दानुशासनानि तथाऽपि द्वित्रेषु तेषु पाणिनीयानुशासनमेव ताँस्तान् सर्वान् शब्दानुशासकरूपग्रन्थान् सर्वतो विशिष्यतेतरामिति त्ववधेयम्।

वस्तुत **"इदमन्धन्तमः कृत्स्नञ्जायेत भुवनत्रयम्। यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते"॥**[5] **"वागेव विश्वा भुवनानि जज्ञे"**,[6] **"शब्देष्वाश्रिता शक्तिर्विश्वस्यास्य निबन्धनी"**[7] इत्याद्युक्तिप्रमाणैश्च शब्दानुशासनरूपं

---

[1] पाणिनीयव्याकरणमहाभाष्यम् (प्रथमं खण्डम्), भूमिकात उद्धृतम्, पृष्ठसङ्ख्या - 06

[2] सिद्धान्तशिरोमणिः, गोलाध्यायान्तर्गतोऽष्टमश्श्लोकः, पृष्ठसङ्ख्या - 06

[3] "रक्षाऽर्थं वेदानामध्येयं व्याकरणम्"।

- पाणिनीयव्याकरणमहाभाष्यम् (प्रथमं खण्डम्), पस्पशाह्निकम्, पृष्ठसङ्ख्या- 20

[4] "अथ शब्दानुशासनम्" - अत्रैव, पृष्ठसङ्ख्या - 05

[5] काव्यादर्शः 1/4, पृष्ठसङ्ख्या - 09-10

[6] वाक्यपदीयम् (1/112), स्वोपज्ञवृत्तिः, पृष्ठसङ्ख्या - 195

[7] अत्रैव (1/110), पृष्ठसङ्ख्या -180

व्याकरणं लौकिकव्यवहारसंवाहकमपि निःसंशयम्, भाषायाः शुद्धये चानिवार्यमिति।[8] तदाधारेण हि योग्यतानिर्धारकमपीदं व्याकरणम्।[9]

एवं सर्वविद्योपकारकस्य[10] तत्परायणभूतस्य[11] च व्याकरणस्य शब्दसाधुत्व-व्यवस्थापकत्वं सर्वतः स्पष्टम्। न हि केवलं तावल्लौकिक्येवाभ्युन्नतिः साध्यतेऽनेनापितु मोक्षद्वारभूतेन[12] शब्दब्रह्मणैव परब्रह्मणः समवाप्तिरिति सुप्रथिते विज्ञाते मते[13] सत्यवाप्यत एवान्यः पन्था अपि यत्र द्वयोर्ब्रह्मणोर्मध्ये साधितम्भवत्यैक्यमिति।[14] अनेन व्याकरणमाहात्म्यं वर्त्तते स्पष्टतरम्। एतच्च श्रेयःप्रेयोवहं व्याकरणं सन्तिष्ठते सर्वदा महत्त्वास्पदमिति तथ्यम्। वस्तुतो हि वेदार्थान्तस्तत्त्वविवेचनाय समेषां वेदाङ्गानाम्पृथक्तया स्वरूपमुद्घाटयितुं यतः कालानुसारेणाविर्भावो जातः, तस्मादेव षड्वेदाङ्गेषु परिगणितस्य वेदवपुषो मुखत्वेनारोपितस्य च व्याकरणाख्यस्य वेदाङ्गस्यास्यापि जातः प्रादुर्भाव इति नितरां स्पष्टावहम्।

---

8 "यस्य षष्ठी चतुर्थी च विहस्य विहाय च। यस्याहं द्वितीया स्याद् द्वितीया स्यामहं कथम्"॥

भारतीय शास्त्र और शास्त्रकार (इत उद्धृतम्), पृष्ठसङ्ख्या – 15

9 "अजर्घा यो न जानाति यो न जानाति बर्बरी। अचीकमत यो न जानाति तस्मै कन्या न दीयते"॥

-अत्रैव, पृष्ठसङ्ख्या – 15

"यद्यपि बहुनाऽधीषे तथाऽपि पठ पुत्र! व्याकरणम्। स्वजनः श्वजनो मा भूत् सकलं शकलं सकृच्छकृत्"॥

- अत्रैव,पृष्ठसङ्ख्या-12

10 "तद्द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम्। पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते"॥

-वाक्यपदीयम् (1/14),पृष्ठसङ्ख्या-47

11 "यथार्थजातयः सर्वाः शब्दाकृतिनिबन्धना। तथैव लोके विद्यानामेषा विद्या परायणम्"॥

-अत्रैव (1/15), पृष्ठसङ्ख्या - 49

12 "इदमाद्यम्पदस्थानं सिद्धिसोपानपर्वणाम्। इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः"॥

- अत्रैव (1/16), पृष्ठसङ्ख्या - 49

13 "द्वे विद्ये वेदितव्ये तु शब्दब्रह्म परञ्च यत्। शब्दब्रह्मणि निष्णातः परम्ब्रह्माधिगच्छति"॥

ब्रह्मबिन्दूपनिषत् 17, ईशादिविंशोत्तरशतोपनिषदः, पृष्ठसङ्ख्या – 142

14 "मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितम्। मयि सर्वं लयं याति तद्ब्रह्माद्वयमस्म्यहम्"॥

कैवल्योपनिषद् 1/19, ईशादिविंशोत्तरशतोपनिषदः, पृष्ठसङ्ख्या - 143

यद्यपि व्याकरणं षड्-विधवेदाङ्गेषु मुखरूपेण स्वीक्रियते चक्षूरूपेण च ज्योतिषमिति। परं कुत्रचिच्छास्त्रचक्षुरिति पदेन व्याकरणस्यैव जायते बोध इति,[15] विशिष्टस्यास्य वेदाङ्गस्य कथञ्चिदद्वितीयम्महत्त्वा-धायकमेव तथ्यम्। नान्येषां वेदाङ्गानामेवं द्विधाऽङ्गारोपणोल्लेखो दृश्यते। शास्त्रचक्षुष्कताऽस्य वेदाङ्गस्य व्याकरणदर्शनशिरोमणेर्वाक्यपदीयस्य वचनेनापि साधयितुं शक्यते। यथोक्तमस्य पदकाण्डे–

**"शास्त्रदृष्टिस्तु शास्त्रस्य प्राप्तिमात्रेऽप्यनिश्चिते।**

**युज्यते प्रत्यवायेन शास्त्रञ्चक्षुरपश्यताम्"॥**[16] इति।

अपरत्रापि निरुक्तवेदाङ्गं व्याकरणस्य पूरकमिति स्वयं निरुक्तवचन-प्रामाण्येन[17] सुविशदीभवति विशिष्टमेव वेदाङ्गस्यास्य माहात्म्यम्।

अपरत्र तु महाभाष्यकारेण पतञ्जलिनाऽपि व्याकरणं नामेयमुत्तरा विद्येति[18] समुद्घुष्टम्। वाक्यपदीयस्य स्वोपज्ञवृत्त्यामितोऽप्यधिकम्महत्त्वं व्याकरणस्यैतस्य सर्वविद्याभ्य एव पावित्र्यातिशयत्वेन सूपस्थापितम्।[19] एवं वेदानां षट्स्वङ्गेषु व्याकरणस्य सर्वतोऽप्रतिहतम्प्राधान्यं[20] विविक्तम्।

---

[15] "शास्त्रेषु चक्षुरिव, व्याकरणम् इति केचित्"। – शब्दकल्पद्रुमः, पञ्चमो भागः, पृष्ठसङ्ख्या - 68

[16] वाक्यपदीयम् (पदकाण्डे तृतीयो भागः - वृत्तिसमुद्देशः), नवसप्ततिसङ्ख्याका कारिका, पृष्ठसङ्ख्या - 98

[17] "तदिदं विद्यास्थानम्। व्याकरणस्य कार्त्स्न्यम्"। - निरुक्तम्, प्रथमाध्यायस्य पञ्चमः पादः, पृष्ठसङ्ख्या – 25

[18] पाणिनीयव्याकरणमहाभाष्यम् (द्वितीयं खण्डम्), अष्टाध्यायीसूत्रसङ्ख्या - 1/2/32

इत्यन्तर्गतम्भाष्यवचनम्, पृष्ठसङ्ख्या-28

[19] "आपः पवित्रं परमं पृथिव्यामपां पवित्रं परमं च मन्त्राः।

तेषां च सामर्ग्यजुषां पवित्रं महर्षयो व्याकरणं निराहुः"॥

- वाक्यपदीयम् (1/14), स्वोपज्ञवृत्तिः, पृष्ठसङ्ख्या - 49

[20] "प्रधानञ्च षट्स्वङ्गेषु व्याकरणम्। प्रधाने कृतो यत्नः फलवान् भवति"।

पाणिनीयव्याकरणमहाभाष्यम् (प्रथमं खण्डम्), पस्पशाह्निकम्, पृष्ठसङ्ख्या - 23

इदं हि व्याकरणशास्त्रमष्टविधं[21] नवविधं[22] चेति बहुत्रोच्यते। काशिकायाम् अष्टाध्याय्या "**क्रतूक्थादिसूत्रान्ताट्ठक्**"[23] सूत्रस्यास्य व्याख्यायां तु पञ्चव्याकरण[24] इत्येवमुल्लेखः पञ्च व्याकरणानि प्रख्यापयति। कुत्रचित्तु वैदिकम्, लौकिकम्, उभयविधश्चेति प्रविभज्य व्याकरणमिदं त्रिप्रकारकम्, अथ तस्माद् वस्तुतो नैकानि व्याकरणान्यनया रीत्येति साधयितुं शक्यते।[25] तत्रेन्द्रकातन्त्रादीनां व्याकरणसम्प्रदायानां सुबहुविशालेषु बहुप्राचीनेषु सत्स्वपि पाणिनितन्त्रस्य सारबहुलत्वात् पाणिनिना कृताऽष्टाध्याय्येव सर्वत्र व्याकरणपरम्पराऽऽधारेति मन्यते। पाणिनितन्त्रप्रशंसापरकमिदं वचनमवाप्यते –

**"पाणिनीयम्महाशास्त्रम्पदसाधुत्वलक्षणम्।**
**सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यं न किञ्चन"॥**[26]

हरचरितचिन्तामणेश्शब्दशास्त्रावतारनामकस्य ग्रन्थस्य सप्तविंशे प्रकाशे भगवतश्शिवस्यैवेदं पाणिनीयं व्याकरणमिति सुस्पष्टीकृतम्। तथा हि-

**"ऐन्द्रं व्याकरणं हित्वा पाणिनीयं व्यधाच्छिवः"॥**[27]

---

[21] "ब्राह्ममैशानमैन्द्रञ्च प्राजापत्यं बृहस्पतिम्। त्वाष्ट्रमापिशलञ्चेति पाणिनीयमथाष्टमम्"॥

"इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः। पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः"॥

संस्कृत व्याकरणशास्त्र का इतिहास (अत्रोद्धृतम्), पृष्ठसङ्ख्या - 29

[22] "ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम्।

सारस्वतं चापिशलं शाकलं पाणिनीयकम्"॥

व्याकरण-तन्त्र का काव्यशास्त्र पर प्रभाव (इत्यत्रोद्धृतम्), पृष्ठसङ्ख्या - 39

[23] अष्टाध्यायीसूत्रसङ्ख्या – 4/2/60, - सिद्धान्तकौमुदी, पृष्ठसङ्ख्या - 245

[24] काशिकावृत्तिः (द्वितीयो भागः) (अष्टाध्यायीसूत्रसङ्ख्या - 4/2/60) , पृष्ठसङ्ख्या - 105

[25] निरुक्तम्, प्रथमाध्यायस्य चतुर्थः पादः, पृष्ठसङ्ख्या –19

[26] पाणिनीयव्याकरणमहाभाष्यम् (प्रथमं खण्डम्), भूमिकात उद्धृतम्, पृष्ठसङ्ख्या - 06

[27] अत्रैव, पृष्ठसङ्ख्या - 05

वस्तुतस्तु धर्मार्थकाममोक्षरूपपुरुषार्थचतुष्टयोपकारकत्वेन श्रुतिस्मृति-पुराणेतिहास-दर्शनवेदाङ्गप्रभृतीनि शास्त्राणि प्रवृत्तानि। तेषु सर्वोपकारकत्वेन मूर्धन्यं व्याकरणं श्रुत्यादिसकलोपकारकत्वेन प्रधानमिति विदितमेव विपश्चिदपश्चिमानाम्। अनधीतव्याकरणः कश्चनापि कस्यचिदपि तत्त्वमधिगन्तुं नालम्। अत एव भगवता पाणिनिनाऽधिपाणिनिशिक्षं व्याकरणं वेदस्य मुखत्वेन निरदेशि -

**“छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।**
**ज्योतिषामयनञ्चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥**
**शिक्षा घ्राणन्तु वेदस्य मुखं व्याकरणं स्मृतम्।**
**तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते”॥**[28]

महाभाष्यकृता पस्पशाह्निके व्याकरणस्य माहात्म्यमेवञ्जगदे “**प्रधाने हि कृतो यत्नः फलवान् भवति**”,[29] इति। किं वा भर्तृहरिणा तु व्याकरणम्मोक्षस्याजिह्मा राजपद्धतिः सिद्धिसोपानपर्वणामाद्यं पदस्थानञ्चा-भ्यधायि।[30]

## ख. साहित्यशास्त्रपरिचयः –

वेदराशित आरभ्य अद्यावधि सम्प्राप्तं विलिखितं विलिख्यमानञ्च समस्तमेतत् साहित्यं वैदिकानि लौकिकानि च तथ्यान्यात्मसात्कुर्वत् सर्वज्ञानविज्ञानादीनां विविधानाञ्च साहित्यिकभेदोपभेदानां वर्गीकृतं नैकस्वरूपं स्वस्मिन् समावेशयति। यथोक्तम् – **“भूतम्भव्यम्भविष्यच्च सर्वं वेदात् प्रसिद्ध्यति”।**[31] एतत् सर्वज्ञानमयम्पौरुषेयापौरुषेयमतानुगुणं वेदवचन-

---

[28] पाणिनीय-शिक्षा, कारिकासङ्ख्या – 41-42

[29] पाणिनीयव्याकरणमहाभाष्यम् (प्रथमं खण्डम्), पस्पशाह्निकम्

[30] “इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम्। इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः”॥

- वाक्यपदीयम् (ब्रह्मकाण्डम्), कारिकासङ्ख्या – 16

[31] “चातुर्वर्ण्यं त्रयो लोकाश्चत्वारश्चाश्रमाः पृथक्। भूतम्भव्यम्भविष्यच्च सर्वं वेदात् प्रसिद्ध्यति”

- मनुस्मृतिः 12/97, पृष्ठसङ्ख्या-458

विस्तृत्यवबोधकम्[32] **"यः कश्चित् कस्यचिद् धर्म्मो मनुना परिकीर्त्तितः। स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः"॥**[33] इत्येतेन कथनेनेतोऽपि विशदितञ्जायते। **"ओमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यानं भूतम्भवद्भविष्य-दिति सर्वमोङ्कार एव। यच्चान्यत्त्रिकालातीतं तदप्योङ्कार एव"।**[34] इत्यौपनिषदवचनन्त्वकारोकारमकारसंहतिरूपस्य[35] त्रिकालातीतस्य च वेदस्य प्राशस्त्यं सुस्पष्टयति।

वस्तुतः साहित्यशब्दस्य व्युत्पत्तिरेव **"डुधाञ् धारणपोषणयोः",**[36] इत्यर्थकाद् धातोः समुपसर्गपूर्वकात् कर्मणि क्तप्रत्यये **"लुम्पेदवश्यमः कृत्ये तुं-काम-मनसोरपि। समो वा हिततयोर्मासस्य पचि युङ्घञोः",**[37] इत्येतद्वचन-प्रामाण्येन समो मकारस्य वैकल्पिके लोपे च कृते जायते। यत्र सहितशब्दस्य धृतत्वं पुष्टत्वं वाऽर्थो निश्चीयते। सहितयोः संहितयोः शब्दार्थयोर्भावस्साहित्यमिति व्युत्पत्त्याऽथवा हितेन धारणपोषणरूपेण सह वर्तेत एतौ शब्दार्थाविति सहितौ तयोर्भावश्च साहित्यम् इति व्युत्पत्त्या च सङ्गच्छते शब्दस्यास्यार्थप्रतिपत्तिः। वक्रोक्तिकारेण तावदस्य साहित्यस्य सारं शोभाशालितायां सन्निहितमिति स्पष्टतः प्रतिपादितम् -

---

[32] "छन्दांसि यज्ञाः क्रतवो व्रतानि भूतम्भव्यं यच्च वेदा वदन्ति"।

- श्वेताश्वतरोपनिषद् 4/9, ईशादिविंशोत्तरशतोपनिषदः,पृष्ठसङ्ख्या - 138

"भूतम्भवन्तम्भविष्यन्तं सूक्ष्मं व्यवहितं विप्रकृष्टमित्येवञ्जातीयकमर्थं शक्नोत्यवगमयितुं नान्यत् किञ्च नेन्द्रियम्"। - शाबरभाष्यम् 1/1/2, पृष्ठसङ्ख्या- 07

[33] मनुस्मृतिः 2/7, पृष्ठसङ्ख्या - 24

[34] माण्डूक्योपनिषद् 1, ईशादिविंशोत्तरशतोपनिषदः, पृष्ठसङ्ख्या - 20

[35] "अकारञ्चाप्युकारञ्च मकारञ्च प्रजापतिः। वेदत्रयान्निरदुहद्भूर्भुवः स्वरितीति च"॥

"त्रिभ्य एव तु वेदेभ्यः पादम्पादमदूदुहत्। तदित्यृचोऽस्याः सावित्र्याः परमेष्ठी प्रजापतिः"॥

- मनुस्मृतिः 2/76-77, पृष्ठसङ्ख्या- 36

[36] धातुसङ्ख्या-1167, - सिद्धान्तकौमुदी, पृष्ठसङ्ख्या- 400

[37] काशिकावृत्तिः(द्वितीयो भागः),अष्टाध्यायीसूत्रसङ्ख्या -6/1/144

इत्येतेत्सूत्रप्रसङ्ग उल्लिखितम्, पृष्ठसङ्ख्या - 495

**"साहित्यमनयोः शोभाशालितां प्रति काऽप्यसौ।**

**अन्यूनानतिरिक्तत्वमनोहारिण्यवस्थितिः"॥**[38]

समग्ररूपेण शब्दार्थाभ्यां हिताभिलाषादीनाम्भावानां धारणं पोषणं येन सम्पाद्यते तदेव साहित्यमित्युच्यते। तस्माच्छब्दनिर्वचनमिदं साहित्य-शब्दस्यास्य सर्वकल्याणकरत्वं सुविशालत्वञ्च विशदयति। एतादृशसाहित्यविचारसन्दर्भे वैदिकर्चां द्रष्टार ऋषयो नूनमद्वितीयं स्थानमावहन्ति। **"साक्षात्कृतधर्म्माण ऋषयो बभूवुः"**[39] इति वचनप्रामाण्यं तेषामृषीणां क्रान्तद्रष्टृत्वं किं वा कवित्वं विशदीकरोति। वैदिकोऽयं कविशब्द[40] इदानीम्प्रयुञ्जानं कथञ्चिदलौकिकार्थमेव प्रकटीकरोतीति निस्संशयं वक्तुं शक्यम्।

यद्यपि वैदिकसाहित्यसम्प्राप्तं कविः, पदमदः साम्प्रतं लौकिकार्थमेव स्पष्टीकुर्वत् प्रत्येति तथाऽपि नूनमेवैतादृशार्थमेव व्यञ्जयदिदमद्यापि कविशब्दस्यास्य पूर्वतनं विशिष्टार्थतत्त्वमेव प्रतिपादयति।[41] वस्तुतस्तु कवित्वन्न सर्वसुलभं न च कविकर्म्म सरलमेवेति।[42] तथोक्तं कविमाहात्म्यम्–

**"अपारे काव्यसंसारे कविरेव प्रजापतिः।**

**यथाऽस्मै रोचते विश्वं तथेदम्परिवर्त्तते"॥**[43]

---

[38] वक्रोक्तिजीवितम्, 1/17

[39] निरुक्तम्, प्रथमाध्यायस्य षष्ठः पादः, पृष्ठसङ्ख्या- 33

[40] "कविर्मनीषी परिभूः स्वयम्भूर्याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः"।

ईशावास्योपनिषद् 8, ईशादिविंशोत्तरशतोपनिषदः, पृष्ठसङ्ख्या- 01

[41] "नान्यतोऽस्ति द्रष्टा" (बृ.उ. 3/8/11) - ईशादि नौ उपनिषद् (शाङ्करभाष्य उद्धृतम्), पृष्ठसङ्ख्या- 18

[42] "नरत्वं दुर्लभं लोके विद्या तत्र सुदुर्लभा। कवित्वं दुर्लभं तत्र शक्तिस्तत्र सुदुर्लभा"॥

- साहित्यदर्पणः, प्रथमः परिच्छेदः, पृष्ठसङ्ख्या - 04

"सर्वशास्त्रमविद्वद्भिर्मृग्यमाणं न सिद्ध्यति"। - अग्निपुराणम्, 337/5 (पूर्वार्धः), पृष्ठसङ्ख्या- 940

[43] ध्वन्यालोकः, तृतीय उद्योतः, (अत्रोद्धृतम्) पृष्ठसङ्ख्या- 222

वैदिककालिकैः पश्चात्कालिकैश्चैतादृशैः कविभिः सम्बद्धं समस्तं संस्कृतसाहित्यं तत्रापि वैदिकसाहित्यं स्वविशाले शब्दराशिसमूहे प्रायशो जगत्स्थान् सर्वविषयान्[44] समावेशयतीति पारम्परिकाणां वैदेशिकानां संस्कृतविदुषाञ्च नितरां सम्मतमिति बहुधा प्रतिपादयितुं शक्यते।

ईदृशं साहित्यं काव्यापराभिधेयं सच्चेतश्चमत्करोति। नलचम्पूकाव्यस्य कर्त्तुः त्रिविक्रमभट्टस्य मते तावद् हृदयलग्नत्वं काव्यस्य विशेषतः प्रख्यापनार्थम्–

**"किं कवेस्तेन काव्येन किं काण्डेन धनुष्मतः।**

**परस्य हृदये लग्नं न घूर्णयति यच्छिरः"॥**[45]

तत्र शारदावतारो मम्मटाचार्योऽपि ब्रूतेऽलौकिकत्वं कविकर्मणः - "**काव्यं लोकोत्तरवर्णनानिपुणं कविकर्म"**[46] इति। आनन्दवर्धनाचार्यस्तु- "**सहृदयहृदया-ह्लादि शब्दार्थमयत्वमेव काव्यलक्षणम्"**[47] इत्येवं वचः समुपस्थाप्य सहृदयहृदयाह्लादत्वं काव्यस्य विनिर्णितवान्।

इत्थम्भूतस्य काव्यस्याविर्भावविषयः साम्प्रतं विचार्यते। भारतीयपद्धतौ तावत् सर्वविद्यानां प्रभवः परमपितुः परमेश्वरादेव। तस्य देवस्य कवेर्वाऽऽदिकाव्यं वेदः। यथोक्तम्- "**देवस्य पश्य काव्यं न ममार न जीर्यति"॥**[48] स एव च प्रथमः कविः – **"स पर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धम-**

[44] "यः कश्चित् कस्यचिद् धर्म्मो मनुना परिकीर्त्तितः । स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः"॥

- मनुस्मृतिः 2/7, पृष्ठसङ्ख्या - 24

[45] नलचम्पूः, प्रथमोच्छ्वासः

[46] काव्यप्रकाशः, प्रथम उल्लासः, पृष्ठसङ्ख्या - 09

[47] ध्वन्यालोकः, प्रथम उद्योतः, पृष्ठसङ्ख्ये – 6-7

[48] अथर्ववेदः 10/08/32

**पापविद्धम्। कविर्मनीषी परिभूः स्वयम्भूर्याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः"॥**49

काव्यस्योद्गमविषये पौराणिकशैल्या निबद्धाम् आख्यायिकां तत्र राजशेखरः काव्यमीमांसायाः प्रारम्भे प्रस्तौति– "**अथातः काव्यं मीमांसिष्यामहे, यथोपदिदेश श्रीकण्ठः परमेष्ठिवैकुण्ठादिभ्यश्चतुषष्टये शिष्येभ्यः। सोऽपि भगवान् स्वयम्भूरिच्छाजन्मभ्यः स्वान्तेवासिभ्यः। तेषु सारस्वतेयो वृन्दीयसामपि वन्द्यः काव्यपुरुष आसीत् । तञ्च सर्वसमयविदं दिव्येन चक्षुषा भविष्यदर्थदर्शिनं भूर्भुवःस्वस्त्रितयवर्त्तिनीषु प्रजासु हितकाम्यया प्रजापतिः काव्यविद्याप्रवर्त्तनायै प्रायुङ्क्त । सोऽष्टादशाधिकरणीं दिव्येभ्यः काव्यविद्यास्नातकेभ्यः सप्रपञ्चं प्रोवाच । तत्र कविरहस्यं सहस्राक्षः समाम्नासीद्, औक्तिकमुक्तिगर्भः, रीतिनिर्णयं सुवर्णनाभः, आनुप्रासिकं प्रचेता यमकं यमश्चित्रं चित्राङ्गदः, शब्दश्लेषं शेषः, वास्तवं पुलस्त्यः, औपम्यमौपकायनः, अतिशयं पराशरः, अर्थश्लेषमुतथ्यः, उभयालङ्कारिकं कुबेरः, वैनोदिकं कामदेवः, रूपकनिरूपणीयं भरतः, रसाधिकारिकं नन्दिकेश्वरः, दोषाधिकरणं धिषणः, गुणोपादानिकमुपमन्युः, औपनिषदिकं कुचमारः, इति। ततस्ते पृथक् पृथक् स्वशास्त्राणि विरचयाञ्चक्रुः । इत्थङ्कारञ्च प्रकीर्णत्वात् सा किञ्चिदुच्चिच्छिदे। इतीयं प्रयोजकाङ्गवती सङ्क्षिप्य सर्वमर्थमल्पग्रन्थेन अष्टादशप्रकरणी प्रणीता"॥**50

एवं काव्यस्योत्पत्तिस्तु परमेश्वरादेवाङ्गीक्रियते। परमेश्वरस्य काव्यं (वेदः) न केवलं पद्यमयं नापि गद्यमयम्। तत्र तु पद्यस्य, गद्यस्य, मिश्रितस्य (गद्यपद्योभयात्मकस्येत्यर्थः) चाप्युपलब्धिर्भवति। नैतावदेव काव्यघटक-तत्त्वान्यपि मूलरूपेण तत्रोपलभ्यन्त एव।51 एवम्भूतस्यास्य काव्यस्य सौन्दर्यं परीक्षितुं येषां शास्त्राणां प्रवृत्तिः समजनि, तानि काव्यशास्त्रत्वेन प्रथितानि।

---

49 यजुर्वेदः 40/8

50 काव्यमीमांसा, पृष्ठसङ्ख्या – 3-4

51 द्रष्टव्यम् - संस्कृत साहित्य का इतिहास (उमाशङ्करशर्मा)

सर्वप्रथमन्तु "अलङ्कार"-शब्दस्य सौन्दर्यपरकत्वात्[52] "काव्यालङ्कार"-नाम्नैव कतिपयेषां ग्रन्थानां स्वरूपं पुर आगतम्। तत्र काव्यालङ्कारः काव्यसौन्दर्यं वा इत्यस्य लक्षणया काव्यसौन्दर्यपरकं शास्त्रमित्यभिप्रायमासीत्। ततः "छत्रिन्यायमाश्रित्य" केवलम् "अलङ्कारशास्त्रम्" एव नाम बहुधा स्थिरञ्जातम्।

काव्यशास्त्रेऽलङ्कारशास्त्रे वा शास्त्रशब्दस्य प्रयोगः "शासनात् शास्त्रम्" व्युत्पत्तिमिमां केवलामाधृत्य न प्रवृत्तः, अपितु "शंसनात् शास्त्रम्" इत्यप्यधिकृत्य। परं महाराजभोजदेवः स्वग्रन्थे "सरस्वतीकण्ठाभरणे" प्रथमां व्युत्पत्तिमेवाधारेणाङ्गीकृतवान्। तद्यथा-

**"यद्विधौ च निषेधे च व्युत्पत्तेरेव कारणम् ।**

**तदध्येयं विदुस्तेन लोकयात्रा प्रवर्त्तते"॥**

**"काव्यं शास्त्रेतिहासौ च काव्यशास्त्रं तथैव च।**

**काव्येतिहासः शास्त्रेतिहासस्तदपि षड्विधम्"॥**[53]

ततः कालेन काव्यस्य कृते पर्यायिभूतः साहित्यमित्ययं शब्दः सुप्रथितः सन् साम्प्रतं यावत् सर्वाधिकं प्रचलति। अस्य शब्दस्य प्रयोगस्य श्रेयो यद्यपि साहित्यदर्पणकर्त्ता विश्वनाथकविराज आप्नोति तथापि शब्दस्यास्य प्रयोगः काव्यस्य कृते तु भामहद्वारैव सर्वप्रथमं ध्वन्यते। तथा हि - "**शब्दार्थौ सहितौ काव्यम्"**[54] सहितयोश्च भावः साहित्यमिति। साहित्यस्य चाभिप्रायः –

**"साहित्यमनयोः शोभाशालितां प्रति काप्यसौ ।**

**अन्यूनातिरिक्तत्वमनोहारिण्यवस्थितिः"॥**[55]

---

[52] "सौन्दर्यमलङ्कारः" - काव्यालङ्कारसूत्राणि 1/1

[53] सरस्वतीकण्ठाभरणम् , 2/138-139

[54] काव्यालङ्कारः, 1/16

[55] वक्रोक्तिजीवितम्, 1/17

तथापि साहित्यशब्दं प्रयुञ्जान आचार्यरुय्यकः सर्वप्रथमं "साहित्यमीमांसा"-नामकं स्वग्रन्थं लिलेख परन्तु ग्रन्थस्यास्यानतिप्रकाशकत्वाद् विश्वनाथः श्रेयो लभते।

इतोऽपि प्रागस्या विद्यायाः कृते "क्रियाकल्पः" इति नाम प्रथितमासीत्। अस्य निर्देशः कामशास्त्रे ललितविस्तरे च प्राप्यते। वस्तुतः शब्दोऽयं "काव्यक्रियाकल्प"-शब्दस्य शेषमात्रम्। श्रीमद्वाल्मीकीयरामायणे लवकुशगानश्रवणाय राज्ञो रामस्य सदसि "क्रियाकल्पविदः काव्यविदश्च" वर्णनं प्राप्यते।[56] तत्रायमभिप्रायो भवति यत् काव्यरसग्रहणे समर्थः 'काव्यविद्', काव्यसौन्दर्यपरीक्षणे च समर्थः "क्रियाकल्पविद्" इति।[57] एवमनेकेषां तत्र नाम्नां चर्चाः समुपलभ्यन्ते। सर्वेषां च समावेश एतेष्वेव।

एवंविधकाव्यानां भेदनिर्णयेऽनेक आधारा अङ्गीक्रियन्ते तेष्विन्द्रियग्राहकताऽऽधारः, स्वरूपाधारः, भाषाऽऽधारः शैल्याधारश्चेत्येते मुख्याः। तत्र सर्वेषामेव भेदानामादिनिदर्शनं प्रायः वेदेषु प्राप्यते, श्रव्यस्य विशेषतः।

साहित्यशास्त्रस्य काव्यशास्त्रस्य स्थानगतविद्वन्नयानुसारं विभाजनं कुर्वताऽऽधुनिकाचार्येण रेवाप्रसादद्विवेदिना तावत् स्वीयं मतमेवं प्रादर्शि – काञ्चीधाम (आचार्यदण्ड्यादिसम्बद्धम्), शारदाधाम (आचार्यभामहवामन-मम्मटादिसम्पृक्तम्), महाकालेश्वरधाम (धनञ्जयधनिकभोजदेवादिसम्बद्धम्) विश्वेश्वरधाम (अप्पयदीक्षितपण्डितराजादिसम्पृक्तम्)[58]

एवं साहित्यशास्त्रपरिचयमात्रं यथासारमिदम्। साम्प्रतं व्याकरणसाहित्य-शास्त्रयोः समानतन्त्रत्वं नाम किमिति विचार्यते।

---

[56] "क्रियाकल्पविदश्चव तथा काव्यविदो जनान्"। - वाल्मीकीयरामायणम्, उत्तरकाण्डम् 94/7

[57] द्रष्टव्या काव्यप्रकाशभूमिका (विश्वेश्वरसिद्धान्तशिरोमणिविहिता), पृष्ठसङ्ख्या - 05

[58] संस्कृत काव्यशास्त्र का आलोचनात्मक इतिहास, पृष्ठसङ्ख्या - 424

## ग. व्याकरणसाहित्यशास्त्रयोः समानतन्त्रत्वम्

ययोश्शास्त्रयोः प्रायेण सिद्धान्तः समानोऽथांशतो भेदश्च ते परस्परं समानतन्त्रशब्देन व्यपदिश्येते। यथा न्यायो वैशेषिकं च, साङ्ख्यो योगश्च, वेदान्तो मीमांसा च। पाकपदार्थसङ्ख्यादिविषये भेदः सन्नपि मोक्षादिविषये न्यायवैशेषिकयोः सिद्धान्तः समानः। न्याये पिठरपाकः, वैशेषिके पीलुपाकश्च स्वीक्रियते। न्याये षोडश पदार्था वैशेषिके तु सप्ताङ्गीक्रियन्ते। एषोऽनयोर्भेदः किन्त्वात्मनः सगुणत्वं मनस इन्द्रियत्वम् अपवर्गस्यात्यन्तिकदुःखनिवृत्ति-रूपत्वं चेत्यादयः समाना एव सिद्धान्ताः। अतो न्यायवैशेषिकयोः समानतन्त्रता। साङ्ख्ये ईश्वरो न चर्चितः किन्तु योगे स स्वीकृतः। एवमीश्वरस्वीकारविषये भेदः सन्नपि साङ्ख्ययोगयोः शेषाः सिद्धान्ताः प्रायेण समाना एव, अतस्तयोः समानतन्त्रत्वम्।[59] मीमांसायाम् उपनिषदां कर्मकाण्डवेदस्यार्थवादत्वेन उपकारकत्वं मन्यते। वेदान्ते च कर्मकाण्डभागस्योपकारकत्वम् उपनिषदाञ्च उपकार्यत्वं स्वीक्रियते। एवमाद्यंशतो भेदेरपि मीमांसावेदान्तयोर्वेदप्रमाणकत्वेन वेदप्रामाण्ये सिद्धान्ततो भेदाभावेन च मीमांसावेदान्तयोः समानतन्त्रत्वम्।

शैवशाक्तदर्शनयोरपि समानतन्त्रत्वम्। शक्तिशिवयोः प्राधान्यविषये विमतौ सत्यामपि शेषाणां सिद्धान्तानां प्रायेण समानत्वात्। इत्थमेव विशिष्टाद्वैत-शुद्धाद्वैत-द्वैताद्वैत-द्वैतमतानामपि समानतन्त्रत्वं वक्तुं शक्यते। पारस्परिकसिद्धान्तानां भेदेऽपि जीव-ब्रह्मस्वीकाररूपैक्याद्। विशिष्टाद्वैत-सिद्धान्तेऽपि रामानुजरामानन्दवेदान्तयोः समानतन्त्रत्वम्। रामानुजवेदान्ते चिदचिद्विशिष्टो नारायण एव परं तत्त्वं, किन्तु रामानुजवेदान्ते तथाभूतो राम एव। एतावन्मात्रे भेदे सत्यपि प्रायेण सर्वत्र सिद्धान्तस्य साम्यम्। न्यायवैशेषिकादिवद् व्याकरणं साहित्यञ्च समानतन्त्रमिति वक्तुं शक्यते। तत्र चोभयोः समानतन्त्रत्वनिरूपकं साम्यं शीर्षकशोऽग्रे समुल्लिख्यते। तत्रादौ-

---

[59] "साङ्ख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः।
एकमप्यास्थितः सम्यगुभयोर्विन्दते फलम्"॥ - श्रीमद्भगवद्गीता, 5/4

**शब्दप्रयोगः –**

व्याकरणस्य प्रयोजनं शुद्धस्य धर्महेतोः शब्दस्य प्रयोगः। महाभाष्ये व्याकरणज्ञानपूर्वके शब्दप्रयोगे धर्म उक्तः – "शास्त्रपूर्वके शब्दप्रयोगे धर्मः"। अत एवोक्तम् - "एकः शब्दः सम्यग्ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके च कामधुग् भवति"[60] इति। अत्रोक्तं यत् स एव शब्दः कामान् पूरयति यः सम्यग् ज्ञातः सुप्रयुक्तश्च भवति। शब्दस्य ज्ञाने सम्यक्त्वं यथार्थत्वं वा व्याकरणेन सिद्ध्यति। व्याकरणज्ञानपूर्वकः शब्दप्रयोग इति भावः, सुप्रयुक्त इति प्रयोगे शोभनत्वं साहित्यशास्त्रं विशेषतः प्रतिपादयतीत्यर्थः। शोभनत्वं नामाह्लादभावजनकत्वं रसाभिव्यञ्जकत्वं वा। तेन रसाभिव्यञ्जकः शब्दः प्रयोज्य इति निष्कर्ष आयाति।

**"यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दान् यथावद् व्यवहारकाले।**
**सोऽनन्तमाप्नोति जयं परत्र वाग्योगविद् दुष्यति चापशब्दैः"॥[61]**

अयं मन्त्रः कथयति यद् व्यवहारकाले शब्दो यथावत् प्रयोक्तव्यः। यथावदिति शब्दज्ञाने सम्यक्त्वं प्रयोगे शोभनत्वञ्च ज्ञापयति। साहित्यशास्त्रमपि काव्यस्य प्रयोजनं व्यवहारज्ञानं मनुते। उक्तम् –

**"काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।**
**सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे"॥[62]**

व्यवहारश्च शब्देनैव भवति। व्यवहारे शब्दप्रयोगस्य शोभनत्वातिशयः कथमिति साहित्यशास्त्रं शिक्षयति। एवं कान्तासम्मितोपदेशोऽपि शब्दस्य सुप्रयोग एव। सुप्रयुक्तः शब्दो रसमानन्दं वा व्यञ्जनसुखेन कृत्ये प्रवर्तयत्यकृत्यान्निवारयति च। एवं साहित्यव्याकरणयोः प्रयोगरूपप्रयोजनस्य व्यञ्जनासिद्धान्तदिशा च प्रायेण समानत्वम्, किन्तु व्याकरणस्य प्रमुखो विषयः

---

[60] व्याकरणमहाभाष्यम्, पस्पशाह्निकम्, प्रदीपटीकावचः

[61] व्याकरणमहाभाष्यम्, पस्पशाह्निकम्,

[62] काव्यप्रकाशः, प्रथम उल्लासः, पृष्ठसङ्ख्या - 06

पदं साहित्यशास्त्रस्य तु काव्यरूपं वाक्यम्। व्याकरणस्य प्रमेयाणि पदानि साहित्यशास्त्रस्य प्रमेयो रसः।

किञ्च साहित्यशास्त्रं व्याकरणस्याप्यपूर्णतां दूरीकरोति। यथा कार्तार्थ्यम् इति पदं व्याकरणदिशा शुद्धं प्रयोगयोग्यञ्च। इदं पदं कृतार्थशब्दाद् भावे ष्यञि सिद्धम्, किन्तु व्याकरणमिदं न व्यवस्थापयति यदेतादृशस्य शब्दस्य प्रयोगः कुत्र कार्यः कुत्र च नेति, किन्तु साहित्यशास्त्रं नियमयति यदेतादृशाः श्रवणोद्वेजकाः शब्दा वीरादावेव रसे प्रयोज्या न तु शृङ्गरादौ। शृङ्गारादावेषां प्रयोगे ह्यसाधुत्वमेव।[63]

**व्यञ्जना –**

साहित्यशास्त्रस्यापि शब्दप्रयोगबोधनमेव प्रयोजनम् अत एव काव्यलक्षणे दोषाभावस्य गुणालङ्कारयोगस्य च सन्निवेशः। यथोक्तं ममटेन– **"तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि"।**[64] व्याकरणस्य विषयस्तु पदम्। तेन हि पदान्येव दोषहानगुणोपादानालङ्कारयोगरसावियोगैः संस्क्रियन्ते। शब्दे शब्दार्थयोर्वा रसाव्यञ्जकत्वाहानोपायशिक्षणं साहित्यस्य विषयः।

अथ वैयाकरणैर्व्याकरणशास्त्रे व्यञ्जनाऽपि स्वीकृता। यथोक्तं परमलघुमञ्जूषायाम्- **"मुख्यार्थबाधनिरपेक्षबोधजनको मुख्यार्थसम्बद्धा-सम्बद्धसाधारणः प्रसिद्धाप्रसिद्धार्थविषयको वक्त्रादिवैशिष्ट्यज्ञानप्रतिभा-द्युद्बुद्धः संस्कारविशेषो व्यञ्जना"।**[65]

ध्वनिवादिभिरालङ्कारिकैरपि व्यञ्जना स्वीक्रियते। वस्तुतो वैयाकरणैः स्फोटस्य यथा व्यङ्ग्यता स्वीकृता तथाऽलङ्कारिकैरपि। उक्तं मम्मटेन– **"बुधैर्वैयाकरणैः प्रधानभूतस्फोटरूपव्यङ्ग्यव्यञ्जकस्य शब्दस्य ध्वनिरिति**

---

[63] "अनङ्गमङ्गलगृहापाङ्गभङ्गितरङ्गितैः।

आलिङ्गितः स तन्वङ्ग्या कार्तार्थ्यं लभते कदा"॥ - अत्रैव, सप्तम उल्लासः, पृष्ठसङ्ख्या- 281

[64] काव्यप्रकाशः, प्रथम उल्लासः, पृष्ठसङ्ख्या- 18

[65] परमलघुमञ्जूषायाम्, पृष्ठसङ्ख्या - 77

**व्यवहारः कृतः। ततस्तन्मतानुसारिभिरन्यैरपि न्यग्भावितवाच्यव्यङ्ग्य-व्यञ्जनक्षमस्य शब्दार्थयुगलस्य"।**[66] व्यञ्जनास्वीकारादेव निपातानां द्योतकत्वं व्याकरणे स्वीकृतम्। साहित्यशास्त्रेऽपि निपातेन सह प्रकृतिप्रत्ययादीनामपि द्योतकता अभिमता।

**पदस्वरूपम् –**

व्याकरणशास्त्रे सुबन्तं तिङन्तञ्च पदमुच्यते। न्यायशास्त्रे तु शक्तं पदमिति। व्याकरणानुसारेण घटमित्येकं पदम्, किन्तु न्यायशास्त्रेऽत्र पदद्वयम्- घट इति प्रकृतिः, अम् इति प्रत्ययश्च। अलङ्कारशास्त्रे तदेव पदं मन्यते यत् सुबन्तं तिङन्तञ्च भवति। अत एव **"अत्रिलोचनसम्भूतज्योतिरुद्गमभासिभिः"**[67] इति पदे क्लिष्टत्वदोषः स्वीकृतः। पदमिह सुबन्तरूपम्। उक्तं सुप्तिङन्तं पदमिति पाणिनिमुनिप्रणीतं पदलक्षणमनादृत्य शक्तं पदमिति पदलक्षणं कुर्वतां समासे शक्त्यभावं च वदतां नैयायिकादीनां मते "अत्रिलोचन:" इत्यादौ समस्ते शक्त्यभावात् पदत्वाभावेन तस्य पदोदाहरणत्वमनुपपन्नमेव स्यात्"[68] एतेन स्पष्टं यत् पदस्वरूपविषये साहित्यव्याकरणयोर्मतमेकमेव।

**प्रवृत्तिनिमित्तस्वरूपम् -**

व्याकरणशास्त्रे चतुष्टयीशब्दानां प्रवृत्तिरिति महाभाष्यवचनेन शब्दस्य जातिगुणक्रियायदृच्छारूपाणि चत्वारि प्रवृत्तिनिमित्तानि स्वीक्रियन्ते। साहित्यशास्त्रेऽपि जात्यादीनि तान्येव प्रवृत्तिनिमित्तानि मतानि। अत एव मम्मटेन **"सङ्केतितश्चतुर्भेदो जात्यादिर्जातिरेव वा"**[69] इति चतुष्टयी शब्दानां प्रवृत्तिरिति महाभाष्यकारश्चेत्युक्तम्। प्रवृत्तिनिमित्तस्य चतुर्विधत्वादेव विरोधालङ्कारस्य दशविधत्वं सम्भवति। यथा जातेर्जात्याविरोधः, जातेर्गुणेन

---

[66] काव्यप्रकाशः, प्रथम उल्लासः, पृष्ठङ्ख्या- 24

[67] अत्रैव, सप्तम उल्लासः पृष्ठसङ्ख्या - 291

[68] अत्रैव (बालबोधिनीटीकासमन्वितः), प्रस्तावना, पृष्ठसङ्ख्या - 09

[69] अत्रैव, द्वितीय उल्लासः, पृष्ठसङ्ख्या - 43

विरोधः, जातेः क्रियया विरोधः, जातेर्द्रव्येण विरोधः, गुणस्य गुणेन विरोधः, गुणस्य क्रियया विरोधः, गुणस्य द्रव्येण विरोधः, क्रियायाः क्रियया विरोधः, क्रियाया द्रव्येण विरोधः, द्रव्येण द्रव्यस्य विरोधश्च।[70] यद्यपि काव्यप्रकाशादौ प्रवृत्तिनिमित्तविषये मीमांसकन्यायबौद्धमतानि विचारितानि, किन्तु सिद्धान्तरूपेण वैयाकरणमतमेव स्वीकृतम्। **"किं बहुना यदेव वैयाकरणानां मतं तदेवालङ्कारिकाणां मतम्"।**[71]

**शाब्दबोधः -**

पदैर्वृत्त्योपस्थापितानां पदार्थानाम् अन्वयस्य बोधः शाब्दबोध उच्यते। शाब्दबोधे कस्य पार्यन्तिकं प्राधान्यमिति विषये महान् कलकलः। व्याकरणमते क्रियाया एव मुख्यं प्राधान्यम्, मीमांसकमते भावनायाः प्राधान्यम्, न्यायमते प्रथमान्तार्थस्य प्राधान्यम्। एवं शाब्दबोधस्त्रिधा- क्रियामुख्यविशेष्यकः, भावनामुख्यविशेष्यकः, प्रथमान्तार्थमुख्यविशेष्यकश्च।

तत्र मीमांसाव्याकरणयोर्मतं प्रायेण समानमेव, किन्तु फलं धात्वर्थमात्रं व्यापारश्च तिङर्थ इति मीमांसामतम्। व्याकरणमते तु व्यापारोऽपि धात्वर्थः तिङर्थश्च कारकमिति विशेषः। भावनाया व्यापारस्य वा प्राधान्यमित्यस्मिन् विषये मीमांसाव्याकरणयोः साम्यमेव। यथा- देवदत्तश्तण्डुलं पचतीत्यत्र व्याकरणमते देवदत्ताभिन्नैकत्वावच्छिन्नकर्तृको वर्तमानकालिको विक्लित्य-नुकूलो व्यापार इति शाब्दबोधः। मीमांसामते तु तथैव बोधः, किन्तु व्यापारस्थाने भावनापदप्रयोगः। न्यायमते तु विक्लित्त्यनुकूलवर्तमान-कालिकव्यापारानुकूलकृतिमान् देवदत्त इति प्रथमान्तार्थमुख्यविशेष्यकः शाब्दबोध एवं शाब्दबोधविषये मतत्रयस्य सत्त्वेऽपि व्याकरणमतमेव साहित्यशास्त्रे सिद्धान्ततः स्वीक्रियते। काव्यप्रकाशे उत्प्रेक्षोदाहरणे

---

[70] "विरोधः सोऽविरोधेऽपि विरुद्धत्वेन यद्वचः। जातिश्चतुर्भिर्जात्याद्यैर्विरुद्धा स्याद् गुणस्त्रिभिः ।

क्रिया द्वाभ्यामपि द्रव्यं द्रव्येणैवेति ते दश"॥ - अत्रैव, दशम उल्लासः पृष्ठसङ्ख्या - 537

[71] अत्रैव (बालबोधिनीटीकासमन्वितः), प्रस्तावना, पृष्ठसङ्ख्या - 09

मृच्छकटिकस्य "**लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः। असत्पुरुषसेवेव दृष्टिर्विफलतां गता"**।।[72] इति पद्यमुदाहृतम्।

अत्र वृत्तौ काव्यप्रकाशे व्यापनादिलेपनादिरूपेण सम्भावितम् इत्यभिहितम्। अनेन वचनेन प्रतिपाद्यते यत् क्रियामुख्यविशेष्यक एव शाब्दबोधः। तमःकर्तृकं व्यापनम् अधःप्रसरणञ्च क्रमेण तत्कर्तृकलेपनत्वेन तत्कर्तृकवर्षणत्वेन च सम्भावितमित्यर्थः। तमःकर्तृकं व्यापनं तत्कर्तृकलेपनम् इव। तमःकर्तृकम् अधःप्रसरणं तत्कर्तृकवर्षणमिवेति भावः। यदि मम्मटस्य नैयायिकवत् प्रथमान्तार्थमुख्यविशेष्यकः शाब्दबोधः स्वीकृतः स्यात् तदा व्यापनादिकर्त्तरि तमसि लेपनादिकर्तृत्वं सम्भावितमित्यभिहितं स्यात्, किन्तु तथा नोक्तम्। अनेन व्याकरणानुसारित्वं स्फुटमेव। न्यायमतेन हि व्यापनादिकर्तृतमो लेपनादिकर्त्रिव इत्युक्तं भवति। न केवलेन मम्मटेनैव तथाऽभिहितम्, दण्डिनाऽप्यभितं यत् "तिङ्वाच्यः कर्तोपमानं भवितुं नार्हति। तद् हि स्वक्रियायां विशेषणीभूतम् अन्यत्रोपमेये विशेषणीभवनाय नालम्। यथा- तमो लिम्पतीत्यत्र तमो भेदसंसर्गेण तमोरूपः कर्ता तिङ्वाच्यकर्त्तरि तिङ्वाच्यः कर्त्ता च जन्यत्वसम्बन्धेन धातुवाच्यव्यापारे विशेषणम्। तेन तमोभिन्नकर्तृकलेपनमिति बोध्यः। अत्र तिङ्वाच्यः कर्त्ता धातुवाच्ये व्यापारे विशेषणत्वेनोपमानं न भवितुमर्हति। उपमानम् इत्युपमेये विशेषणमेव। एकत्र विशेषणम् अन्यत्र विशेषणत्वेनान्वेतुं नालम्। उक्तं काव्यादर्शे –

**"कर्ता यद्युपमानं स्यात् न्यग्भूतौऽसौ क्रियापदे।**

**स्वक्रियासाधनव्यग्रौ नालमन्यद् व्यपेक्षितुम्"**॥[73]

अयं प्रसङ्गः काव्यप्रकाशस्य टीकायां बालबोधिन्यामपि सविस्तरं प्रतिपादितः।[74]

---

[72] काव्यप्रकाशः, दशम उल्लासः पृष्ठसङ्ख्या - 487

[73] काव्यादर्शः, 2/30

[74] "अत्र पूर्वार्धे लिम्पतीति पदेन 'गौरयम्' इतिवत् साध्यवसानलक्षणया, उपमेयभूतं व्यापनमुपस्थितम् एवं वर्षतीति पदेनापि, उपमेयभूतमधःप्रसरणमुपस्थितम्। तथा च तमःकर्तृकाङ्गकर्मकव्यापनं

साहित्यशास्त्रस्य तावन्मुख्यप्रमेयो रसः। रसश्च साधारणीभूत-रत्यादिरेवं न तु रत्यादिमान्। यथा व्याकरणे क्रियाया एव मुख्यं प्राधान्यं तथा साहित्ये रत्यादेरेव। यथा न्याये क्रियावत एव प्राधान्यं तथा नेह रत्यादिर्मतः। अत एव रत्यादेरेव रसपदबोधकत्वं स्वीकृतम्, न तु रत्यादिर्मतः। उक्तम् -

**"कारणान्यथ कार्याणि सहकारीणि यानि च।**

**रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः॥**

**विभावा अनुभावास्तत् कथ्यन्ते व्यभिचारिणः।**

**व्यक्तः स तैर्विभावाद्यैः स्थायी भावो रसः स्मृतः"॥** [75]

तदा रत्यादिमान् रसः स्मृत इत्युक्तं स्यात्, किन्तु तथा नोक्तम्। शाब्दबोधे धर्मस्य मुख्यं प्राधान्यं न तु धर्मिण इति रसनिरूपणकारिकातः प्रतीयते।

विवेचनेनानेन स्पष्टं यद् व्याकरणवत् साहित्यशास्त्रेऽपि व्यापारमुख्यविशेष्यक एव शाब्दबोधः स्वीकृत इति।

**शब्दविशेषानौचित्यम्-**

साहित्यशास्त्रप्रमेयस्य रसस्य भङ्गो येन भवति तत् तत्त्वम् अनौचित्यमिति। इदमेव दोषशब्देन व्यपदिश्यते। तदनौचित्यं द्विधा - अन्तरङ्गं बहिरङ्गञ्च।

---

भ्रमातिशयकारकत्वसकलवस्तुमलिनीकरणत्वादिनिमित्तेन लेपनरूपतया सम्भावितम् एवं नभःकर्तृकाञ्जनकर्मकाधःप्रसरणं पूर्वोक्तेनैव निमित्तेन वर्षणरूपतया सम्भावितमित्युभयत्र क्रियास्वरूपोत्प्रेक्षैवेयम्। इयाँस्तु विशेषः - तमःकर्तृकाङ्गकर्मकव्यापनं स्वतःसम्भवि (लोकप्रसिद्धम्) नभःकर्तृकाञ्जनकर्मकाधःप्रसरणं तु कविकल्पितमितीत्युद्योतसुधासागरयोः स्पष्टम्। परे तु 'लिम्पतीव तमोऽङ्गानि' इत्यत्राचेतनस्य तमसो व्यापनरूपो विषयो लेपनत्वेन सम्भावितः, एवं 'वर्षतीवाञ्जनं नभः' इत्यत्र निरालोकप्रवृत्तस्तमसः सम्पातो नभःकर्तृकाञ्जनवर्षणत्वेन सम्भावितः, उभयत्र विषयस्यानुपादानमित्याहुः"।

- काव्यप्रकाशः (बालबोधिनीटीकासमन्वितः), पृष्ठसङ्ख्या - 587

[75] काव्यप्रकाशः, चतुर्थ उल्लासः, पृष्ठसङ्ख्या - 119

तत्राद्यं रसेऽङ्गस्य साक्षात् कारणम्। यत्र रसदोषाः प्रविष्टाः। बहिरङ्गमनौचित्यं पञ्चधा षोढा वा - विधेयाविमर्शः, प्रक्रमभेदः, क्रमभेदः, पौनरुक्त्यं, वाच्यावचनञ्च।[76]

वाच्यावचनेनावाच्यवचनमपि गृह्यते। अतोऽनौचित्यस्य षोढात्वम्। एतद्बहिरङ्गमनौचित्यं समासादिशब्दविशेषाश्रितम्। एतेषामनौचित्यानां मूलं व्याकरणशास्त्रम्। व्याकरणशास्त्रमपि एतादृगनौचित्यनिवृत्तिं सूचयति। तत्र विधेयस्य विविक्षितस्यार्थस्य प्राधान्येनानिर्देशो विधेयाविमर्शः। उक्तम्- **"विधेयः प्राधान्येन प्रतिपिपादयिषितो योऽर्थस्तस्य अविमर्शोऽननुसन्धानम् उपसर्जनीकरणात्"।**[77]

यथा प्राधान्येन विवक्षितस्य निषेधस्य समासे गुणीभावेन विधेयाविमर्शरूपम् अनौचित्यं भवति। यथा -

**"संरम्भः करिकीटमेघशकलोद्देशेन सिंहस्य यः**

**सर्वस्यैव स जातिमात्रनियतो हेवाकलेशः किल।**

**इत्याशाद्विरदक्षयाम्बुदघटाबन्धेऽप्यसंरब्धवान्**

**योऽसौ कुत्र चमत्कृतेरतिशयं यात्वम्बिकाकेसरी"॥**[78]

अत्र न संरम्भोऽम्बिकायाः केसरी इति व्यस्त एव प्रयोगः समीचीनः। संरम्भस्य निषेध एव तात्पर्यम्। अतो नञ्तत्पुरुषो न कर्त्तव्यः। नञर्थाभावस्योत्तरपदार्थे विशेषणत्वेन विवक्षितं प्राधान्यं न प्रतीयते। एवं केसरिणि महत्त्वम् अम्बिकासम्बन्धेनैव विवक्षितम्। अम्बिकायाः प्राधान्येन विवक्षा। अम्बिकासम्बन्धाभावे केसरिणि न तथा महत्त्वम्। अम्बिकाकेसरीति तत्पुरुषसमासेऽम्बिकायाः उत्तरपदार्थविशेषणत्वेन वैवक्षिकं प्राधान्यं न प्रतीयते। अयं शब्दशक्तेः स्वभावो यद् व्यस्तपदेन विवक्षितप्राधान्यं गम्यते, न

[76] व्यक्तिविवेकः, पृष्ठसङ्ख्या - 436

[77] व्यक्तिविवेकः, पृष्ठसङ्ख्या - 18

[78] अत्रैव, पृष्ठसङ्ख्या - 184

तु समस्तपदेन। अतोऽत्र विधेयस्य प्राधान्येन प्रतिपादयितुमिष्टस्याभावस्य अम्बिकारूपार्थस्य च समासे गुणाभावेन विवक्षितप्राधान्याप्रतीत्या विधेयाविमर्शः। यस्यार्थस्य प्राधान्येन विवक्षा तस्य समासाभावो व्याकरणसम्मतः। यथा वृषल्या दास्याश्च सम्बन्धेनैव कामुके पुत्रे च निन्द्यतायाः प्रतिपत्तेर्वृषल्या दास्याश्च प्राधान्येन विवक्षितायाः समासेन प्रत्ययाभावात् समासाभावः **"षष्ठ्या आक्रोशे"**[79] इति सूत्रेण भगवता पाणिनिना षष्ठ्या अलुक् शिष्टः। अत्र समासस्य प्रयोजनमेकपदीभावमात्रम्। विभक्तेरलुका ध्वनितं यद् विभक्तिश्रवण एव विवक्षितार्थस्य प्राधान्यं गम्यते, अतो विशेषणीभूतोऽप्यर्थो व्यस्तनैव पदेन प्रतिपाद्यो न तु समासेन। पदार्थयोर्गुणप्रधानभावो द्विधा- वास्तवो वैवक्षिकश्च। यथा अम्बिकाकेसरीत्यत्र अम्बिकायाः केसरिणं प्रति स्वस्वामिभावेन वास्तवं विशेषणत्वम्, किन्तु वैवक्षिकं प्राधान्यं **"समर्थः पदविधिः"**[80] इति सूत्रं वैवक्षिकगुणप्राधान-भावस्थलेऽपि समासाभावस्य बोधकम्। एवमलुक्समासेन विवक्षितस्यार्थस्य समासेन बोधने दोष इति सूच्यते। इत्थं विभक्तेरलुका गम्यते। यद्विधेयाविमर्शो यथा साहित्ये तथा व्याकरणेऽपि।

साहित्यशास्त्रे प्रक्रमभेदनामानौचित्यं स्वीकृतम्। प्रक्रमस्य प्रारम्भस्य भेदोऽन्यथाकरणं प्रक्रमभेदः। यया प्रकृत्या येन प्रत्ययेन येन पदेन शब्देनार्थेन क्रमेण वस्तुना वा प्रक्रमः तेनैवोपसंहारः समुचितः। एवं प्रक्रमभेदः सप्तधा- प्रकृतिप्रत्ययपदशब्दार्थक्रमवस्तुप्रक्रमभेदाः।[81] तत्रैकः प्रकृतिप्रक्रमभेदो यथा-

**"सततमनभिभाषणं मया ते, परिपणितं भवतीमनानयन्त्या।**

**गतधृतिरवलम्बितुं बतासूननलमनालपनादहं भवत्या"॥**[82]

[79] अष्टाध्यायीसूत्रसङ्ख्या – 6/3/21

[80] अत्रैव – 2/1/1

[81] व्यक्तिविवेकः, द्वितीयो विमर्शः, पृष्ठसङ्ख्या - 285

[82] व्यक्तिविवेकविमर्शः (अत्रोद्धृतम्), पृष्ठसङ्ख्या - 87

धातुप्रातिपदिकरूपप्रकृत्योर्मध्ये धातुप्रकृतिप्रक्रमभेदोऽत्र। अत्र हि वचनरूपार्थः भाष्-धातुना वक्तुं प्रक्रान्तः, किन्तु लब्धातुनोपसंहृतः। यत्र प्रक्रमोपसंहारयोरर्थैकत्वं विवक्षितं तत्र धात्वादिभेदो न समीचीनः। शब्दस्यापि शाब्दबोधे विशेषणत्वेन भानस्य व्याकरणशास्त्रे सम्मततया शब्दभेदे सति शाब्दबोधेऽपि भेदापत्तिः। अयं प्रक्रमभेदोऽपि व्याकरणसम्मतः। **"स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च"**[83] इत्यादिसूत्रेण स्वाम्यादियोगे षष्ठी सप्तमी चानुशिष्टा, तेन गवां गोषु वा स्वामीति यथा साधु तथा "गोषु चाश्वानां च स्वामी" इत्यपि साधु भवेत्, किन्तु भाष्यकारोऽस्य साधुत्वं न स्वीकरोति। असौ प्रतिपादयति यद् यदि षष्ठ्या निर्देशः प्रारब्धस्तदा षष्ठ्यैव निर्वाहः, यदा तु सप्तम्या निर्देशः प्रारब्धस्तदा सप्तम्यैव निर्वाहः कर्त्तव्यः। यथा गवाश्वाश्वानाम् इति। अनेन स्फुटं यद् येन विभक्त्यादिशब्देन प्रारम्भस्तेनैवोपसंहारश्च कर्त्तव्य इति। अन्यथाकरणे तु प्रक्रमभेदः।

**"एकस्या आकृतेश्चरितः प्रयोगो द्वितीयस्यास्तृतीयस्याश्च न भवति। तद्यथा गोषु स्वाम्यश्वेषु चेति। नहि भवति – गोषु चाश्वानां च स्वामीति"।**[84]

प्रक्रमभेदस्य लोकवेदमूलत्वमपि कैय्यटेन प्रतिपादितम्।[85] यत्र सर्वनामादिपदानां वाक्ये निर्धारितः क्रमोऽन्यथा क्रियते तत्र क्रमभेदाभिधानमनौचित्यं भवति। यथैकमुदाहरणम् -

---

[83] अष्टाध्यायीसूत्रसङ्ख्या – 2/3/39

[84] व्याकरणमहाभाष्यम्, (अष्टाध्यायीसूत्रसङ्ख्या - 3/1/40 इत्यत्र) पृष्ठसङ्ख्या - 121

[85] "एकस्या इति। लोकवेदप्रसिद्धोऽयं न्यायः। तथाहि 'खादिरे बध्नाति, पालाशे बध्नाति' इत्यादौ विकल्पितेषु साधनेषु येनैव साधनेनोपक्रान्ता क्रिया तेनैव निर्वाह्यते। तत्र यदि कदाचित् खादिरस्य भ्रेषो भवति तदा तत्सदृशो बर्बुरः सादृश्यात् खादिरबुद्ध्या प्रतिनिधीयते, न तु पलाशः प्रतिगृह्यते। साधनभेदेन क्रियान्यत्वादुपक्रान्तक्रियाऽनिर्वाहप्रसङ्गात्। लोकेऽपि यदा स्वस्वामिभावप्रतिपादनाय गवां स्वामीति षष्ठ्युपक्रम्यते तदा 'अश्वानाञ्चे'त्यत्रापि तत्प्रतिपादनाय सैव निर्वाह्यते। अन्यथा' अश्वेषु च' इत्युक्तेऽधिकरणप्रत्तिपत्तिरपि स्यादश्वेषु च तिष्ठतीति। तस्माद् योऽर्थो यया प्रतिपादयितुमुपक्रान्तस्तयैवासौ

**"तीर्थे तदीये गजसेतुबन्धात् प्रतीपगामुत्तरतोऽस्य गङ्गाम्।**

**अयत्नबालव्यजनीबभूवुर्हंसाः नभोलङ्घनलोलपक्षा:"॥**[86]

पूर्वनिर्दिष्टस्यैवार्थस्य बोधनाय सर्वनामपदस्य पश्चात् प्रयोग इति क्रमो वर्त्तते, किन्त्वत्र 'रघुवंशश्लोके तदीये' इत्यत्र तत्पदेन गङ्गारूपार्थः बोधयितुमिष्टः, किन्तु स एतत्सर्वनामपदप्रयोगात् प्राङ्न निर्दिष्टः, अतः क्रमभेदः। एवं चादीनां प्रयोगस्यापि क्रमो निर्धारितः। यस्यार्थस्य समुच्चयादिरभीष्टस्तद्बोधकपदान्तरमेव चादीनां प्रयोगः। यथा रामश्यामयोः समुच्चये प्रतिपिपादयिष्यते रामः श्यामो गच्छतश्चेति प्रयोगः समीचीनः, न तु रामः श्यामः गच्छतश्च इति। तथा सति अविवक्षितायाः पठनादिक्रियाया एव समुच्चयो बोध्यः स्यात्, न तु नामपदबोध्ययोरर्थयोः।

क्रमभेदोऽपि व्याकरणशास्त्रसम्मतः। **"कृञ्चानुप्रयुज्यते लिटि"**[87] इति सूत्रे अनुशब्दप्रयोगोऽस्य मूलम्। अनुशब्देन ज्ञाप्यते यदव्यवधानेनैव कृञः प्रयोगः कर्त्तव्यः, न तु पूर्वत्वेन व्यवहितत्वेन च। यथा- ईहां देवदत्तः चक्रे, चक्रे ईहां देवदत्त इत्यपितु ईहाञ्चक्रे देवदत्त इत्ययं प्रयोगः साधुः। अनुशब्दोऽत्र चादीनामपि शब्दानां प्रयोगक्रमस्योपलक्षणम्। इदं सर्वं **"विपर्यासनिवृत्त्यर्थं तर्हि कृञोऽनुप्रयोगवचनं क्रियते। ईहाञ्चक्रे। चक्रे ईहां मा भूत्। व्यवहितनिवृत्यर्थं च कृञोऽनुप्रयोगवचनं क्रियते। अन्वेव चानुप्रयोगो यथा स्यात्। ईहाञ्चक्रे। व्यवहितस्य मा भूत्। ईहां देवदत्तश्चक्रे इति"।**[88]

तथा "कृञ्चानुप्रयुज्यते" इत्यत्रानुप्रयोगस्यानुशब्दपर्यालोचनया व्यवहितप्रयोगं 'तं पातयां प्रथममास' इत्यादौ निषेधता, चादीनां च 'नहि

---

निर्वाह्यो न त्वन्यया शब्दाकृत्येत्यर्थः। एवं हि प्रतिपत्तिलाघवं भवति"। - व्याकरणमहाभाष्यम्, (अष्टादशसूत्रसङ्ख्या - 3/1/40 ), पृष्ठसङ्ख्या - 121

[86] रघुवंशम् 16/33

[87] अष्टाध्यायीसूत्रसङ्ख्या – 3/1/40

[88] व्याकरणमहाभाष्यम्, (3/1/40 सूत्रोपरि), पृष्ठसङ्ख्या - 122

भवति च वृक्षः' इत्यादिना प्रयोगनियमव्याख्यानेन द्योतकत्वं कथयताऽस्थानप्रयोगलक्षणः क्रमभेदः कटाक्षितः।[89] शब्दस्यार्थस्य वा पुनर्वचनं पौनरुक्त्यम्। एवं पौनरुक्त्यं द्विधा- शाब्दमार्थञ्च। सामान्यनेदं पौनरुक्त्यम्- प्रकृतिप्रत्ययपदवाक्यपौनारूप्यात् पञ्चधा।

यथा- "**अश्वीयसंहृतिभिरुद्धतमुद्धुराभिर्भूरेणुजालमखिलं वियदाततान**"।[90] अत्राश्वीयसंहृतिरिति भिसं प्रति प्रातिपदिकत्वेन प्रकृतिः, तत्र पुनरुक्तिरश्वीयरूपप्रकृत्यंशस्यार्थोऽश्वसमूहः, "**केशाश्वाभ्यां यञ्छौ**"[91] सूत्रेणैतेन समूहार्थे छप्रत्ययः। संहृतिशब्दस्यापि समूह एवार्थ इत्येवं प्रकृत्यर्थस्य समूहस्य पौनरुक्त्यम्। इदमपि व्याकरणसम्मतम्। यत्र बहुव्रीहिणैव विवक्षितार्थलाभस्तत्र कर्मधारयं कृत्वा ततो मत्वर्थीयप्रत्ययविधानं न समीचीनम् इति **"न कर्मधारयान्मत्वर्थीयः बहुव्रीहिश्चेत् तदर्थप्रतिपत्तिकरः"** इति वार्त्तिकाशयः। यथा- पीतञ्चेदमम्बरं पीताम्बरम्, तदस्यास्तीति पीताम्बरवान् इति प्रयोगो न भवति, तथा सति कर्मधारयसमासमत्वर्थीय-प्रत्ययरूपवृत्तिद्वयं स्वीकरणीयं भवति। पीताम्बरं यस्येति बहुब्रीहौ तु मत्वर्थीयो गतार्थ इति न वृत्तिद्वयाश्रयरूपं गौरवम्। एतेन सूचितं यत् पीताम्बरवान् इति कथने पौनरुक्त्यं भवति। बहुव्रीहिमत्वर्थीययो-रेकाश्रयत्वात्। उक्तं रुय्यकेन व्यक्तिविवेकव्याख्याने तथा कर्मधारय-मत्वर्थीयाभ्यामेव बहुव्रीहिर्लघुत्वात् स्यादिति वृत्तिलाघवं चिन्तयता कात्यायनेन पौनरुक्त्यमपि प्रकाशितमेव।[92]

वाच्यस्यावश्यवक्तव्यस्यावचनम् अकथनं वाच्यावचनमिति। यथा प्रकृतपद्ये-

---

[89] व्यक्तिविवेकः, पृष्ठसङ्ख्या - 180

[90] अत्रैव, पृष्ठसङ्ख्या - 103

[91] अष्टाध्यायीसूत्रसङ्ख्या – 4/2/48

[92] व्यक्तिविवेकः, पृष्ठसङ्ख्या - 180

**"नवजलधरः सन्नद्धोऽयं न च दृप्तनिशाचरः**

**सुरधनुरिदं दूराकृष्टं न तस्य शरासनम्।**

**अयमपि पटुर्धारासारो न बाणपरम्परा**

**कनकनिकषस्निग्धा विद्युत् प्रिया न ममोर्वशी"॥**[93]

अत्रेदमा अयमिति रूपेण नवजलधर इदमिति रूपेण सुरधनुः, अयमिति रूपेण च धारासार इति त्रयोऽपि पदार्थाः परामृष्टाः। तद्वद् विद्युदपि परामृश्याऽऽसीत्, किन्तु तदर्थं द्वयमिति पदं न प्रयुक्तमित्यदमिति पदेन वाच्याया विद्युतो वचनाद् वाच्यावचनम्।

इदमपि व्याकरणशास्त्रमूलकम्। कल्पबादयः प्रत्ययाः सदृशे भवन्ति यथा चन्द्रकल्पं मुखमित्यत्र कल्पप् चन्द्रमुखसादृश्ये न तु मुखे चन्द्रत्वस्य सम्भावनायाम्। भाष्यकारेणात्रोपमा व्यवस्थापिता रूपकं निराकृतञ्च। अनेन सूचितं यत् कल्पबोपमा एव वाच्या न तु रूपकं वाच्यम्। कल्पबा उपमाया अवाच्यत्वे वाच्यावचनरूपदोषः। अनेनैवावाच्यवचनम् अपि ध्वनितम्। रूपकाश्रयेण ह्यन्यवाच्यावचनम्। तथोक्तम्- "**तथा ईषदसमाप्तौ**[94] **इत्यत्र प्रतिज्ञानसमधिगम्यं सूत्रकारोक्तं रूपकलक्षणमर्थं दूषयता प्रकृत्यर्थसदृशे कल्पबादिविधानमिति प्रतिज्ञानसमधिगम्यार्थभूतामुपमां व्यवस्थापयतोपमा-श्रयेण वाच्यावचनमपि द्योतितमेव"।**[95]

**"एतन्मन्दविपक्वतिन्दुकफलश्यामोदरापाण्डुर-**

**प्रान्तं हन्त ! पुलिन्दसुन्दरकरस्पर्शक्षमं लक्ष्यते।**

**तत् पल्लीपतिपुत्रि ! कुञ्जरकुलं कुम्भाभयाभ्यर्थना-**

**दीनं त्वामनुनाथते कुचयुगं पत्रावृतं मा कृथाः"॥**[96]

---

[93] काव्यप्रकाशः, सप्तम उल्लासः, पृष्ठसङ्ख्या - 294

[94] अष्टाध्यायीसूत्रसङ्ख्या – 5/3/67

[95] व्यक्तिविवेकविमर्शः, पृष्ठसङ्ख्या - 180

[96] काव्यप्रकाशः, सप्तम उल्लासः, पृष्ठसङ्ख्या - 282

इत्थं साहित्यशास्त्रे विवेचनीयस्य बहिरङ्गस्य शब्दविशेषाश्रितस्य अनौचित्यं यथा व्याकरणेन ध्वनितं तथा साहित्यशास्त्रेऽपि स्वीकृतम्। एवं साम्यनिरूपणपक्षोऽनयोर्व्याकरणसाहित्यशास्त्ररूपसमानतन्त्रयोः साधयितुं शक्यते। सम्प्रत्यनयोश्शास्त्रयोः सिद्धान्तगतं वैषम्यमाधारीकृत्य शीर्षकशो विलिख्यते।

**सिद्धान्तवैषम्यम् –**

पदमात्रसाधुत्वं हि व्याकरणस्य विषयः। एतच्च पदं चतुर्धा पञ्चधा वेति प्रथितिः। तत्र चतुर्णाम्पदानाम् अर्थान्नामाख्यातोपसर्गनिपातानाम्बहुप्राक्त एव जायमानोऽस्त्युल्लेखः।[97] कर्मप्रवचनीयानामपि योगे सति पञ्चमत्वमपि पदप्रकारसन्दर्भे निगद्यते व्यक्तिविवेकादिग्रन्थेषु।[98] यद्यपि दार्शनिकानां वैयाकरणानाम्मते तु पदलक्षणसारतत्त्वम्-

**"चतुर्भिः पञ्चभिर्व्वा प्रायेणान्तरितः क्षणैः।**

**पूर्ववर्णात्परो वर्णः पदत्वम्प्रतिपद्यते"॥**[99]

एवम्भूतमेव प्रतिपाद्यते परमिह प्रक्रियापथमनुसृत्य प्रयुक्तानां समवाप्तानाञ्च चतुर्णाम्पञ्चानां वा पदानामेवाधारं स्वीकृत्य वचो विन्यस्यते। एवम्भूतानां नामाख्यातोपसर्गनिपातानाञ्चतुर्णां नामाख्यातोपसर्गनिपातकर्म-प्रवचनीयानाम्पञ्चानां वा पदानां मूलं कुत्रेति विचारसन्दर्भे, पाणिनिना यद्यपि चतुर्भिस्सूत्रैर्निर्दिष्टानि,[100] चत्वारि पदानि न च तान्येवंविधानि, अपरमपि तथ्यं यत् प्रक्रियासरणिं विहाय प्रयोगदशायां दृश्यते पदद्वैविध्यस्यैव प्रसारः, स च "**सुप्तिङन्तं पदम्**"[101] इति सूत्रापेक्ष एव। तत्र च सुबन्तरूपं पदमपि

---

97 "तद्यान्येतानि चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च"।

निरुक्तम्, प्रथमाध्यायस्य प्रथमः पादः, पृष्ठसङ्ख्या – 02

98 "तत्र पदं पञ्चधा, नामाख्यातोपसर्गनिपातकर्मप्रवचनीयभेदात्"। - व्यक्तिविवेकविमर्शः, पृष्ठसङ्ख्या - 62

99 पदवाक्यरत्नाकरः, पृष्ठसङ्ख्या - 26

100 "सुप्तिङन्तं पदम्," "नः क्ये" "सिति च" "स्वादिष्वसर्वनामस्थाने"

- अष्टाध्यायीसूत्रसङ्ख्याः क्रमशः 1/4/14,15,16,17

101 अष्टाध्यायीसूत्रसङ्ख्या -1/4/14 , - सिद्धान्तकौमुदी, पृष्ठसङ्ख्या- 09

द्विविधम्- समस्तासमस्तभेदात्। समस्तपदं हि सङ्ख्यामालक्ष्य पञ्चसमास-समानेव भेदान् समाविशति। तत्राप्यव्ययीभावपरं पदम् अव्ययम् इतरञ्चानव्ययम् इत्येवं स्वीकृत्य तत्रापि द्विविधत्वं शक्यत एव समानेतुम्। अथासमस्ते पदभेदे स्वीकृते सत्येव नामाख्यातोपसर्गनिपातकर्मप्रवचनीयानि समादाय चतुर्धा पञ्चधा वा स्वरूपं मन्तुं शक्यत इति विशेषः। यद्यपि चतुर्धा पदोल्लेखो न हि पाणिनिना प्रयुक्त इत्येवम्भूतायाश्शङ्कायाः समाधानमाप्यते **"यथोत्तरं मुनीनां प्रामाण्यम्"**[102] इति वचनावलोकमवाप्य, यतः पाणिनीयव्याकरणपरम्परायां त्रिमुनीनां वचनविचारसन्दर्भे प्रामाण्यम् उत्तरोत्तरत एव स्वीक्रियते। तस्माद्धि महाभाष्यकारमतानुसारेण तदतिरिक्तानामपि विचारणाऽनुसारेण चेह पदानाञ्चातुर्विध्यम्[103] इति सुस्थितम्।

अथ रसाभिव्यक्तिसमर्थवाक्यसाधुत्वं साहित्यशास्त्रस्य विषयः। रसाभिव्यक्तिसामर्थ्यं काव्यवाक्यस्य साधुत्वम् तद्दोषहानेन गुणोपादानेन अलङ्कारयोगेन च भवति। एवं दोषा गुणा अलङ्काराश्च साहित्यशास्त्रस्य प्रमेयाः। इमे रसार्थमिति रसोऽन्तिमः प्रमेयः। अत एव रसस्वरूपस्य विस्तरेण प्रतिपाद्यम्। एवं साहित्यशास्त्रस्य सङ्कलनया चत्वारः प्रमेयाः। काव्यं हि रसाभिव्यञ्जकं वाक्यम्, अत एव **"वाक्यं रसात्मकं काव्यम्",**[104] "**रमणीयार्थप्रतिपादकः शब्दः काव्यम्"**[105] इत्याद्यभिहितम्। अत्र मतेऽर्थो विशेषणत्वेन निवेशितः। अपरेषाम्मते शब्दार्थयोः रसाभिव्यञ्जकत्वस्य समानत्वेन काव्यलक्षणे गुणप्रधानभावेन न सन्निवेशोऽपितु द्वन्द्वे प्राधान्येनैव। यथा– "**तददोषौ शब्दौ सगुणौ"**[106] अथ "**यो दोषः शब्दपरिवृत्यसहः स**

---

[102] "न बहुब्रीहौ" -अष्टाध्यायीसूत्रसङ्ख्या -1/1/29 इत्यत्र भट्टोजिदीक्षितवचनम्" - अत्रैव, पृष्ठसङ्ख्या-52

[103] "नामशब्देन सुबन्तम्, नमति आख्यातार्थं प्रति विशेषणीभवतीति व्युत्पत्तेः। आख्यातम् - तिङन्तम्। उपसर्गनिपातयोः पृथगुपादानं गोबलीवर्दन्यायेन"। - पाणिनीयव्याकरणमहाभाष्यम् (प्रथमं खण्डम्), पस्पशाह्निकम्, पृष्ठसङ्ख्या - 41

[104] साहित्यदर्पणः, प्रथमः परिच्छेदः, पृष्ठसङ्ख्या - 23

[105] रसगङ्गाधरः, प्रथममाननम्, पृष्ठसङ्ख्या - 10

[106] काव्यप्रकाशः, प्रथम उल्लासः, पृष्ठसङ्ख्या - 18

**शब्ददोष एव। यश्च पदार्थान्वयप्रतीतिपूर्वबोध्य: सोऽपि शब्ददोष:। यश्चार्थप्रतीत्यनन्तरं बोध्य: सोऽर्थाश्रय इति"।**107

भरतादिमते तावद् दोषा गुणाश्च दश। वामने मते तु विंशतिः - दशशब्दगुणा दशार्थगुणाश्च। अलङ्कारा अपि द्विधा- शब्दालङ्काराः अर्थालङ्काराश्च। यद्यप्यलङ्कारा गुणाश्च प्राचाम्मते शब्दार्थाश्रितास्तथापि गुणालङ्कारयोर्भेदः। गुणाश्शब्दार्थयोर्नित्या धर्मा अलङ्काराश्च तदतिशयहेतवः। रसश्च रत्याद्यभिधानासाधारणीकृता संवित्। एवमेते साहित्यशास्त्रे वर्ण्यन्ते।

ध्वनिसिद्धान्ते माधुर्यौजःप्रसादाख्यास्त्रय एव रसमात्रधर्मा गुणाः। तत्र चित्तद्रुतिजनकत्वं माधुर्यम्, चित्तदीप्तिजनकत्वम् ओजः, चित्तविकास-जनकत्वञ्च रसगतं प्रसादः। एतन्मम्मटादिमतम्, विश्वनाथमते द्रुत्यादिरूप एव गुणः। एषां गुणानां व्यञ्जकाश्च शब्दविशेषा अर्थविशेषाश्च। यद्यपि गुणा रसधर्मास्तथापि व्यञ्जकत्वसम्बन्धेनोपचाराच्छब्दार्थयोरपि मन्यन्ते। अलङ्काराश्च साक्षाच्छब्दधर्माः, शब्दार्थद्वारा जातुचिद् रसोपकारकाश्च। एवं ध्वनिसिद्धान्ते गुणालङ्कारयोर्भेदः।

इत्थं वक्तुं शक्यते यद् रसवृत्तित्वे सति रसाव्यभिचरितस्थितिकत्वे सति च नित्यं साक्षाच्च रसोपकारकत्वं गुणत्वम्। अलङ्कारत्वञ्च शब्दार्थवृत्तित्वे सति रसव्यभिचरितस्थितिकत्वे सति शब्दार्थद्वारा कदाचिद् रसोपकारकत्वम्।

भोजेनापि साहित्यशास्त्रस्य शुद्धाः प्रमेयाः दोषगुणालङ्काररसा एवोक्ताः। भामहेन सहितौ शब्दार्थौ काव्यमित्युक्तम्। तत्र शब्दार्थयोः साहित्यं नाम सम्बन्ध उक्तः। अतः शब्दोऽर्थः सम्बन्धश्च द्वादशधा भवति।

तत्र शब्दो यथा - प्रकृतिः, प्रत्ययः, उपस्कारः, उपपदम्, प्रातिपदिकम्, विभक्तिः, उपसर्जनम्, समासः, पदम्, वाक्यम्, प्रकरणम्, प्रबन्धश्च।108

---

107 साहित्यदर्पण:, सप्तम: परिच्छेद:, पृष्ठसङ्ख्या - 609

108 शृङ्गारप्रकाशः, प्रथमः प्रकाशः, पृष्ठसङ्ख्या - 03

अर्थो यथा- क्रिया, कालः, कारकम्, पुरुषः, उपाधिः, प्रधानम्, उपस्कारार्थः, प्रातिपदिकार्थः, विभक्त्यर्थः, वृत्त्यर्थः, पदार्थः, वाक्यार्थश्च।[109]

सम्बन्धो यथा- अभिधा, विवक्षा, तात्पर्यम्, प्रविभागः, व्यपेक्षा, सामर्थ्यम्, अन्वयः, एकार्थीभावः, दोषहानम्, गुणोपादानम्, अलङ्कारयोगः, रसावियोगश्च।[110]

तत्र पूर्वेऽष्टौ शब्दाः तदर्थाः सम्बन्धाश्च व्याकरणशास्त्रस्यापि प्रमेयाः, किन्तु दोष-हानगुणोपादानालङ्कारयोगरसावियोगरूपाः सम्बन्धाः तदाश्रयाः शब्दार्थाश्च साहित्यशास्त्रस्यैव शुद्धप्रमेयत्वेन बोधिताः।

**व्याकरणस्य पूर्णतायाः सम्पादनम् -**

व्याकरणस्य विषयः पदं तद्द्वारा वाक्यञ्च। वाक्ये पदान्यपोद्धारदिशा पृथक्कृत्वा व्याकरणेन संस्क्रियन्ते। व्याकरणसंस्कृतान्यपि पदानि क्वचित् प्रयोगयोग्यानि क्वचिच्चाप्रयोगयोग्यानि भवन्ति। संस्कृतपदानां प्रकरणविषये प्रयोगयोग्यता अप्रयोगयोग्यता कुत्र भवतीति व्याकरणेन ज्ञातुं न शक्यते। अस्य ज्ञानं साहित्यशास्त्रेणैव सम्भवम्। यथा श्रुतिकट्वश्लीलरवादिपदानां शृङ्गारादौ अप्रयोगयोग्यता, वीरादौ च प्रयोगयोग्यतेति विशिष्य साहित्य-शास्त्रज्ञानं विना ज्ञातुं न शक्यते। तत्र श्रुतिकटुशब्दस्य शृङ्गारेऽप्रयोगयोग्यता-

**"अनङ्गमङ्गलगृहापाङ्गभङ्गितरङ्गितैः।**

**आलिङ्गितः स तन्वङ्ग्या कार्तार्थ्यं लभते कदा"॥**[111]

साधन-वायु-विनाशशब्दानाम् अश्लीलानाम् अप्रयोगयोग्यता। यथा-

---

[109] अत्रैव

[110] अत्रैव

[111] काव्यप्रकाशः, सप्तम उल्लासः, पृष्ठसङ्ख्या - 281

**"साधनं सुमहद्यस्य यन्नान्यस्य विलोक्यते।**

**तस्य धीशालिनः कोऽन्यः सहेतारालितां भ्रूवम्"॥**

**"लीलातामरसाहतोऽन्यवनितानिःशकदष्टाधरः**

**कश्चित्केसरदूषितेक्षण इव व्यामील्य नेत्रे स्थितः।**

**मुग्धा कुड्मलिताननेन ददती वायुं स्थिता तत्र सा**

**भ्रान्त्या धूर्ततयाऽथ वा नतिमृते तेनानिशं चुम्बिता "।।**

**"मृदुपवनविभिन्नो मत्प्रियाया विनाशाद्**

**घनरुचिरकलापो निःसपत्नोऽद्य जातः।**

**रतिविगलितबन्धे केशपाशे सुकेश्याः**

**सति कुसुमसनाथे कं हरेदेष बर्ही"॥**[112]

अत्र साधनवायुविनाशशब्दाः अमङ्गलव्यञ्जकत्वेन न प्रयोज्या इति साहित्यशास्त्रेऽश्लीलदोषत्वेनेमे परिगण्यन्ते। एवं रवशब्दः मण्डूकरव एव प्रयोज्यो न सिंहनादे। यथोक्तं काव्यप्रकाशे-

**"मञ्जीरादिषु रणितप्रायं पक्षिषु च कूजितप्रभृति।**

**स्तनितभणितादि सुरते मेघादिषु गर्जितप्रमुखम्॥**

**इति प्रसिद्धिमतिक्रान्तम्।**

**यथा महाप्रलयमारुतक्षुभितपुष्करावर्तक-**

**प्रचण्डघनगर्जितप्रतिरुतानुकारीमुहुः।**

**रवःश्रवणभैरवः स्थगितरोदसीकन्दरः**

**कुतोऽद्य समरोदधेरयमभूतपूर्वः पुरः॥**

**अत्र रवो मण्डूकादिषु प्रसिद्धो न तूक्तविशेषे सिंहनादे"।**[113]

---

[112] अत्रैव, सप्तम उल्लासः, पृष्ठसङ्ख्या - 288

[113] अत्रैव, पृष्ठसङ्ख्या - 341

समस्तपदानां प्रयोगः प्रायेण तत्रैव कर्त्तव्यः क्रोधादिरूपोऽर्थः। क्रोधाद्यभावे सुदीर्घसमासपदप्रयोगेऽस्थानस्थसमासदोषः स्वीकृतः। यथोक्तम्- अस्थानसमासो यथा -

**"अद्यापि स्तनशैलदुर्गविषमे सीमन्तिनीनां हृदि**
**स्थातुं वाञ्छति मान एष धिगिति क्रोधादिवालोहितः।**
**प्रोद्यद्दूरतरप्रसारितकरः कर्षत्यसौ तत्क्षणात्**
**फुल्लत्कैरवकोशनिःसरदलिश्रेणीकृपाणं शशी"॥**[114]

व्याकरणेन **"हशि च"**[115] इति सूत्रेणोत्वविशिष्टस्य पदस्य **"हलि सर्वेषाम्"**[116] इति यलोपविशिष्टस्य च पदस्य प्रयोगः साधुरिति सामान्येन उच्यते, किन्त्वेतादृशानां पदानां भूयस्त्वेन प्रयोगः साहित्यशास्त्रे निषिध्यते। एतादृशस्थले उपहृतलुप्तविसर्गदोषः स्वीकृतः। यथा –

**"धीरो विनीतो निपुणो वराकारो नृपोऽत्र सः।**
**यस्य भृत्या बलोत्सिक्ता भक्ता बुद्धिप्रभाविताः"॥**[117]

व्याकरणशास्त्रानुसारेण वाक्ये संहिताया विकल्पेन सन्धिरपि विकल्पेनोक्तः। तथा हि प्रथितिः– **"संहितैकपदे नित्या नित्या धातूपसर्गयोः। नित्या समासे वाक्ये तु सा विवक्षामपेक्षते"॥** एवमेव प्रगृह्यसञ्ज्ञानिमित्तकः सन्ध्यभावो व्याकरणसम्मतः। **"प्लुतप्रगृह्या अचि नित्यम्"**[118] इति ह्युक्तं किन्तु प्रगृह्यनिमित्तकसन्ध्यभावविशिष्टानां पदानां बाहुल्येन प्रयोगः साहित्यशास्त्रे निषिद्धः। एवमेवाश्लीलार्थद्योतकत्वेऽर्थनिर्णये कष्टत्वे च साहित्यशास्त्रे

---

[114] अत्रैव:, सप्तम उल्लासः, पृष्ठसङ्ख्या - 338

[115] अष्टाध्यायीसूत्रसङ्ख्या – 6/1/114

[116] अत्रैव – 8/3/22

[117] काव्यप्रकाशः, सप्तम उल्लासः, पृष्ठसङ्ख्या - 321

[118] अष्टाध्यायीसूत्रसङ्ख्या – 6/1/125

शब्दशास्त्रसम्मतसन्धेरभाव एवाभिप्रेतः। एतादृशस्थले साहित्यशास्त्रे विसन्धित्वदोषोऽङ्गीकृतः। "**तथोक्तम् - विसन्धिसन्धेर्वैरूप्यं विश्लेषोऽश्लीलत्वं कष्टत्वं च। तत्राद्यं यथा-**

**राजन्! विभान्ति भवतश्चरितानि तानि**

**इन्दोर्द्युतिं दधति यानि रसातलेऽन्तः।**

**धीदोर्बले अतितते उचितानुवृत्ती**

**आतन्वती विजयसम्पदमेत्य भातः"॥**[119]

अत्र पूर्वार्द्धे "तानि इन्दोः" इत्यत्र वाक्ये संहिताया अविवक्षया व्याकरणसम्मतोऽपि यण्सन्धेरभावः साहित्यशास्त्रे दोषत्वेनाभिहितः। उक्तश्लोकस्योत्तरार्धे **"प्लुतप्रगृह्या अचि नित्यम्"** इत्यनेन प्रगृह्यनिमित्तको व्याकरणसम्मतोऽपि सन्ध्यभावः भूयसां प्रगृह्यनिमित्तकसन्ध्यभाववतां प्रयोगो दोषत्वेन साहित्यशास्त्रे स्वीकृतः। अथ च व **"धिक् तां च तं च मदनं च इमां च माम् च"** इह "च इमाम्" इत्यत्रापि संहिताया अविवक्षया व्याकरणसम्मतो गुणसन्धेरभावोऽप्यत्र साहित्यशास्त्रे दोषरूपेणैवान्ततो विचार्यते। सन्धिविषयं समाश्रित्यैव तावद् व्याकरणसाहित्यशास्त्रगतसिद्धान्तवैषम्य-विषयश्श्लोकेनानेनाप्यवगन्तुं शक्यते -

**"तत उदित उदारहारहारिद्युतिरुच्चैरुदयाचलादिवेन्दुः।**

**निजवंश उदात्तकान्तकान्तिर्बत मुक्तामणिवच्चकास्त्यनर्घः"॥**[120]

अत्र ततस्+उदितस्+उदारहारहारि, निजवंशे+उदात्तकान्तिः, इत्यत्र यकारः "**लोपः शाकल्यस्य"**[121] सूत्रेण लुप्तः। पूर्वत्र सकारस्य रुत्वे "**भोभगोअघोअपूर्वस्य योऽशि"**[122] इति यत्वे कथितसूत्रेण लोपः।

---

[119] काव्यप्रकाशः, सप्तम उल्लासः, पृष्ठसङ्ख्या - 322

[120] अत्रैव, पृष्ठसङ्ख्या - 322

[121] अष्टाध्यायीसूत्रसङ्ख्या – 8/3/19

[122] अत्रैव – 8/3/17

निजवंशे+उदात्तकान्तकान्तिः इत्यत्र अयादेशेन प्राप्तो यकारः लुप्तः। एतादृशो लोप एकस्य बहूनां वा पदानां प्रयोगे साधुत्वेनाङ्गीकृतो व्याकरणशास्त्रे, परन्तु मम्मटेन "**संहितां न करोमीते स्वेच्छया सकृदपि दोषः प्रगृह्यादिहेतुकत्वे त्वसकृत्। वेगादुड्डीय गगने चलण्डामरचेष्टितः। अयमुत्तपते पत्री ततोऽत्रैव रुचिङ्कुरु**"॥[123]

अत्र 'चलन्+डामर' इत्यत्र ष्टुत्वेन चलण्डामर इति भवति। रुचिं+कुरु अत्र "**वा पदान्तस्य**"[124] इति सूत्रेण अनुस्वारस्य परसवर्णत्वे 'रुचिङ्कुरु' इति पदं सिद्धं भवति। एवमिह सन्धिः व्याकरणसम्मतः, किन्तु साहित्यशास्त्रे ससन्धिकतद्पदद्वयघटकलण्डाचिङ्कु इति शब्दाभ्यां शिश्नयोन्यङ्कुररूपाश्लीलार्थद्योतकत्वेन व्याकरणसम्मतोऽपि स सन्धिर्निषिद्धः। यथा वा –

**"उर्व्यसावत्र तर्वाली मर्वन्ते चार्ववस्थितिः।**

**नात्रर्जु युज्यते गन्तुं शिरो नमय तन्मनाक्"**॥[125]

अत्र "उर्वी+असौ+अत्र, तरु+आली, मरु+अन्ते, चारु+अवस्थितिः, न+अत्र+ऋजुः" इत्यत्र सन्धौ सति शब्दस्य मूलं स्वरूपमेव ज्ञातुं सारल्येन न शक्यते। शब्दस्वरूपस्य सन्धौ नितान्तभिन्नत्वेनार्थप्रतीतौ कष्टत्वमिति दोषेण एतादृशे स्थले व्याकरणसम्मतोऽपि यणादिसन्धिः साहित्यशास्त्रे नाङ्गीकृतः। एवं वैषम्ये सत्यपि पूर्णतामासादयति साहित्यशास्त्रं व्याकरणशास्त्रम् उद्दिश्य इति स्पष्टम्।

### साहित्याङ्गता-

उपमाभेदनिरूपणं व्याकरणाश्रितमेव। भेदघटित साधर्म्यरूपोपमा द्विधा- पूर्णा लुप्ता च। तत्रोपमानोपमेयसाधारणधर्मोपमाप्रतिपादकानाम्

---

[123] काव्यप्रकाशः, सप्तम उल्लासः, पृष्ठसङ्ख्या - 323

[124] अष्टाध्यायीसूत्रसङ्ख्या – 8/4/59

[125] काव्यप्रकाशः, सप्तम उल्लासः, पृष्ठसङ्ख्या - 323

उपादाने पूर्णा अन्यतरस्यानुपादाने लुप्ता च। तत्र पूर्णा श्रौत्यार्थी द्विधा। यथेवादिशब्दानां साधर्म्यरूपोपमावाचकानां प्रयोगे श्रौती। यथेवादयो हि शब्दाः श्रवणमात्रेणैवोपमां प्रतिपादयन्ति। सादृश्यवदर्थकानां तुल्यादिशब्दानां प्रयोगे ह्युपमाऽऽर्थी। तुल्यादयो हि सादृश्यवदर्थशक्त्या श्रुतिमात्रेण सादृश्यवन्तमर्थं बोधयन्ति, किन्तु सादृश्यवद्धर्मिबोधानन्तरं सादृश्यरूपो धर्मो बोध्यते। सादृश्यवद्-धर्मिरूपार्थाद् आगतत्वेन साधर्म्यरूपाया उपमाया आर्थवत्त्वम्। एते द्वे पूर्णोपमे समासे तद्धिते वाक्ये च भवतः। **"तत्र तस्यैवे"**[126]**ति** सूत्रेण इवार्थे वतेः स्थले तद्धितगता श्रौती शब्दोपमा, किन्तु **"तेन तुल्यं क्रिया चेद्वतिः"**[127] इति सूत्रेण तुल्यार्थे विहितस्य वतिप्रत्ययस्योपादाने पूर्णोपमाऽऽर्थी भवति। इवेन सह समासे श्रौतीसमासगतोपमा। एतदुक्तम् – **"यथेववादिशब्दा यत्परास्तस्यैवोपमानताप्रतीतिरिति यद्यप्युमान-विशेषणान्येते तथापि शब्दशक्तिमहिम्ना श्रुत्यैव षष्ठीवत् संबन्धं प्रतिपादयन्तीति तत्सद्भावे श्रौती, उपमा। तथैव "तत्र तस्येव" इत्यनेनेवार्थे विहितस्य वतेरुपादाने। "तेन तुल्यं मुखम्" इत्यादावुपमेये एव "तत्तुल्यमस्य" इत्यादौ चोपमाने एव "इदं च तच्च तुल्यम्" इत्युभयत्रापि तुल्यादिशब्दानां विश्रान्तिरपि साम्यपर्यालोचनया तुल्यताप्रतीतिरिति साधर्म्यस्यार्थत्वात् तुल्यादिशब्दोपादाने आर्थी। तद्वत् "तेन तुल्यं क्रिया चेद्वतिः" इत्यनेन विहितस्य वतेः स्थितौ। "इवेन नित्यसमासो विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च" इति नित्यसमासे, इवशब्दयोगे समासगा"।**[128]

कल्पबादिप्रत्यये कर्माधारकक्यचि कर्तृक्यङि कर्तृकर्मविहितणमुलि क्विपि च पूर्णोपमायाः भेदाः प्रतिपादिताः।

एवं व्याकरणं साहित्यशास्त्रप्रमेयोपमाद्यलङ्कारपरिष्कारे महदुप-करोति। किञ्चालङ्कारविषयकसाहित्यशास्त्राध्ययनेन तेषां तेषां

[126] अष्टाध्यायीसूत्रसङ्ख्या – 5/1/116

[127] अत्रैव 5/1/115

[128] काव्यप्रकाशः, दशम उल्लासः, पृष्ठसङ्ख्या – 468-469

व्याकरणशास्त्रीयविषयविशेषाणां ज्ञानं सुदृढं भवतीति साहित्यशास्त्रस्यापि व्याकरणं प्रत्यङ्गत्वं बोधयितुं शक्यते।

**व्याकरणसाहित्यशास्त्रयोः परस्पराङ्गाङ्गिभावः-**

व्याकरणं सर्वोपकारकत्वात् सर्वशास्त्राणाम् अङ्गम्। तथाहि "काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकम्" इति प्रसिद्धिः। अतो व्याकरणस्य साहित्यशास्त्रं प्रत्यङ्गता अयत्नसिद्धा। विना व्याकरणज्ञानं काव्ये शब्दप्रयोगे च्युतसंस्कृतिदोषः स्वीकृतः। एवं यथा व्याकरणस्य साहित्यं प्रत्यङ्गता तथांशविशेषेण साहित्यस्यापि व्याकरणं प्रत्यङ्गता। साहित्यशास्त्रं हि विषयविशेषे व्याकरणमुपकरोति। यथा व्याकरणस्यापि चरमं प्रयोजनं शब्दस्य सुप्रयोगः। प्रयोगे सुष्ठुत्वस्य सिद्धिः कथमिति भवेदिति साहित्यशास्त्रं शिक्षयति। साहित्यशास्त्रं तान् नियमान् प्रतिपादयति यैः प्रयुज्यमाने शब्दे आह्लादकाता सिद्ध्यति। शब्दगताह्लादकत्वं नाम रसाभिव्यञ्जकत्वमेव। पूर्वं प्रतिपादितं यद् वेदोऽपि शब्दप्रयोगे शोभनत्वं वाञ्छति। अत एव सुप्रयुक्त इत्यत्र सुशब्दः प्रयुक्तः। नीतावप्युच्यते -

**"सत्यं ब्रूयात् प्रियं ब्रूयात् मा ब्रूयात् सत्यमप्रियम्।**

**प्रियं च नानृतं ब्रूयाद् एष धर्मः सनातनः"**

अनेन सत्यस्य यथार्थस्य वा तथा शब्देन प्रतिपादनं बोध्यते, येन श्रोतरि आह्लादो व्यक्तः स्यात्। आह्लादव्यक्त्यभावे शब्दप्रयोगे शोभनत्वं न समायाति। भारविनाऽपि- **"हितं मनोहारि च दुर्लभं वचः"**[129] इत्यत्र शब्दप्रयोगे मनोहारित्वम् आह्लाद्यभिव्यञ्जकत्वं भवेदिति संसूचितम्। व्याकरणेन शब्दस्य संस्कारः सुप्रयोगाय एव विधीयते। प्रयोगे सुष्ठुत्वस्य शोभनत्वस्य प्रियत्वस्य मनोहारित्वस्य वा सिद्धेरुपायानां प्रतिपादकं साहित्यशास्त्रम्। दृश्यते यत् साहित्यानभिज्ञाः वैयाकरणाः शब्दस्य शोभने प्रयोगे न दक्षाः, अधीतसाहित्यशास्त्रास्तु शब्दप्रयोगेण श्रोतृचित्तं चमत्कुर्वन्ति। अनधीतव्याकरणानां कृते तु साहित्यशास्त्रज्ञानं गगनकुसुमायमानाम्।

[129] किरातार्जुनीयम्, 1/4

व्याकरणज्ञानाभावे कविम्मन्या अनेन च्युतसंस्कृतिदोषदूषितमेव काव्यं विरचयन्ति यद् वस्तुतो न भवति काव्यम्। "न काव्यमव्याकरणं विराजते" तावद् एवंविधानि वचांस्यत्र मूलभूतानि।

एवं साहित्यशास्त्रं व्यावहारिकशब्दे सुष्ठुत्वस्य सिद्धेरुपायानां प्रतिपादकत्वेन व्याकरणमुपकरोति। इत्थं साहित्यव्याकरणशास्त्रयोः परस्परोपकारकत्वेनाङ्गाङ्गिभागः।

समग्रतो न केवलं वैयाकरणैरेवापितु शास्त्रान्तररहस्यविद्भिरपि व्याकरणस्य माहात्म्यमन्वभावि। अत एव साहित्यमर्ममनीषिणा श्रीमताऽऽनन्दवर्धनेन वैयाकरणा एव विचक्षणेषु प्राथम्येन गणिताः– "**प्रथमे हि विद्वांसो वैयाकरणाः**",[130] इत्येतेन वचसा।

यद्यपि "**शब्दार्थशासनज्ञानमात्रेणैव न वेद्यते। वेद्यते स हि काव्यार्थतत्त्वज्ञैरेव केवलम्**"॥[131] इत्यादिना साहित्यशास्त्रिणामपि कथञ्चि-दधिकमाहात्म्यमुपन्यस्यते तथाऽपि बहुधा वैयाकरणराद्धान्तान् आश्रित्य साहित्यशास्त्रिभिः स्वसिद्धान्ताः समाविष्कृताः। तद्यथा तदीयध्वनिसिद्धान्तो वैयाकरणमेव स्फोटराद्धान्तमाश्रित्य प्रवर्तितः। उक्तं हि ध्वन्यालोके–

**"यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।**

**व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः"॥**[132]

एवं वाग्देवताऽवतारेण मम्मटेनापि प्रत्यपादि।[133] ततो ध्वन्यालोकेऽपि **परिनिश्चितनिरपभ्रंशशब्दब्रह्मणां विपश्चितां मतमाश्रित्यैव ध्वनिव्यवहार इति विश्वस्य यानि निर्माणानि तद्विषया याः शक्तयः तैः सह किं विरोधाविरोधौ**

---

[130] ध्वन्यालोकः, प्रथम उद्योतः 1/13 अत्रत्यं वचः

[131] अत्रैव, प्रथम उद्योतः, कारिकासङ्ख्या - 07

[132] अत्रैव, कारिकासङ्ख्या - 13

[133] "बुधैर्वैयाकरणैः प्रधानभूतस्फोटरूपव्यङ्ग्यव्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहारः कृतस्ततस्तन्मतानु-सारिभिरन्यैरपि न्यग्भावितवाच्यव्यङ्ग्यव्यञ्जनक्षमस्य शब्दार्थयुगलस्य"।

- काव्यप्रकाशः, प्रथमोल्लासः

**चिन्त्येते।**[134] इत्येतेन वचनेन व्याकरणसाहित्यशास्त्रयोः समानतन्त्रत्वमस्ति प्रतिपादितम्।

साहित्यशास्त्रे चतुष्टयी शब्दानाम्प्रवृत्तिरिति पातञ्जलमतम् अनुश्रित्यैवोपाधिशक्तिवादः प्रवर्तितो मम्मटप्रभृतिभिराचार्य्यैः।[135]

अनेन प्रकारेण शब्दसाधुत्वमुख्यप्रयोजनं व्याकरणं समेषां शास्त्राणाम्भवत्युपजीव्यम्। साहित्यशास्त्रं तु व्याकरणेनातीव सम्बद्धम्। साहित्यशास्त्रं तदपि विवेचयति यद् व्याकरणेन न विवेचितम्। व्याकरणेन येषां शब्दानां साधुत्वं साधितं तेष्वेव केषाञ्चिदसाधुत्वं साहित्ये वाक्यदृशा प्रतिपाद्यते। यथा- **"प्लुतप्रगृह्या अचि नित्यम्"**[136] इति सूत्रेण प्रगृह्याणां सन्ध्यभावः साधुत्वेन प्रतिपाद्यते, किन्तु प्रगृह्यकृतसन्ध्यभावानाम्भूयः प्रयोगे विसन्धित्वस्य, लुप्तविसर्गाणाम् उत्वप्राप्तविसर्गाणाम्, विसर्गलोपानाम्, संहिताया अविवक्षया सकृदप्यसन्धेः, सन्धौ वैरूप्यविश्लेषाश्लीलत्वकष्टानाञ्च दोषत्वेनैवाङ्गीकारः साहित्यशास्त्रे।[137]

रसप्रधानकाव्यनिरूपणपरं साहित्यशास्त्रं शब्दसाधुत्वसमुद्यतं व्याकरण-शास्त्रञ्च न्यायवैशेषिक-साङ्ख्ययोग-पूर्वोत्तरमीमांसावत् समानतन्त्र-मिति कथने नैव कश्चनातिशयः। तथोक्तम्- **"यथा च व्याकरणं भाषायां व्युत्पत्यै, अपेक्ष्यते तथाऽलङ्कारशास्त्रमपि काव्ये नैपुण्यायापेक्ष्यते। न केवलमलङ्कारशास्त्रं विना काव्ये नैपुण्यमेव भवति, अपितु वाक्यदोषदृष्टिरपि न जायते। यो हि अलङ्कारशास्त्रं न जानाति केवलं व्याकरणादिकमेव जानाति स कथं जानीयात् "चिन्तारत्नमिव च्युतोऽसि" इति, "गुणैरनर्घ्यः प्रथितो रत्नैरिव महार्णवः" इति चानयोस्तुल्येऽपि, उपमानोपमेययोर्लिङ्गभेदे पूर्वं दुष्टं न परमिति। एवं जघनकाञ्च्यादिपदकर्णावतंसादिपदयोरवशिष्टेऽपि पौनरुक्त्ये**

---

[134] ध्वन्यालोकः, तृतीय उद्योतः

[135] "तदेवाह जात्यादिरिति। आदिना गुणक्रियायदृच्छानां ग्रहणम्। महाभाष्यकारमतमिदम्"।

- काव्यप्रकाशः, द्वितीयोल्लासे वामनीटीकावचनम्

[136] अष्टाध्यायीसूत्रसङ्ख्या – 6/1/125

[137] "प्रतिकूलवर्णमुपहतलुप्तविसर्गं विसन्धि हतवृत्तम्। न्यूनाधिककथितपदं पतत्प्रकर्षं समाप्तपुनरात्तम्॥

अर्धान्तरैकवाचकमभवन्मतयोगमनभिहितवाच्यम्। भग्नप्रक्रममक्रममतपरार्थं च वाक्यमेव तथा"॥

- काव्यप्रकाशः, सप्तम उल्लासः, सूत्रसङ्ख्या - 75

**पूर्वं दुष्टं परदुष्टमिति। तस्मादेतदपि शास्त्रं व्याकरणादिवदवश्यमध्येतव्य-श्रेण्यामन्तर्भावमर्हति"।**[138]

एवं समानतन्त्रत्वेन ख्यापिते व्याकरणे निरूपिताः सिद्धान्ताः प्रायेण साहित्यशास्त्रे समाद्रियन्ते ध्वनिवादिभिराचार्य्यैरन्यैश्चेति स्पष्टम्।

बाणभट्टजीवनसम्बद्धा किंवदन्त्यपि ध्वनति यद् व्याकरणसाहित्ययोरङ्गाङ्गिभावो बाणभट्टस्यैकेन पुत्रेण वैयाकरणेन **"शुष्कं काष्ठं तिष्ठत्यग्रे"** इत्यभिहितम्। साहित्यशास्त्रमर्मज्ञेनापरेण पुत्रेण तु- **"नीरस-तरुरिह विलसति पुरतः"** इत्यभिहितम्। अतो निष्कर्षत इदं वक्तुं शक्यते-

**"शब्दशास्त्रं विना नैव साहित्यं लभते स्थितिम्।**

**साहित्यं च विना शब्दशास्त्रमायाति रम्यताम्"॥**

---

138 अत्रैव, प्रस्तावनायां वामनाचार्यवचः, पृष्ठसङ्ख्या - 01

# प्रथमोऽध्यायः

## लिङ्गवचनशब्दार्थविमर्शः

न्यायदर्शनानुसारेण प्रत्यक्षानुमानोपमानशब्दरूपेषु प्रमाणेषु शब्दप्रमाणमन्त्यम्। प्रत्यक्षादीनि त्रीणि प्रमाणानि शब्दप्रमाणस्योपजीव्यानि। यदि सूक्ष्मतया विचार्यते तदेदं वक्तुं शक्यते यत् प्रत्यक्षादिप्रमाणापेक्षया शब्दप्रमाणस्य महत्त्वाधिकम्। अत एव वाचस्पतिमिश्रेण ब्रह्मसूत्रभाष्यव्याख्यानभूतायां भामत्यां शब्दरूपस्य श्रुतिप्रमाणस्य प्राबल्यमाश्रित्य प्रत्यक्षसिद्धस्यापि भेदस्य **"सर्वं खल्विदं ब्रह्म", "नेह नानाऽस्ति किञ्चन"** इत्यादिवेदरूपशब्दप्रमाणप्रतिपाद्याभेदज्ञानेन बाधः स्वीकृतः। व्याकरणशास्त्रेऽपि पूर्वविरोधे सति परस्य प्राबल्यं **“विप्रतिषेधे परं कार्यम्” “परनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः”** इत्येभिर्वचनैः साधितम्।

मीमांसायां यद्यपि श्रुतिलिङ्गादिस्थले परस्य दौर्बल्यं प्रतिपादितं तथाऽपि श्रुतिलिङ्गादिप्रमाणस्य विषयाः परस्परनिरपेक्षज्ञानानि भवन्ति। यत्र तु उपजीव्योपजीवकभावस्तत्र तु परस्यैव प्राबल्यम्। एवं यथा पूर्वापेक्षया परशास्त्रस्य प्राबल्यं प्रायेणाङ्गीक्रियते तथाऽत्रापि प्रत्यक्षाद्यपेक्षया शब्दस्य प्राबल्यं स्वीकरणीयम्।

आलङ्कारिकैरपि प्रतिपाद्यते यत् प्रत्यक्षादिप्रमाणोद्बोध्योऽर्थस्तथा चमत्कारी न भवति यथा शब्दप्रमाणबोध्यः। अर्थेषु शब्दबोध्यत्वमेव चमत्कारे प्रमाणं भवति। मम्मटेनापि **“*शब्द*प्रमाणवेद्योऽर्थो व्यनक्त्यर्थान्तरं यतः”**[1] इत्यनेन कथनेन शब्देनैव बोध्येऽर्थे रसाभिव्यञ्जकत्वं स्वीक्रियते। किञ्चिदपि ज्ञानं शब्दानुवेधम् अन्तरेण न सम्भवतीति भर्तृहरिणाऽपि प्रतिपादितम्- **“न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते। अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते”॥**[2] शब्दाभिधानं ज्योतिरन्तरेण समस्तं जगदिदम् अन्धन्तमो जायेतेति दण्डिनाऽप्युक्तम्- **“इदमधन्तमः कृत्स्नं जायेत भुवनत्रयम्। यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते”॥**[3] किं बहुना **“अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्। विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः”॥**[4] इति

---

[1] काव्यप्रकाशः, तृतीय उल्लासः, पृष्ठसङ्ख्या - 109

[2] वाक्यपदीयम्, 1/123

[3] काव्यादर्शः, 1/4

[4] वाक्यपदीयम्, 1/1

वाक्यपदीयवचनानुषङ्गेण वैयाकरणैरभिस्वीकृतं शब्दस्य ब्रह्मरूपत्वं तु सुप्रसिद्धमेव। **"वागेव विश्वा भुवनानि जज्ञे",**[5] इत्यादिश्रुतिवाक्यान्यपि शब्दस्य महत्त्वं स्पष्टत एव प्रतिपादयन्ति। शब्दतत्त्वादेव समग्रस्य जगतः सृष्टेरभिधानेन शब्दस्य महिमा न परोक्षः। अतः प्रत्यक्षाद्यपेक्षया शब्दप्रमाणस्य प्राबल्ये नैव कश्चन संशीतिलेशः। शब्देन मुख्यतया वाक्यमेव बुध्यते। आप्तोच्चारितं वाक्यं शब्द इति "**आप्तवाक्यं शब्दः"**[6] इति तर्कसङ्ग्रहेऽप्यभिहितम्।

वाक्यरूप एष शब्दः पूर्वमखण्ड एवासीत् किन्तु वाक्यरूपस्य शब्दस्य प्रार्थनयैवेन्द्रेण वाक्यरूपः शब्दोऽयं सखण्डो विहितः। तत्र वाक्यरूपस्य शब्दस्य पदरूपो विभागः प्रथमः। एवं वेदतो व्याकरणं यावच्छास्त्रप्रवृत्तये प्रकृतिप्रत्ययादिविभाग आप्यत एव। तद्यथा वाक्यपदीयेऽपि– "**अपोद्धारपदार्था ये ये चार्थाः स्थितलक्षणाः। अन्वाख्येयाश्च ये शब्दा ये चापि प्रतिपादकाः"॥**[7] पदरूपोऽयं शब्दः आलङ्कारिकैः मुख्यतस्त्रिधा मन्यते- वाचको लक्षको व्यञ्जकश्चेति । तत्राभिधया बोधको वाचकशब्दश्चतुर्धा मन्यते- रूढः, यौगिकः, योगरूढः, यौगिकरूढश्च । अवयवार्थं विना यस्यार्थस्य प्रसिद्धिर्भवति स रूढः इति कथ्यते। अर्थाल्लोकप्रसिद्धिवशाद् येषां शब्दानां प्रकृतिप्रत्ययादिकं न निरीक्षितुं शक्यतेऽसौ शब्दः रूढ इति। "रसोइया" इत्यस्य अर्थः पाचकः किमर्थम्, पाकानुकूलव्यापारवत्त्वात्, पङ्कजः इत्यस्यार्थः कमलं कथम्, पङ्के जायमानत्वात्, परं रूढशब्दस्यार्थे निर्वचनं न स्वीक्रियते यतस्तत्र प्रत्येकं व्यक्तिः भिन्नमर्थं विदधाति। यौगिकयोगरूढयोः निर्वचनं व्याकरणेन ज्ञायते। रूढशब्दानां ज्ञानं तु निरुक्तशास्त्रेणैव ज्ञातुं शक्यते। सारार्थस्त्वयं यद् यत्र प्रकृतिप्रत्ययौ न स्पष्टतया शास्त्रेण कल्पितौ स योगार्थशून्यो डित्थादिशब्दो रूढः। यत्र तु प्रकृतिप्रत्ययविभागः सुस्पष्टः, यश्च प्रकृतिप्रत्ययार्थान्वयोल्लसितस्य बोधकः स शब्दो यौगिकः। एवम् अवयवार्थसम्बन्धेन यस्यार्थ आप्यते स यौगिकः कथ्यते। यथा पाचकः, अत्र अवयवद्वयमस्ति, पच्धातुः अक-प्रत्ययश्च, अत्र पचेरर्थः पाकानुकूलव्यापारः, अक इत्यस्यार्थ आश्रयः। अतः पाकानुकूलव्यापाराश्रयः पाचक इति। पच्प्रकृत्यर्थपाकस्य ण्वुल्प्रत्ययार्थ-कर्तुश्चान्वयेन समुल्लसितस्य पाककर्तृरूपस्यार्थस्य बोधको हि पाचकशब्दः।

[5] अत्रैव (1/112), स्वोपज्ञवृत्तिः, पृष्ठसङ्ख्या - 195

[6] तर्कसङ्ग्रहः, शब्दनिरूपणम्

[7] वाक्यपदीयम्, 1/24

यत्र तु प्रकृतिप्रत्ययादिविभागः सुस्पष्टः यश्च प्रकृतिप्रत्ययार्थान्वयोल्लसिताद् अर्थान्तरे रूढश्च स योगरूढः। यथा पङ्कजशब्दः। अयं पङ्कजनिकर्तृत्व-विशिष्टपद्ममेव बोधयति न तु पङ्कजनिकर्तृकुमुदजलौकःप्रभृति। यस्य पदस्य योगार्थः सम्भवति किन्तु येन बोध्ये प्रसिद्धार्थे योगार्थः कथञ्चिदपि नान्वेति स शब्दो यौगिकरूढः। यथा मण्डपशब्दः। अयं गृहविशेषेऽर्थे रूढः। यत्र रूढे गृहविशेषे मण्डपानकर्तृत्वस्य योगार्थस्य न कथञ्चिदप्यपृथक्त्वेन गणनमिति सिद्धान्तः। शब्दस्याखण्डतापक्षे तु यौगिकादिरूपो विभागः न सम्भवति। परं शब्दस्य सखण्डतापक्षमनुसृत्य प्रस्तुताध्याये विवेचनीयौ लिङ्गवचनशब्दौ कीदृशौ कस्य कस्यार्थस्य बोधकौ चेति भवति जिज्ञासोदयः। अतः प्रकृतमनुसृत्येह मुख्यरूपेण लिङ्गवचनशब्दार्थविमर्शो विधीयते।

## लिङ्गशब्दार्थः –

व्याकरणे सुतिङन्तरूपपदयोरन्यतरपदं सुबन्तमिति निश्चप्रचम्। सुबन्तस्य प्रकृतिः प्रातिपदिकम्। प्रातिपदिकार्थेषु च लिङ्गस्य जायते ग्रहणम्। इह तावल्लिङ्गपदार्थस्य प्रसिद्धो विविधशास्त्रानुसारी व्युत्पत्तिलभ्यश्चार्थः पूर्वत्र विविच्यते।

वस्तुतो लिङ्गशब्दो नैकशास्त्रप्रयुक्तत्वाच्च बह्वर्थक इति सुविदिततरम्। सर्वप्रथमं वैदिकसाहित्यत एव तावल्लिङ्गतत्त्वविचारबीजः समवाप्यते। तत्र हि स्वरपदार्थमाधृत्य समानानामपि शब्दानां लिङ्गनिर्धारणं सुनिश्चीयते। तद्यथा "ब्रह्मन्", "यशस्" इत्यनयोः प्रातिपदिकयोः सममेव पुन्नपुंसकलिङ्गयोः प्रयोगदर्शने सति द्वयोः कः किंलिङ्गक इति तत्त्वं वैदिकस्वरसिद्धान्तेनैव स्पष्टीभवति।[8] वस्तुतोऽयं लिङ्गपदार्थः प्रतिशास्त्रं भिन्नभिन्नार्थान् समावेशयति। तेष्वादौ दर्शनशास्त्रपरोऽयं लिङ्गशब्दः कमर्थमभिधत्ते इत्येतत्तत्त्वविचारणेह पूर्वत्र विभाव्यते।

तत्रादौ न्यायदर्शने त्वनुमितौ साधनभूतः पदार्थो लिङ्गशब्देन व्यपदिश्यते।

---

[8] "ब्रह्मन् (नपुंसकलिङ्गम्) प्रार्थनायामर्थे, ब्रह्मन् (पुँल्लिङ्गम्) प्रार्थनाकर्ता, यशस् (नपुंसकलिङ्गम्) कीर्तिः, यशस् (पुँल्लिङ्गम्) यशस्वी"। - वैदिकस्वरबोधः, पृष्ठसङ्ख्या -136

**न्यायमते लिङ्गविमर्शः –**

ययोः पदार्थयोर्मध्ये कार्यकारणभावः तादात्म्यं वा भवति तयोरेवानुमितौ साध्यसाधनभावो मन्यते। यथाऽऽर्द्रेन्धनेसंयुक्ताग्निर्धूमं जनयतीति वह्निधूमयोः कार्यकारणभावो लोके प्रसिद्धः। किन्त्वनुमितौ लोके यत् कार्यं तत् साधनत्वेन यस्य कारणत्वञ्च तत् साध्यत्वेन स्वीक्रियते। यथा पर्वतो वह्निमान् धूमाद् इत्यत्र पर्वते वह्न्यनुमितौ धूमः साधनं भवति यतो ह्ययं वह्नेः कार्यं वर्तते। एवं वह्निः साध्यत्वेन स्वीक्रियते। अयं हि धूमस्य कारणं भवति। एवं ययोः पदार्थयोः तादात्म्यं तयोरप्यनुमितौ साध्यसाधनभावः मन्यते, तत्र व्याप्यभूतः पदार्थः साधनं व्यापकीभूतः पदार्थश्च साध्यो भवति। यथा शिंशपात्ववृक्षत्वयोः तादात्म्यं वर्तते। तत्र वृक्षत्वानुमाने वृक्षत्वव्याप्यं शिंशपात्वं साधनं भवति। एवं ययोः पदार्थयोः तादात्म्यं कार्यकारणभावश्च, तयोरेव साध्यसाधन-भावोऽनुमितौ स्वीकृतः। कार्यकारणभावस्य निर्णयस्तावद् भवति प्रमाणाधीनः।

"प्रमाणैरर्थपरीक्षणं न्यायः" इति भणितिः सुप्रसिद्धैव। न्यायशास्त्रञ्च प्रमाणशास्त्रमित्युच्यते। यत्र हि प्रमाणैर्निर्णीतार्थः सिद्धान्तत्वेन सूच्यते।

तत्र तावद् व्यक्तिविवेके कार्यकारणभावनिश्चयस्य हेतुत्वेन त्रीणि प्रमाणानि नाट्यशास्त्रकारसम्मतान्युद्धृतानि- "**लोको वेदस्तथाऽध्यात्मं प्रमाणं त्रिविधं स्मृतम्**"।[9] अत्र वस्तुतः शब्दरूपं प्रत्यक्षरूपञ्चेति द्वे एव प्रमाणे कार्यकारणभावस्य मूलत्वेन प्रतिपादिते। तत्र लोकशब्देन वेदशब्देन च निबन्धानिबन्धरूपत्वेन द्विविधं शब्दप्रमाणमध्यात्मशब्देन च प्रत्यक्षप्रमाणं स्वीकृतम्। इत्थं साध्यसाधनभावस्य मूलं तादात्म्यं तदुत्पत्तिश्च।

वस्तुतस्तु न्यायमते स्वीकृतानि सन्ति चत्वारि प्रमाणानि। तानि च प्रत्यक्षम्, अनुमानम्, उपमानम्, आगमश्च।[10] तत्र चतुर्षु प्रमाणेष्वन्यतमं प्रमाणमनुमानमिति। तत्प्रसङ्ग एवास्मिन् शास्त्रे लिङ्गशब्दविमर्शोऽवाप्यते। 'अनु'-इत्युपसर्गपूर्वकात् 'मा'-धातुना ल्युट्प्रत्यये सिद्ध्यति अनुमानशब्दः,

---

[9] **नाट्यशास्त्रम्** 25/120

[10] प्रत्यक्षानुमानोपमानागमाः प्रमाणानि - न्यायसूत्रम्, 1/1/3

यस्यार्थः - **"मितेन लिङ्गेन अर्थस्य अनु पश्चान्मानमनुमानम्"।**[11] **येन हि तदनुमीयते तदनुमानम्। लिङ्गपरामर्शोऽनुमानम्"।**[12] एवं लिङ्गद्वाराऽर्थस्य परामर्शेन यद् यथार्थज्ञानं जन्यते, तदनुमानम्। यथा - पर्वतो वह्निमान्, धूमवत्त्वात्। अत्र धूमद्वाराऽग्नेर्ज्ञानं जन्यते। वस्तुतस्तु धूमादिरूपः पदार्थः पर्वतादौ परोक्षतया लीनं वह्निप्रभृतिपदार्थमनुमापयतीति लिङ्गशब्देनापि निगद्यते। लीनं प्रत्यक्षाविषयं पदार्थं गमयतीति धूमादिर्लिङ्गमिति। लिङ्गपदस्य लीनशब्देन गम्लृधातुना च निर्वचनं प्रदर्श्यते।

एवं न्यायशास्त्रीयेऽपि साधनरूपे लिङ्गपदार्थे ज्ञानसाधनत्वरूपः योगार्थोऽन्वितः। न्यायशास्त्रे लिङ्गपदेन यः साधनरूपः पदार्थ उच्यते स सपक्षे पक्षे च तिष्ठति विपक्षे तु न तिष्ठति। इत्थं न्यायमते पक्षसत्त्वेन सपक्षसत्त्वेन विपक्षव्यावृत्तत्वेन च विशिष्टानुमितौ धूमादिरूपः पदार्थो लिङ्गशब्देन निगद्यते।

एवं न्यायादिपरम्परायामनुमानसन्दर्भे[13] लिङ्गमर्थगमकत्वेन बुध्यते। तथा हि**- "पर्वतो वह्निमान्, धूमवत्त्वात्, यो यो धूमवान् स स वह्निमान् यथा महानसं तथा चायं तस्मात्तथा। अनेन प्रतिपादिताल्लिङ्गात् परोऽप्यग्निं प्रतिपद्यते"।**[14] एवं धूमत्वमत्र लिङ्गस्य स्वरूपम्।

तत्र हि सूत्रकारो गौतमस्तु **"तत्पूर्वकं त्रिविधमनुमानम्"**[15] इत्युल्लिख्य लिङ्गस्यास्यैवापेक्षामितोऽपि विशदयति। अत्र तावत् 'तत्' इति पदस्याभिधेयार्थः "लिङ्गलिङ्गिदर्शनम्" इति। तस्मात् लिङ्गिना सह सम्बन्धग्रहणे सति लिङ्गदर्शनेन व्याप्तिग्रहणं सम्भवति। व्याप्तिग्रहणे लिङ्गज्ञानेन परोक्षवस्तुनो ज्ञानं भूयते, तदेवानुमानं कथ्यते। अत्र लिङ्गपदेन

---

[11] न्यायसूत्रवात्स्यायनभाष्यम्, 1/1/3

[12] तर्कभाषा, पृष्ठसङ्ख्या- 71

[13] "मितेन लिङ्गेन लिङ्गिनोऽर्थस्य पश्चान्मानमनुमानम्"।

- न्यायभाष्यम् (1/1/3 इति सूत्रस्थभाष्यवचः), पृष्ठसङ्ख्या -17-18

[14] तर्कसङ्ग्रहः, पृष्ठसङ्ख्या - 32

[15] न्यायसूत्रम्, 1/1/5

कश्चार्थो गृहीत इति प्रश्नोद्भवे तत्रोच्यते तर्कभाषाकारेण केशवमिश्रेण **"व्याप्तिबलेनार्थगमकं लिङ्गम्"।**[16] इति। यथा "पर्वतो वह्निमान्, धूमवत्त्वात्" इत्यत्र धूमो वह्नेर्लिङ्गमिति। तच्च कथमिति चेद् यत्र धूमस्तत्र वह्निरिति साहचर्यनियमो व्याप्तिः। तद्व्याप्तिस्मरणेन धूमो वह्निम् अवबोधयति। अतो व्याप्तिस्मरणेन वह्न्यनुमापकत्वाद् धूमो वह्नेर्लिङ्गमिति। तस्य च परामर्शोऽनुमानमिति गद्यते। तच्चानुमानं द्विविधम्- **"स्वार्थानुमानं परार्थानुमानञ्च"।**[17] **"तत्र स्वार्थं स्वानुमितिहेतुः"**[18] इति तर्कसङ्ग्रहकारो बभाण। यथा कश्चित् स्वयमेव महानसादौ बहुशो दर्शनेन ''यत्र-यत्र धूमस्तत्र तत्राग्निरि''ति व्याप्तिं गृहीत्वा उपपर्वतञ्च गत्वा वह्नौ सन्दिहानः सन् गिरौ धूमं पश्यन् व्याप्तिं स्मरति – "यत्र यत्र धूमस्तत्राग्निरिति", तदनन्तरमेव "वह्निव्याप्यधूमवानयं पर्वतः" इति ज्ञानं जन्यते। अयमेव लिङ्गपरामर्श इति कथ्यते। तस्मात् पर्वतोऽग्निमानिति ज्ञानमनुमितिरुच्यते। एतदेव स्वार्थानुमानं कथ्यते।

अत्र स्वार्थानुमाने लिङ्गपरामर्श इति कथं चेद् **"व्याप्तिबलेन लीनमर्थं गमयतीति लिङ्गम्, तच्च धूमादि। तस्य परामर्शो= ज्ञानविशेषो लिङ्गपरामर्शः"**[19] इति।

परार्थानुमाने प्रतिज्ञादिपञ्चावयववाक्यसमुदायात्मकेन न्यायेन परम्परया जन्यते यद् अनुमानं तत् परार्थानुमानमिति। यथाह केशवमिश्रस्तर्कभाषायाम् – **"यत्तु कश्चित् स्वयं धूमादग्निमनुमाय परं बोधयितुं पञ्चावयवमनुमानवाक्यं प्रयुङ्क्ते तत् परार्थानुमानम्। तद्यथा- पर्वतोऽग्निमान्, धूमवत्त्वात्, यो यो धूमवान् स सोऽग्निमान्, यथा महानसः, तथा चायम्,**

---

[16] तर्कभाषा, अनुमाननिरूपणम्, पृष्ठसङ्ख्या - 72

[17] तर्कसङ्ग्रहः, पृष्ठसङ्ख्या - 94

[18] तत्रैव, पृष्ठसङ्ख्या - 94

[19] तत्रैव, पदकृत्यटीका, पृष्ठसङ्ख्या - 95

**तस्मात्तथेति"।**[20] एवं यत्पञ्चावयववाक्यं परप्रतिपत्त्यर्थं प्रयुज्यते तत्परार्थानुमानमिति। एवं स्वार्थानुमितिः परार्थानुमितिः चेत्यनयोर्लिङ्गपरामर्श एव करणम्। तस्माल्लिङ्गपरामर्शोऽनुमानमिति फलितम्।

इदमेव सर्वं न्यायसिद्धान्तमुक्तावल्यां विश्वनाथन्यायपञ्चाननेन प्रपञ्चितम् –

**"व्यापारस्तु परामर्शः करणं व्याप्तिधीर्भवेत्।।**

**अनुमायां ज्ञायमानं लिङ्गं तु करणं न हि।**

**अनागतादिलिङ्गेन न स्यादनुमितिस्तदा"॥**[21]

न्यायमते लिङ्गमिदं त्रिविधमिति सूत्रितम्। अन्वयव्यतिरेकि, केवलान्वयि, केवलव्यतिरेकि चेति। प्रथमं तावद् अन्वयव्यतिरेकि- "**अन्वयेन व्यतिरेकेण च व्याप्तिमदन्वयव्यतिरेकि"**।[22] अत्र अन्वयः साध्यसाधनयोः साहचर्यः। तदभावयोः साहचर्यं व्यतिरेकः।[23] एवं चान्वयप्रयोज्यव्याप्तिमद्-व्यतिरेकप्रयोज्यव्याप्तिमदन्वयव्यतिरेकीत्यर्थः। यथा – वह्नौ साध्ये धूमवत्त्वं लिङ्गम् अन्वयव्यतिरेकि। अत्रान्वयव्याप्तिर्यत्र धूमस्तत्राग्निरिति यथा महानसमिति। महानसे धूमवह्न्योरन्वयसद्भावात्। एवञ्च व्यतिरेकव्याप्तौ यत्र वह्निर्नास्ति तत्र धूमोऽपि नास्ति यथा महाह्लद इति। महाह्लदे धूमाग्न्योर्व्यतिरेकस्य सद्भावदर्शनात्।

व्यतिरेकव्याप्तेस्त्वयं सिद्धान्तो विद्यते। अन्वयव्याप्तौ यद् व्याप्यमस्ति तस्याभावो व्यतिरेकव्याप्तौ व्यापको भवति। यच्चान्वयव्याप्तौ व्यापकं तस्याभावोऽत्र व्याप्य इति गदितं कुमारिलभट्टेन श्लोकवार्त्तिके-

---

[20] तर्कभाषा, पृष्ठसङ्ख्या- 80

[21] कारिकावली, कारिके - 66-67

[22] तर्कसङ्ग्रहः, पृष्ठसङ्ख्या - 101

[23] अत्रैव, पदकृत्यटीका, पृष्ठसङ्ख्या - 102

**"व्याप्यव्यापकभावो हि भावयोर्यादृगिष्यते।**
**तयोरभावयोस्तस्माद् विपरीतः प्रतीयते॥**
**अन्वये साधनं व्याप्यं साध्यं व्यापकमिष्यते।**
**तदभावोऽन्यथा व्याप्यो व्यापकः साधनात्ययः॥**
**व्याप्यस्य वचनं पूर्वं व्यापकस्य ततः परम्।**
**एवं परीक्षिता व्याप्तिः स्फुटीभवति तत्त्वतः"॥**[24]

द्वितीयं तावत् केवलान्वयि। "**अन्वयमात्रव्याप्तिकं केवलान्वयि"**[25] अथवा "**व्यतिरेकव्याप्तिशून्यत्वे सति अन्वयव्याप्तिमत्त्वं केवलान्वयित्वम्"।**[26] यथा घटोऽभिधेयः प्रमेयत्वात्, पटवत्। अत्र प्रमेयत्वम् अभिधेयत्वम् इत्यनयोर्व्यतिरेकव्याप्तिर्नास्ति, सर्वस्यापि प्रमेयत्वादभिधेयत्वाच्च। अर्थात् सकलपदाभिधेयत्वस्येश्वरप्रमाविषयत्वस्य चात्यन्ताभावा-प्रतियोगित्वरूप-केवलान्वयित्वेन तदभावाप्रसिद्ध्या तद्घटितव्यतिरेकव्याप्तिर्न सम्भवत्येवेति भावः।

तृतीयं तावत् केवलव्यतिरेकि लिङ्गम्। "**व्यतिरेकमात्रव्याप्तिकं केवलव्यतिरेकि"**[27] अथवा "**निश्चितान्वयव्याप्तिशून्यत्वे सति व्यतिरेकव्याप्तिमत्त्वं केवलव्यतिरेकित्वम्"।**[28] यथा पृथिवी इतरेभ्यो भिद्यते। गन्धवत्त्वात्। अत्र गन्धवत्त्वं लिङ्गम्। यदितरेभ्यो न भिद्यते न तद्गन्धवत् यथा जलम्, न चेयं तथा, तस्मान्न तथेति। अत्र यद् गन्धवत् तदितर-भिन्नमित्यन्वयदृष्टान्तो नास्ति, पृथिवीमात्रस्य पक्षत्वात्।

---

[24] श्लोकवार्त्तिकम्, 121-123

[25] तर्कसङ्ग्रहः, पृष्ठसङ्ख्या - 103

[26] अत्रैव, न्यायबोधिनी, पृष्ठसङ्ख्या - 103

[27] अत्रैव, पृष्ठसङ्ख्या - 105

[28] अत्रैव, न्यायबोधिनी, पृष्ठसङ्ख्या - 105

एवं न्यायमते लिङ्गं त्रिविधमिति। तच्च व्याप्तिबलेन लीनमर्थं गमयति। तस्य परामर्श एवानुमानमिति निगद्यते।

**साङ्ख्यमते लिङ्गविमर्शः –**

साङ्ख्यदर्शनमतं प्रकटयित्री कारिका तु सूक्ष्मशरीरार्थभूतलिङ्ग-स्वरूपत्वाच्[29] चेतनः पुरुषो दुःखं निवृत्तिपर्यन्तं स्वभावेन प्राप्नोतीत्यादिविवेचनद्वारा लिङ्गार्थं सविशेषं प्रतिपादयति। तावत् साङ्ख्यदर्शने लिङ्गशब्दस्य प्रयोगः स्थलद्वये लभ्यते। आदिमं तत्त्वमीमांसायामपरं च प्रमाणमीमांसायाम्। तत्त्वमीमांसायां लिङ्गशरीरप्रतिपादनावसरे लिङ्गशब्दस्यार्थः प्रतिपाद्यते माठरवृत्तौ- **"प्रलयकाले प्रधाने लयं गच्छति इति लिङ्गम्"।**[30] साङ्ख्यतत्त्वकौमुद्याम्- **"लिङ्गनाज्ज्ञापनाद् बुद्ध्यादयो लिङ्गम्"।**[31]

अर्थाद् येन पुरुषो लिङ्ग्यते ज्ञायते वा तल्लिङ्गमित्येवं प्रधानस्य ज्ञापकत्वादनुमापकत्वाद्वा हेतोर्बुद्धिरहङ्कार एकादश इन्द्रियाणि च लिङ्गमित्यभिधीयन्ते। तदेवोच्यते किरणावल्याम् – **"लिङ्गं त्रयोदश-करणसमुदायः"।**[32] एतदाधारेण लिङ्गे लिङ्गशरीरे च स्पष्टो भेदः। लिङ्गमित्युक्ते त्रयोदशकरणानि , तत्र च पञ्चतन्मात्रयोगे लिङ्गशरीरं भवति।

सृष्ट्यादौ पूर्वोत्पन्नम्, असक्तम्, नियतम्, बुद्धितत्त्वादारभ्य सूक्ष्मतन्मात्रपर्यन्तं भोगरहितं धर्माधर्मादिभावरहितं लिङ्गशरीरं गमनागमनं करोतीत्युच्यते ईश्वरकृष्णेन।[33] पूर्वोत्पन्नमित्युक्ते सृष्ट्यारम्भे प्रकृतिद्वारा

---

[29] "तत्र जरामरणकृतं दुःखम्प्राप्नोति चेतनः पुरुषः। लिङ्गस्याविनिवृत्तेस्तस्माद् दुःखं स्वभावेन"॥

- साङ्ख्यकारिका, कारिकासङ्ख्या - 55

[30] माठरवृत्तिः , कारिकासङ्ख्या - 40

[31] साङ्ख्यतत्त्वकौमुदी, कारिकासङ्ख्या - 41

[32] किरणावली, कारिकासङ्ख्या - 41

[33] साङ्ख्यकारिका, कारिकासङ्ख्या - 40

प्रतिपुरुषं पृथक् पृथगुत्पादितम्।[34] असक्तमर्थात् यस्य निर्बाधगत्या शिलायामपि प्रवेशः सम्भवेत्।[35] नियतम् इत्यस्याभिप्रायः सृष्ट्यादितः महाप्रलयं यावत् स्थितिः।[36] एवं पञ्चज्ञानेन्द्रियाणि - चक्षुश्श्रोत्रघ्राण-रसनत्वगाख्यानि, पञ्चकर्मेन्द्रियाणि- वाक्पाणिपादपायूपस्थाख्यानि, पञ्चतन्मात्राणि शब्दस्पर्शरूपरसगन्धाख्यानि, मनः, अहङ्कारः, बुद्धिश्चेत्यष्टादशनां समूहः लिङ्गशरीरं सूक्ष्मशरीरं वा उच्यते साङ्ख्ये। शान्तैर्घोरैर्मूढैश्चेन्द्रियैर्युक्तत्वात् अस्य विशेषसञ्ज्ञा।[37] सूक्ष्मशरीरं स्थूलशरीरं विना धर्माधर्मादिभोगेऽशक्तं भवत्यत उपभोगरहितमेव संसरति।[38] धर्माधर्मज्ञानाज्ञानवैराग्यावैराग्यै-श्वर्यानैश्वर्याः भावाः सन्ति। बुद्धिरेतैरन्विता भवति, सूक्ष्मशरीरञ्च बुद्ध्यान्वितं भवति। अतो लिङ्गशरीरमपि बुद्ध्या धर्माधर्मादिभावैस्तथैव युक्तो यथा सुगन्धितचम्पकपुष्पसम्पर्कात् वस्त्रं सुगन्धितम्। अतः धर्माधर्मादिभावैरन्वितं लिङ्गशरीरं संसरति।[39]

यथाऽनाधारं चित्रमस्तम्भा च छाया न भवति तथैवानाश्रयं सूक्ष्मशरीरं स्थूलशरीरं विना न तिष्ठति। पुरुषार्थहेतुरूपमिदं सूक्ष्मशरीरं धर्माधर्मादिनिमित्तेन स्थूलशरीररूपनैमित्तिकेन सम्बद्धत्वात् प्रकृतेर्विभुत्व-शक्तियोगात् नर्त्तक इवाचरति।[40]

---

[34] प्रधानेनादिसर्गे प्रतिपुरुषमेकैकमुत्पादितम्। - साङ्ख्यतत्त्वकौमुदी - 40

[35] असक्तम् अव्याहतं शिलामप्यनुप्रविशति। - अत्रैव - 40

[36] "आ चादिसर्गादा च महाप्रलयादवतिष्ठते"। अत्रैव 40

[37] "शान्तघोरमूढेन्द्रियैरन्वितत्वाद्विशेषः"। अत्रैव 40

[38] "षाट्कौशिकं शरीरं भोगायतनं विना सूक्ष्मशरीरं निरुपभोगं तस्मात् संसरति"। अत्रैव 40

[39] अत्रैव 40

[40] साङ्ख्यकारिका, कारिकासङ्ख्ये – 41-42

**साङ्ख्यशास्त्रीयप्रमाणमीमांसायां लिङ्गशब्दस्यार्थः –**

स्वामिनारायणभाष्यम्- **"लिङ्गयति गमयति लीनमर्थमिति लिङ्गम्"।**[41] अनुमानस्य लिङ्गलिङ्गिपूर्वकत्वप्रतिपादनावसरे लिङ्गशब्दः परिभाष्यते। अज्ञातस्यार्थस्यावबोधकं लिङ्गमित्युच्यते। लिङ्गस्यार्थो व्याप्यम्। व्याप्यं च सन्दिग्धोपाधेः निश्चितोपाधेश्च निराकरणेन वस्तुस्वभावसम्बद्धम्। यथा अज्ञातस्य वह्नेः अवबोधकं धूमं लिङ्गम्।

योगसूत्रे लिङ्गशब्दस्यार्थो द्वाभ्यां सूत्राभ्यां स्पष्टतयावबोद्धुं शक्यः। तत्र प्रथमं सूत्रमिदम् – **"सूक्ष्मविषयत्वं चालिङ्गपर्यवसानम्"।**[42]

गन्धतन्मात्रं पार्थिवस्याणोः, जलीयस्याणोः रसतन्मात्रम्, तैजसस्याणोः रूपतन्मात्रम्, वायवीयस्याणोः स्पर्शतन्मात्रम्, आकाशस्य शब्दतन्मात्रम्, तन्मात्राणामहङ्कारः, अहङ्कारस्य लिङ्गमात्रम् (महत्तत्त्वम्), लिङ्गमात्रस्य च अलिङ्गं (प्रकृतिः) सूक्ष्मो विषयः। अलिङ्गात्परं सूक्ष्मं न किञ्चिदस्ति। पुरुषः सूक्ष्मो वर्त्तते किन्तु लिङ्गात्परं यथा अलिङ्गस्य सौक्ष्म्यं न तथा पुरुषस्य । पुरुषो लिङ्गस्य हेतुर्भवति अन्वयिकरणं न भवति। अतः अलिङ्गे निरतिशयं सौक्ष्म्यमुच्यते।

अतः प्रलयकाले समेषां सूक्ष्मविषयाणामलिङ्गे पर्यवसानं भवति। ततः पूर्वं समेषां लयः तदात्मकत्वेन लिङ्गमात्रे अर्थाद् महत्तत्त्वे भवति। ततोऽलिङ्गे (प्रकृतौ) पर्यवसानम्।

विशेषाः, अविशेषाः, लिङ्गमात्रम्, अलिङ्गश्च इमानि गुणपर्वाणि सन्ति।[43] तन्मात्राणां क्रमशः आकाशवायुतेजोजलभूमयः पञ्च विशेषाः, अस्मितायास्तु श्रोत्रत्वक्चक्षुजिह्वाघ्राणाख्यानि पञ्च ज्ञानेन्द्रियाणि,

---

[41] स्वामिनारायणभाष्यम् – 5

[42] योगसूत्रम् 1/45

[43] **"विशेषाविशेषलिङ्गमात्रालिङ्गानि गुणपर्वाणि"। न्यायसूत्रम्, २.१९**

वाक्पाणिपादपायूपस्थाख्यानि पञ्च कर्मेन्द्रियाणि, उभयेन्दियं (मनः) चैकादश विशेषाः। शब्दस्पर्शरूपरसगन्धाख्यानि पञ्चतन्मात्राणि अस्मिता चैते षड् विशेषाः सन्ति। एतैरविशेषैः परो लिङ्गमात्रं महत्तत्त्वं वर्त्तते। अलिङ्गं च प्रकृतिः ततोऽपि परः।

लीयमानावस्थायां षड् विशेषाः सत्तामात्रे महदात्मनि तदात्मकतां प्राप्य निःसत्तासत्ते, निःसदसति, निरसति, अव्यक्ते, अलिङ्गे प्रधाने प्रलीयन्ते। अविशेषाणां पूर्वोक्तः लिङ्गमात्रपरिणामः, अपरश्च अलिङ्गपरिणामः। अलिङ्गावस्थायां पुरुषार्थो हेतुर्न भवति, अतः सा नित्यावस्था वर्त्तते। अन्येऽवस्थात्रये (विशेषाविशेषलिङ्गमात्रावस्थात्रये) पुरुषार्थता हेतुर्भवति। एषः हेतुभूतः पुरुषार्थः निमित्तकारणं वर्त्तते, अतः अवस्थात्रयमनित्यमुच्यते।

एवं सूत्रद्वयव्याख्यानुसारेण वक्तुं शक्यं यल्लिङ्गमात्रशब्दो बुद्ध्यर्थं प्रयुज्यते। अतोऽस्मादारभ्यैव लिङ्गशरीरप्रतिपत्तिर्भवतीति।

**वेदान्तमते लिङ्गविमर्शः**

वेदान्तदर्शने लिङ्गमिति शब्दः मुख्यतया लिङ्गशरीरनिरूपणक्रमे विशद्यते। अत्र हि सूक्ष्मशरीराणामस्त्यवधारणा यत् पुनर्जन्मादितत्त्वव्याख्यानमपि साधयतीत्यन्यत्। स्थूलभौतिकशरीरं पदार्थमूलकं मूर्तं च यस्यास्तित्वस्यानुभूतिर्भवति किन्त्वेतदतिरिच्यापि एकाऽस्ति व्यवस्था, या जीवकृतशुभाशुभकर्मफलादिविवेचनं कल्पयति। तदेव भवति सूक्ष्मशरीरमिति।

सूक्ष्मशरीरं वर्तमानजन्मनः संस्कारमग्रिमजन्म यावद् आवहति। ईदृशमेव लिङ्गशरीरं वेदान्तसारे विद्यत एवं परिभाषितम्- **"सूक्ष्मशरीराणि सप्तदशावयवानि लिङ्गशरीराणि"**[44] इति।

[44] वेदान्तसारः, पृष्ठसङ्ख्या - 64

इदं हि लिङ्गशरीरं सप्तदशावयवात्मकं वर्तते। तत्र च सप्तदशावयवाः सन्ति - पञ्च ज्ञानेन्द्रियाणि, पञ्च कर्मेन्द्रियाणि, पञ्च वायवः तथा च बुद्धिमनसी।[45]

पञ्च ज्ञानेन्द्रियाणि सन्ति - श्रोत्रत्वक्चक्षुजिह्वाघ्राणाख्यानि। आकाशादेः सत्वांशेभ्यः पञ्च ज्ञानेन्द्रियाणि निर्मितानि सन्ति। श्रोत्रम् आकाशस्य, त्वग् वायोः, चक्षुः तेजसः, जिह्वा जलस्य, घ्राणञ्च पृथिव्याः सात्त्विकांशैर्भवति निर्मितम्। पञ्च कर्मेन्द्रियाणि सन्ति – वाक्पाणिपादपायूपस्थानि। एतानि आकाशादे रजोगुणरूपसूक्ष्मांशैः निर्मितानि। पञ्च वायवस्तु भवन्ति प्राणापानोदानव्यानसमानाः।

अथ "**बुद्धिर्नाम निश्चयात्मिकाऽन्तःकरणवृत्तिः"**,[46] अर्थाद् अन्तःकरणस्य या निश्चयात्मिका अन्तःकरणवृत्तिः, सा बुद्धिः कथिता। "**मनो नाम संकल्पविकल्पात्मिकाऽन्तःकरणवृत्तिः"।**[47] अन्तःकरणस्यैव या संकल्पविकल्पात्मिका वृत्तिर्भवति, सा मनोनाम्नाऽभिधीयते। बुद्धिर्ज्ञानेन्द्रियाणि च मिलित्वा विज्ञानमयकोशं निर्मान्ति। मनो ज्ञानेन्द्रियाणि च मिलित्वा मनोमयकोशस्य निर्माणं विदधति। प्राणाः कर्मेन्द्रियाणि च मिलित्वा प्राणमयकोशं विनिर्मान्ति। एवं वेदान्तदर्शने लिङ्गशरीरं कोशत्रयात्मकमपि भवति।[48]

अथ वेदान्ते हि साक्षात्कारोपयोगिश्रवणादिसन्दर्भनिरूपणे "**ब्रह्मात्मनोरेकत्वनिश्चायकैरुपक्रमोपसंहारादिभिः षड्-विधलिङ्गैः सर्वेषां वेदान्तवाक्यानामद्वैते ब्रह्मणि तात्पर्यविधारणं श्रवणमित्यर्थः"**[49] इति वचसा लिङ्गस्वरूपं षड्विधं विवृतञ्जायते। अत्रैव हि ब्रह्मसाक्षात्कारोपयोगि-श्रवणमनननिदिध्यासनसमाध्यनुष्ठानवर्तिष्वन्यतमे श्रवणे "**उपक्रमोपसंहारा-**

---

[45] अवयवास्तु ज्ञानेन्द्रियपञ्चकं बुद्धिमनसी कर्मेन्द्रियपञ्चकं वायुपञ्चकं चेति। - अत्रैव

[46] अत्रैव, पृष्ठसङ्ख्या -65

[47] अत्रैव

[48] अत्रैव, पृष्ठसङ्ख्या - 66

[49] वेदान्तसारः (सारबोधिनीटीकावचः), पृष्ठसङ्ख्या - 158

**वभ्यासोऽपूर्वता फलम्। अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये"॥**[50] इत्येतैः षड्भेदान्वितैर्लिङ्गैरद्वैते ब्रह्मणि तात्पर्यविधारणार्थं हि लिङ्गशब्दोऽस्ति सम्प्रयुक्तः।

**मीमांसासम्मतो लिङ्गविमर्शः -**

मीमांसादर्शने लिङ्गम् इत्येतत् पदं तत्र प्रमाणस्यावान्तररूपेणाप्यते व्याख्यायितम्। विधि-मन्त्र-नामधेय-निषेधार्थवादभेदाद् वेदः पञ्चविधः उल्लिखितः।[51] तत्र विधिरज्ञातार्थज्ञापको वेदभाग उच्यते।[52] विधिरपि चतुर्विधा विभज्यते- "**उत्पत्तिविधिः, विनियोगविधिः, अधिकारविधिः प्रयोगविधिश्चेति"**।[53] तत्र विनियोगविधावेतस्याः सहकारिभूतषट्प्रमाणमध्ये[54] लिङ्गस्य विवेचनमस्ति जातम्। लिङ्गं परिभाषयन् अर्थसङ्ग्रहकारो ब्रूते – "**शब्दसामर्थ्यं लिङ्गम्"**[55] इति। उदाहरणार्थम्- बर्हिर्देवसदनं दामी'ति मन्त्रस्य कुशलवनाङ्गत्ववदग्नये जुष्टं निर्वापामि, इत्येतत्प्रकाशनसामर्थ्यरूपाल् लिङ्गान्निर्वापादौ विनियोग इत्यर्थः ।

मीमांसादर्शने पूर्वप्रमाणं परप्रमाणात् बलवत्। अतः लिङ्गम् अपि स्वपरप्रमाणेभ्यो वाक्यादिभ्यो बलवद् भवतीति विशेषः।

**पुराणसम्मतो लिङ्गविमर्शः -**

पुराणप्रसिद्धो हि लिङ्गपदार्थः प्रथितलिङ्गानुशासन-विषयासम्पृक्तभगवच्छिवोल्लेखकः – "**लीयते हि शिवादन्यदशेषमशिवं शिवे!**

---

[50] अत्रैव

[51] अर्थसङ्ग्रहः, पृष्ठसङ्ख्या - 36

[52] अत्रैव

[53] अत्रैव, पृष्ठसङ्ख्या - 48

[54] "एतस्य विधेः सहकारिभूतानि षट् प्रमाणानि। श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यारूपाणि"।

- अत्रैव, पृष्ठसङ्ख्या - 57

[55] अर्थसङ्ग्रहः, पृष्ठसङ्ख्या - 78

**अतो लिङ्गं द्विजश्रेष्ठा अविनाशी हरः स्वयम्"॥**[56] एवमेव शिवमहापुराणादिषु[57] लिङ्गार्थकश्शिवः प्रसिद्धतर एव। तत्र हि वाल्मीकीयरामायणेऽपि प्रस्तरबालुकाऽऽकृतिर्लिङ्गार्थ एव शिव इति पुराणप्रसिद्धं तथ्यं काव्यगतवर्णनामालक्ष्यापि सुतरां प्रतिपादितमवाप्यते –

**"यत्र यत्र च याति स्म रावणो राक्षसेश्वरः।**

**जाम्बूनादमयं लिङ्गं तत्र तत्र स्म नीयते॥**

**बालुकावेदिमध्ये तु तल्लिङ्गं स्थाप्य रावणः।**

**अर्चयामास गन्धैश्च पुष्पैश्चामृतगन्धिभिः"॥**[58]

एवं लिङ्गतत्त्वस्यास्य प्राप्यत ईदृशोऽप्यर्थान्वितः सूल्लेखः। एतस्यैव लिङ्गस्य चर्चासम्बद्धं ज्योतिर्लिङ्गपरमपि तथ्यमत्र पुरस्कर्तुं शक्यमेव। तथा हि द्वादशज्योतिर्लिङ्गानि तु स्थाननामानुसारीणि पुराणादिषु सुप्रथितान्येव। यथा हि शिवमहापुराणे लिङ्गविषयसम्बद्धा आहोस्विज्ज्योतिर्लिङ्गपरा आप्यन्ते स्थानोल्लेखपुरस्सरं श्लोका इमे ये पूजितप्रस्तराकृतिविशेषार्थस्य लिङ्गस्वरूपस्य प्रतिपादनक्रमे न विद्यन्तेऽप्रासङ्गिकाः –

**"केदारो हिमवत् पृष्ठे डाकिन्यां भीमशङ्करः।**

**वाराणस्यां च विश्वेशस्त्र्यम्बको गौतमीतटे ।।**

**सौराष्ट्रे सोमनाथश्च श्रीशैले मल्लिकार्जुनः।**

**उज्जयिन्यां महाकाल ओङ्कारे चामरेश्वरः॥**

**वैद्यनाथश्चिताभूमौ नागेशो दारुकावने ।**

**सेतुबन्धे च रामेशो घुश्मेशश्च शिवालये"॥**[59]

---

[56] सूतसंहिता, 4/28/35

[57] "ततः स्वलिङ्गचिह्नत्वात् स्तम्भतो निष्कलं शिवः। स्वलिङ्गं दर्शयामास जगतां हितकाम्यया"॥

- शिवमहापुराणम्, 1/5/29

[58] वाल्मीकीयरामायणम्, 31/42-43

[59] श्रीशिवमहापुराणम् , शतरुद्रीयसंहिता 42/2-4

एवं नामग्राहम् एषां द्वादशज्योतिर्लिङ्गानां यत् स्वरूपं तत्तु साक्षाल्लिङ्गशब्दसम्बद्धमेवेति पुराणपरो लिङ्गशब्दविमर्श इति दिक्।

**साहित्यसम्मतश्चिह्नरूपलिङ्गपदार्थविमर्शः**

विवक्षितार्थविशेषस्य बोधकारणेषु च लिङ्गस्य भवति ग्रहणम्।[60] तच्च लिङ्गम् असाधारणधर्मत्वान्नियामकत्वरूपि। तद्यथा- **"कुपितो मकरध्वजः"**[61] इह कोपरूपविवक्षितार्थविशेषबोधाच्चिह्नाद् वा कामदेवार्थो मकरध्वजरूपो गृह्यते न हि सागरराजादिरूपः। साधारणतस्तु लिङ्गशब्दार्थश्चिह्नत्वेन बहुधा प्रयुज्यते। तथा हि वाक्यपदीयवचनमिदम्- **"स्मृतयो बहुरूपाश्च दृष्टादृष्टप्रयोजनाः । तमेवाश्रित्य लिङ्गेभ्यो वेदविद्भिः प्रकल्पिताः"॥**[62] अथ महाभारत-रघुवंश-मुद्राराक्षसादिग्रन्थवचांसि च नैकान्यत्र प्रमाणम्।[63]

एवं विविधा अर्थाः लिङ्गस्य विविधशास्त्रानुसारिण इह प्रतिपादिताः। वस्तुतो व्याकरणसम्मतं स्त्रीपुन्नपुंसकरूपयोनिमत्त्वमर्थमादाय लोके यल्लिङ्गपदार्थः स्वीक्रियतेऽसावेव साहित्येऽपि। परं तत्रापि प्रकृतिपरे निर्जीवे वा वस्तुनि शब्दार्थानुसारि लिङ्गं यन्निर्धार्यते तच्छास्त्रीयमित्यप्यभिधीयते। एवमीदृशस्य प्रसिद्धतरस्य व्याकरणसाहित्यशास्त्रसम्मतस्य लिङ्गस्यार्थविशेषस्त्वग्रिमयोरध्याययो- र्विशिष्य विधास्यते।

---

[60] "संयोगो विप्रयोगश्च साहचर्यं विरोधिता। अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः"॥

"सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः। शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः"॥

- काव्यप्रकाशः, द्वितीयोल्लास उद्धृतम्।

[61] काव्यप्रकाशः, द्वितीयोल्लासः, पृष्ठसङ्ख्या - 65

[62] वाक्यपदीयम् 1/7

[63] "येन लिङ्गेन यो देशो युक्तमभिलक्ष्यते..." – महाभारतम् (आदिपर्व), 1/2/08

"लिङ्गैर्मुदः संवृतविक्रियास्ते...." – रघुवंशम्, 07/30

"स मया क्षपणकलिङ्गधारी...." - मुद्राराक्षसम्, प्रथमोऽङ्कः, पृष्ठसङ्ख्या - 41

## वचनविमर्शः –

व्याकरणानुसारं प्रातिपदिकार्थविषये चैवमभिहितम्– “**एकं द्विकं त्रिकं चेति चतुष्कं पञ्चकं तथा। नामार्थ इति सर्वेऽमी पक्षाः शास्त्रे निरूपिताः**”॥[64] प्रातिपदिकार्थादिविषयान्तर्वर्त्येव वचनतत्त्वमिदं परिगण्यते। एवं प्रकृतिरूपप्रातिपदिकार्थेष्वेव भवत्यन्तर्भावो वचनपदार्थस्यापि। वच परिभाषणे[65] इत्यर्थकाद् धातोर्ल्युटि सति वचनशब्दसिद्धिः। एवं वचनस्यार्थः उच्चारणम्, कथनमात्रं सङ्ख्या च। यद्यपि साङ्ख्यम्, परिसङ्ख्या चेति पदद्वयं साङ्ख्यमीमांसाशास्त्रानुसारेण कथञ्चिद् निवृत्त्यर्थवत्त्वाद् बुद्धिरूपमर्थमेव प्रकटयति तथाऽपि न्यायादिग्रन्थानुसारेण गुणाख्यपदार्थान्तःपरिगणिता सङ्ख्यैकत्वादिव्यवहारहेतुरूपैवोक्ता।[66] व्याकरणानुसारेण तु “**प्रातिपदिकार्थ-लिङ्गपरिमाणवचनमात्रे प्रथमा**”[67] इत्यादिसूत्रवपुषा वचनं सङ्ख्या च समानार्थत्वमेव धत्तः। तस्मादेव “**बहुत्वसङ्ख्या वाच्यत्वेन विधीयते**”,[68] “**प्रोच्यते वचनं सङ्ख्या तथैकवचनादिकम्**”,[69] इत्यादिकं बहुधा व्याख्यायितञ्जातम्। “**चक्षिङ् व्यक्तायां वाचि**”[70] इत्यर्थकाद् धातोः “**चक्षिङः ख्याञ्**”[71] सूत्रेणैतेन ख्याञित्यादेशे सति समुपसर्गपूर्वकस्य सङ्ख्या-शब्दस्यार्थोऽपि वचनमात्रत्वेनैव साधितो दृश्यते। तत एवैकत्वद्वित्वबहुत्व-बोधकत्वेन स्वौजसादीनामेकवचनद्विवचनबहुवचनरूपाः सञ्ज्ञाः। एतादृश-वचनभेदस्थितौ नमः, भूयः इत्याद्यव्ययपदानाम् अव्ययत्वात् सर्वदा समत्वकारणात् स्वादीनां च लुक्त्वादपि बहुवचने भूयांसि, नमांसि इत्येतादृशाः प्रयोगाः कथम्? किमेते साधवोऽसाधवो वा ? अथ

---

[64] वैयाकरणभूषणसारः, नामार्थनिर्णयः, कारिकासङ्ख्या - 25

[65] धातुसङ्ख्या – 1139, 1987 - सिद्धान्तकौमुदी, पृष्ठसङ्ख्या - 395, 423

[66] तर्कसङ्ग्रहः, पृष्ठसङ्ख्या - 15

[67] अष्टाध्यायीसूत्रसङ्ख्या – 2/3/46

[68] काशिकावृत्तिः, 1/4/21

[69] लिङ्गवचनविचारः, पृष्ठसङ्ख्या - 78

[70] धातुसङ्ख्या – 1087 - सिद्धान्तकौमुदी, पृष्ठसङ्ख्या - 391

[71] अष्टाध्यायीसूत्रसङ्ख्या – 2/4/54

**“पृषोदरादीनि यथोपदिष्टम्”**,[72] वेदाः प्रमाणम्, भूयः प्रयोजनानि, भवन्तः पुरस्कारभाजनानि, भवान्नेतस्य पात्रम्, अन्यत्र त्वादरार्थेऽपि मम गुरुचरणाः, अभिनवगुप्तपादाः इत्येवं विधाः नैके प्रयोगास्तावद् व्याकरणशास्त्रीय-विचारपुरस्सरं समीक्षणमपेक्षन्ते। एवमेव सङ्ख्या प्रातिपदिकेनैव वाच्या विभक्तयश्च वचनरूपसङ्ख्याया द्योतिका वा? सङ्ख्याया विभक्तिवाच्यत्वे हि प्रत्ययार्थप्राधान्यात् प्रातिपदिकार्थव्यक्तौ गुणीभावो न भवेत्। किञ्च मधु, वचः, वारि, इत्यादौ विभक्तेरभावेऽप्येकत्वादिसङ्ख्यायाः प्रत्ययेन व्यभिचारात् सङ्ख्याया न विभक्तिवाच्यता। विभक्त्या सङ्ख्या वाच्येति पक्षान्तरम्। तथैवोक्तम्- **“द्योतिका वाचिका वा स्युर्द्वित्वादीनां विभक्तयः”**[73] इत्यादिवचन-पुरस्सरं समुल्लसन्ति शाब्दिकानां विमतयः। केचिद्धि साम्प्रतिकाः भाषासारल्यमुद्दिश्य द्विवचनं निषेधन्त इव दृश्यन्ते। ते हि बालकौ, इत्यादिद्विवचनस्य स्थाने बालकद्वयमिति प्रयुज्य द्विवचनस्यानुपादेयत्वं प्रतिपादयन्ति, किन्त्वर्थभेदादिदं न समीचीनम्। बालकावित्युक्ते द्वित्वविशिष्टौ बालकाविति बोधः। बालकद्वयमित्यत्र तु द्व्यवयवकः समुदाय इति बोधः। ततश्च द्विवचनाभावे बालकयोर्द्वित्वस्य प्रकारतया भानं क्वचिदपि न भवेत्। द्व्यवयवारब्धसमुदायस्यैव शाब्दबोधे विशेष्यता स्यात्। किञ्च द्विवचनाभावेऽश्वि-विशाखा-पुनर्वसुप्रभृतीनां शब्दानाम् अश्विनावित्यादि-प्रयोगो लुप्येत। अतो व्याकरणसम्मतं द्वित्वस्य बोधकं द्विवचनं स्वीकार्यमिति विषयोऽयमपि नूनमवधेयास्पदत्वं सन्तिष्ठते। एवं व्युत्पत्त्यनुसारं व्याकरणानुसारमेव हि वचनशब्दस्यार्थः प्रसिद्धतरः संस्कृतवाङ्मये यस्यार्थं सङ्ख्या कथनं वेति।

साम्प्रतं सङ्ख्यायाः वचनस्य वा माहात्म्यनिभालनं प्रथितसङ्ख्येयानुसारं तावद् विधीयते। तत्र हि प्रथमम् एकसंख्यायाः महत्त्वं संस्कृतवाङ्मये प्रामुख्येन भज्यत एव। यथा उपनिषत्सु दरीदृश्यते एकमेवाद्वितीयं ब्रह्मेत्यादिवचनम्। अन्यान्यप्येतत्तथ्यप्रतिपादकानि वचांस्यस्या एवैकसंख्याया अथ तद्बोध्यप्रथितसंख्येयस्य च तत्र तत्रोप-निषदादिष्वेवावाप्यन्ते –

---

[72] अत्रैव – 6/3/109

[73] लिङ्गवचनविचार इत उद्धृतम्, पृष्ठसङ्ख्या - 78

**"एको देवः सर्वभूतेषु गूढः"**।[74] **"एको हंसो भुवनस्यास्य मध्ये"**।[75] अद्वैतरूपेणाप्युपनिषत्स्वेकत्वस्य ग्रहणं भवति। यथा- **"एको हि रुद्रो न द्वितीयाय तस्थुः"**।[76] **"एकमेवाद्वितीयं ब्रह्म"**।[77] इत्यादि।

व्याकरणेऽपि एकसङ्ख्यायाः महत्त्वमेवं प्राप्यते। य एकोऽल् प्रत्ययो भवति, तस्य "**अपृक्त एकाल् प्रत्ययः**"[78] अमुना सूत्रेण अपृक्तसञ्ज्ञा भवतीति। तथा च एक ईश्वरः, एकः सूर्यः, एकः बौद्धदर्शनस्य विज्ञानपदार्थः, एका पृथ्वी, एकं शुक्राचार्यस्य नेत्रम्, एकः गणेशस्य दन्त इत्यादय एकसंख्यत्वेन प्रसिद्धाः सन्तीति।

द्विर्वचन-द्वित्वाम्रेडित[79]-वीप्सा-द्वय-युग-युगलाद्यो द्विसंख्यायाः वाचिकाः भवन्ति सञ्ज्ञाः। तावद्धि द्विसङ्ख्यया ज्ञेयानि भवन्तीमान्युदाहरणानि- सुखं-दुःखं, सष्टिः-लयः, शुभम्-अशुभं, लाभः-अलाभः, कारणं-कार्यम्, पुण्यं-पापम्, सत्यम्-असत्यम्, जयः-पराजय। उत्तरायणं-दक्षिणायनम्। कृष्णपक्षः- शुक्लपक्षः, परा अपरा इत्यादीनि।

द्विसङ्ख्याऽनन्तरमिमानि त्रिसङ्ख्याया उदाहरणानि प्रस्तूयन्ते। ईश्वरो, जीवः, प्रकृतिः, एतेषां त्रयाणां ज्ञाने सति ब्रह्मसाक्षात्कारो भवति।

यथोल्लिखितम् -

**"अनन्तश्चात्मा विश्वरूपो ह्यकर्ता त्रय यदा विन्दते ब्रह्ममेतत्"**॥[80]

---

[74] श्वेताश्वतरोपनिषद् - 6/10

[75] अत्रैव - 6/11

[76] अत्रैव - 3/2

[77] छान्दोग्योपनिषत् – 6/2/1

[78] अष्टाध्यायीसूत्रसङ्ख्या - 1/2/41

[79] "तस्य परमाम्रेडितम्", अत्रैव – 8/1/2

[80] श्वेताश्वेतारोपनिषद् 1/3

"त्रयः अग्नयः"- वडवाग्निः, जठराग्निः, दावाग्निः इति। "त्रयः कालाः" - भूतकालो वर्तमानकालो भविष्यकालः। "त्रयो जीवाः" - जलचरः, थलचरः, नभचर इति।

"त्रीणि दुःखानि"- आध्यात्मिकदुःखम्, आधिभौतिकदुःखम्, आधिदैविकदुःखम्।

"त्रयो देवाः"- ब्रह्मा, विष्णुः, महेशः । "त्रयो दोषाः"- वात-पित्त-कफाभिधाः। "त्रयो रामाः"- परशुरामः, श्रीरामः बलरामः । "त्रीणि ऋणानि"- पितृणम्, ऋष्यृणं, देव-ऋणम् । "त्रिवर्गः" - धर्म, अर्थः, काम इति। "तिस्रः शब्दशक्तयः"- अभिधा, लक्षणा, व्यञ्जना। "त्रयो गुणाः" - सत्त्वगुणः, रजोगुणः, तमोगुणः। "तिस्रो धनगतयः"- दानं भोगो नाशः। "पिटकत्रयम्"- सूत्रपिटकम्, विनयपिटकम्, अभिधम्मपिटकमिति। "बृहत्त्रयी"- किरातार्जुनीयम्, शिशुपालवधम्, नैषधीयचरितम्। "व्याकरणस्य मुनित्रयम्"- पाणिनिः, कात्यायनः, पतञ्जलिः इत्यादयः त्रिसङ्ख्यावाचकाः शब्दाः संस्कृतवाङ्मये प्रसिद्धाः सन्तीति।

तुरीयः, तुर्यः, इत्यादिशब्देनापि त्रिसंख्याग्रवर्ती चतुश्शब्दो व्यह्रियते। भारतवर्षे "चत्वारि तीर्थस्थलानि प्रसिद्धानि" जगन्नाथधाम, रामेश्वरधाम, द्वारिकाधाम, बद्रीनाथधाम चेति। "चत्वारि युगानि" - सत्ययुगम्, त्रेतायुगम्, द्वापरयुगम्, कलियुगम्। "चत्वारो वर्णाः" - ब्राह्मणः, क्षत्रियः, वैश्यः, शूद्रः। "चत्वारः पुरुषार्थाः"- धर्मार्थकाममोक्षाश्चेति। "चत्वार आश्रमाः"- ब्रह्मचर्याश्रमः, गृहस्थाश्रमः, वानप्रस्थाश्रमः, संन्यासाश्रमः। "चतस्रो वयोऽवस्थाः"- बाल्यं कौमारं यौवनं वार्धक्यमिति। "चत्वार उपायाः"- सामदामदण्डभेदरूपा इत्येवमादयः शब्दाः चतुःशब्देन संयुताः सन्तः प्रसिद्ध्यन्ति।

पञ्चशब्दस्य महत्त्वं तावत् सरण्यामेवास्याम्। यथा - विद्यार्थिनां पञ्चलक्षणन्तु अतिप्रसिद्धं वर्तते।

यथोक्तम्- **“काकचेष्टा बको ध्यानं श्वाननिद्रा तथैव च।**
**अल्पाहारी, गृहत्यागी, विद्यार्थिपञ्चलक्षणम्”॥**

पञ्च यमा: - **“अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः”।**[81]

पञ्च नियमा: - **“शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः”।**[82]

पञ्च कर्माणि- **“उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनानि”।**

पञ्च क्लेशाः- **“अविद्याऽस्मितारागद्वेषाभिनिवेशाः क्लेशाः”।**[83]

“पञ्चभूतानि”- पृथिवी, जलं, तेज:, वायु:, आकाश इति।

“पञ्चतन्मात्राणि”- गन्ध:, रस:, रूपं, स्पर्श:, शब्द:।

“पञ्चवायु:” – **“हृदि प्राणो गुदेऽपान:, समानो नाभिमण्डले।**
**उदान: कण्ठदेशस्थो व्यान: सर्वशरीरग:”॥**[84]

“पञ्चकोशा:”- अन्नमयकोश: प्राणमयकोश:, मनोमयकोशः, विज्ञानमयकोश:, आनन्दमयकोश:। “पञ्चज्ञानेन्द्रियाणि”- श्रोत्रं त्वक्चक्षुर्जिह्वा घ्राणञ्चेति। “पञ्चकर्मेन्द्रियाणि”- वाक्पाणिपादपायूपस्थाख्यानि। “पञ्चावयववाक्यम्”- प्रतिज्ञा, हेतु:, उदाहरणम्, उपनय:, निगमनमिति।

---

[81] योगसूत्रम् – 2/30

[82] योगसूत्रम् – 2/32

[83] योगसूत्रम् – 2/3

[84] तर्कसङ्ग्रहः, पृष्ठसङ्ख्या – 11

"पञ्चमहायज्ञाः"- **"अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम्।**

**होमो दैवो बलिर्भूतो नृयज्ञोऽतिथिपूजनम्"॥**[85]

अतः षट्सङ्ख्यायाः महत्त्वन्तु एभ्य उदाहरणेभ्यः स्पष्टीभवति। "षड् ऋतवः"- ग्रीष्मः, वर्षा, शरद्, हेमन्तः, शिशिरः, वसन्तः। "षड् रिपवः"- कामः, क्रोधः, लोभः, मोहः, मदः, मात्सर्यम्। ब्राह्मणस्य षट् कर्माणि-

**"अध्यापनमध्ययनं यजनं याजनं तथा दानं प्रतिग्रहं चैव"।**[86]

षट् चक्रम्– मूलाधारचक्रम्, अधिष्ठानचक्रम्, मणिपूरचक्रम्, अनाहतचक्रम्, विशुद्धचक्रम्, आज्ञाचक्रञ्च। षट् दर्शनानि- सांख्यदर्शनं योगदर्शनं न्यायदर्शनं वैशेषिकदर्शनं मीमांसादर्शनं वेदान्तदर्शनं च।

षड् वेदाङ्गानि-

**"छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।**
**ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते"॥**[87]
**"शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।**
**तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते"॥**[88]

षट्सङ्ख्याया अनन्तरं प्रथितसप्तसङ्ख्यायाः स्वरूपं प्रथितिप्राप्तैरेवो-दाहरणैः प्रतिपादयितुं शक्यते। तद्यथा- "सप्तस्वराः"- षड्ज-ऋषभ-गान्धार-मध्यम-पञ्चम-धैवताः। "सप्तवासराः"- सोमवासरः, मङ्गलवासरः, बुद्धवासरः, बृहस्पतिवासरः, शुक्रवासरः, शनिवासरः, रविवासरः। "सप्त ऊर्ध्वलोकाः"-

---

[85] मनुस्मृतिः 3/70

[86] अत्रैव - 1/88

[87] पाणिनीयशिक्षा, कारिका - 41

[88] अत्रैव, कारिका – 42

भूर्भुवस्स्वर्महर्जनस्तपस्सत्यानि।[89] “सप्त अधोलोका:- अतलवितलसुतल-रसातलतलातलमहातलपातालानि। “सप्तर्षय:”- कश्यप:, अत्रि:, भारद्वाज:, गौतम:, विश्वामित्र:, जमदग्नि: वसिष्ठ:। “रामायणे सप्तकाण्डानि”- बालकाण्डम्, अयोध्याकाण्डम्, अरण्यकाण्डम्, किष्किन्धाकाण्डम्, सुन्दरकाण्डम्, युद्धकाण्डम्, उत्तरकाण्डमिति।

संस्कृतवाङ्मये अष्टसङ्ख्याया: महत्त्वमेभिर्वचनैः परिशीलयितुं शक्यम्। यथा हि “अष्टौ विवाहा:”- ब्राह्मविवाह:, दैवविवाहः, आर्षविवाह:, प्राजापत्यविवाह:, आसुरविवाह:, गान्धर्वविवाहः, राक्षसविवाहः, पैशाचविवाहः।[90]

योगाभ्यासे अष्टाङ्गम्- **“यमनियमासनप्राणायामप्रत्याहारधारणा-ध्यानसमाधयोऽष्टावङ्गानि”।**[91]

“अष्टौ दिग्गजा:”- ऐरावत:, पुण्डरीक:, वामन:, कुमुदः, अञ्जन:, पुष्पदन्त:, सार्वभौम:, सुप्रतीक:। “अष्टौ महासिद्धय:”- अणिमा, महिमा, लघिमा, गरिमा, प्राप्ति:, प्राकाम्यम्, ईशिता, वशिता। “साष्टाङ्गनमस्कार:”- पद्भ्यां जानुभ्यां पाणिभ्याम् उरसा धिया शिरसा वचसा दृष्ट्या चेति।

अष्टसङ्ख्याया अनन्तरं नवसंख्याया: माहात्म्यमप्येवं प्राप्यते - “नवद्रव्याणि”- **द्रव्याणि पृथिव्यप्तेजोवाय्वाकाश-कालदिगात्मामनांसि नवैव।**[92] “नवदुर्गा:”- शैलपुत्री, ब्रह्मचारिणी, चन्द्रघण्टा, कूष्माण्डा, स्कन्दमाता, कात्यायनी, कालरात्रि:, महागौरी, सिद्धिदात्री। “नवग्रह:”- सूर्य:, चन्द्र:,

---

[89] वेदान्तसारः, पृष्ठसङ्ख्या - 87

[90] मनुस्मृतिः

[91] योगसूत्रम् – 2/29

[92] तर्कसङ्ग्रहः, पृष्ठसङ्ख्या - 3

मङ्गलः, बुधः, बृहस्पतिः शुक्रः, शनैश्चरः, राहुः, केतुः। "विक्रमस्य नवसभारत्नानि"- धन्वन्तरिः, क्षपणकः, अमरसिंहः, शङ्कुः, वेतालभट्टः, घटकर्परः, कालिदासः, वराहमिहिरः, वररुचिः। "नवरसाः"- शृङ्गारः, हास्यः, करुणः, रौद्रः, वीरः, भयानकः, बीभत्सः, अद्भुतः, शान्तश्चेति।

दशसङ्ख्यायाः कतिचनोदाहरणानि प्रसिद्धानि सन्ति, तान्यत्र प्रस्तूयन्ते।

दशधर्मलक्षणानि -

**"धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।**

**धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्"।।** [93]

"दशावताराः"- मत्स्यावतारः, कूर्मावतारः, वराहावतारः, नरसिंहावतारः, वामनावतारः, परशुरामावतारः, रामावतारः, कृष्णावतारः, बुद्धावतारः, कल्क्यवतारः। "दश दिशाः"- पूर्वदिशा पश्चिमदिशा उत्तरदिशा दक्षिणदिशा आग्नेयदिशा नैऋत्यदिशा ईशान्यदिशा वायव्यदिशा ऊर्ध्वदिशा अधरदिशा। इत्यादीनि विविधान्युदाहरणस्वरूपाण्युपस्थापयितुं शक्यन्ते।

एकादशसङ्ख्यायाः स्वरूपमुदाहरणानुकूलं सम्प्रत्युल्लिख्यते। "एकादशोपनिषद्"- ईशोपनिषद्, केनोपनिषद्, कठोपनिषद्, प्रश्नोपनिषद्, मुण्डकोपनिषद्, माण्डूक्योपनिषद्, तैत्तिरीयोपनिषद्, बृहदारण्यकोपनिषद्, ऐतरेयोपनिषद्, छान्दोग्योपनिषद्, श्वेताश्वतरोपनिषद्। "एकादश रुद्राः"- महादेवः, शिवः, रुद्रः, शङ्करः, नीललोहितः, ईशानः, विजयः, भीमः, देवदेवः, भवोद्भवः, आदित्यश्च। एभ्यः शब्देभ्यः एकादशशब्दस्य प्रसिद्धिः स्पष्टायते।

द्वादशशब्दस्य माहात्म्यमित्थमुच्यते- "द्वादश ज्योतिर्लिङ्गानि"-

[93] **मनुस्मृतिः**, 6/92

**“सौराष्ट्रे सोमनाथं च श्रीशैले मल्लिकार्जुनम्**

**उज्जयिन्यां महाकालमोङ्कारममलेश्वरम् ॥**

**परल्यां वैद्यनाथं च डाकिन्यां भीमशङ्करम् ।**

**सेतुबन्धे तु रामेशं नागेशं दारुकावने ॥**

**वाराणस्यां तु विश्वेशं त्र्यम्बकं गौतमीतटे ।**

**हिमालये तु केदारं घुश्मेशं च शिवालये”॥** [94]

“द्वादशादित्या:”- मित्र:, रवि:, सूर्य:, भानु:, खग:, पूषा, हिरण्यगर्भ:, मरीचि:, आदित्य:,सविता, अर्क:, भास्कर:। “द्वादश मासा:”- चैत्रमास:, वैशाखमास:, ज्येष्ठमास:, आषाढमास:, श्रावणमास:, भाद्रमास:, आश्वयुज्मास:, कार्तिकमास:, मार्गशीर्षमास:, पुष्यमास:, माघमास: फाल्गुनमास:। “द्वादश राशय:”- मेष:, वृषभ:, मिथुन:, कर्क:, सिंह:, कन्या, तुला, वृश्चिक:, धनु:, मकर:, कुम्भ:, मीनश्चेति।

विशिष्टसङ्ख्यासमन्वितं साम्प्रतं किञ्चित् पदमाश्रित्य केचन प्रसङ्गाः विस्तरेण विविच्यन्ते।

तत्रादौ वेदत्रयी चत्वारो वा वेदाः इत्येतत् तथ्यमाधृत्यापि सङ्ख्यागतो वचनपरो वा विमर्शावसरश्शिष्यते। त्रयीति पदेनर्ग्यजुस्सामवेदा एव प्रसिद्धिवशादुल्लिखिता जायन्ते। “**ऋग्वेदो देवदैवत्यो यजुर्वेदस्तु मानुषः। सामवेदः स्मृतः पित्र्यः”**[95] इत्येतेन वचनेन यद्यपि क्रमशो दैवमानुष-पित्र्यरूपेणोपकल्पितत्वमथ च वराहपुराणोक्तनारायणब्रह्मरुद्ररूपेण क्रमश ऋग्यजुस्सामवेदानां[96] त्रयाणाम्महत्त्वानुसारेण क्रमिकत्वम्प्रकटितं भवति। एवमेवान्यत्र “वेदानां सामवेदोऽस्मि” इति श्रीमद्भगवद्गीताया दशमाध्याय-

---

[94] स्तोत्ररत्नावली

[95] मनस्मृतिः, 4/124, पृष्ठसङ्ख्या - 135

[96] वराहपुराणम् , 2/76-80, पृष्ठसङ्ख्या - 03

स्थश्लोकस्यानुशीलनेन **"प्राणः सामवेदः"**,[97] इति बृहदारण्यको-पनिषद्वचसाऽवलोके वेदेषु सामवेदस्यैवाधिकम्महत्त्वम्भवति विशदितम्। सत्स्वेवम्भूतेषु प्रमाणेषु न ह्यथर्ववेदस्य माहात्म्यञ्जायते न्यूनम्। तथा हि प्रसिद्धिः- **"ऋग्यजुःसामवेदास्त्रयी आथर्वणश्च तुरीयः। तत्रार्थव्यवस्थितपादा ऋचः। ताः सगीतयः सामानि। अच्छन्दांस्यगीतानि यजूंषि। ऋचो यजूंषि सामानि चाथर्वणं त इमे चत्वारो वेदाः"॥**[98] अन्यत्र तु चतुर्णां वेदानामथर्वो हि वेदः सर्वोत्तमः प्रोक्तः– **"अथर्वाङ्गिरसी ह्येषा श्रुतीनामुत्तमा श्रुतिः। अविचार्य्यैव कार्यैषा श्रेयस्कामैर्नरैः सदा"॥**[99] महाभाष्यकृतः[100] पतञ्जलेर्मतानुदिशा व्यवहरता न्यायमञ्जरीकारेण जयन्तभट्टेनाथर्ववेदस्य स्थानं वेदानां सर्वोपर्युररीकृत्याथर्ववेदस्योल्लेखः- **"तत्र वेदाश्चत्वारः प्रथमोऽथर्ववेदः, द्वितीय ऋग्वेदः"**[101] इत्यादिना सर्वतः प्राक्कृतः। एवमथर्ववेदमाहात्म्यस्य मूलम्ब्रह्मविद्याया अत्र प्राधान्येन सुविन्यासम् अथर्त्विजाम्ब्रह्मणः प्राधान्यमेवेति मन्तुं शक्यते। तथा हि प्रोक्तमस्य वेदस्य ब्रह्मतत्त्वयुतत्वम् मुण्डकोपनिषदि- **"अथर्वणे यां प्रवदेत ब्रह्माऽथर्वा तं पुरोवाचाऽङ्गिरे ब्रह्मविद्याम्"।**[102]

अथर्ववेदसम्बद्धस्य ब्रह्मणो यज्ञानुष्ठाने सर्वाधिकम्प्राधान्यमपि सायणाचार्य्यवचनद्वारा स्वतो विशदितञ्जायते।[103] यद्यपि त्रयाणां वेदानामुल्लेखश्चतुर्णाञ्च वेदानाञ्च मतम्पृथक्-पृथग् बहुत्रावाप्यते। तद्यथा त्रयीति पदेन त्रयाणां वेदानामुद्घोषकम्मनुस्मृतिवचनमिदम् -

---

97 बृहदारण्यकोपनिषद् 1/5/4, ईशादिविंशोत्तरशतोपनिषदः, पृष्ठसङ्ख्या- 91

98 काव्यमीमांसा (प्रथमाध्यायमारभ्य पञ्चमाध्यायपर्यन्ता), द्वितीयोऽध्यायः, पृष्ठसङ्ख्या - 07

99 महाभारतम् (चतुर्थ खण्ड), कर्णपर्व, 69/85, पृष्ठसङ्ख्या - 3991

100 "व्याकरणमहाभाष्यकृतस्तु अथर्वयजुर्ऋक्सामवेदा इति वेदानां क्रममातिष्ठन्ते"।

न्यायमञ्जरी (सूर्यनारायणशुक्लशर्म्मकृतविवरणादुद्धृतम्), पृष्ठसङ्ख्या - 03

101 अत्रैव, प्रमाणप्रकरणम्, पृष्ठसङ्ख्या - 02

102 मुण्डकोपनिषद् 1/2, ईशादिविंशोत्तरशतोपनिषदः, पृष्ठसङ्ख्या - 16

103 "तत्र होत्रादयस्त्रयो मिलित्वा वाग्रूपं यज्ञमार्गं संस्कुर्वन्ति, ब्रह्मा त्वेक एव मनोरूपं यज्ञमार्गं कृत्स्नमपि संस्करोति। तस्मादस्यास्ति सामर्थ्यमिति"। - ऋग्वेदभाष्यभूमिका, पृष्ठसङ्ख्या - 16

**"अग्निवायुरविभ्यस्तु त्रयं ब्रह्म सनातनम्।**

**दुदोह यज्ञसिद्ध्यर्थमृग्यजुःसामलक्षणम्"॥** [104]

**"त्रयी वै विद्या ऋचो यजूंषि सामानि"**[105] इत्येतद्वचनमपि त्रयाणां वेदानां सत्ताम्प्रख्यापयति। अपि च चत्वारश्च वेदा इत्येवं कथनं शतपथ-ऐतरेय-गोपथब्राह्मणेषु तैत्तिरीयसंहिता-तैत्तिरीयारण्यक-श्रौतसूत्र-महाभारत-वचनेषु[106] प्राप्यते। तथाऽप्येकेषाम्मतानुसारेणाथर्ववेदो पश्चात्कालिक एव, त्रयाणां वेदानामेव पुरुषसूक्तादिषूक्तत्वात्।[107] किमधिकम्, स्वयमथर्ववेद-वचनम् अप्येतन्मतमेवाभिव्यञ्जयति- **"ऋचः सामानिच्छन्दांसि पुराणं यजुषा सह। उच्छिष्टाज्जज्ञिरे सर्वे दिवि देवा दिवि श्रिताः"॥**[108]

त्रयीति पदं तु स्वरूपभेदात्मकं केवलं वेदविभागं विशदयतीति वक्तुं शक्यते। येषु मन्त्रेषु पादव्यवस्था स्यात् सा हि ऋक् तद्वेदश्चर्ग्वेद इत्युच्यते, आस्वेवर्चासु गेयात्मकतामाधृत्य सामाख्यो वेदोऽभिधीयते, ऋक्सामस्वरूपातिरिक्तानाम्मन्त्राणामभिधा यजुस्तद्वेदश्च यजुर्वेद इति प्रोच्यते।[109] अपि चाकारोकारमकारसंहतिरूपा वेदाः,[110] भूर्भुवःस्व इत्येतत्संहतेश्च प्रातिनिध्यवाहका ऋग्यजुःसामाख्या इमे त्रयो वेदा इति सङ्केतितमवाप्यते मनुस्मृत्याम्। यथोक्तन्तत्र- **"अकारञ्चाप्युकारञ्च मकारञ्च प्रजापतिः। वेदत्रयान्निरदुहद् भूर्भुवःस्वरितीति च॥ त्रिभ्य एव तु वेदेभ्यः**

---

[104] मनुस्मृतिः 1/23, पृष्ठसङ्ख्या - 05

[105] वैदिक साहित्य और संस्कृति (इत उद्धृतम्), पृष्ठसङ्ख्या - 15

[106] क्रमशः 5/33, 1/9, 10/07/02, 2/8, 10/18, द्रोणपर्व 51/24

- अत्रैव (इत उद्धृतम्),पृष्ठसङ्ख्या - 16

[107] "तस्माद् यज्ञात् सर्वहुत ऋचः सामानि यज्ञिरे, छन्दांसि यज्ञिरे, तस्माद्यजुस्तस्मादजायत"।

यजुर्वेदः 31/7 - अत्रैव, पृष्ठसङ्ख्या -15-16

[108] अथर्ववेदः – 11/7/24 - संस्कृतसाहित्येतिहासः (अत्रोद्धृतम्), पृष्ठसङ्ख्या - 22

[109] "तेषामृग् यत्रार्थवशेन पादव्यवस्था" – जैमिनिसूत्रम् 2/1/35,

गीतिषु सामाख्या – जैमिनिसूत्रम् 2/1/36,

"शेषे यजुःशब्दः" – जैमिनिसूत्रम् 2/1/37 - संस्कृतसाहित्यकोशः, पृष्ठसङ्ख्या - 532

[110] माण्डूक्योपनिषद् 1, ईशादिविंशोत्तरशतोपनिषदः, पृष्ठसङ्ख्या - 20

**पादम्पादमदूदुहत्। तदित्यृचोऽस्याः साविञ्याः परमेष्ठी प्रजापतिः"॥**[111] एतद्धि राजशेखरोऽपि मनुते।[112] इदं हि तावत् वेदत्रयी इत्येतत्पदगतं शास्त्रतत्त्वम्। वस्तुतश्चतुर्धा वेदप्रकारविचारोऽपि त्रयीपदविचारसम्पृक्त एव। कवयोऽपि नैके **"गुरुयजमानगातृहोतृप्रभृतिभिः"**[113] इत्यादिभिर्वचोभिर्होत्र्युद्गात्रध्वर्युब्रह्मेत्येते चत्वार ऋत्विजः सन्त्येव सङ्केतितास्तस्माच्चतुर्धाऽपि वेदविभागस्तावदिह विविच्यते। इमे हि चत्वारो वेदाः संहिताऽधारेणैव विभज्यन्त इत्यवधेयम्। यतो मन्त्रात्मकाः संहिता विषयवस्त्वाधारेण चतुष्प्रकारका भवन्ति-ऋक्संहिता-सामसंहिता-यजुःसंहिता-अथर्वसंहिताभेदात्। यतश्च यज्ञा-नुष्ठानार्थम् एव प्रतिसंहिताऽनुसारेण चतुर्धात्विजो होतृ-उद्गातृ-अध्वर्य्यु-ब्रह्मभेदात् कल्पन्ते, प्रसिद्धिश्च चतुर्णामृत्विजां क्रमशो देवताप्राशस्त्य-पराणाम्मन्त्राणामृग्वेदस्थानां विधिपूर्वकमुच्चारणम्, सामवेदस्थानाम्मन्त्राणां सस्वरमुच्चारणम्, यजुर्वेदस्थैर्मन्त्रैर्विधिपूर्वकं यज्ञसम्पादनम्, अथर्ववेद-स्थानाम्मन्त्राणामालोके सर्वविधविघ्नानां समाधानं यज्ञनिरीक्षणञ्चेत्येतेषां यज्ञसम्पृक्तकर्म्माणीति।[114] यद्यप्युल्लिख्यन्ते गौणाः[115] प्रशास्ता-प्रतिप्रस्थाता-ब्राह्मणाच्छंसि-प्रस्तोतारश्चर्त्विजोऽपि तथाऽपि होत्र्युद्गात्रध्वर्य्युब्रह्मेति चतुर्णाम्प्रमुखानां प्रसिद्धानामृत्विजाञ्च कर्माण्यन्यत्रैवं साररूपेणोल्लिखितानि-**"एष ह वै यज्ञो योऽयं पवत एष ह यन्निदं सर्वं पुनाति यदेष यन्निदं सर्वं पुनाति तस्मादेष एव यज्ञस्तस्य मनश्च वाक् च वर्त्तनी। तयोरन्यतरां मनसा संस्करोति ब्रह्मा, वाचा होताऽध्वर्य्युरुद्गातान्यतरां स यत्रोपाकृते प्रातरनुवाके पुरा परिधानीयाया ब्रह्मा व्यवदतति"॥**[116] तस्मादपि चतुर्वेदतया वेदस्वरूपं विशदीजायते। अन्यत्तु ब्रह्मणश्चतुर्भ्यो मुखेभ्यः पृथक् पृथग् वेदा आविर्भूता[117] इत्यपि पूर्वोक्तमत्स्यादिपुराणकथनम्भवितु-मर्हमेतत्तत्त्वविशदयितृ वचनम्,

---

[111] मनुस्मृतिः 2/76-77, पृष्ठसङ्ख्या - 36

[112] "तान्येतानि कृत्स्नामपि भूर्भुवःस्वस्त्रयीं व्यासज्य वर्तन्ते"।

- काव्यमीमांसा (प्रथमाध्यायमारभ्य पञ्चमाध्यायपर्यन्ता), द्वितीयोऽध्यायः, पृष्ठसङ्ख्या - 14

[113] द्रष्टव्यः, परिशिष्टान्तर्गतशिवशतकस्थोऽष्टत्रिंशत्सङ्ख्याकश्लोकः।

[114] वैदिक साहित्य का इतिहास, पृष्ठसङ्ख्या – 129-30

[115] द्रष्टव्यम् – वैदिक साहित्य और संस्कृति, पृष्ठसङ्ख्या - 440

[116] छान्दग्योपनिषद् 4/16/1-2, ईशादिविंशोत्तरशतोपनिषदः, पृष्ठसङ्ख्या - 58

[117] "सर्वेभ्य एव वक्रेभ्यस्ससृजे सर्वदर्शनः"॥ - श्रीमद्भागवतमहापुराणम्, 3/12/39, पृष्ठसङ्ख्या - 102

एवं तावच्चतुर्वेदस्वरूपकथनं वेदत्रयीत्यस्य पदस्य त्रयीत्यस्य वा सापेक्षमिति वचनगतमेव किञ्चिद् विशिष्टं तथ्यम्।

वेदसङ्ख्यासम्बद्धात् विचारात् पश्चात् पुराणं हि पञ्चमो वेदः,[118] यद्धि चतुर्दशविद्यास्वन्तर्हितं[119] सद् वेदार्थमेवोपबृंहयतीति प्रथितिपरं पुराणमाश्रित्यापि वचनतत्त्वं विशद्यते। यद्यप्याक्षेपकृद्भिः पुराणानि कपोलकल्पितस्वभावान्न कथमपि भवितुमर्हाणि वेदार्थोपबृंहकाणीति प्रोच्यते तथाऽपि "**पुराणम्मानवो धर्मः साङ्गो वेदश्चिकित्सितम् । आङ्गसिद्धानि सर्वाणि न हातव्यानि हेतुभिः"॥**[120] इति वचनप्रामाण्यमुररीकृत्य पुराणानाम्पञ्चमवेदत्वं वेदार्थोपबृंहणत्वञ्च नितरामक्षुण्णं सन्तिष्ठते। वस्तुतो वेदार्थोपबृंहणत्वमतिरिच्य पुराणानां स्थितिर्वेदेभ्योऽपि प्राचीनतरेति विवादपरकम्प्रथितं ह्यन्यन्मतम्।[121] भागवते तु वेदेभ्यो महत्त्वाधिक्येऽपि पुराणानामुत्पत्तिः पश्चात्कालिकी कथिता।[122] सत्यपि पौराणिके विरोधवचने सम्प्राप्ते पूरणवत्त्वमेव पुराणत्वम्[123] इति लक्षणान्तरम्। पुराणानाम्भेदास्सत्त्वरजस्तमोगुणाधारेण जायत इति प्रथमभेदसरण्यनुसारं शिवपुराणदि-

---

[118] "इतिहासः पुराणञ्च पञ्चमो वेद उच्यते"॥ - (श्रीमद्भागवतमहापुराणम्, 1/7/20)

"इतिहासपुराणम्पञ्चमं वेदानां वेदम्" (छान्दोग्योपनिषद्, 7/1/2)

[119] "पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः ।

वेदास्स्थानानि विद्यानां धर्मस्य च चतुर्दश"॥ (याज्ञवल्क्यस्मृतिः, 1/3)

[120] महाभारतस्यानुशासनपर्ववचनम्, पुराणपर्यालोचनम्, पृष्ठसङ्ख्या - 13

[121] "पुराणं सर्वशास्त्राणाम्प्रथमं ब्रह्मणा स्मृतम् । अनन्तरञ्च वक्त्रेभ्यो वेदास्तस्य विनिर्गताः"॥

- मत्स्यपुराणम्, 53/3

[122] "ऋग्यजुःसामाथर्वाख्यान् वेदान् पूर्वादिमुखैः । शास्त्रमिज्यां स्तुतिस्तोमम्प्रायश्चित्तं व्यधात् क्रमात् ॥

इतिहासपुराणानि पञ्चमं वेदमीश्वरः । सर्वेभ्य एव वक्त्रेभ्यस्ससृजे सर्वदर्शनः"॥

- श्रीमद्भागवतमहापुराणम्, 3/12/37,39

[123] "इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् । इति पूरणात् पुराणमिति चान्यत्र। न चावेदेन वेदस्य बृंहणं सम्भवति, नह्यपूर्णस्य कनकवलयस्य त्रपुणा पूरणं युज्यते"।

- भागवतसन्दर्भः, पृष्ठसङ्ख्या - 17

कन्तामसमिति पद्मादिपुराणवचनम्,[124] अथ पुराणानि हीमानि मुख्यतया पुराणोपपुराणोपोपपुराणेत्युल्लेखेन भवन्ति त्रेधा भक्तानीत्यपि प्रथितं तथ्यम्।

पुराणसङ्ख्यासमाश्रिते विभाजने हि सर्वत्राष्टादशसङ्ख्यायुतत्वं प्रधानायते।[125] तत्राष्टादशपुराणानि हि प्रथितान्येव–

**"दशधा चाष्टधा चैतत् पुराणमुपदिश्यते ।**

**बृहत्सूक्ष्मप्रभेदेन मुनिभिस्तत्त्ववित्तमैः ॥**

**ब्राह्मम्पाद्मं वैष्णवञ्च शैवम्भागवतन्तथा ।**

**भविष्यन्नारदीयञ्च मार्कण्डेयमतः परम्॥**

**आग्नेयम्ब्रह्मवैवर्तं लैङ्गं वाराहमेव च।**

**स्कान्दञ्च वामनञ्चैव कौर्मम्मात्स्यञ्च गारुडम्॥**

**ब्रह्माण्डञ्चेति पुण्योऽयम्पुराणानामनुक्रमः।**

**तत्र शैवन्तुरीयं यच्छार्वं सर्वार्थसाधकम्"॥**[126]

एष्वष्टादशपुराणेषु दशसङ्ख्याकानि पुराणानि शिवनामकीर्त्तितानीति प्रथ्यते। तद्यथा–

**"अष्टादशपुराणेषु दशभिर्गीयते शिवः ।**

**चतुर्भिर्भगवान् ब्रह्मा द्वाभ्यां देवी तथा हरिः"॥**[127]

शिवपुराणे तु पुराणानां सङ्ख्या षड्-विंशतिरिति निर्दिश्य[128] न नामानि तेषां सङ्गृहीतानि तथाऽपि प्रथितामष्टादशसङ्ख्यामतिरिच्य पुराणस्यायन्निर्देशस्सर्वथा नवीन इत्यपरन्तथ्यम्।

---

124 पद्मपुराणम्, उत्तरखण्डः 236/17,19,20, मत्स्यपुराणम्, 53/68-69

125 "अष्टादशसङ्ख्याया वैशिष्ट्यमेतदाधारञ्च स्पष्टयितुम्मधुसूदनौझावर्य्यस्य बुद्धिवैशद्यविवरणं विशेषेण पुराणपर्यालोचनस्य तृतीये परिच्छेदे परिभावनीयम्"।

126 शिवमहापुराणम् (वायवीयसंहिता, पूर्वभागः, 1/42-45)

127 स्कन्दपुराणम्, 2/30/38

128 "षड्-विंशतिपुराणानां मध्येऽप्येकं शृणोति यः"। - शिवमहापुराणम्, उमासंहिता, 13-41

वस्तुतः सङ्ख्यातत्त्वमेव वस्तुतः वचनमदः पदं प्रख्यापयतीति स्पष्टीकृतम्। व्याकरणसाहित्यशास्त्रीयं वचनतत्त्वगतं विश्लेषणं वस्तुतः शतादिपदानामालोके सविस्तरं शक्यते कर्तुम्। तस्मात् साहित्यशब्दस्य बृहत्परिध्यनुसार्येतदवशिष्टविश्लेषणं प्रारभ्यते। वस्तुतः सङ्ख्यायाः वचनस्य वा माहात्म्यं संस्कृते शतकसाहित्यस्य सुदीर्घपरम्परामनुसृत्य विशेषतो निभालयितुं शक्यते। शतकमस्य पदस्य बीजम्महत्त्वञ्च वैदिकसाहित्येऽपि लभ्यते। यत्र मानवस्य पूर्णमायुश्शतम् इति स्वीकृतम्– **"जीवेम शरदश्शतम्"**,[129] **"जिजीविषेच्छतं समाः"**,[130] इत्यादयो वेदमन्त्राः "**शतायुर्वै पुरुषः**" इति सिद्धान्तं समर्थयन्ते। वस्तुतस्तु जीवनस्य सर्वकर्मस्वेव शतसङ्ख्याया योगाकाङ्क्षा वेदेऽवाप्यते।[131] भगवता पतञ्जलिनाऽपि महाभाष्ये श्रुतिसिद्धान्त एवानूदितः।[132] किमधिकम्, लोके तु खिन्नतायामपि शत्रुजनेभ्यश्शतायुरभिलाषस्य वर्णनमवाप्यते।[133] पुराणादिषु देवानां शतन्नामानि प्रथितानि। आगमादिषु च प्रायशोऽनायासमवाप्तानि दुर्गाकालीशिवविष्णुप्रभृतीनां शतं सहस्रं वा नामान्यपि प्रसिद्धान्येव। शतसाहस्रीसंहितेत्यभिधया च वेदव्यासप्रणीतस्य महाभारतस्यापि नितराम्प्रथितिः। किङ्कर्तव्यविमूढार्जुनकृतदिव्यस्वरूपदर्शनानुरोधानुसारेण

---

129 "तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् । पश्येम शरदः शतं जीवेम शरदः शतं शृणुयाम शरदः शतम्" ॥

शुक्लयजुर्वेदकाण्वसंहिता , 36/24, पृष्ठसङ्ख्या - 335

130 ईशावास्योपनिषद् 2, ईशादिविंशोत्तरशतोपनिषदः, पृष्ठसङ्ख्या – 01

131 "पश्येम शरदः शतम् जीवेम शरदः शतम्। बुध्येम शरदः शतम्, रोहेम शरदः शतम्। पूषेम शरदः शतम्, भवेम शरदः शतम्। भूयेम शरदः शतम्, भूयसीः शरदः शतात्" ॥ (अथर्ववेदः 19/67)

- संस्कृत वाङ्मय का बृहद् इतिहास (प्रथमखण्ड, वेद),भूमिकात उद्धृतम्,पृष्ठसङ्ख्या-06

132 "बृहस्पतिश्च प्रवक्ता, इन्द्रश्चाध्येता, दिव्यं वर्षसहस्रमध्ययनकालो न चान्तं जगाम, किम्पुनरद्यत्वे ? यः सर्वथा चिरञ्जीवति वर्षशतञ्जीवति"।

- पाणिनीयव्याकरणमहाभाष्यम् (प्रथमं खण्डम्), पस्पशाह्निकम्, पृष्ठसङ्ख्या – 54

133 "उपकृतं बहु तत्र किमुच्यते सुजनता प्रथिता भवता परम्।

विदधदीदृशमेव सदा सखे! सुखितमास्व शरदां शतम्" ॥

- साहित्यदर्पणः, द्वितीयः परिच्छेदः, पृष्ठसङ्ख्या- 55

भगवता श्रीकृष्णेन हि स्वदिव्यस्वरूपप्रदर्शनमपि शतशः सहस्रशश्च[134] सङ्ख्यान्विततयैवासीत् कारितम्। पूजनादिक्रमेष्वपि शतम् अष्टोत्तरशत-मित्यस्य सम्पृक्तत्वमीदृश्याः परिमाणात्मिकायाः सङ्ख्याया एव महत्त्वं विशदयति। शतकशब्दस्य व्युत्पत्तिदृष्ट्या हि शतम्परिमाणमस्य शतसङ्ख्याविशिष्टो वेत्यर्थलाभः **"सङ्ख्याया अतिशदन्तायाः कन्",**[135] इति सूत्रसाधनेन जायते। एवं विद्यते संस्कृतसाहित्ये भारतीयसंस्कृतौ च शतकस्य शतसङ्ख्याया वा महत्त्वन्नाविदितम्।

एतादृश्याश्शतकरचनाया रहस्यं सम्पूर्णजीवनसमयलाभः कविकर्मणि पूर्णतायाः प्राप्तिश्चेति स्वीकर्तुं शक्यते। यद्यपि शतककाव्ये शतादप्यधिकाः कतिचन श्लोका भवन्ति तथाऽपि प्राधान्येन शतकमिति व्यपदेशः प्रसिद्धः। शतककाव्ये श्लोकानां सङ्ख्या शतादधिकाऽपि दृश्यते परङ्कदाचिदपि ततो न्यूना नह्येवावाप्यते। सम्भवतश्शताधिकश्लोकप्रणयने "*भूयसीः शरदः शतात्*",[136] इति श्रुतिर्मूलत्वेन स्वीक्रियते। मानवस्य सहज-स्वभावानुगुणश्शताधिकायुरभिलाषश्शताधिकपद्यगुम्फने मूलमिति मन्तुं शक्यते। सर्वेष्वेषु शतककाव्येषु तावल्लौकिकमलौकिकम्माङ्गल्यप्राप्तिरूपञ्च लक्ष्यमन्वेष्टुं शक्यते। तद्यथा नीतिशृङ्गारादीनि लौकिकमाङ्गल्ययुतानि सूर्य-देव्यादीन्यलौकिकमाङ्गल्ययुतानि च तावन्त्यस्य प्रमाणानि।

यद्यपि नहि केवलं शतसङ्ख्याऽन्वितमेव काव्यादिविरचनं प्रसिद्धिमतिशेतेऽपित्वष्ट-दश-द्वादश-पञ्चदश-द्वात्रिंशदष्टोत्तरशतसहस्राष्टोत्तर-सहस्रादिसङ्ख्या अपि तथैव काव्यनाम तद्वपुश्च सीमाङ्कयन्ति। पञ्चापगेशाशास्त्रि(पैङ्गनाडु)-प्रणीतानीमानि काव्यनामानि तावदिह प्रमाणत्वेनोद्धर्तुं शक्यानि। तद्यथा- त्रिपुरसुन्दर्यष्टकोमामहेश्वराष्टक-प्रसन्नवेङ्कटेशाष्टक-सारस्वताष्टक-श्रीसुब्रह्मण्याष्टक-दक्षिणगोकर्णेश्वराष्टक-

---

[134] "पश्य मे पार्थ! रूपाणि शतशोऽथ सहस्रशः। नानाविधानि दिव्यानि नानावर्णाकृतीनि च"॥

श्रीमद्भगवद्गीता (द्वितीयखण्डः), 11/5, पृष्ठसङ्ख्या- 253

[135] अष्टाध्यायीसूत्रसङ्ख्या - 5/1/22

[136] (अथर्ववेदः 19/67), संस्कृत वाङ्मय का बृहद् इतिहास (प्रथमखण्ड, वेद), भूमिकात उद्धृतम्,

पृष्ठसङ्ख्या-06

मरतकातलेश्वराष्टक-लोकमातृद्वादशश्लोकी- सरस्वतीद्वादशश्लोकीपरमशिव-पञ्चदशी-गौरीचरणसप्तति-जगद्गुर्वष्टोत्तरशतकादीनीति[137] ततः सहस्र-सङ्ख्यायुतत्वमपि स्तोत्राणान्नैकशो द्रष्टुं शक्यते, वस्तुतस्सहस्रशब्दोऽय-मनन्तवाची,[138] तस्मादेव स्तोत्रादिषु भगवन्नामानि सहस्रसङ्ख्यया भवन्ति युतानि, विष्णुसहस्रनाम-शिवसहस्रनामश्रीगोसहस्रनामस्तोत्रादीन्यत्र प्रमाण-भूतानि। तत्रापि शतमित्यस्य प्रभावोऽवगन्तुं शक्यत एव। नैकस्तोत्राणामेव प्रणयनं वस्तुतः शतकान्वितानां स्तोत्राणामन्येषाञ्च काव्यानाम्मूलत्वेना-नुसन्धातुं शक्यते।

अत एव नैके महाकवयश्शतककाव्यानि रचयामासुः। तत्र प्राचीनानि सूर्य-चण्डी-देवी-ईश्वर-शिवादीनि शतकस्तोत्रकाव्यानि, नीतिशृङ्गारवैराग्या-दीन्यन्यानि नैकविषयप्रधानानि शतककाव्यानि प्रसिद्धान्येव। अर्वाचीनैरपि काव्यप्रणयनपटुभिः संस्कृतशतकम्, अटलबिहारीवाजपेयिशतकम्, पाथेयशतकम्, अथ ग्रामशतकम्, सिनेमाशतकम् इत्यादीनि विविध-विषयकाणि शतककाव्यानि प्रणीतानि। नव्यास्तु सन्त्येव दत्तचेताः शतककाव्यसमृद्धये प्रवर्तमानाश्च। यथा हि सरण्यामस्यां रामभद्राचार्याभि-राजराजेन्द्रमिश्रादीनां नामानि सन्ति विशेषेणोल्लेखनीयानि, यैर्विविधानि शतककाव्यानि विरच्यन्ते। एवं शतककाव्यानाञ्चिरन्तनी निरवच्छिन्ना च परम्परा स्पष्टा।

परम्परायां ह्यस्यां तादृशानामपि काव्यानाम्प्रणयनञ्जातं येषां सम्बन्धो ग्रन्थसङ्ग्रन्थिगाम्भीर्यस्योन्मेषणेनासीत्। तस्मादेव ज्योतिषविषयकं रत्नशतकम्, हरिभद्रसूरिकृतं योगशतकम्, शिवदत्तशर्मप्रणीतं योगविषयसम्बद्धञ्च सिद्धान्तयोगशतकम्, अन्येषाञ्चैतादृशशतकानां रचना जाता। वस्तुतः शतककाव्यानां विकासक्रममभिलक्ष्य तादृशानामपि रचनानामुल्लेखनं भवितुमर्हम्, येषामाख्याः सन्ति शतकोल्लेखवियुक्ताः, परं तेषां वपुः शतकसङ्ख्ययैव भवति युतम्। पञ्चशतसङ्ख्यासंयुत-ममेरिकावर्णनन्नाम संस्मरणात्मकं मिथिलाप्रसादत्रिपाठिनः काव्यमथ सप्तशतसङ्ख्यासंयुतं गिरिधरशर्मनवरत्नकृता गिरिधरसप्तशत्याख्यं काव्यम्, शिवदत्तशर्मचतुर्वेदिकृतं स्फूर्त्तिसप्तशतीकाव्यम्, राजेन्द्रमिश्रकृतमभिराज-

137 History of Classical Sanskrit Literature, पृष्ठसङ्ख्या- 1009 -10

138 श्रीमद्भगवद्गीता (द्वितीयखण्डः), 7/3 इत्यस्य संस्कृतव्याख्यायाञ्चर्चितः, पृष्ठसङ्ख्या - 06

सप्तशतीकाव्यञ्च[139] तावच्छतककाव्यानां विकासक्रमत्वविवेचनायां तादृशानां शतककाव्यानाम्प्रातिनिध्यमावहतीति तथ्यं वर्त्तते सुस्पष्टम्। तस्मात्तादृशेष्वपि काव्येषु रचनानामुल्लेखश्शतककाव्येष्वेव विधातुं शक्यते, यत्र न भवति प्राथम्येन शतकनामावाप्तिः परं तत्र शतसङ्ख्याया भवत्येव योगः। संस्कृतसाहित्यगतशतकरचनाप्रभावेणान्ये भाषाभाषिका अपि स्वस्वभाषासु शतककाव्यानि व्यरचयंस्तद्यथा हिन्दीभाषाया लेखकैश्श्रीभट्ट-ठाकुर-रघुराजसिंह-जगन्नाथदासरत्नाकराख्यैः क्रमशः युगलशतक-ठाकुरशतक-सुन्दरशतक-उद्धवशतकनामभिश्शतककाव्यप्रणयन-परम्परैवाग्रेसारिता। एवं सूक्ष्मेक्षिकया विकाससरणिं शतककाव्यानाम्प्रवर्धमानाम्पुष्टाञ्च समालोचयितुं शक्यते।

शतककाव्यानि प्रायशः स्तोत्रसाहित्यमेवाधिकं विभूषयन्ति यत्र च देवानान्नामानि भवन्ति संयुतानीति प्रसिद्धमेव तथ्यम्। तद्यथा मयूरप्रणीतं सूर्यशतकम्, बाणभट्टविलिखितं नानकदेवकृतञ्च चण्डीशतकम्, सोमेश्वररचितं रामशतकम्, विद्याकरपुरोहितप्रणीतं नारायणशतकम्, वरदराजाचार्य-कण्णन्विलिखितं लक्ष्मीशतकम्, आनन्दवर्धनप्रणीतं देवीशतकम्, अवतारकविकृतमीश्वरशतकम्, मुद्गलाचार्यलिखितं रामार्याशतकम्, चन्द्रशेखरमिश्रविहितमार्तत्राणनारायणशतकम्, सुन्दरशर्मविहितं शम्भु-शतकम्, ति.गु.वरदाचार्यानूदितं कालहस्तीश्वरशतकं कृष्णशतकञ्चेति शतकद्वयम्, परमड्डीमल्लिकार्जुनकृतञ्च गङ्गाधरशतकम् अक्कमादेवी-शतकमिति शतकद्वयम्, रामभद्राचार्यप्रणीतं राघवेन्द्रशतकादिकम्, प्रस्तुतस्य गोकुलनाथोपाध्यायस्य शिवशतकञ्चात्र दिग्दर्शकमात्रम्।

न देवतानामग्राहकाणि सूर्य-राम-नारायण-लक्ष्मी-शिव-चण्डी-देव्यादीनि शतकानि एव प्रणीतानि भक्तकविभिरपितु देवसंयुतम्पदार्थमपि स्तुत्य तेषु कतिचिद्भिः प्रशंस्यानि शतकानि प्रस्तुतानि, तद्यथा क्रूरनारायणो नाम कविस्तावत् भगवतो विष्णोरायुधं सुदर्शननामचक्रं स्तुत्य सुदर्शनशतकम्[140] इति नाम काव्यं विलेखयामास। भगवतः पादुकामाश्रित्य भक्तकविना वेदान्तदेशिकेनापि पादुकाशतकं व्यधायि।[141] अमङ्गलमपाकर्तुं

---

[139] संस्कृत वाङ्मय का बृहद् इतिहास (सप्तम-खण्ड), पृष्ठसङ्ख्या - 130

[140] संस्कृत साहित्य का इतिहास, पृष्ठसङ्ख्या- 358 (काव्यमालाया अष्टमगुच्छके प्रकाशितमिदं शतकम्)

[141] इहैव, पृष्ठसङ्ख्या- 354

कृतेषु शतककाव्येषु मयूरकविविरचितं सूर्यशतकं क्रूरनारायणप्रणीतञ्च सुदर्शनशतकमत्रोल्लेखार्हम्।

स्तोत्रसाहित्यतोऽतिरिक्तानि भर्तृहरिकृतानि नीति-शृङ्गार-वैराग्यशतकानि तु सन्त्येव सुप्रथितानि। भर्तृहरेश्शतकत्रयमतिरिच्य धनदत्रयं वर्तते शतकेषु प्रसिद्धम्। धनदराजनाम्नः कवेः त्रीणि शतकानि सन्तीमानि - शृङ्गारधनदम्, नीतिधनदम्, वैराग्यधनदञ्चेति।[142] आधुनिकस्य च शिवज्युपाध्यायस्यापि वर्तते शतकत्रयनामा कश्चन त्रिभिश्शतकैरन्वितः प्रबन्धः। अमरुककवेरमरुशतकमपि वर्तते बहुप्रसिद्धम्। अस्मिन् क्रमे चतुर्वेदेभ्यः पृथक्-पृथक् शतसङ्ख्याऽऽत्मकानां सारभूतविवेचनादीनां सङ्ग्रहणेन सम्पादितं चतुर्वेदशतकमित्यभिधं शतकन्तावच्छतक-काव्यशिरोमणिरूपमेवेति, तादृशैर्मनीषिभिः कविभिः प्राथम्येन सङ्कलितस्य पुनरेतद्विशिष्टपरिमाणरूपसङ्कलनत्वादिति वक्तुं शक्यम्। मोहनमिश्रप्रणीतं राधानयनद्विशतीत्याख्यं विशिष्टं द्विशतकं काव्यमपि शतककाव्येष्ववश्यम-द्वितीयत्वाद् राजते। चीनदैशिकेत्सिङ्द्वारा प्रशंसितञ्चतुश्शतकम्,[143] अध्यर्धशतकमिति बौद्धस्तोत्रस्य द्वे विशिष्टे शतके तावच्छतक-काव्यगणनाप्रसङ्गे विशिष्येते। चतुश्शतकम् अध्यर्धशतकञ्च नाम्नोरनुरूपं क्रमशश्चतुश्शतश्लोकान्वितमेकपञ्चाशच्छलोकान्वितञ्च तिब्बती-सङ्ग्रहालया-ल्लब्धुं शक्येते। सम्भवत एते पूर्णतया प्रकाशनतामपि गते स्यातामिति तु भिन्नान्वेषणप्रसङ्गत्वान्नेहाधिकं विविच्यते।[144] शतकयोरनयो रचनाकारो मातृचेटनामा कश्चिद् बौद्धस्सम्राजः कनिष्कस्यासीत् समकालिक इति वर्ततेऽत्र विशेषम्।[145] वस्तुतः सन्त्यनेकानि शतकानि तादृशान्यपि येषाम्प्रकाशन-मद्यावधि न जातानि। एवं शतककाव्यानि शतकानि वाऽन्यानि बहूनि भवितुमर्हन्तीति निःसंशयम्।

---

[142] काव्यमाला (त्रयोदशो गुच्छकः), पृष्ठसङ्ख्या- 33

[143] "These charming compositions are equal in beauty to the heavenly flowers, and the high principles which they contain rival indignity the lofty peaks of a mountain."

– संस्कृत साहित्य का आलोचनात्मक इतिहास (अत्रोद्धृतम), पृष्ठसङ्ख्या- 541

[144] राधानयनद्विशती, भूमिकायाम्, पृष्ठसङ्ख्या - 03

[145] तत्रैव, पृष्ठसङ्ख्या - 03

मुस्लिमविद्वद्भिरपि नैकानि संस्कृतग्रन्थरत्नान्यनूदितानि विलिखितानि चेति सुविदितमेव । एतेषु च ग्रन्थरत्नेषु केषाञ्चिच्छतकानामपि काव्यानां समुपलब्धिरेतदेव विशदयति। रहीमकविविलिखितं जगन्नाथशास्त्रिणा चानूदितं रहीमजगन्नीतिशतकम्, अन्येन केनचिद् विदुषा प्रणीतं यवनराजनीतिशतकं[146] चात्र विशेषत उल्लेखार्हे। एवं नीत्याधृतमन्यदपि शतककाव्यम्मुस्लिमविद्वदतिरिक्तेनैकेन धीमता विदुरनीतिशतकमित्येतन्नाम्ना साधु समुपस्थापितमस्ति। चाणक्यशतकञ्च चाणक्यकृतमेतेषु प्रसिद्धतरमिति नापेक्षते किमपि प्रमाणवचनम्।

अन्यान्यपि तथाविधानि बहूनि शतकानि संस्कृतसाहित्ये यानि प्रथितानामप्रथितानां सामाजिकतत्त्वादिविविधविषयाणामाधारं स्वीकृत्य विलिखितानि जातानि वर्तन्ते च विलिख्यमानानीमानि। तद्यथा साम्प्रतिकेन पद्मशास्त्रिणा प्रणीतानि सिनेमाशतकम्, चायशतकम्, विश्वकथाशतक-ञ्चैतादृशानामेव शतकानां सन्त्यादर्शरूपाणि। सुप्रसिद्धयेन्दिरासञ्ज्ञया-ऽन्वितानि च शतकानि तावत् प्रथितविषयाधृतानां शतककाव्यानाम्प्रा-तिनिध्यमावहन्ति। एतेषु शतककाव्येषु शान्तिदेवारथिकृतम् इन्दिराप्रशस्ति-शतकम्, श्रीकृष्णसेमवालकृतम् इन्दिराकीर्तिशतकम्, रामकृष्णशास्त्रिरचितम् इन्दिराशतकम्, रामाशीषपाण्डेयप्रणीतम् इन्दिराशतकञ्चात्र विशेषतस्सन्ति प्रसिद्धानि। शिवदत्तशर्मचतुर्वेदिनो गोस्वामितुलसीदासशतकम्, शान्तिभिक्षु-शास्त्रिणो भीमाम्बेडकरशतकम्, रसिककव्युपनाम्नः आर्.के.पटेलस्य शेक्सपियरशतकम्, श्रीकृष्णसेमवालस्य भीमशतकम् इत्येतानि च शतकानि व्यक्तित्ववैशद्यकेषु शतककाव्येषु सन्त्युल्लेखार्हाणि।

यात्रावर्णनपरकाणि शतकानि यथा राजेन्द्रमिश्रस्य बालीप्रत्यभिज्ञान-विमानयात्रेति शतकद्वयम्,[147] रमाकान्तशुक्लस्य तुरीनोस्मृतिसपादशतकम्, हासपरकञ्च श्रीरङ्गंवेङ्कटेश्वरस्य काफीशतकम्, शिवदत्तशर्मचतुर्वेदिनो हाहा-हूहूशतकञ्चोल्लेखार्हम्।[148] एवं विविधविषयाधृतान्यपि बहूनि शतकानि विलिखितङ्गतानि।

---

[146] संस्कृत भाषा और साहित्य, पृष्ठसङ्ख्या- 78

[147] संस्कृत वाङ्मय का बृहद् इतिहास (सप्तम-खण्ड), पृष्ठसङ्ख्या - 128

[148] अत्रैव, पृष्ठसङ्ख्या - 127

इदानीं नामग्राहं केषाञ्चन प्रसिद्धानां शतकानाम्परिगणनम्पुरस्क्रियते। तथा हि शङ्कराचार्यप्रणीतम् अपराधशतकम्, नागराजकृतम्भावशतकम्, निगमान्तमहादेशिकरचितं दयाशतकम्, शिल्हणमिश्रप्रणीतं शान्तिशतकम्, विद्याधरजि-आचार्यकृतम्भावनाशतकम्, वाञ्छेश्वरस्य महिषशतकम्, आसुरि-अनन्ताचार्यस्य सम्मार्जनीशतकम्, जीवेश्वरोपाध्यायकृतम्फलितज्योतिष-सम्बद्धं रत्नशतकम्, गोरखनाथकृतं गोरक्षशतकम्, धर्मदेवरचितम्पुराण-दृष्टान्तशतकम्,[149] कुसुमदेवप्रणीतं दृष्टान्तशतकम्, अज्ञातकर्तृकृतं वृन्दावनशतकम्, केदारनाथशास्त्रिविरचितन्तौषीशतकम्, मेधाव्रतप्रणीतं गुरुकुलशतकम्, श्रीकान्तमिश्रविलिखितम्पद्मशतकम्, त्रिलोकीनाथमिश्ररचितं दुर्मिलाशतकम्, भल्लटकृतम्भल्लटशतकम्, रामकृष्णकविकृतं सारशतकम्,[150] नीलकण्ठदीक्षितप्रणीतं सभारञ्जनशतकम्, उत्प्रेक्षावल्लभकविविरचितं सुन्दरीशतकम्, ताराचरणतर्करत्नरचितं काशिराजकाननशतकम्, सुन्दराचार्यकविकृतं गीतिशतकम्, मधुसूदनकविप्रणीतमन्यापदेशशतकम्, रामकिशोरमिश्रकृतं श्रीगरुडध्वजसपादशतकम्, विश्वेश्वरपण्डितप्रणीतं रोमावलीशतकम्, तेजपालसिंहकृतम्मूर्खशतकम्, प्रियव्रतशर्मरचितं वसन्तशतकम्, नारोजिपण्डितलिखितं लक्ष्मणशतकम्, रामकैलासपाण्डेय-रचितम्भारतशतकम्, जयप्रकाशनारायणद्विवेदिकृतञ्च गुर्जरसपादशतकम्, शिवदत्तशर्मविलिखितं सिद्धान्तयोगशतकम्, बौद्धस्य वज्रदत्तस्य लोकेश्वरशतकम्, रामचन्द्रकविभारत्या भक्तिशतकम्,[151] कविकृष्णराम-स्यार्यालङ्कारशतकम्, गतार-उपतपस्सीभिक्षुविलिखितं वृत्तशतकम्, अथ जीवानन्दविद्यासागरसम्पादितायां शतकावल्याम्मुख्यत उल्लेखनीयानि शतकानि स्तुतिशतकम्, श्रीपादारविन्दशतकम्, कटाक्षशतकम्, मन्दस्मितशतकञ्चेति।[152] अन्यानि च शतकान्यनया रीत्यैव नैकान् विषयान् आधृत्य बहुभिः कविभिः प्रणीतानि जातानि।

---

[149] History of Classical Sanskrit Literature, पृष्ठसङ्ख्या- 1015

[150] संस्कृत वाङ्मय का बृहद् इतिहास (सप्तम-खण्ड), पृष्ठसङ्ख्या - 130

[151] संस्कृत साहित्य का आलोचनात्मक इतिहास, पृष्ठसङ्ख्या- 542

[152] "तत्र महिषशतकमपि वर्तते सम्पादितम्, परमेतस्य कर्ता वाञ्छेश्वर इति ज्ञातविषयत्वात् सम्पादितेषु शतकेषु न परिगणितमिदम्"।

- द्रष्टव्या जीवानन्दविद्यासागरसम्पादिता "शतकावलिः"

साम्प्रतिका नैक आचार्याश्शतककाव्यानामिमां सरणिम्प्रवर्धयन्तस्सन्ति। तद्यथा नवीनेषु शतकेषु रामभद्राचार्यस्यार्याशतकम्, गणपतिशतकम्, सीताशतकम्, रघुनाथशतकम्, राघवचरणचिह्नशतकम्, चित्रकूटशतकम्, अन्यानि च बहूनि शतककाव्यानि, अभिराजराजेन्द्रमिश्रस्यारण्यकोक्तिशतकम्, आर्याऽन्योक्तिशतकम्, पराम्बाशतकम्,[153] संस्कृतशतकम् अन्यानि च नैकानि शतकानि, मिथिलाप्रसादत्रिपाठिनः केशवशतकम्, शिवदत्तशर्मचतुर्वेदस्य नैकानि वेद-पुराण-इतिहासादिशतकानि,[154] विट्ठलदेवमुनिसुन्दरशर्म्मणो वीराञ्जनेय-श्रीनिवास-शम्भु-देवी-छायापत्येतानि शतकानि,[155] विष्णुकान्तस्य सपार्षदश्रीवैद्यनाथशतकम्, विद्याधरदत्तपाण्डेयस्य पराम्बास्तुतिशतकम्, हरेकृष्णशतपथेः कविशतकम्, कैलाशनाथद्विवेदिनो गुरुमाहात्म्यशतकम्, कृष्णभाऊशास्त्रिणो विज्ञानशतकम्, पी.रामचन्द्रडोः कुमतिशतकम्, नलिनीशुक्लाया वाणीशतकम्, रामकरणशर्मणः पाथेयशतकम्, श्रीकृष्णसेमवालस्य सर्वमङ्गलाशतकम्, केवलानन्दशर्मणो यतीन्द्रशतकम्, गदाधरदाशस्य मेघशतकम्, विद्याधरशास्त्रिणोऽनुभवशतकम्, महादेवशास्त्रिणो भारतशतकम्, प्रीतमलालनृसिंहलालस्य शक्तिशतकम्, श्रीधरभास्करवर्णेकरस्य स्वातन्त्र्यशतकम्, रामाशीषपाण्डेयस्य प्रहेलिकाशतकम्,[156] चन्दनमुनेः प्रास्ताविकश्लोकशतकमनुभवशतकञ्च,[157] मनुदेवभट्टाचार्यस्य रघुनाथामृतशतकम्, सूर्यमणिरथस्य समस्यापूर्त्तिशतकम्, जीतरामभट्टस्यानुभूतिशतकम्, कार्लकैपलर्-इत्यस्य यवनशतकम्, कपिलदेवद्विवेदिनस्तावत् संस्कृतनिबन्धशतकम्, अन्यैश्च विलिखितानि विलिख्यमानानि च बहूनि विविधतत्त्वयुतानि शतककाव्यपरम्परां समृद्धयन्ति शतकानि सन्ति।

प्रसिद्धेषु शतकेषु तादृशानि शतककाव्यानि बहूनि सन्ति यत्रैकेनैव नाम्ना कविभिः स्वस्वशतककाव्यानि विरचितानि। तद्यथा - शृङ्गारशतकनाम्नैव भर्तृहरि-व्रजलाल-जनार्दन-व्रजराज-नरहरि-इत्याख्यानां

---

153 संस्कृत वाङ्मय का बृहद् इतिहास (सप्तम-खण्ड), पृष्ठसङ्ख्या - 123

154 शिवदत्तशर्माचतुर्वेदस्य शतकसंहितास्थान्यन्यानि शतकानि द्रष्टव्यानि।

155 संस्कृत वाङ्मय का बृहद् इतिहास (सप्तम-खण्ड), पृष्ठसङ्ख्या - 130

156 अत्रैव, पृष्ठसङ्ख्या - 130

157 अत्रैव, पृष्ठसङ्ख्या - 708

पञ्चकवीनाम्,[158] वैराग्यशतकनाम्नैव च भर्तृहरि-जनार्दन-नीलकण्ठ-अप्पयदीक्षित-शङ्कराचार्य्याणाम्पञ्चानाम्,[159] नीतिशतकनाम्ना वेङ्कटाचार्य-श्रीनिवासाचार्य-सुन्दराचार्य्य-अज्ञातनामवतामिति चतुर्णाम्,[160] अन्योक्ति-शतकनाम्ना च सोमनाथ-भट्टवीर-दर्शनविजयगणि-इत्याख्यानां त्रयाणाम्, सूर्य्यशतकनाम्ना तु मयूर-गोपालशर्म्म-श्रीश्वरविद्यालङ्कार-राघवेन्द्रसरस्वती-रखिलदास-लिङ्गकवि-कोदण्डरामाख्यानां[161] सप्त यावत् सङ्ख्याकानां कवीनां शतकाकाव्यान्यवाप्यन्ते। एवंविधं शतककाव्यविरचनं तत्तच्छतकाना-मनुकरणमात्रमेव न ह्यपितु समेषां तेषां शतकानाम्प्रथितिविषयत्वमेव सूचयति। वस्तुतः स्तोत्रादिग्रन्थप्रणयनस्य विशिष्टसङ्ख्यासमाश्रयणमप्येतदेव वचनस्य गूढं वैलक्षण्यपरत्वं विशेषतः प्रतिपादयति। एवं सूक्ष्मेक्षिकया शतककाव्यानां तदीयविकासरणेश्च प्रणयनाधारमपि वचनस्य सङ्ख्यायाः वा माहात्म्यमाधृत्यैव समालोचयितुं शक्यते।

एवं संस्कृतवाङ्मयसम्बद्धानां सङ्ख्यया वचनेन वा विशेषतः सम्पृक्तानां तत्त्वानाम् एवं वचनविमर्शो नैकधा पुरस्कर्तुं शक्यत इह तावत् सङ्ख्यार्थमाहात्म्यपुरस्सरं वेदपुराणशतककाव्यादिसंयुत एव वचनविशेष-विमर्शो विहितः। व्याकरणसाहित्यशास्त्रदृशा वचनविमर्शो हि विशेषोऽग्रिमे चतुर्थेऽध्याये विधास्यते।

---

[158] History of Classical Sanskrit Literature, पृष्ठसङ्ख्या – 1089-90

[159] अत्रैव, पृष्ठसङ्ख्या – 1081

[160] अत्रैव, पृष्ठसङ्ख्या – 319

[161] अत्रैव, पृष्ठसङ्ख्या – 1107

# द्वितीयोऽध्यायः

## व्याकरणशास्त्रदृशा लिङ्गविमर्शः

लिगि गत्यर्थकात्, लिगि चित्रीकरणकाच्च धातुभ्याम्[1] **"इदितो नुम्धातोः"**[2] सूत्रेणैतेन नुमि सति लिङ्गशब्दसंसाधनं शक्यते कर्तुम्, परं व्याकरणशास्त्रप्रयुक्तलिङ्गतत्त्वार्थदृष्ट्या त्वाकृत्यर्थवत्त्वाल्लिगि-चित्रीकरणा-र्थकादेव धातोर्लिङ्गशब्दसंसाधनं प्रतिभाति वरम्। वैयाकरणैस्तावत् सुबन्तप्रयोगेण प्रवृत्तिनिमित्ततदाश्रयलिङ्गसङ्ख्या-कारकाणि बोध्यन्त इत्यत्र नैव क्वचन विवादः। किन्तु सुबन्तपदेषु लिङ्गादयः प्रातिपदिकार्थाः प्रत्ययार्था वेत्यत्र विद्यते विवादः। प्रातिपदिकार्थविषये चैवमभिहितम्-

**"एकं द्विकं त्रिकं चेति चतुष्कं पञ्चकं तथा।**

**नामार्थ इति सर्वेऽमी पक्षाः शास्त्रे निरूपिताः"॥**[3]

प्रातिपदिकार्थादिविषये तु वैयाकरणानां महान् कलकलः।

लिङ्गमिदं प्रायशः पुं-स्त्री-नपुंसकलिङ्गभेदेन त्रिधात्वं भजते इति सुविज्ञायत एव। तत्र च सप्तधा[4] लिङ्गं कीदृक्प्रकारकं किञ्च तेषां स्वरूपमित्यपि पृथक्तया विवेचनीयार्हम्। यद्यपि योनिमत्त्वादिरूपं पुंव्यञ्जनादिरूपञ्च लिङ्गं प्रसिद्धम्- **"स्तनकेशवती स्त्री स्याल्लोमशः पुरुषः स्मृतः। उभयोरन्तरं यच्च तदभावे नपुंसकम्"॥**[5] इति, तथाऽपि खट्वादावेतादृशलौकिकस्त्रीत्वादिलिङ्गस्यासम्भवेन सत्त्वरजस्तमोगुण-परिणामरूपं साङ्ख्यं शास्त्रीयञ्च लिङ्गं वैयाकरणैरङ्गीकृतम्। गुणानां परिणामस्त्रिधा त्रिधा सर्वेषु पदार्थेषु। कस्मिंश्चिदपि पदार्थे कश्चिद् गुण उपचीयते, कश्चिदपचीयते, कश्चिच्च समस्तिष्ठति न तस्योपचयोऽपचयो वा। तत्रोपचयः पुंस्त्वम्, अपचयः स्त्रीत्वम्, समत्वञ्च क्लीबत्वमिति वैयाकरणानां

---

1 सिद्धान्तकौमुदी, धातुसङ्ख्या – 159, 1878

2 अष्टाध्यायीसूत्रसङ्ख्या – 7/1/58

3 वैयाकरणभूषणसारः, नामार्थनिर्णयः, कारिकासङ्ख्या - 25

4 "उपादानविकल्पाश्च लिङ्गानां सप्त वर्णिताः। विकल्पसन्नियोगाभ्यां ये शब्देषु व्यवस्थिताः"॥

- वाक्यपदीयम् (तृतीयो भागः), लिङ्गसमुद्देशः, कारिकासङ्ख्या - 03

5 व्याकरणमहाभाष्यम् (चतुर्थं खण्डम्), 4/1/3 अत्रत्यभाष्यवचः

निर्णयः।[6] ब्रह्मणः प्रकृतिपरत्वेन यद्यपि तत्र गुणपरिणामरूपं लिङ्गं न सम्भवति तथाऽपि गुणपरिणामस्य समारोपेण ब्रह्मादिशब्दप्रतिपाद्ये ब्रह्मण्यपि क्लीबत्वस्त्रीत्वपुंस्त्वादिव्यवहारः। एतादृग्गुणपरिणामरूपस्य लिङ्गस्य चर्चाऽत्र प्रामुख्यं भजते।

**"तस्माच्छसो नः पुंसि"**,[7] इत्यादिनैकसूत्रद्वाराऽपि लिङ्गस्वरूपं शास्त्रीयं जायते विशदितमन्यच्च स्तनकेशादिचिह्नाधारेण तु ज्ञायते लौकिकं लिङ्गस्वरूपम्। सन्ति च तादृशाः अपि शब्दाः येषां शास्त्राधारेण तु सम्भवत्यन्यल्लिङ्गं परं लोकाधारेण हि तेषां लिङ्गस्वरूपं ततः पृथग् एवावबुध्यते। सन्ततिः, लोकः, अपत्यम्, पिपीलिका, जनः इत्येते सन्ति तादृशा एव शब्दाः। लौकिकलिङ्गवाचकता तु माता, पिता, स्नुषा, क्षत्रिय इत्यादिप्रयोगद्वारा सम्भवत्येव। अन्यदपि तावत् स्वरूपं शास्त्रीयलिङ्गस्य कुलरत्नं मैथिली रामस्य दाराः एतादृशेषूदाहरणेषु शक्यते द्रष्टुम्। **"तत्र जातः"**,[8] **"तत्र भवः"**,[9] इत्यादिसूत्रद्वारा लिङ्गस्याविवक्षा शास्त्रे दृश्यत एव ब्राह्मणो न हन्तव्यः इत्यादिषु च लौकिकोदाहरणेष्वपि न कस्यचन विशेषलिङ्गस्याविवक्षेत्यप्यवधेयतथ्यम्। अत्र तावदयं विशेषो यल्लिङ्गवचनमतन्त्रम्' इति प्रसिद्धिबलात् सूत्रेष्विदमविवक्षादर्शनं सर्वत्रार्षत्वात् समाधीयते, अथ च लोकोदाहरणैरविवक्षेयमपि सन्तिष्ठते। एवं व्यक्तिरियं प्रथमा इत्यादिवचनैः पुंल्लिङ्गार्थोऽपि सङ्गच्छते। **"इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम् । इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः"॥** कुत्रचिच्चैवं भूतेषु प्रयोगेषु तावत् प्रतिपादनीयविषयकलिङ्गविपर्ययदर्शने सति **"उद्देश्यविधेययोरैक्यमापादयत्सर्वनामपर्य्यायेण तत्तल्लिङ्गभाग् भवति"**,[10] इति न्यायेन विधेयगतभिन्नलिङ्गविवक्षाविषयोऽपि दृष्टिपथमायात्येव।

---

[6] "साङ्ख्यप्रसिद्धसत्त्वादेर्लिङ्गं परिणतिर्मतम्। शास्त्रतो ज्ञायते यस्मात् ततः शास्त्रीयमुच्यते॥

तत्रोपचयभागो यस्तत्पुंस्त्वमभिधीयते। स्त्रीत्वं त्वपचयो भागः साम्यं क्लीबत्वमुच्यते।

केवलं शास्त्रकार्यार्थमाश्रितं शाब्दिकैर्बुधैः"॥ - लिङ्गवचनविचारः, पृष्ठसङ्ख्या - 07

[7] अष्टाध्यायीसूत्रसङ्ख्या – 6/1/103

[8] अत्रैव, 4/3/25

[9] अत्रैव, 4/3/53

[10] वाक्यपदीयम् , 1/16 इत्यत्र प्रत्येकार्थप्रकाशिकाटीकात उद्धृतम्, पृष्ठसङ्ख्या -83

अपरत्र काण्डः, काण्डम्, खण्डः, खण्डम् इत्येवं सम्बन्धः[11] सम्बन्धम्[12] इत्यनयोः प्रयोगयोस्तावन्महाभाष्यकृता प्रदत्ता स्वीकृतिस्तावल्लिङ्ग-वैविध्यविषयमेव स्पष्टीकरोति। अनेन प्रकारेणेदृशं लिङ्गं शब्दनिष्ठमर्थ-निष्ठञ्चोभयं प्रतीयते। तस्माल्लिङ्गाश्रयो भवति शब्दनिष्ठोऽर्थनिष्ठो वेत्यपि विचारणाविषयत्वम्भजत एव। लिङ्गमिदं प्रातिपदिकवाच्यं टाबादिप्रत्ययाः लिङ्गस्य स्वसमभिव्याहृतपदनिष्ठशक्त्युद्बोधकत्वेन द्योतका एवेति सिद्धान्तः। अत एव वैयाकरणसिद्धान्तकौमुद्यामभिहितम्- **"अजादीनामकारान्तस्य च वाच्यं यत्स्त्रीत्वं तत्र द्योत्ये टाप् स्यात्"।**[13] तेन अजा इत्यत्र स्त्रीत्वविशिष्टोऽज इति बोधः। टाबादिप्रयोग एव स्त्रीत्वादेर्बोधेन टाबादिवाच्यमेव लिङ्गमित्यपरः पक्षः। किन्तु नायं समीचीनो यतो टाबाद्यभावेऽपि क्षुत् समिदादौ लिङ्गबोधस्य दर्शनम्, तस्माट्टाबादिद्योत्यमेव लिङ्गमिति राद्धान्तः।

पुंस्त्व-स्त्रीत्व-नपुंसकत्वरूपाणि लिङ्गान्याश्रित्य व्याकरणशास्त्रे विविधानि कार्याणि विधीयन्ते। तत्र पुंस्त्वादिरूपं लिङ्गं किं लक्षणम्? लौकिकं शास्त्रीयं वा, लिङ्गस्याश्रयः शब्दोऽर्थो वा शब्दाश्रयत्वेऽर्थाश्रयत्वे च पुँल्लिङ्गादिशब्दानां कोऽभिप्रायः? लिङ्गं प्रातिपदिकार्थः प्रत्ययार्थो वा। लिङ्गस्य गुणपरिणामरूपत्वे आत्मब्रह्मेत्यादिपुंस्त्वादिव्यवहार इत्यादि-व्याकरणशास्त्रे नानाधा विचारितम्। तदिह प्रदर्श्यते –

---

11 "अत्रैवम् अभिसम्बन्धः करिष्यते"। - व्याकरणमहाभाष्यम् (पञ्चमं खण्डम्) 6/2/143

"साधनसम्बन्धस्तमभ्यन्तरीकृत्य धातुः साधनेनोच्यते"। अत्रैव (षष्ठं खण्डम्) 8/1/70

(एवमेव 1/4/23, 2/1/1, 3/1/22, 3/1/26, 6/1/72, 6/3/61, 6/4/1 इत्यष्टाध्यायीसूत्रस्थभाष्ये पुंल्लिङ्ग एव सम्बन्धप्रयोगः)

12 "एवं तर्हि ह्रस्वनद्यापो नुट् इत्यत्र अतो धातोः इत्यतो लोपः **सम्बन्धम्** अनुवर्तिष्यते"।

- अत्रैव (पञ्चमं खण्डम्), अष्टाध्यायीसूत्रसङ्ख्या - 6/1/102 इत्यत्र भाष्यवचः

"सम्बन्धम् अनुवर्तिष्यते"। - अत्रैव (षष्ठं खण्डम्), अष्टाध्यायीसूत्रसङ्ख्या - 8/2/56 इत्यत्र भाष्यवचः (एवमेव 1/4/23, 2/1/1, 3/1/22, 3/1/26, 6/1/72, 6/3/61, 6/4/1 इत्यष्टाध्यायीसूत्रस्थभाष्ये नपुंसकलिङ्ग एव सम्बन्धप्रयोगः)

13 सिद्धान्तकौमुदी, पृष्ठसङ्ख्या – 109-110

**व्याकरणशास्त्रे लिङ्गाश्रितानि कार्याणि-**

तत्र हि व्याकरणशास्त्रीयस्य सभेदस्य लिङ्गस्य किं स्वरूपमिति तावत् प्रथमं विचार्यते।

**"स्त्रियाम्"**[14] इति सूत्रे महाभाष्ये लिङ्गं सभेदं निर्धारितम्। तत्र लौकिकं लिङ्गमेवमुक्तम्- **"स्तनकेशवती स्त्री स्याल्लोमशः पुरुषः स्मृतः। उभयोरन्तरं यच्च तदभावे नपुंसकम्"॥**[15] अत्र 'स्तनकेशवती' इत्यत्र मतुप्, 'लोमशः' इत्यत्र मत्वर्थीयः शप्रत्ययश्च भूमादौ वर्तते। मत्वर्थीया हि भूमादौ भवन्ति। उक्तमिदम्–

**"भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने।**

**संसर्गेऽस्तिविवक्षायां भवन्ति मतुबादयः"॥**[16]

तेन स्तनकेशादिनोपलक्षितं लिङ्गं स्त्रीत्वम्, लोमादिनोपलक्षितं लिङ्गं पुंस्त्वं लिङ्गसदृशं नपुंसकत्वञ्चेति लौकिकलिङ्गस्वरूपं फलति। स्तनकेशादेरुपलक्षणत्वेन स्तनकेशाद्यभावेऽपि बालायां कुमार्यां वा विद्यमाने स्त्रीत्वे नातिव्याप्तिः। स्तनादीनि लिङ्गस्य व्यञ्जकानि तेन स्तनादिव्यङ्ग्यं लिङ्गं स्त्रीत्वम्, लोमादिव्यङ्ग्यं लिङ्गं पुंस्त्वम्, स्त्रीत्व-पुंस्त्व-सदृशं लिङ्गं नपुंसकत्वमिति भावः। स्त्री-पुं-नपुंसकशब्दानां प्रवृत्तिनिमित्तं स्त्रीत्वपुंस्त्व-नपुंसकत्वानि गोत्वादिवद् जातिविशेषा द्रव्यसमवेतानि। एषोऽभिप्रायः कैयटे- "**लिङ्गमिति। स्तनकेशादिकमिति भावः। स्तनकेशवतीति- भूमादौ मतुप्। तथैव लोमश इति शः। लिङ्गे पृष्टेलिङ्गिकथनं लिङ्गप्रतिपत्तिपरमिति प्रश्नप्रतिवचनयोर्नास्त्यसङ्गतिः। स्तनकेशांश्च प्रसिद्धत्वादन्यस्यापि स्त्रीप्रतिपत्तिनिमित्तस्य कुमार्यादिगतस्योपलक्षणम्। तदनेन स्त्रीत्वादीनां स्तनाद्युपव्यञ्जनानां गोत्वादिवत् सामान्यविशेषत्वं दर्शितम्। यथोक्तं हरिणा-**

---

[14] अष्टाध्यायीसूत्रसङ्ख्या, 4/1/3

[15] व्याकरणमहाभाष्यम्, 4/1/3 इत्यस्य व्याख्याने।

[16] "तदस्यास्त्यस्मिन्निति मतुब्" - अष्टाध्यायीसूत्रसङ्ख्या - 5/2/94 सूत्रस्यास्य व्याख्याने वार्तिकम्।

**हस्तिन्यां वडवायाञ्च स्त्रीति बुद्धेः समन्वयः। अतस्तां जातिमिच्छन्ति द्रव्यादिसमवायिनीम्॥ इति। उभयोरन्तरमिति। लिङ्गवत्त्वेन सदृशमित्यर्थः"।**[17]

एतादृशस्य लिङ्गस्य खट्वा-तटी-नद्यादावसम्भवेन टाबादीनां विधानस्य व्यर्थत्वाद् भगवता भाष्यकृता व्याकरणशास्त्रीयं गुणपरिणामस्वरूपं लिङ्गं स्वीकृतम्। यथा- "**तटे च खल्वपि सर्वाणि लिङ्गानि दृष्ट्वा- तटः तटी तटमिति, कस्तदध्यवसातुमर्हति– इयं स्त्री, अयं पुमान्, इदं नपुंसकमिति। तस्मान्न वैयाकरणैः शक्यं लौकिकं लिङ्गमास्थातुम्। अवश्यं च कश्चित् स्वकृतान्त आस्थेयः। कौऽसौ स्वकृतान्तः? संस्त्यानप्रसवौ लिङ्गमास्थेयौ स्वकृतान्ततः। संस्त्यानप्रसवौ लिङ्गमास्थेयौ। किमिदं संस्त्यानप्रसवाविति ? संस्त्याने स्त्यायतेर्ड्रट्टि स्त्री, सूतेः सप् प्रसवे पुमान् इति। ननु च लोकेऽपि स्त्यायतेरेव स्त्री, सूतेश्च पुमानिति। अधिकरणसाधना लोके स्त्री- स्त्यायत्यस्यङ्गर्भ इति। कर्तृसाधनश्च पुमान्- सूते पुमानिति। इह पुनरुभयं भावसाधनम्। संस्त्यानं स्त्री प्रवृत्तिश्च पुमान्"।**[18]

अस्याभिप्रायः "**स्त्यै शब्दसङ्घाते**"[19] इति धातोः ड्रटि सूतेः सकारस्य पकारे औणादिकेऽसुनि च प्रत्यये कृते क्रमेण स्त्रीशब्दः पुंशब्दश्च सिद्धः। तत्र स्त्रीपुंशब्दौ यदा लौकिकं लिङ्गं बोधयतस्तदाऽधिकरणे कर्तरि च प्रत्ययः। यस्यां शुक्रशोणितरूपो गर्भः। स्त्यायते सङ्घातीभवति सा स्त्री। यः सूतेऽपत्यं जनयति स पुमाँश्चोच्यते। यश्च स्त्रीपुम्भ्यां भिन्नं स्त्रीपुंसदृशञ्च तन्नपुंसकमिति फलितं भवति, किन्तु शास्त्रीयलिङ्गपक्षे स्त्रीपुंशब्दौ भावसाधनौ क्रियापरौ, स्त्रीशब्दश्च संस्त्यानं तिरोभावोऽपचयो वाऽर्थः। पुंशब्दस्य तु प्रवृत्तिराविर्भाव उपचयो वाऽर्थः। तेनापचयः स्त्रीत्वम् उपचयश्च पुंस्त्वम्, उपचयापचयाभ्यां साम्यम् आक्षिप्तं तेन साम्यावस्था स्थितिर्वा नपुंसकत्वमिति सिद्ध्यति। पुनः प्रश्नो भवति यत् केषाम् उपचयापचयादिलिङ्गमिति अस्योत्तरं महाभाष्ये एवं

---

[17] व्याकरणमहाभाष्यम् (चतुर्थाध्यायान्वितम), प्रदीपटीका, पृष्ठसङ्ख्या- 19

[18] अत्रैव, पृष्ठसङ्ख्या- 25

[19] सिद्धान्तकौमुदी, धातुसङ्ख्या - 976

प्रदत्तम्- **“कस्य पुनः संस्त्यानं स्त्री, प्रवृत्तिर्वा पुमान् ? गुणानाम्। केषाम्? शब्दस्पर्शरूपरसगन्धानाम्। सर्वाश्च पुनर्मूर्तय एवमात्मिकाः संस्त्यानप्रसव-गुणाः, शब्दस्पर्शरूपरसगन्धवत्यः। यत्राल्पीयांसो गुणास्तत्रावरतस्त्रयः- शब्दः, स्पर्शः, रूपमिति। रसगन्धौ न सर्वत्र। प्रवृत्तिः खल्वपि नित्या। न हीह कश्चिदपि स्वस्मिन्नात्मनि मुहूर्तमप्यवतिष्ठते, वर्धते वा यावदनेन वर्धितव्यम् अपायेन वा युज्यते”।**[20]

अनेन स्पष्टं यद् गुणापचयः स्त्रीत्वं गुणोपचयः पुंस्त्वं गुणसाम्यञ्च नपुंसकत्वमिति। “निर्दोषं हि समं ब्रह्म” यथाऽवस्थमित्यर्थः साम्यशब्दस्य।

सर्वे पदार्थाः षड्विकाराक्रान्ताः। ते च षड्विकाराः- जन्म-सत्ता-परिणामवृद्ध्यपचयनाशरूपाः। इदं निरुक्ते प्रथमाध्याये-

**“षड्भावविकारा भवन्तीति वार्ष्यायणिः।**

**जायतेऽस्ति विपरिणमते वर्द्धतेऽपक्षीयते विनश्यतीति”।**[21]

वाक्यपदीये-

**“अध्याहितकलां यस्य कालशक्तिमुपाश्रिताः।**

**जन्मादयो विकाराः षड्भावभेदस्य योनयः”॥**[22]

इति षड्भावनिर्देशः। एवं सर्वं वस्तु परिणामि वर्तते। कस्मिँश्चित् पदार्थे कस्यचिच्छब्दादिगुणस्य कदाचिदपचयोऽन्यस्य गुणस्योपचयः कस्यचिदपरस्य गुणस्य नोपचयः नापयश्च। यथा कस्मिँश्चित् पदार्थे गन्धगुण उपचीयते तदा तत्पूर्ववर्ती शब्दादिगुणोऽपचीयते। गुणान्तरञ्च समानरूपेण तिष्ठति।

---

[20] अत्रैव, पृष्ठसङ्ख्या- 26-28

[21] निरुक्तम्, 1/1/2

[22] वाक्यपदीयम्, 1/3

यद्यपि भाष्ये शब्दादिगुणानाम् उपचयापचयौ कथितौ, किन्तु शब्दादीनां समेषां सत्त्वरजस्तमोगुणहेतुकत्वात् सत्त्वादिगुणानामेव उपचयापचयसाम्यरूपाः परिणामा लिङ्गशब्देन कैयटे एवं प्रतिपादिताः– "**सर्वपदार्थव्यापित्वं .........नित्यः परिणामः**"।[23]

एतादृशस्य गुणपरिणामरूपलिङ्गस्य सर्वत्र व्यापकत्वे विवक्षातः प्रयोगः। यथाऽपचयविवक्षायां स्त्रीत्वस्य, उपचयविवक्षायां पुंस्त्वस्य, उभयोरविवक्षायां (अर्थात् साम्यविवक्षायां) नपुंसकत्वस्य स्थितिः। अत्र पुनः प्रश्न उदेति यत् तादृशस्य लिङ्गस्य केवलान्वयित्वे नैकस्मिन्नेवार्थे लिङ्गत्रयप्रयोगापत्तिः। अस्योत्तरं यल्लोकस्य नियामकत्वेन न तथा भावः। एतदेव भाष्ये प्रतिपादितम्- "**विवक्षातः संस्त्यानविवक्षायां स्त्री। प्रसव-विवक्षायां पुमान्। उभयोरविवक्षायां नपुंसकम्। 'तस्योक्तौ लोकतो नाम' तस्य उक्तौ च वचने लोकतो नामैतद् भवति स्त्री पुमान्नपुंसकमिति**"।[24] तथा च "**लोकव्यवहारानुवादिनी विवक्षा आश्रीयते न** तु प्रा**योक्त्री**"[25] इति कैयटः प्राह। एवं वाक्यपदीयकारः -

**"सन्निधाने निमित्तानां किञ्चिदेव प्रवर्तकम्।**
**यथा तक्षादिशब्दानां लिङ्गेषु नियमस्तथा॥**
**भावतत्त्वदृशः शिष्टाः शब्दार्थेषु व्यवस्थिताः।**
**यद्यद्धर्मेऽङ्गतामेति लिङ्गं तत्तत्प्रचक्षते"॥**[26]

यद्यप्याम्रफले गुणोपचयापचयसाम्यत्वानि सन्ति तथाप्युपचयस्य विवक्षायाम् आम्रः अपचयस्य विवक्षायाम् आम्री साम्यविवक्षायाम् आम्रमिति

---

[23] व्याकरणमहाभाष्यम् (चतुर्थाध्यायान्वितम्), प्रदीपः, पृष्ठसङ्ख्या- 27

[24] अत्रैव, पृष्ठसङ्ख्या- 29

[25] अत्रैव, प्रदीपटीका, पृष्ठसङ्ख्या - 29

[26] वाक्यपदीयम्, 3/13/20-21

न लिङ्गत्रये प्रयोगः। व्यक्तिविशेषस्य तादृशविवक्षायां सत्यामपि न लोकविवक्षा। लोको हि आम्रमिति पदेन साम्यमेव विवक्षति।

एवं गुणपरिणामो लिङ्गमिति शास्त्रीयलिङ्गस्वीकारे साङ्ख्यादिसम्मतपुरुषादौ गुणानामभावेऽपि भोक्तृदशापन्ने तस्मिन् समारोपेण गुणवानिव लक्ष्यमाणे पुंस्त्वादिप्रयोगो न विरुध्यते। आरोपितं गुणपरिणाममादाय एकस्मिन्नेव तत्त्वे आत्मा पुरुषश्चितिश्चैतन्यमिति त्रयाणां लिङ्गानां प्रयोगः। कैयटेनायं सिद्धान्त एवं सूचितः- **"सत्त्वादीनाम् आविर्भावादिरूपः प्रवृत्तिशब्दवाच्यो नित्यः परिणाम इत्यर्थः"।**[27] महाभाष्यप्रतिपादितलिङ्गस्वरूपस्य निष्कर्षो वाक्यपदीये एवं प्रतिपादितम्-

**"प्रवृत्तिरिति सामान्यं लक्षणं तस्य कथ्यते ।**

**आविर्भावस्तिरोभावः स्थितिश्चेत्यथ भिद्यते"॥**[28]

**"वस्तुतस्तु स्वरविशेष इव स्त्रीत्वपुंस्त्वादिकं शब्दधर्मः"**[29] इति पदवाक्य-रत्नाकरः। अर्थाद् उदात्तानुदात्तस्वरितसमान्येवेमानि त्रीणि लिङ्गानि।

**"तद्भिन्नत्वे सति तद्गतभूयो धर्मवत्त्वं सादृश्यम्"**[30] इति न्यायसिद्धान्त-मुक्तावली। अत्र सादृश्यं केवलं शब्दगतं लिङ्गत्रिविधत्वमुद्दिश्यैव साधारणतोऽन्यथा तु लिङ्गानां सप्तधाऽऽदिभेदा अपि।

वैयाकरणभूषणसारे नामार्थनिर्णये शास्त्रीयमेव लिङ्गं स्वीकृतम्। यथा वैयाकरणभूषणसारे- **"सत्त्वरजस्तमोगुणानां साम्यावस्था नपुंसकत्वम्। आधिक्यं पुंस्त्वम्। अपचयः स्त्रीत्वम्"।**[31]

---

[27] व्याकरणमहाभाष्यम् (चतुर्थाध्यायान्वितम्), प्रदीपटीका, पृष्ठसङ्ख्या- 27

[28] अत्रैव ( प्रदीपे भर्तृहरिमतमुद्धृतम्)

[29] पदवाक्यरत्नाकरः, पृष्ठसङ्ख्या- 282

[30] न्यायसिद्धान्तमुक्तावली, प्रत्यक्षखण्डम्, पृष्ठसङ्ख्या- 21

[31] वैयाकरणभूषणसारः, पृष्ठसङ्ख्या- 244

लघुशब्देन्दुशेखरेऽपि तथैव प्रतिपादितम्। **"स्त्रियामि"**[32]ति सूत्रे **"अचेतनखट्वावृक्षादिसाधारणं लिङ्गन्तु सत्त्वादीनां गुणानामुपचयापचय-स्थितिरूपं क्रमेण पुंस्त्रीनपुंसकाख्यम् 'एकार्थे शब्दान्यत्वाद् दृष्टं लिङ्गान्यत्वमि'ति भाष्योक्तेरर्थनिष्ठं केवलान्वयि। केनचिच्छब्देन किञ्चिद्वस्तु पदार्थ इति त्रिविधव्यवहारस्य पदार्थमात्रे सत्त्वात्"**[33] उक्तकथनस्यायमेवाभिप्रायो यद्वैयाकरणैर्लौकिकं लिङ्गं न स्वीकर्तुं शक्यते। अवयवसंस्थानविशेषरूपस्य लिङ्गस्य 'दारान्' 'स्वसा' इत्यादौ नत्वटाप्प्रत्ययादेरभावस्य प्रसङ्गात्। केषाञ्चन मते लौकिकलिङ्गस्वरूप-प्रतिपादके श्लोके –

**"स्तनकेशवती स्त्री स्याल्लोमशः पुरुषः स्मृतः।**

**उभयोरन्तरं यच्च तदभावे नपुंसकम्"॥**[34]

इत्यत्र लोमपदं लिङ्गपरं केशपदञ्च योनिपरं वर्तते। तेन स्त्रीत्वं योनिः पुंस्त्वं च लिङ्गमिति प्रतिफलति न तु केशलोमादीनां रोमादिपरत्वम्, तथा सति गवादिषु स्त्रीत्वपुंस्त्वादेरभावस्य प्रसङ्गः। इदमपि वक्तुं न शक्यते यद् 'दारान्' इत्यादौ लौकिकलिङ्गरूपस्य पुंस्त्वस्य दारपदार्थे दारशब्दे वा आहार्यारोपे नत्वादिसिद्धिः, यतोहि आरोपाभावेऽपि तादृशाः शब्दा अभिमताः। आहार्यारोपे हि बाधकालिकेच्छाजन्यज्ञानलक्षणो यथा श्वेतेऽपि शङ्खे शङ्खः पीत इति इच्छाजन्यं ज्ञानम् आहार्यम्। दारान् इत्यादौ बाधकाल एव पुंस्त्वस्य प्रतीतिर्न दारशब्दः पुंस्त्वविशिष्टः इति व्यवहारो निर्बाधो हि प्रवर्तते। अत एव भाष्यकृता शास्त्रीयमेव गुणपरिणामरूपं लिङ्गमिति स्वीकृतम्। सकलो हि शब्दार्थः त्रिगुणात्मकत्वेन उपचयापचयसाम्यरूपगुण-परिणामवान् एव भवति। यद्यपि आत्मादिनिरवयवपदार्थेषु न गुणपरिणाम-रूपलिङ्गस्य सम्भवस्तथापि तद्वाचकस्यात्मादिशब्दस्य त्रिगुणात्मकत्वेन

---

[32] अष्टाध्यायीसूत्रसङ्ख्या - 4/1/3

[33] लघुशब्देन्दुशेखरः, पृष्ठसङ्ख्या- 593

[34] स्त्रियाम्, अष्टाध्यायीसूत्रसङ्ख्या - 4/1/3 इत्यस्य व्याख्याने - व्याकरणमहाभाष्यम्

तद्गतोपचयादेस्तच्छब्दवाच्या-त्मादौ समारोपेण पुंस्त्वादिव्यवहारो न विरुद्धः। एवं वाक्यपदीये-

**"तिस्रो जातय एवैताः केषाञ्चित्समवस्थिताः।**

**अविरुद्धा विरुद्धाभिर्गोमहिष्यादिजातिभिः"॥**[35]

**"पुंस्त्वादिरूपजातिविशेष एव लिङ्गं न तु गुणपरिणामरूपम्"**[36] इत्यादिवैयाकरणभूषणसारस्य प्रभाटीकायां स्पष्टम्।

उक्तविवेचनेन निष्कर्षत एवं वक्तुं शक्यते- लिङ्गवचनविचारे निष्कृष्टं लौकिकं पुंस्त्वादिलिङ्गम् एवमुक्तम्– "**वयन्तु ब्रूमः- मेढ्रवत्त्वं लौकिकपुंस्त्वम्। लौकिकस्त्रीत्त्वं तु योनिमत्त्वम्। न च मूढमेढ्रभगान्यतरवन्नपुंसकव्यक्तावति-व्याप्तिरिति वाच्यम्, इष्टापत्तेः। लौकिकनपुंसकत्वं तु रोगवयःप्रमृत्यप्रयोज्य-मिथुनकर्मयोग्यत्वाभावयुतमेढ्रभगान्यतरवत्त्वे सति पुंस्त्वस्त्रीत्वान्यतरप्रयुक्त-श्मश्रुस्तनादिशून्यत्वम्। सत्यन्तानिवेशे बालेऽपि 'इयं व्यक्तिर्नपुंसकमि'ति व्यवहारापत्तिः"।**[37] योनिः स्त्रीत्वम्, लिङ्गं पुंस्त्वम्, योनिलिङ्गान्तरसादृश्यं नपुंसकत्वञ्चेति। लौकिकं योन्याद्यवयवसंस्थानविशेष एव लौकिकं लिङ्गम्। गुणो गुणापचयः स्त्रीत्वम्, गुणोपचयः पुंस्त्वम्, गुणसाम्यं नपुंसकत्वञ्चेति गुणपरिणामरूपः। वाक्यपदीयमते स्त्रीत्वपुंस्त्वनपुंसकत्वरूपजातिविशेष एव वा लिङ्गं शास्त्रीयं लिङ्गम्। जातिविशेषरूपं लिङ्गं जात्यन्तरेणाविरुद्धम्। यथा घटादौ घटत्वपृथिवीत्वद्रव्यत्वादीनां विविधजातीनां सत्ता, न च तासां परस्परविरोधस्तथा गवादिषु गोत्वादिभिस्सह पुंस्त्वादिलिङ्गरूपजातीना-मपि सत्त्वं न विरोधश्च। यद्यपि शास्त्रीयं लिङ्गं केवलान्वयित्वेन अव्यावर्तकं तथापि नियतलिङ्गशब्दानां लौकिकलिङ्गविशिष्ट एव शास्त्रीये लिङ्गे शब्दशक्तेः स्वीकारेण न दोषः। यथा पशुना यजेत इत्यत्र पशुपदस्य

---

[35] वाक्यपदीयम्, 3/13/4

[36] वैयाकरणभूषणसारः, प्रभाटीकायाम्, पृष्ठसङ्ख्या- 244-245

[37] लिङ्गवचनविचारः, पृष्ठसङ्ख्या- 4

लौकिकपुंस्त्वविशिष्ट एव शास्त्रीयपुंस्त्वे शक्तेः स्वीकारेण स्त्रीत्वविशिष्टपशुना छाग्या न यागस्य विधानम्। इदं वैयाकरणभूषणसारप्रभायां स्पष्टम्।[38]

साङ्ख्यशास्त्रे तु पञ्चविंशतितत्त्वानि प्रसिद्धानि। तत्र पुरुषः प्रकृतिश्चेत्युभयगतं यल्लिङ्गं तत्तु शास्त्रीयलिङ्गमेव। प्रसिद्धं तावत् साङ्ख्यशास्त्रप्रोदीरितं शास्त्रीयलिङ्गस्वरूपम् –

**"साङ्ख्यप्रसिद्धसत्त्वादेर्लिङ्गं परिणतिर्मतम्।**
**शास्त्रतो ज्ञायते यस्मात् ततः शास्त्रीयमुच्यते॥**
**तत्रोपचयभागो यस्तत्पुंस्वमभिधीयते।**
**स्त्रीत्वं त्वपचयो भागः साम्यं क्लीबत्वमुच्यते।**
**केवलं शास्त्रकार्यार्थमाश्रितं शाब्दिकैर्बुधैः"॥**[39]

एवं शास्त्रीयलिङ्गस्वरूपनिरूपणस्य मूलं साङ्ख्यशास्त्रमिति सूल्लिखितम्।

**लिङ्गस्याश्रयः-**

एवं लिङ्गं द्विविधम्- लौकिकं शास्त्रीयञ्च। तत्र लौकिकं लिङ्गमर्थगतमेवेति निश्चप्रचम्, किन्तु शास्त्रीयलिङ्गस्याश्रयः शब्दो वाऽर्थो वेति संशयो जागर्ति। तत्र शब्द एवाश्रय इत्येकः पक्षः, अर्थ एवेत्यपरः पक्षश्च। तत्र कः पक्षः श्रेयान् इति व्याकरणशास्त्रदृशा विचार्यते -

'दारान्' इत्यादौ नत्वस्य पशुनेत्यादौ नाभावस्य अजेत्यादौ टापः कुमारीत्यादौ ङीषः श्रीयम् इत्यादौ ह्रस्वस्य च शब्दत एव विधानेन नत्वादेः शब्द एव जायमानत्वेन शास्त्रीयं लिङ्गं शब्दगतमेवेति स्वीकर्त्तव्यम्। यदि तल्लिङ्गस्याश्रयः शब्द एव मन्यते तदा शब्देषु भेदस्तथा सम्भवति यथैकस्मिन्नेवाकारे ह्रस्वत्वदीर्घत्वप्लुतत्वानुदात्तत्वादिधर्मसत्त्वेन भेदः। यत्र

[38] वैयाकरणभूषणसारः, प्रभाटीका, पृष्ठसङ्ख्या- 244

[39] लिङ्गवचनविचारः, पृष्ठसङ्ख्या- 07

शब्दे पुंस्त्वं स पुँल्लिङ्गः, यत्र स्त्रीत्वं तत्र स्त्रीलिङ्गः, यत्र तु नपुंसकत्वं तत्र नपुंसकलिङ्ग इति व्यवहारः। यथा श्रीशब्दः स्त्रीत्वेन विष्णुशब्दाद् भिद्यते। श्रीशब्दे हि पुंस्त्वविरुद्धं स्त्रीत्वं विष्णुशब्दे च स्त्रीत्वविरुद्धं पुंस्त्वम्। एवं तटः, तटी, तटम् इत्यत्र प्रतिशब्दं भेदः। पुंस्त्वादिलिङ्गं विहाय न किञ्चिदपि तत्त्वमत्र भेदकं भवितुमर्हति। आनुपूर्वी हि समाना। समानाम् आनुपूर्वीमादाय लिङ्गकृतभेदसत्त्वेऽपि तटशब्दे त्रिलिङ्गव्यवहारः। एवं शब्दाश्रितं लिङ्गं तच्छब्दवाच्यमपि भवति। यथा घट इति पदं स्वगतशास्त्रीयपुंस्त्वस्यापि वाचकम्।

इदं वैयाकरणभूषणसार एवमुल्लिखितम्- **“तत्तच्छब्दनिष्ठं तत्तच्छब्दवाच्यञ्च, तमेव विरुद्धधर्ममादाय तटादिशब्दा भिद्यन्ते। केषाञ्चिदनेकलिङ्गव्यवहारस्तु समानानुपूर्वीकत्वेन शब्दानामभेदारोपाद्”।**[40] अयञ्चैव प्रसङ्गः प्रभायामेवं व्याख्यातः- **“अर्थनिष्ठत्वे चाचेतनचेतनवाचकानां मध्वादिशब्दानां मक्षिकादौ पुन्नपुंसकत्वे, वसन्ते च पुंस्त्वमिति व्यवस्थाया अनुपपत्तिः। एवं स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्त्रियां धने इत्यादिष्वप्यर्थनिष्ठत्वे नियमोच्छेदापत्तिः। शब्दनिष्ठत्वे च ह्रस्वत्वदीर्घत्वोदात्तत्वानुदात्तत्ववत् स्त्रीत्वपुंस्त्वविरुद्धधर्मवत्त्वाच्छब्दा भिद्यन्ते। केषाञ्चिदनेकलिङ्गत्वव्यवहारस्तु समानानुपूर्वीकत्वेन तेषां तन्त्रेणानुकरणादुपपद्यते। एवं च समानानुपूर्वीकेषु तटादिषु लिङ्गत्रयम्, छागादिषु लिङ्गत्रयम्, पदार्थादिष्वेकमिति सर्वत्र मुख्य एव लिङ्गव्यवहारः। तत्तछब्देति-जात्यादिभेदेन भिन्नाये शब्दास्तेषु शब्देषु स्थितं यल्लिङ्गं तत् स्वाश्रयशब्दवाच्यम्”।**[41] एवमुक्तविवेचनेन स्पष्टं यल्लिङ्गस्यार्थनिष्ठत्वं न सम्भवति। अचेतनवाचका ये मघ्वादयः शब्दास्तदर्थेषु माक्षिकादिषु पुंस्त्वनपुंसकत्वे वसन्तादिरूपेऽर्थे पुंस्त्वञ्च नास्ति।

लिङ्गं यदि शब्दाश्रितं मन्यते तदा दोष एकः समापतति। पशुना यजेत इत्यादौ छाग्याऽपि यागस्य बोधनापत्तिः। यतः पशुशब्दे स्वगतमेव पुंस्त्वं

---

[40] वैयाकरणभूषणसारः, पृष्ठसङ्ख्या- 244-245

[41] अत्रैव, प्रभाटीका, पृष्ठसङ्ख्या- 244

बोध्यते न त्वर्थगतम्। अत्र समाधानम्- यल्लिङ्गं यद्यपि शब्दगतं तथापि शब्दार्थयोस्तादात्म्येन भेदेऽपि च स्वाश्रयवाच्यत्वसम्बन्धेन (स्वं लिङ्गं तस्याश्रयः शब्दः, तस्य वाच्यता शब्दे तेन) अर्थगतस्यापि लिङ्गस्य निर्णायकत्वं सम्भवति। एवं वक्तुं न शक्यते यदियं व्यक्तिः, इदं वस्तु, तटः, तटी, तटम् इत्यादौ व्यक्त्यादिशब्दगतस्य स्त्रीत्वादेस्तदर्थेऽपि स्त्रीत्वादेर्निश्चायकमिति। यतोहि व्यक्त्यादिशब्दा नियतलिङ्गाः, पशुशब्दस्तु न नियतलिङ्गः। पशुशब्दो हि स्त्रियामपि वेदे प्रतिपादितः।

वस्तुतस्तु उणाद्यूप्रत्ययः पशुशब्दो व्याकरणेन पुंस्येव निर्णीतः। अतोऽयं नित्यपुँल्लिङ्गः। वेदे "पश्वा" इत्यादौ तु छन्दसि सर्वविधीनां वैकल्पिकत्वेन न नाभावः। मीमांसायां पुंस्त्वविशिष्टेनैव पशुना यागो निर्णीतः। इदञ्च सर्वं वैयाकरणभूषणसारेऽपि प्रतिपादितम्।[42] **"पशुना रुद्रं यजेत..., इत्यादौ पशौ पुंस्त्वादिकं निरुक्तमबाधितमेव सुपामर्थः। यत्र तु तद्बाधस्तत्र दारा इत्यादौ बहुवचनवत् साधुत्वमात्रार्थास्तल्लिङ्गाभिधायिप्रयोगाः, न तु शब्दधर्मश्शाब्दबोधगोचर इति वस्तुगतिः"।**[43] इत्येतेन वचनेन पदवाक्यरत्नाकरकारो गोकुलनाथोपाध्यायो मन्त्रगतं पशुपदं वस्तुतः सापेक्षतः पुंस्त्वार्थविशिष्टं पश्वर्थं बोधयतीति विशदितवान्।

एवं लिङ्गस्याश्रयः शब्द एवेति वैयाकरणभूषणसारस्य मतम्। शब्दः स्वगतलिङ्गेनार्थगतस्यापि लिङ्गस्य निर्णायकः, शब्दार्थयोर्हि तादात्यम् । शब्दार्थयोर्भेदेऽपि सति स्वाश्रयवाच्यत्वसम्बन्धेनार्थगतस्यापि लिङ्गस्य निर्णयः। तावल्लिङ्गं शब्दाश्रितमेवेति कौण्डभट्टादीनां पक्षः। किन्तु नवीना वैयाकरणाः शास्त्रीयमपि लिङ्गमर्थगतमेव स्वीकुर्वन्ति तस्य शब्दाश्रयत्वं निराकुर्वन्ति च –

---

[42] वैयाकरणभूषणसारः, पृष्ठसङ्ख्या- 246-249

[43] पदवाक्यरत्नाकरः, पृष्ठसङ्ख्या- 282

**"शास्त्रीयस्यापि लिङ्गस्य स्थितिरर्थे सुनिश्चिता।**

**तस्य शब्दगतत्वं हि सहते न विचारणाम्"॥**[44]

अस्यायमभिप्रायो व्याकरणशास्त्रे तादृशानि वचनानि लभ्यन्ते, येन शास्त्रीयस्य लिङ्गस्य शब्दगतत्वम् अर्थगतत्वञ्चोभयं प्रतिपाद्यते। यथा- "**अर्धं नपुंसकम्"**[45] इति सूत्रेण नपुंसकशब्दस्यार्धविशेषणत्वेन, "**अस्त्री पङ्कं पुमान् पाप्मा"**[46] इति कोशे पुमान् इति शब्दस्य पाप्मा इति शब्दविशेषणत्वेन नपुंसकत्वपुंस्त्वरूपलिङ्गस्य शब्दगतत्वं लभ्यते। "**तस्यान्ते नेमिः स्त्री स्यात्"**[47] इत्यत्र कोशे स्त्रीशब्दस्य नीवीशब्दविशेषणत्वेन स्त्रीत्वलिङ्गस्य शब्दनिष्ठत्वमेव सिद्ध्यति। "**देवताः स्त्रियाम्"**[48] **"अर्धर्चाः पुंसि च"**[49] "**स्त्रियां मूर्तिस्तनुस्तनूः"**[50] "**सक्थि क्लीबे पुमानूरुः"**[51] इत्यादौ स्त्री-पुं-क्लीब-प्रातिपदिकेभ्यः सप्तम्या वाचकत्वरूपवैषयिकाधिकरणे विहितत्वेन देवता-अर्धर्च-सन्धिं शब्दाः स्त्रीत्व-पुंस्त्व-नपुंसकत्वानां बोधका इत्यर्थो भवति। अनेन लिङ्गस्य देवताऽऽदिपदप्रतिपाद्यार्थगतत्वं लभ्यते।

इत्थं लिङ्गस्य वस्तुतः क आश्रय इति संशीतिः। उभयपक्षेऽपि शास्त्रीयकार्यनिर्वाहः। शब्दाश्रितत्वे दारान् इत्यादौ पुंस्त्व-प्रयुक्त-नत्वादिकार्यसिद्धिः सङ्गतैवेति प्रतिपादितम्। लिङ्गस्यार्थगतत्वेऽपि

---

[44] लिङ्गवचनविचारः, कारिका -18

[45] अष्टाध्यायीसूत्रसङ्ख्या - 2/2/2

[46] अमरकोषः, 1/4/23

[47] अत्रैव, 2,8/56

[48] अत्रैव, 1/1/9

[49] अष्टाध्यायीसूत्रसङ्ख्या - 2/4/31

[50] अमरकोषः, 2/6/71, पृष्ठसङ्ख्या- 226

[51] अत्रैव, 2/6/73, पृष्ठसङ्ख्या- 227

अर्थधर्मस्य लिङ्गस्य शब्द आरोपेण न शास्त्रीयकार्यनिर्वाहासङ्गतिः। शब्दार्थयोरभेदपक्षे त्वर्थगतलिङ्गप्रयुक्तकार्यं शब्दे सुतरामेव सिद्धम्।

**अर्थनिष्ठं लिङ्गम् –**

लिङ्गस्याश्रयोऽर्थ एवेति नव्यानां पक्षः। नव्यमतनिष्कर्षरूपं महामहोपाध्यायेन दीनबन्धुझावर्येण स्वीये ग्रन्थे लिङ्गवचनविचारे समुल्लिखितम्।[52]

यथा लौकिकं लिङ्गम् अर्थनिष्ठं तथा शास्त्रीयमप्यर्थगतमेव स्वीकार्यम्। शास्त्रीयस्यापि लिङ्गस्यार्थनिष्ठत्वादेव **"प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा"**[53] इति सूत्रेण प्रातिपदिकार्थमात्रे तदपेक्षयाऽधिके लिङ्गमात्रे वा विवक्षिते प्रथमायाः विधानं सङ्गच्छते। लिङ्गस्यार्थनिष्ठत्वमिति स्वीकारे न्यायदर्शनानुसारेणापि प्रातिपदिककार्थेत्यादिसूत्रस्य सङ्गतिर्भवति। लिङ्गस्य शब्दगतत्वे लिङ्गस्य शाब्दभानं न स्यात्। न्यायमते हि शाब्दबोधे शब्दो न भासते ततश्च लिङ्गस्याप्यभानापत्तिः। अतः प्रथमारूपेण शब्देन स्वगतलिङ्गस्य शाब्दबोधे प्रत्यर्पणाभावे लिङ्गे प्रथमाऽभिधानं व्यर्थं स्यात्। वैयाकरणमते तु भर्तृहरेः-

**"न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।**

**अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते"॥**[54]

इत्यादिवचनेन शब्दस्यापि शाब्दबोधे भासनात् तद्गतलिङ्गस्यापि भानं भवति, किन्तु न नैयायिकमते। एवं न्यायमतेऽपि प्रातिपदिकार्थेत्यादिसूत्रेण लिङ्गे प्रथमाविधानस्य सार्थक्याय लिङ्गाश्रयोऽर्थ एवेति स्वीकार्यम्।

---

[52] लिङ्गवचनविचारः, कारिका -18

[53] अष्टाध्यायीसूत्रसङ्ख्या - 2/3/46

[54] वाक्यपदीयम्, 1/131

अत एव "**ह्रस्वो नपुंसके प्रातिपदिकस्य"**[55] **"तस्माच्छसो नः पुंसि"**[56] **"देवताः स्त्रियाम्"**[57] इत्यादौ नपुंसकादिलिङ्गबोधकशब्दे सप्तमीनिर्देशः सङ्गच्छते। "**एकार्थे शब्दान्यत्वाद् दृष्टं लिङ्गान्यत्वम्"**[58] इति महाभाष्ये एकार्थे इति प्रयोगेण लिङ्गस्यार्थगतत्वमेव सिद्ध्यति। अस्यार्थो वर्तते यद् एकस्मिन्नेव जलादिरूपेऽर्थे घनरसाब्जलादिरूपा अनेके लिङ्गाः शब्दा दृश्यन्ते। यथा घनरस इति पुँल्लिङ्गः शब्दः, आब् इति स्त्रीलिङ्गः शब्दः, जलमिति नपुंसकलिङ्गः शब्दः। एवमेकस्मिन्नेवार्थे शब्दभेदाद् विभिन्नलिङ्गार्थकशब्द-प्रयोगाल्लिङ्गानां भेदो ज्ञायते। यद्यपीदं भाष्यं लिङ्गभेदसाधकम्, तथाप्येकार्थे इति वचनं लिङ्गस्यार्थनिष्ठत्वस्य व्यञ्जकम्। अर्धं नपुंसकम्, इत्यादौ नपुंसकादिशब्दा लक्षणया नपुंसकत्वस्य स्त्रीत्वस्य पुंस्त्वस्य बोधकं बोधयन्ति। ततश्च "**अर्धं नपुंसकम्"**[59] इत्यस्यार्धपदं नपुंसकत्वस्य बोधकम् इत्यर्थः फलति। यद्यपि नपुंसकादिशब्दस्य नपुंसकादिबोधकपरत्वे लक्षणास्वीकार एव गौरवम् इति वक्तुं शक्यते तथापि "**देवताः स्त्रियाम्"**[60] इत्यादौ लिङ्गस्य शब्दाश्रयत्वपक्षे न शक्यार्थेनापि लक्ष्यार्थेऽन्वयः सङ्गच्छते। एष आशयो लिङ्गवचनविचार एवं प्रतिपादितः-

**"अर्द्धं नपुंसकम्, अञ्जलिः पुमान्, इत्यादौ नपुंसकादिशब्दास्तु नपुंसकत्वपुंस्त्वादिबोधकपराः इति न तदसाङ्गत्यम्। न च यथाश्रुतार्थपरत्वसम्भवे लक्ष्यार्थपरत्वं नोचितमिति वाच्यम्, अत्र**

---

[55] अष्टाध्यायीसूत्रसङ्ख्या - 1/2/47

[56] अत्रैव, 6/1/103

[57] अत्रैव, 1/1/9

[58] व्याकरणमहाभाष्यम्, स्त्रियामिति 4/1/3 सूत्रे ।

[59] अष्टाध्यायीसूत्रसङ्ख्या - 2/2/2

[60] अत्रैव, 1/1/9

**यथाश्रुतार्थपरत्वस्य त्वन्मते सम्भवेऽपि 'देवतानि पुंसि वे'त्यादौ शक्यार्थलक्ष्यार्थयोरुभयोरप्यसम्भवात्"।**[61]

किञ्च लिङ्गस्य शब्दाश्रयत्वे पशुना यजेत इत्यादौ छाग्याऽपि यागापत्तिः। शब्दनिष्ठत्वेन गुणोपचयरूपपुंस्त्वलिङ्गेन अर्थगतस्य लौकिकपुंस्त्वस्य निर्णयः स्त्रीत्वस्य व्यावर्तनं च न सम्भवति। शब्दगतं भिन्नस्वरूपं लिङ्गम् अर्थगतं भिन्नस्वरूपं लिङ्गं कथं निश्चाययेत्? किञ्च गुणोपचयरूपस्य पुंस्त्वस्य केवलान्वयितया तेन लिङ्गान्तरव्यावर्तनं न सम्भवति। यत्र शास्त्रीयं पुंस्त्वं तत्र शास्त्रीयं स्त्रीत्वं नपुंसकत्वं च सम्भवत्येव। एवं लिङ्गस्य शब्दगतत्वे दोषोऽपि भाष्यप्रामाण्येन प्रतिपादितो लिङ्गवचनविचारे- **"एतेन यदुक्तं वैयाकरणभूषणे सत्त्वरजस्तमोगुणानां साम्यं नपुंसकत्वम्, आधिक्यं पुंस्त्वम्, अपचयः स्त्रीत्वं तत्तच्छब्दनिष्ठं तत्तच्छब्दवाच्यं च। तमेव विरुद्धधर्ममादाय तटादिशब्दा भिद्यन्ते। केषाञ्चिदनेकलिङ्गत्व-व्यवहारस्तु समानानुपूर्वीकत्वेन शब्दानामभेदारोपात्। एवञ्च पदार्थपदे पुंस्त्वमेव, व्यक्तिपदे स्त्रीत्वमेव, वस्तुपदे नपुंसकत्वमेवेति सर्वत्रैवायं पदार्थ इयं व्यक्तिरिदं वस्त्विति व्यवहारस्तटस्तटी तटमिति चोपपद्यते। तत्र लिङ्गमर्थपरिच्छेदकत्वेनान्वेतीति पश्वादिशब्दोक्तं पशुस्त्रियां नास्तीति पशुनेत्यादिविधिर्न छाग्यादीनङ्गत्वेन प्रयोजयतीति- तदपास्तम्। शब्दगत-धर्मेणार्थपरिच्छेदस्य दुरुपपादत्वात् शब्दे च शास्त्रीयस्यैव लिङ्गस्य सम्भवेन तस्य च केवलान्वयितयाऽर्थव्यावर्तकत्वासम्भवाच्चोभयं सर्वत्रेति भाष्येण पुंस्त्वादेरविरोधलाभेन तमेव विरुद्धधर्ममादायेति कथनस्य चिन्त्यत्वाच्च"।**[62]

इत्थं नव्यानाम्मते लिङ्गमर्थनिष्ठमेव। एवं लिङ्गस्याश्रयः शब्दोऽर्थो वेति वैयाकरणानां कलकलः।

एवं व्याकरणशास्त्रसम्मतं शास्त्रीयं लिङ्गं लौकिकं लिङ्गं तदाश्रयश्चेति विषया विचारिताः। गुणोपचयः पुंस्त्वम्, गुणापचयः स्त्रीत्वम्, गुणसाम्यं

---

[61] लिङ्गवचनविचारः, पृष्ठसङ्ख्या- 26

[62] अत्रैव, पृष्ठसङ्ख्या- 27

(स्थितिः) नपुंसकत्वञ्चेति त्रिविधं लिङ्गं प्रसिद्धम्। एवं मेढ्रवत्त्वं योनिमत्त्वं जननशक्तिशून्यमेढ्रयोन्यन्यतरवत्त्वं च क्रमेण पुंस्त्वं स्त्रीत्वं नपुंसकत्वमिति लौकिकं लिङ्गम्। लिङ्गं स्वसत्तया स्वाभावेन च शब्दभेदस्य प्रयोजकमिति लिङ्गप्रयोज्याः शब्दभेदा विचार्यन्ते–

**लिङ्गप्रयोज्यशब्दभेदास्तद्वैचित्र्यञ्च-**

लिङ्गं शब्दभेदस्य प्रयोजकम्। तत्र कस्य शब्दस्य भेदो लिङ्गेन विधीयत इति सर्वप्रथमं विचारणीयम्। शब्दो द्विधा- पदं वाक्यञ्च। तत्र सुबन्तं तिङन्तम् इति द्विविधं पदमिति सुप्तिङन्तं पदम् इति सूत्रे प्रतिपादितम्। **"शक्तं पदम्"**[63] इति न्यायमीमांसकमतम्। तदनुसारेण घटम् इत्यत्र पदद्वयम्- घटेति पदस्य कम्बुग्रीवादिमान् अर्थः, अम् इति पदस्य कर्मत्वमर्थः। एवं प्रकृतिः प्रत्ययश्च पदमित्याशयः। तत्र प्रत्ययांशे लिङ्गं न भेदकं किन्तु प्रातिपदिकरूपप्रकृत्यंश एव। इत्थं शक्तं पदमिति लक्षणेन पदमेकविधम्। पाणिनिमतेन द्विविधम्। निरुक्तमतेन नामाख्यातोपसर्गनिपातरूपं चतुर्विधम्। कर्मप्रवचनीयस्य पृथक्करणेन पञ्चविधं पदम्। तथा चोक्तं भर्तृहरिणा-

**"द्विधा कैश्चित् पदं भिन्नं चतुर्धा पञ्चधाऽपि वा।**
**अपोद्धृत्यैव वाक्येभ्यः प्रकृतिप्रत्ययादिवत्"॥**[64]

तत्र पाणिनिनये नामाख्यातोपसर्गनिपातकर्मप्रवचनीयानां सुबन्तेऽन्त-र्भावः। आख्यातस्य तु तिङन्ते। आकाङ्क्षादिमत् पदसमूहो वाक्यम्। तथा चोक्तं भर्तृहरिणा –

**"साकाङ्क्षावयवं भेदे परानाकाङ्क्षशब्दकम्।**
**क्रियाप्रधानं गुणवदेकार्थं वाक्यमिष्यते"॥**[65]

---

[63] तर्कसङ्ग्रहः, पृष्ठसङ्ख्या- 129

[64] वाक्यपदीयम्, 3/1/1

[65] वाक्यपदीयम्, 2/4

**“एकतिङ् वाक्यसंज्ञं भवतीति वक्तव्यम्”**[66] इति महाभाष्यस्थं वचनमपि। **“तिङ्सुबन्तचयो वाक्यं क्रिया वा कारकान्विता”**[67] इत्यमरकोषवचनमपि।

इत्थं पदवाक्यभेदेन शब्दो द्विधा। प्रकारान्तरेण शब्दः पुनर्द्विधा- नित्यः स्फोटात्मकः, अनुकार्यो ध्वन्यात्मकश्च। एतद्द्वयं पस्पशाभाष्ये एवं सूचितम्- **“येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः। अथवा प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते”**।[68]

तत्र स्फोटस्याविकार्यत्वेन तत्र न लिङ्गप्रयोज्यो भेदः, अपितु ध्वन्यात्मक एव शब्दे। व्यञ्जक-ध्वन्यात्मक-शब्दगतं लिङ्गं स्फोटे प्रतिबिम्बत इति व्यञ्जकधर्मस्य लिङ्गस्यारोपाद् आरोपितो भेदः स्फोटे। तस्माद् ध्वन्यात्मक एव शब्दो लिङ्गाश्रयत्वेन स्वीकर्तव्यः। ध्वन्यात्मके शब्दे लिङ्गं वास्त्वमारोपितं वेत्यन्यतं लिङ्गसम्बन्धिव्याकरणशास्त्रीयं कार्यं ध्वन्यात्मक एव शब्दे। व्याकरणेन ध्वन्यात्मकस्यैव शब्दस्यान्वाख्यानं तद्द्वारा ध्वन्यात्मकशब्दव्यङ्ग्यस्फोटस्य चेति प्रदीपेऽपि प्रतिपादितम्- **“येनोच्चारितेतेन्ति– वैयाकरणा वर्णव्यतिरिक्तस्य पदस्य वाक्यस्य वा वाचकत्वमिच्छन्ति। वर्णानां प्रत्येकं वाचकत्वे द्वितीयादिवर्णोच्चारणानर्थक्य-प्रसङ्गात्। आनर्थक्ये तु प्रत्येकमुपत्तिपक्षे यौगपद्येनोत्पत्त्यभावाद् अभिव्यक्ति-पक्षे तु क्रमेणैवाभिव्यक्त्या समुदायाभावादेकस्मृत्युपारूढानां वाचकत्वे सरो रस इत्यादावर्थप्रतिपत्त्यविशेषप्रसङ्गात् तद्व्यतिरिक्तः स्फोटो नादाभिव्यङ्ग्यो वाचको विस्तरेण वाक्यपदीये व्यवस्थापितः”**।[69]

शास्त्रकारैरेवं प्रातिपदिकप्रकृतिरूपस्यैव लिङ्गप्रयोज्यो भेदः प्रतिपादितः। व्याकरणशास्त्रमते सिद्धान्ते प्रातिपदिकरूपस्यैव शब्दस्य लिङ्गमर्थस्तस्मिन् प्रातिपदिके एवार्थधर्मो लिङ्गमारोपितश्च। लिङ्गं तु

---

[66] अष्टाध्यायीसूत्रसङ्ख्या - 2/1/1 अत्र महाभाष्यवचनांशः

[67] अमरकोषः, 1/6/2

[68] व्याकरणमहाभाष्यम् (नवाह्निकम्), पस्पशाह्निकम्, पृष्ठसङ्ख्या - 4

[69] अत्रैव, प्रदीपटीका, पृष्ठसङ्ख्या - 15

टाबादिभिर्द्योत्यमेव। अत एवामरकोषादयो नामलिङ्गानुशासनम् इति नाम्ना व्यवहृताः। लिङ्गानुशासनसूत्रकारैरपि कृदन्तादिप्रातिपदिकस्य लिङ्ग-माख्यातम्। पदसमूहरूपवाक्यात्मकशब्दस्य लिङ्गं वाक्ये शब्दशास्त्रीय-कार्यभावेन न सूचितम्, किन्तु लोकव्यवहारेण वाक्ये सामान्येन नपुंसकत्वम् इति निश्चेतुं शक्यते। अत एव रामो वनं गतः इति मया श्रुतम्। रामो रावणं जघानेति तेनोच्चारितम् इत्यादौ श्रुतकथितपदयोर्नपुंसकत्वस्य प्रयोगेण रामो वनं गत इति वाक्ये रामो रावणं जघानेति वाक्ये च नपुंसकत्वं सिद्ध्यति। श्रावणप्रत्यक्षविषयता उच्चारणविषयता च मुख्यतः पदसमूहरूपवाक्य एव। वाक्यार्थे तु तादृशी विषयताऽऽरोपेण सम्भवति न तु मुख्यतया। किञ्च वाक्यार्थे सामान्यरूपेण नपुंसकत्वं स्वीकार्यमेव, यस्यारोपः पदसमूहात्मके वाक्ये कार्यः। अत एव रावणः सीतां जहार, इदं नोचितम् अत्र द्वितीयवाक्ये इदमिति पदेन रावणकर्तृकसीताकर्मकहरणे सामान्येन नपुंसकत्वं सिद्ध्यत्येव। तच्च शास्त्रीयमेव। वैयाकरणमते क्रियाप्रधानः शाब्दबोधो नैयायिकमते तु प्रथमान्तार्थप्रधानः। एवं सत्यपि वाक्यार्थे तद्बोधके वाक्ये च नपुंसकत्वं भवत्येव।

एवं प्रातिपदिकरूपस्य लिङ्गस्य वाच्यत्वपक्षे लिङ्गस्य प्रत्ययवाच्यत्वपक्षे पदस्य शब्दस्य भेदप्रयोजकं लिङ्गं भवति। तदाधारेण शब्दाः सर्वप्रथमं द्विधा निर्धारयितुं शक्यन्ते- (अ) सलिङ्गाः (ब) अलिङ्गाश्च।

(अ) सलिङ्गाः शब्दाः - तत्र सलिङ्गाः शब्दाः सप्तधा। एते पूर्वं द्विधा विभज्यन्ते- विशेष्यनिघ्नाः स्वतन्त्रलिङ्गाश्च। एषां लिङ्गं विशेष्यस्याधीनं भवति ते विशेष्यनिघ्नाः। ते च प्रायेण शुक्लादिरूपा विशेषणशब्दाः। यथा- शुक्लः पटः, शुक्ला शाटी, शुक्लं वस्त्रम्, अत्र शुक्लशब्दे लिङ्गं विशेष्याधीनम्। पटे शाट्यां वस्त्रे च क्रमेण पुंस्त्वस्य स्त्रीत्वस्य नपुंसकत्वस्य च सत्त्वेन तद्विशेषणीभूतशुक्लशब्दे पुंस्त्वं स्त्रीत्वं नपुंसकत्वञ्च। विशेष्यनिघ्नाः शब्दा एकधर्मिवाचकाः। एकधर्मिबोधकत्वेन विशेषणविशेष्यपदयोः सामानाधिकरण्यं भवति। यथा शुक्लपटयोः, शुक्लशब्दः शुक्लगुणद्वारा पटशब्दश्च पटत्वजातिरूपधर्मद्वारा वस्त्ररूपमेकमेव धर्मिणं बोधयतः। अत एकधर्मिवाचकत्वरूपं सामानाधिकरण्यं भवति। विशेष्यनिघ्ना एव शब्दा


अन्यलिङ्गास्त्रिलिङ्गाश्चोच्यन्ते। एतादृशविशेष्यनिघ्नविशेष्यशब्दप्रयोगे तदर्थयोरभेदान्वयो भवति। तेन शुक्लाभिन्नःपट इति रूपः शाब्दबोधः। इहाभेदपदेन इतरशब्दानवच्छिन्नविशेष्यविशेषणभावोऽभिप्रेतो नत्वभेद-मात्रम्। सम्बन्धरूपोऽन्वयो हि भेदघटितः। अत्रेदं बोध्यं यत्पदार्थयो-र्विशेष्यविशेषणभावो द्विधा भवति- अभेदेन विभक्तिबोध्यसम्बन्धेन च। तत्र भेद उदाहृतः। राज्ञः पुरुष इत्यत्र राजपुरुषयोर्विशेष्यविशेषणभावः स्वस्वामि-भावसम्बन्धप्रयोज्यः। एष सम्बन्धोऽत्र षष्ठीबोध्यः। यत्राभेदेनैवान्वयोऽ-भिप्रेतस्तत्र विशेष्यनिघ्नशब्दाः प्रातिपदिकार्थमात्रे भवन्ति। यथा शुक्लः पट इत्यत्र प्रथमा प्रातिपदिकार्थमात्रे। अत एव शुक्लपटयोरुभयोः प्रातिपदिकार्थयोरभेदान्वयः। अत्र नामपदं प्रातिपदिकार्थपरम्। निपातरूप-नामार्थाभेदसम्बन्धवारणायोक्तव्युत्पत्तौ निपातातिरिक्तत्वेन सङ्कोच इति व्युत्पत्तिवादादौ- प्रातिपदिकार्थयोरभेदान्वय इति “नामार्थयोरभेदातिरिक्त-सम्बन्धोऽव्युत्पन्नः” इति नियमेन भवति प्रपञ्चितम्। वस्तुतस्तात्पर्यमिदं यद् विशेष्यनिघ्नशब्दा विशेष्यलिङ्गकाः। एषां कतीनाञ्चन शब्दानामुपदेशोऽमरकोशे विशेष्यनिघ्नवर्गे द्रष्टुं शक्यते।

स्वतन्त्रलिङ्गाः शब्दास्तु त्रिधा भवन्ति- एकलिङ्गाः, द्विलिङ्गाः, त्रिलिङ्गाश्च। स्वतन्त्रं पदान्तरसमभिहारानधीनं लिङ्गं येषां ते स्वतन्त्रलिङ्गाः। यथा रामरमाज्ञानप्रभृतयो व्यक्तिविशेषवाचिनि रामशब्दे पुंस्त्वं सीताशब्दे स्त्रीत्वं ज्ञानशब्दे नपुंसकत्वञ्च यदस्ति तत् पदान्तरसम्बन्धं नापेक्षतेऽपितु स्वातन्त्र्येण तिष्ठति।

एकं लिङ्गं येषां त एकलिङ्गाः, द्वे लिङ्गे येषां ते द्विलिङ्गाः, त्रीणि लिङ्गानि येषां ते त्रिलिङ्गा इत्येकलिङ्गद्विलिङ्गत्रिलिङ्गपदानामर्थाः। तत्रैकलिङ्गाः त्रिधा- पुंस्त्वमात्रलिङ्गा रामविष्णुप्रभृतयः स्त्रीत्वमात्रलिङ्गाः सीतालताप्रभृतयः नपुंसकमात्रलिङ्गाः फलज्ञानादयः। तत्र द्विलिङ्गाः त्रिविधाः- स्त्रीत्वपुंस्त्वलिङ्गाः, स्त्रीत्वनपुंसकत्वलिङ्गाः, पुंस्त्वनपुंसकत्व-लिङ्गाश्च।

एवं सलिङ्गशब्दाः सङ्कलनेन सप्तधा- १. पुँल्लिङ्गाः २. स्त्रीलिङ्गाः ३.नपुंसकलिङ्गाः ४.स्त्रीपुँल्लिङ्गाः ५.स्त्रीनपुंसकलिङ्गाः ६.पुन्नपुंसक-लिङ्गाः ७. त्रिलिङ्गाश्च।

रामविष्णुप्रभृतयः पुँल्लिङ्गस्य सीतालताऽऽदयः स्त्रीलिङ्गस्य, फलज्ञानादयो नपुंसकलिङ्गस्य, ब्राह्मणभ्रमरादयः स्त्रीपुँल्लिङ्गस्य, क्रोऽवेतसादयः स्त्रीनपुंसकलिङ्गाः, दैवतचरणनूपुरादयः पुन्नपुंसकलिङ्गस्य, तटादयस्त्रिलिङ्गस्योदाहरणानि। तदेवं सलिङ्गशब्दभेदा एवं ज्ञातुं शक्यन्ते।




ईदृशं सलिङ्गभेदप्रतिपादनं लिङ्गवचनविचार एवं वर्तते- "**तदित्थं सलिङ्गानां सप्तविधत्वम्- पुँल्लिङ्ग-स्त्रीलिङ्ग-नपुंसकलिङ्ग-स्त्रीपुंसलिङ्ग-**

**स्त्रीनपुंसकलिङ्ग-पुन्नपुंसकलिङ्ग-त्रिलिङ्गत्वभेदात्"।**[70] लिङ्गवचनविचार-कर्तुः सलिङ्गविवेचनक्रमे वाक्यपदीयं मूलम्। उक्तं वाक्यपदीये -

**"भेदानां बहुमार्गत्वं कर्मण्येकत्र चाङ्गता।**

**शब्दानां यतशक्तित्वं तस्य शाखासु दृश्यते"॥**[71]

एते सलिङ्गानां सप्त भेदाः शास्त्रीयलिङ्गविशिष्टानामेव, किन्तु ये शब्दा लौकिकमेव लिङ्गं बोधयन्ति ते त्रिधा। यथा- पुं-स्त्री-नपुंसकादयः। एते क्वचन लौकिकलिङ्गेन सह शास्त्रीयमपि लिङ्गं बोधयन्ति। अत एव अमुना पुंसा इत्यत्र अमुनेति पदे नाभावादिरूपकार्यस्य सिद्धिः।

वाक्यपदीये लिङ्गस्य प्रतिपादनं त्रिधाऽवलोक्यते। तत्र सर्वप्रथमं लिङ्गविषयकाणि सप्तमतानि प्रदर्शितानि। अवयवविना शरीरेण स्तनकेशादीनां संयोगसमवायरूपः सम्बन्धः लिङ्गमित्येकं मतम्। संयोग-समवायसम्बन्धेन विशिष्टाः स्तनादय एव लिङ्गमिति द्वितीयः पक्षः। स्तनकेशादिभिरभिव्यङ्ग्या स्त्रीत्वादिजातिरेव लिङ्गमिति तृतीयं मतम्। साङ्ख्योक्तसत्त्वरजस्तमोरूपाणां गुणाणामुपचयाद्यवस्था लिङ्गमिति चतुर्थं मतम्। उपचयाद्यवस्थाविशिष्टा सत्त्वादयो गुणा एव लिङ्गमिति पञ्चमं मतम्। शब्दविशेषोपजनितो बाह्ये पदार्थे समारोपितः स्त्रीत्वादिरूपोऽर्थो लिङ्गमिति षष्ठं मतम्। शब्दविशेषसंस्कारकारणत्वं लिङ्गमिति सप्तमं मतम्। उक्तं वाक्यपदीये-

**"स्तनकेशादिसम्बन्धो विशिष्टा वा स्तनादयः।**

**तदुपव्यञ्जना जातिर्गुणावस्था गुणास्तथा॥**

**शब्दोपजनितोऽर्थात्मा शब्दसंस्कार इत्यपि।**

**लिङ्गानां लिङ्गतत्त्वज्ञैर्विकल्पाः सप्तदर्शिताः"॥**[72]

---

[70] लिङ्गवचनविचारः, पृष्ठसङ्ख्या- 31

[71] वाक्यपदीयम्, 1/6

[72] अत्रैव, ३/१०/१-२

अत्र प्रथमं द्वितीयं च मतं लौकिकलिङ्गेन सम्बद्धम्। तृतीयं वैशेषिकसम्मतम्। चतुर्थं पञ्चमं च साङ्ख्यसम्मतम्। षष्ठं सप्तमं च शब्दशास्त्राश्रितं महाभाष्याश्रितं वा। केचिद् वैयाकरणानां मतमात्रं न तु सिद्धान्त इति विवदन्ति। वस्तुतो वैयाकरणमते प्रक्रियानिर्वाहाय साङ्ख्यसम्मतमेव लिङ्गम् इति महाभाष्याश्रितः सिद्धान्तविशेषः।[73]

वाक्यपदीये पुनरग्रे लिङ्गं सप्तधा प्रतिपादितम्। एतद् प्रतिपादनाधारः शब्दशक्तिस्वभावः–

**"उपादानविकल्पाश्च लिङ्गानां सप्त वर्णिताः।**

**विकल्पसन्नियोगाभ्यां ये शब्देषु व्यवस्थिताः"॥**[74]

विशिष्टशक्तिशालिभिः शब्दैः लिङ्गानाम् अर्थोपाधित्वेन ग्रहणं तदेवोपादान-पदार्थः। तस्योपादानस्य विकल्पाः सप्तेत्यर्थः। केचन शब्दाः स्त्री-पुन्नपुंसकविषयाः केचन च पुन्नपुंसकविषयाः, इतरे स्त्रीनपुंसाकविषयाः, अन्ये स्त्रीपुंससाधारणः, केचन पुंस्त्वादावेव नियताश्च। एवं शब्दविशेषैः प्रतिपादनेन तदर्थोपाधित्वेन प्रतीयमानं लिङ्गमपि सप्तधा भवति।

एवं सामान्येन शब्दशक्तिस्वभाववशेन च लिङ्गविषयकाणि सप्त मतानि द्विधा प्रतिपादितानि वैशेषिकं मतमवलम्ब्य स्त्रीत्वादिजातिविशेष-रूपाणि लिङ्गानि यानि प्रतिपादितानि तान्येतदाधारीणि। तेन महिषे स्थितं महिषत्वं यथा जातिः तथा पुंस्त्वमपि। गवि स्थितं यथा गोत्वं तथा स्त्रीत्वमपि पुंस्त्वमपि वा जातिः। ज्ञाने स्थितं ज्ञानत्वमिव नपुंसकत्वमपि जातिः। पुंस्त्वादिजातीनां महिषत्वादिजातीनां च परस्परभिन्नत्वेऽप्येकार्थसमवायित्वं न विरुद्धम्। अत्र प्रमाणमनुभव एव। यथा हस्तीति शब्दस्य वडवेति शब्दस्य च प्रयोगे समुपस्थिते द्रव्यरूपे पदार्थ् क्रमेण स्त्रीत्वगजत्वयोरश्वत्वस्त्रीत्वयोश्च जात्योरविरोधेन नानुभवः सिद्धः। उक्तं वाक्यपदीय एव-

---

[73] द्रष्टव्यम्, अत्रैव, ३/१०/१-२ पृष्ठसङ्ख्या- ७४८-७५४

[74] अत्रैव, ३/१०/३

**"तिस्रो जातय एवैताः केषाञ्चित् समवस्थिताः ।**

**अविरुद्धा विरुद्धाभिर्गोमहिष्यादिजातिभिः ॥**

**हस्तिन्यां वडवायाञ्च स्त्रीत्वबुद्धेः समन्वयः ।**

**अतस्तां जातिमिच्छन्ति द्रव्यादिसमवायिनीम्"॥**[75]

**सलिङ्गशब्देभ्योऽर्थोपस्थितेः प्रक्रिया -**

समेषां शब्दानां जातिगुणक्रियायदृच्छारूपाणि चत्वारि प्रवृत्तिनिमित्तानि इति **"चतुष्टयी शब्दानां प्रवृत्तिः"**[76] इति पस्पशाभाष्याल्लभ्यते। तत्र ये शब्दा जात्याऽर्थविशेषे प्रवर्त्तन्ते, ते जातिशब्दा उच्यन्ते। यथा- गोशब्दः, अयं गोत्वजातिद्वारा गवि प्रवर्त्तते। ये शब्दा गुणद्वाराऽर्थविशेषे प्रवर्त्तन्ते ते गुणशब्दाः। यथा - शुक्लः, अयं शुक्लगुणद्वारा शुक्लगुणवति प्रवर्त्तते। ये शब्दाः क्रियाद्वाराऽर्थविशेषे प्रवर्त्तन्ते ते क्रियाशब्दाः। यथा - पाचकः, अयं पाकक्रियाद्वारा पाककर्तरि प्रवर्तते। ये शब्दा यदृच्छाद्वारा (यदृच्छासन्निवेशितसञ्ज्ञारूपधर्मद्वारा) अर्थेऽपि प्रवर्तन्ते ते यदृच्छाशब्दाः। यथा - डित्थः, अयं वक्तृकल्पितस्फोटात्मकडित्थेत्यखण्डसञ्ज्ञाद्वारा सञ्ज्ञिनि प्रवर्त्तते। अयमेव द्रव्यशब्दोऽप्यभिधीयते। अर्थादेकव्यक्तिबोधकः शब्दो द्रव्यशब्दो यदृच्छाशब्दो वा व्यपदिश्यते।

एवं प्रवृत्तिनिमित्तानि चत्वारि। तदाधारेण शब्दानामपि चातुर्विध्यम्- जातिशब्दः, गुणशब्दः, क्रियाशब्दः, द्रव्यशब्दश्च। तत्र जातिशब्दः, द्रव्यशब्दश्च स्वतन्त्रलिङ्गः. गुणशब्दः क्रियाशब्दश्च विशेष्यनिघ्नः। उक्तञ्च लिङ्गवचनविचारे-

---

[75] अत्रैव, ३/१०/४-५

[76] व्याकरणमहाभाष्यम्, 1/1/2

**"जातिशब्दद्रव्यशब्दौ लिङ्गे स्वातन्त्र्यमृच्छतः।**

**गुणशब्दक्रियाशब्दौ प्रायोऽन्याधीनलिङ्गकौ"॥**[77]

जातिशब्दः क्वचित् प्रकारतया क्वचिद् विशेष्यतया च जातिमुपस्थापयति। यथा - घटशब्दो घटत्वजातिद्वारा घटव्यक्तिरूपमर्थमुपस्थापयति। तत्रोपस्थितौ घटत्वं प्रकारतया भासते, किन्तु घटत्वशब्दो घटत्वरूपां जातिं विशेष्यतयोपस्थापयति। इहोपस्थितौ घटत्वं विशेष्यतया भासते। द्रव्यशब्दा आकाशचन्द्रादयः। एते आकाशचन्द्रादिसञ्ज्ञाद्वारा आकाशचन्द्रादिरूपं व्यक्तिमुपस्थापयन्ति। इहोपस्थितौ स्फोटात्मकशब्दरूपा सञ्ज्ञा प्रकारतया व्यक्तिश्च विशेष्यतया भासते। येषां मते तु यदृच्छाशब्दानां व्यक्तिविशेष एव सङ्केतस्तन्मते निर्विकल्पक एव प्रत्ययः। न्यायादिमते तु तत्तदानुपूर्व्यैव प्रकारत्वेन भावात् सविकल्पक एव प्रत्ययः। इदं मतत्रयं रसगङ्गाधरे निरूपितम्।[78]

गुणक्रियाप्रवृत्तिनिमित्तकाः शब्दा विशेष्यनिघ्ना भवन्ति। तत्र गुणशब्दा गुणं प्रकारतयोपस्थापयन्ति। यथा शुक्लः पटः, इत्यत्र शुक्लगुणस्य तद्वतो गुणिनश्चोपस्थितिरत्र गुणः प्रकारतया भासते व्यक्तिश्च विशेष्यतया क्वचन गुणशब्दा गुणमेव विशेष्यतयोपस्थापयन्ति। यथा- शुक्ल इति। अत्र शुक्लशब्दः शुक्लगुणमेव प्राधान्येनोपस्थापयति। गुणशब्दस्य **"गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति"**[79] इत्यमरवचनेन गुणे गुणिनि च शक्तिः (सङ्केतः)। वस्तुतस्तु प्राधान्येन गुणस्योपस्थापनेन गुणशब्दो जातिशब्द एव। गुणे प्रयुक्तो गुणशब्दो हि जातिं प्रकारतयोपस्थापयति। एवं गुणिवाचकप्रकृतिकभावप्रत्ययान्ताः शुक्लादयोऽपि जातिवाचकाः। क्रियाशब्दा अपि क्रियां प्रकारतयोपस्थापयन्ति। यथा - पाचक इति पदेन पाकक्रिया प्रकारतया तत्कर्ता विशेष्यतया चोपतिष्ठति। उपस्थितौ पाकक्रिया प्रकारत्वेन

---

[77] लिङ्गवचनविचारः, कारिका 25, पृष्ठसङ्ख्या- 32

[78] रसगङ्गाधरः, द्वितीयमाननम् (अभिधानिरूपणप्रसङ्गे)

[79] अमरकोषः, 1/5/17, पृष्ठसङ्ख्या- 62

भासते, किन्तु पाकादयः शब्दा जातिवाचकाः, न तु विशेष्यनिघ्नाः। ते हि पाकत्वादिजातिं प्रकारतयोपस्थापयन्ति, किन्तु केचन क्रियाशब्दा विशेष्यनिघ्ना न भवन्ति अपितु ते स्वतन्त्रलिङ्गाः। यथा - प्रमाणम्, प्रधानम् इत्यादयः। तथा हि **"वेदाः प्रमाणम्",**[80] **"प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि"।**[81]

**"दूत्याय दैत्यारिपतेः प्रवृत्तो द्विषां निषेद्धा निषेधप्रधानम्।**

**स भीमभूमीपतिराजधानीं लक्षीचकाराथ रथस्यदस्य"॥**[82]

अत्र प्रधानप्रमाणादिशब्देषु न विशेष्यानुसारि लिङ्गम्। केचन जातिवाचकाः शब्दाः त्रिलिङ्गा अपि भवन्ति। यथा तटादयः। **"तटं त्रिषु"**[83] इत्यमरवचनम्। एतत् सर्वं लिङ्गवचनविचारे स्पष्टम्।

विशेष्यनिघ्नशब्देभ्यः शास्त्रीयस्यैव लिङ्गस्योपस्थितिर्न तु लौकिकस्येत्येकं मतम्। लौकिकस्यापि भवतीति द्वितीयं मतम्। तत्र प्रथममतवादिनोऽमयमभिप्रायः - विशेष्यनिघ्नानां लौकिके लिङ्गे न शक्तिः। अतस्तैर्लौकिकलिङ्गस्य नोपस्थितिः। लौकिकलिङ्गेऽपि शक्तिस्वीकारे गौरवम्। यथा पवित्रा ब्राह्मणी, शूरा क्षत्रिया, धनाढ्या वैश्या, सुन्दरी शूद्रा चेत्यादौ ब्राह्मणीप्रभृतिभिर्विशेष्यशब्दैरेव लौकिकलिङ्गस्य प्रतीतेः पवित्रादिविशेष्यनिघ्नपदस्यापि लौकिकलिङ्गे शक्तेः स्वीकारो नोचितः। किञ्च शोभना शाटी इत्यादौ नापि विशेष्यनिघ्नशोभनाशब्देन नापि च विशेष्यशाटीशब्देन च कस्यचिल्लौकिकलिङ्गस्योपस्थितिः। एवं विशेष्य-वाचकस्यापि पदस्य न क्वचन लौकिकलिङ्गे शक्तिः किन्तु विशेष्यनिघ्नानां (विशेषणानां) तु सर्वत्रैव न लौकिकलिङ्गोपस्थापकत्वम्।

---

[80] व्युत्पत्तिवादः, प्रथमाकारकम्, पृष्ठसङ्ख्या- 07

[81] न्यायसूत्रम्, 1/1/3

[82] नैषधीयचरितम्, 6/1

[83] अमरकोषः, 1/9/7

यदि विशेष्यनिघ्नशब्दस्य लौकिके लिङ्गे शक्तिर्न स्वीक्रियते। तदा कश्चिद् आगच्छति इत्यादौ कदाचित् कश्चिदिति कथनेन स्त्रीव्यक्तेरपि बोधः स्यात्। अतो विशेष्यनिघ्नानां लौकिकलिङ्गबोधकत्वं नास्तीति पक्षो न समीचीन इति शङ्कोदेति। अस्याश्शङ्कायां समाधानं वर्तते- तथा भवतु नाम। स्त्रीव्यक्तेरपि बोध इष्ट एव। यथा- कुमारसम्भवे इदं पद्यं लभ्यते-

**"अकृशं कुचयोः कृशं वलग्ने**
**विततं चक्षुषि विस्तृतं नितम्बे।**
**अरुणाधरमाविरस्तु चित्ते**
**करुणाशालि कपालिभागधेयम्"॥**[84]

अत्राकृश-विपुल-विस्तृतरूपविशेष्यनिघ्नशब्दैः पार्वतीरूपस्त्री-व्यक्ते-र्बोधोऽनुभवसिद्धः। एवं नैषधीयचरितस्येदमपि पद्यं द्रष्टुं शक्यते –

**"क्रियते चेत् साधु विभक्ति चिन्ता व्यक्तिस्तदा सा प्रथमाभिधेया।**
**या स्वौजसां साधयितुं विलासैस्तावत् क्षमानामपदं बहु स्यात्"॥**[85]

अत्र प्रथमा सा या क्षमेति स्त्रीप्रत्ययान्तविशेष्यनिघ्नशब्देभ्यः पुरुषस्य नलस्यापि प्रतीतिः। लौकिकलिङ्गवाचकत्वाभावेऽपि विशेष्यनिघ्नशब्देभ्यः क्वचन लौकिकलिङ्गप्रतीतिर्योग्यतावशाद् भवति। यथा-

**"अधरः किसलयरागः कोमलविटपानुकारिणौ बाहू।**
**कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम्"॥**[86]

इत्यत्र विशेष्यनिघ्नकान्तपदेन वक्तृतात्पर्येण योग्यतया च पुरुषबोधः। यथा- मृगदृक्, हरिणनयना, कमलनयनम् इत्यादिविशेष्यनिघ्नपदेभ्यो योग्यता-

---

[84] महासुभाषितसङ्ग्रहः (**कुमारसम्भवम्**) , श्लोकसङ्ख्या- 113

[85] नैषधीयचरितम् , 3/23

[86] अभिज्ञानशाकुन्तलम्, 1/22

तात्पर्यवशादेव लौकिकस्त्रीत्वप्रतीतिः। एवं स्थितं यद् विशेष्यनिघ्नपदेभ्यः शक्तेरभावेन न लौकिकलिङ्गोपस्थितिः।

वस्तुतस्तु प्रथमं मतं न समीचीनम्। विशेष्यनिघ्नानां लौकिकेऽपि लिङ्गे शक्तिः स्वीकार्या। तेन विशेष्यनिघ्नशब्दानां लौकिकस्यापि लिङ्गस्य वाचकत्वम्। अत एव सुन्दरोऽस्ति इत्यत्र सुन्दरपदेन पुरुषस्यापि बोधोऽनुभवसिद्धः, यद्यपि सुन्दरपदं सुन्दरत्वेन चेतनेऽचेतने च समानरूपेण प्रवर्तते। सौन्दर्यं हि यथा चेतने भवति तथाऽचेतनेऽपि। तथापि सुन्दर इति कथनेन चेतनपुरुषस्यैव बोध आनुभाविकः। एवमेव सुन्दरी दर्शनीया इत्यत्र नार्या बोधः। इदं वक्तुं न शक्यते यत् सुन्दरादिपदानाम् अध्याहृतपुरुषनार्यादिपदसमभिव्याहारेणैव लौकिकलिङ्गबोधकत्वमिति। यतः सर्वत्र तथाऽध्याहारे किमपि प्रमाणं नास्ति। यत्र न विशेष्यवाचकपदाध्याहारस्तत्रापि विशेष्यनिघ्नपदेनैव लौकिकलिङ्गस्यापि प्रतीतिरनुभवसिद्धा। यथा मूर्खपुत्रः मूर्खः अयम् अधमपुत्रः, इत्यत्र विशेष्यनिघ्नपदेभ्यो लौकिकपुंस्त्वस्य प्रतीतिरनुभवसिद्धा।

विशेष्यनिघ्नानां लौकिकस्यापि लिङ्गस्य वाचकत्वे सुन्दरो घटः इत्यत्रापि सुन्दर इति पदेन न लौकिकपुंस्त्वस्य बोधः। घटे हि मेढ्रवत्त्वरूपं लौकिकं लिङ्गं नास्ति। वस्तुतो नैष दोषः। यत्र लौकिकलिङ्गसम्भवः तत्रैव तत्प्रतीतिरिति नियमः स्वीकर्तव्यः। अतो विशेष्यनिघ्नशब्देन लौकिकलिङ्गस्याप्युपस्थितिरिति स्वीकार्यम्। इदानीं प्रश्न उदेति यद् विशेष्यनिघ्नपदानां शास्त्रीयलिङ्गविशिष्टे लौकिके लिङ्गे. लौकिकलिङ्ग-विशिष्टे शास्त्रीये लिङ्गे, शास्त्रीये लौकिके च शक्तिः स्वीकार्या। उत्तरं वर्त्तते यत् क्वचन शास्त्रीयस्य कुत्रचिल्लौकिकस्यैव च लिङ्गस्य बोधकत्वेन विशेष्यलिङ्गशब्दस्य खण्डशः शक्तिः स्वीकार्या।

एवं विशेष्यनिघ्नशब्दस्य शास्त्रीये लौकिके च लिङ्गे खण्डशः शक्तिः। अत्र पुनः प्रश्न एकः समुदेति यत् क्वचिदुभयोर्लिङ्गयोः प्रत्ययस्य दर्शनेन कथं खण्डशः शक्तिः स्वीकार्येति। अयम् ऐन्द्री मुखं पश्य रक्तश्चुम्बति चन्द्रमाः इत्यत्र रक्तपदेन लोहितगुणवति शास्त्रीयस्य अनुरागवति च लौकिकस्य लिङ्गस्य प्रतीतिः। अस्योत्तरं विद्यते यद् योग्यतायाः तात्पर्यस्य चन्द्रादिशब्दविशेषमहिम्ना च शास्त्रीय-लौकिक-लिङ्गयोः प्रतीतिर्न विरुद्धा।

तात्पर्याद्यभावे तु क्वचन सुन्दरो घट इत्यादौ शास्त्रीयस्यैव लिङ्गस्य प्रत्ययः। एवं विशेष्यनिघ्नशब्देभ्यः खण्डशः शक्त्या क्वचिच्छास्त्रीयस्य कुत्रचिच्च लौकिकस्य लिङ्गस्य प्रतीतिः। इदं सर्वं लिङ्गवचनविचारे विचारितम्।[87]

वस्तुतस्तु शास्त्रीयलिङ्गविशिष्टलौकिकलिङ्गे लौकिकलिङ्गविशिष्ट-शास्त्रीयलिङ्गे वा विशिष्टशक्तेः स्वीकारे समीचीनः। यथा नागेशभट्टेन फलविशिष्टे व्यापारे व्यापारविशिष्टे फले च धातोः शक्तिः स्वीकृता। परमलघुमञ्जूषायाम्- **"तस्मात् फलावच्छिन्ने व्यापारे व्यापारावच्छिन्ने फले च धातूनां शक्तिः"।**[88]

एवं सुन्दर इत्यत्र सुन्दरशब्दस्य शास्त्रीयपुंस्त्वविशिष्टलौकिकपुंस्त्वे सुन्दरो घट इत्यत्र लौकिकपुंस्त्वविशिष्टशास्त्रीयपुंस्त्वे च शक्तिः। एवं रमणीया कान्ता इत्यत्र रमणीयपदस्य शास्त्रीयस्त्रीत्वविशिष्टलौकिकस्त्रीत्वे, रमणीया घटी इत्यत्र रमणीयपदस्य लौकिकस्त्रीत्वविशिष्टशास्त्रीयस्त्रीत्वे च शक्तिः। एवं विशेष्यनिघ्नशब्दस्य शास्त्रीयलिङ्गावच्छिन्ने लौकिके लिङ्गे लौकिकलिङ्गावच्छिन्ने शास्त्रीये लिङ्गे च विशिष्टा शक्तिः।

एवं सलिङ्गशब्दभेदास्तेभ्योऽर्थोपस्थितेः प्रसङ्गप्राप्ता च प्रक्रिया निरूपिता । इदानीमलिङ्गशब्दविषये प्रतिपाद्यते –

न लिङ्गं येषां ते शब्दा अलिङ्गाः। एते द्विधा- स्वः, प्रातः, सायं च इत्यादीन्यव्ययानि गच्छति, पठति इत्यादीनि तिङन्तानि च। उक्तं लिङ्गवचनविचारे- **"तत्रालिङ्गा अव्ययान्याख्यातजानि"**[89] एवमभावद्वारा लिङ्गं शब्दभेदस्य हेतुः। अत्राव्ययपदानाम् अलिङ्गत्वविषये एकः प्रश्न उदेति।

---

[87] "विशेष्यनिघ्नाः शास्त्रीयलिङ्गत्रितयवाचिनः। भवन्त्येवान्यथा तेषां न हि स्यादनयलिङ्गता॥
विशेष्यनिघ्ना ये शब्दास्तेषु शक्तिर्न लौकिके। लिङ्गे गौरवदोषेणेत्याहुः केचिद् विचक्षणः॥
परे त्वाहुर्विशेष्यत्तल्लिङ्गानामपि लौकिकम्। लिङ्गमर्थोऽभ्युपेतव्यः कुमारब्राह्मणादिवत्"॥
- लिङ्गवचनविचारः, कारिकाः 29-31 , पृष्ठसङ्ख्याः – 40-43

[88] परमलघुमञ्जूषा, धात्वर्थनिरूपणम्, पृष्ठसङ्ख्या- 48

[89] लिङ्गवचनविचारः, पृष्ठसङ्ख्या- 32

यद्यव्ययपदान्यलिङ्गानि सन्ति तर्हि तेभ्यः स्त्रियां टाप् न प्राप्तः, ततश्च **“अव्ययादाप्सुपः”**[90] इति सूत्रेण अव्ययादापः प्राप्तिः, तस्य लुक् च पाणिनिना कथं विधीयते। अस्य प्रश्नस्येदमुत्तरम्-

लिङ्गवचनकारेण अव्ययस्यालिङ्गत्वं वार्तिकभाष्याश्रयणेन प्रतिपादितम्। कात्यायनेन भाष्यकृता चोक्तसूत्रे आब्ग्रहणं प्रत्याख्यातम्- **“अव्ययादापो लुग्वचनानर्थक्यं लिङ्गाभावात्, अव्ययादापः लुग्वचनमनर्थकम्। किं कारणम् ? लिङ्गाभावात्, अलिङ्गमव्ययम्”।**[91]

तेनाब्ग्रहणमदृष्टार्थमेव न तु दृष्टार्थम्। सूत्रकारमते तु कदाचिदव्ययानामपि सलिङ्गत्वप्राप्तस्यापो लुग्विधानार्थम् आब्ग्रहणं कृतम्। यथा ‘तत्र शालायाम्’ अत्र स्त्रीलिङ्गशालाशब्दसामानाधिकरण्येन तत्रेत्यदन्ताद् **“अजाद्यतष्टाप्”**[92] इति टाप् प्राप्तः, तस्य अनेन लुग्विधीयते। उक्तं सिद्धान्तकौमुद्याम्- **“अव्ययाद्विहितस्यापः सुपश्च लुक् स्यात्”।**[93] तत्र शालायाम्- अजाद्यतष्टाप्[94] सूत्रे ।

एवं पाणिनिमते तत्र ग्रामे, तत्र शालायाम्, तत्र गृहे इत्यादौ पुँल्लिङ्गादिशब्दसामानाधिकरण्येन तत्रेत्यादिशब्दानां पुंस्त्व-स्त्रीत्व-नपुंसकत्वसम्भवेन सलिङ्गत्वम्। अत्र **“सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु। वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्”**[95] इति वचनेन अव्ययस्यापि सलिङ्गत्वं सूच्यते। तत्र किमुचितमिति विचारणीयम्। वस्तुतस्तु **“यथोत्तरं**

---

[90] अष्टाध्यायीसूत्रसङ्ख्या - 2/4/82

[91] व्याकरणमहाभाष्यम् (द्वितीयखण्डम्), 2/4/82 इत्येतत्सूत्रे, पृष्ठसङ्ख्या - 572

[92] अष्टाध्यायीसूत्रसङ्ख्या - 4/1/4

[93] “अव्ययादाप्सुपः”, अष्टाध्यायीसूत्रसङ्ख्या - 2/4/82 - सिद्धान्तकौमुदी

[94] अष्टाध्यायीसूत्रसङ्ख्या - 4/1/4

[95] व्याकरणमहाभाष्यम्, 2/4/82 सूत्रव्याख्याने

**मुनीनां प्रामाण्यम्"**[96] इति नियमेन पाणिन्यपेक्षया वार्त्तिककारस्य भाष्यकारस्य च प्राबल्यम्। अतस्तत्रेत्यादीनां सामानाधिकरण्येन सलिङ्गत्वं नाङ्गीकार्यम्। भाष्यवार्त्तिककारमतं प्रदीपे तदुद्योते चैवं प्रतिपादितम् -

**"लिङ्गाभावादिति। न च स्त्रीनामाधिकरणपक्षः स्त्रियामित्यत्राश्रितः, भूतमियं ब्राह्मणी इत्यादौ भूतादिभ्यः प्रसङ्गादिति भावः"।**[97]

**"ननु मा भूल्लिङ्गं तत्र शालायामित्यादौ स्त्रीसामानाधिकरण्यादेव टाप् तस्य चानेन लुगत आह न चेति। भूतमिति। सामान्ये नपुंसकम्"।**[98]

भावोऽयं वर्तते यत् स्त्रीलिङ्गसामानाधिकरण्येन तत्रेत्याद्यव्ययेभ्यः टाप् न सम्भवति। यदि तत्सामानाधिकरण्येन टाप् स्वीक्रियते तदा भूतम् इयं ब्राह्मणी इत्यत्र ब्राह्मणी समानाधिकरणाद् भूतप्रातिपदिकादपि टाप् स्यात्, न च भवति। भूतमित्यत्र पदसंस्कारपक्षमाश्रित्य सामान्ये नपुंसकत्वम्। एवमव्ययानाम् अलिङ्गत्वमेव। अथवा नञ ईषदर्थत्वेन 'न' ईषल्लिङ्गं यस्य इत्यलिङ्गशब्दस्य विग्रहः कार्यः। लिङ्गद्योतकप्रत्ययस्य सर्वथाऽप्रयुज्यमानत्वेन अव्ययशब्दानामलिङ्गत्वं सम्भवति। अत एव अस्मिन् प्रातः इयं दोषा, इदं नक्तम् इत्यादौ प्रातराद्यव्ययसामानाधिकरण्येन। इदमादिषु लिङ्गविशेषः सम्भवति। सामान्येन नपुंसकत्वं[99] तु सिद्धमेव।

इत्थं लिङ्गं शब्दभेदहेतुः। अव्ययाख्यातान्यलिङ्गशब्दाः पूर्वप्रदर्शिताः, सप्तधा सलिङ्गाश्च शब्दाः। तत्र शास्त्रीयं लिङ्गं ह्रस्वदीर्घप्लुतस्पृश्यतालव्यादिवच्छब्दधर्मोऽपि सन् लिङ्गभेदप्रयोजकः।

---

[96] सिद्धान्तकौमुदी, "न क्वादेः" अष्टाध्यायीसूत्रसङ्ख्या - 7/3/59 इत्यत्र व्याख्याने

[97] व्याकरणमहाभाष्यम् (द्वितीयखण्डम्), 2/4/82 सूत्रे प्रदीपटीका, पृष्ठसङ्ख्या - 572

[98] व्याकरणमहाभाष्यम् (द्वितीयखण्डम्), 2/4/82 सूत्रे उद्योतटीका, पृष्ठसङ्ख्या - 572

[99] "अर्द्धर्चाः पुंसि च"। अष्टाध्यायीसूत्रसङ्ख्या - 2/4/31 इति व्याख्याने - लघुसिद्धान्तकौमुदी

**लिङ्गाविवक्षा -**

कदाचिल्लिङ्गस्याविवक्षाऽपि। यथा स्त्रीत्वस्य केचन शब्दा नैकलिङ्गाः। तेषां स्त्रीत्वस्य विवक्षाया अभावे स्त्रीप्रत्ययाप्राप्तावपि प्रयोगाः साधुर्मन्यते। यथा- कोमलादयश्शब्दाः। स्त्रीत्वाविवक्षायां कोमल इति स्त्रीप्रत्ययरहितोऽपि शब्दः साधुः। एतादृशेषु शब्देषु स्त्रीत्वस्य पुंस्त्वस्य नपुंसकत्वस्य चाविवक्षा भवति। यथा- कोमलः करः, इत्यत्र स्त्रीत्वनपुंसकत्वयोः, कोमला नगरी इत्यत्र पुंस्त्वनपुंसकत्वयोः, कोमलं वस्त्रम् इत्यत्र स्त्रीत्वपुंस्त्वयोश्चाविवक्षा। एवं त्रिलिङ्गेषु कस्यचन लिङ्गस्याविवक्षा भवति। एवं द्विलिङ्गेष्वपि चरणादिशब्देषु। स्त्रीत्वबोधकप्रत्ययाभावेऽपि कोमलादिपदानां प्रयोगः साधुरिति तत्र स्त्रीत्वादिलिङ्गाविवक्षा।

किन्तु येषां स्त्रीबोधकप्रत्ययाभावे प्रयोगस्य न साधुत्वं तेषु खट्व-गङ्ग-तार-गोध-प्रभृतिषु स्त्रीत्वस्य विवक्षैव भवति, न त्वविवक्षा। स्त्रीप्रत्यय-विशिष्टाः खट्वा-गङ्गा-तारा-गोधा-प्रभृतयः शब्दाः प्रयोगे साधवो न तु खट्वः, गङ्गः, तारः, गोध इत्यत्र प्रयोगे साधुत्वं भवति। एवं नित्यस्त्रीलिङ्गे शब्दे स्त्रीत्वस्य विवक्षैव भवति। विवक्षाया अभावे टाबादेरप्राप्तौ खट्व-गङ्गेत्यादीनामसाधुत्वम्। एवं नियतलिङ्गे शब्दे लिङ्गाविवक्षा न सम्भवति। एवं पुंस्त्वनियता विष्णुप्रभृतयस्तत्र पुंस्त्वस्य नियतनपुंसकलिङ्गा ये ज्ञानादयस्तत्र नपुंसकत्वस्य चाविवक्षा कर्तुं न शक्यते।

ज्ञानादौ नपुंसकत्वस्याविवक्षायाम् अमादेशः वायुप्रभृतिभ्यः **"स्वमोर्नपुंसकात्"**[100] इति स्वमोर्लुक् न प्राप्नोति। एवं स्थितं यदनियतलिङ्गे पदे लिङ्गस्याविवक्षा नियतलिङ्गे तु विवक्षेति। उक्तञ्च लिङ्गवचनविचारे-

**"स्त्रीप्रत्ययप्रकृतयः काश्चित् स्त्रीमात्रलिङ्गकाः।**
**अनेकलिङ्गाः काश्चित्तेत्येवं द्वैविध्यमाश्रिताः॥**

[100] अष्टाध्यायीसूत्रसङ्ख्या - 7/1/23

**तत्राद्यासु स्त्रीत्वलिङ्गविवक्षा नियतान्यथा।**

**न ताः साधुत्वमृच्छेयुर्न च स्युः स्वार्थबोधिकाः"॥**[101]

अस्याशयो वर्तते यत् स्त्रीप्रत्ययस्य प्रकृतिभूताः केचन शब्दाः स्त्रीमात्रलिङ्गाः अनेकलिङ्गाश्च भवन्ति। तत्र स्त्रीमात्रलिङ्गे लिङ्गविवक्षा न सम्भवति, अनेकलिङ्गे तु सम्भवति। उक्तं वृत्तावपि- **"तत्राद्येषु खट्वगङ्गतारगोधप्रभृतिषु स्त्रीत्वविवक्षा नित्या, अर्थात् स्त्रीत्वविवक्षयैव प्रयुक्तेषु साधुत्वमन्यथा त्वसाधुत्वमिति द्वितीयेषु कोमलकुमारक्रोडप्रभृतिषु त्वनित्या सा, अर्थात् स्त्रीत्वविवक्षया वा तदविवक्षया वा प्रयुक्तेषु साधुत्वमिति। तत्र स्त्रीत्वे विवक्षिते स्त्रीप्रत्ययोऽन्यथा तु नेति विवेकः"।**[102]

लिङ्गस्याविवक्षायां **"तस्यापत्यम्"**[103] सूत्रेऽस्मिन् अमादेशविशिष्टोऽपत्यशब्दः प्रमाणम्। अपत्यशब्दो नपुंसकत्वबोधकः । अत एव नपुंसकत्वबोधकाद् अपत्यशब्दात् परयोः स्वमोः **"अतोऽम्"**[104] सूत्रेणानेनामादेशे अमि पूर्वः इति पूर्वरूपत्वे अपत्यम् इति सिद्ध्यति। अपत्यमिति पदेन बोध्ये रामादौ नपुंसकत्वं भासते, किन्तु अपत्यार्थे विहितेनेञणादिना नपुंसकत्वं न भासते, अर्थाद् इञणादयः अपत्यार्थे विधीयमानाः प्रत्ययाः नपुंसकत्वस्य बोधका न भवन्ति। यथा - अप्शब्दवाच्यम् इत्यत्र जले अब्विशेषणतया भासमानमपि नपुसंकत्वम् अप्शब्दवाच्यत्वेन न भासते। दशरथसम्बन्धिन्यपत्यार्थे इञ् इति तत्सूत्रतात्पर्यभूतवाक्यार्थे **"तस्यापत्यम्"**[105] इत्यत्र अपत्यपदवाच्यं नपुंसकत्वं न विवक्षितम्। अत एव दशरथस्यापत्यं पुमान् इति विग्रहे पुंस्त्वे इञ्प्रत्ययो भवति दाशरथीत्यादौ। एवमौपगवादावणादयोऽपि बोध्याः। अपत्यमित्यत्र नपुंसकत्वस्य विवक्षायां

---

[101] लिङ्गवचनविचारः, कारिके - 34, 35

[102] लिङ्गवचनविचारः, पृष्ठसङ्ख्या - 49

[103] अष्टाध्यायीसूत्रसङ्ख्या - 4/1/92

[104] अत्रैव, 7/1/24

[105] अत्रैव, 4/1/92

पुंस्त्वाद्यर्थे औपगवः औपगवी इत्यादावणादयो न स्युः। नपुंसकत्वस्याविवक्षायाम् अपत्यमित्यत्र कथममादेश इति न शङ्कनीयः। अपत्यशब्दस्य नपुंसकत्वमात्रे शक्तत्वेनामादेशः सिद्ध्यति। सूत्रपर्यवसितार्थवाक्ये तु नपुंसकस्याविवक्षितत्वेन न परामर्शः। एवं लिङ्गस्याविवक्षायां तस्यापत्यम् इति सूत्रेऽपत्यम् इत्यत्रामादेशः प्रमाणम्।

उक्तं लिङ्गवचनविचारे– "**तथा हि तस्यापत्यमित्यादावपत्यादिपदादपत्यादिविशेषणतया नपुंसकत्वं भासत एवेति नामादेशानुपपत्तिः। परन्त्वपत्यप्रत्ययवाच्यतया तन्न विवक्षितम्। यथा जलं घनरसपदवाच्यमित्यत्र जलविशेषणतया भासमानमपि नपुंसकत्वं घनरसपदवाच्यत्वेन न विवक्षितं तद्वत्। तथा च तत्सम्बन्ध्यपत्यमित्यर्थेऽणादिरिति पर्यवसितार्थकवाक्ये इतिनाऽपत्यत्वा-वच्छिन्न एवं परामृश्यते, न तु नपुंसकत्वविशिष्टमपत्यं न वा तत्पदार्थ उपग्वादिः तस्योपग्वादिशब्दलभ्यत्वात्। नापि तत्सम्बन्धः तस्य उपग्वपत्यमित्यादाविवैकार्थीभावमहिम्नैव लाभात्। एवञ्चोपग्वादिरुपलक्षणं न तु विशेषणमिति तत्त्वम्। एवमेकत्वमप्यणादिप्रत्ययवाच्यत्वेनाविवक्षितम् । तेन औपगवौ इत्यादयोऽपि सिद्धयन्ति। लिङ्गसंख्ययोः शक्तिग्रहस्तु तृजादिवल्लोकत एवेत्याहुः**"॥[106]

## प्राणिमात्रवाचकानां ब्राह्मणादिप्रातिपदिकानां लौकिकशास्त्रीयोभय-लिङ्गबोधकत्वम् –

एवं व्याकरणशास्त्रे गुणपरिणामरूपं शास्त्रीयं लिङ्गं स्वीकृतम्। अत्र प्रश्न उदेति यद् ये प्राणिवाचकाश्शब्दास्तदर्थे लौकिकलिङ्गस्य सम्भवेन तत्र शास्त्रीयं लिङ्गं किमर्थमाश्रयणीयम्? यथा ब्राह्मणान् इत्यादौ लौकिकलिङ्गाश्रयणेन नत्वस्य ब्राह्मणीत्यादौ ङीषश्च सिद्धिः। एवं लौकिकेनैव स्त्रीत्वेन पुंस्त्वेन च शास्त्रीयकार्यसिद्धौ ब्राह्मणादिप्रातिपदिकानां शास्त्रीयलिङ्गवाचकत्वं किमर्थं स्वीकरणीयम्? प्राणिवाचकेषु कलत्रादिषु नपुंसकत्वप्रयुक्तामादेशादेः कृते यदि शास्त्रीयं नपुंसकत्वम् आश्रीयते तर्हि कलत्रादिशब्दानां शास्त्रीयनपुंसकत्ववाचकत्वं भवतु नाम। तेनेदं स्वीकरणीयं

---

106 लिङ्गवचनविचारः, पृष्ठसङ्ख्या- 49-50

यद् ब्राह्मणादिशब्दे लौकिकस्यैव लिङ्गस्य वाचकत्वं समीचीनं न तु शास्त्रीयस्यापि।

वस्तुतः प्रश्नोऽयं न समीचीनः। यदि ब्राह्मणादिशब्दे लौकिकशास्त्रीयोभयलिङ्गबोधकत्वं न स्वीक्रियेत तदा अस्मिन् ग्रामे वासिनः सर्वान् पुरुषान् स्त्रियश्च ब्राह्मणान् जानीहि इति वाक्येऽसङ्गतिः स्यात्। अत्र ब्राह्मणशब्दस्य वाच्यत्वेन लौकिकं शास्त्रीयञ्च लिङ्गं विवक्षितम्। ब्राह्मणशब्देन पुरुषवत् स्त्रियोऽपि बोध्याः सन्ति। ब्राह्मणे लौकिकस्य शास्त्रीयस्य च पुंस्त्वस्याश्रयणेन नत्वमुपपादनीयम्। यदि शास्त्रीयं पुंस्त्वं ब्राह्मणशब्देन वाच्यं न स्यात् तदा स्त्रीणामपि बोधकत्वेन स्त्रीषु लौकिकपुंस्त्वस्याभावेन च ब्राह्मणान् इत्यत्र नत्वं न स्यात्। अतः प्राणिमात्रवाचकेषु ब्राह्मणादिशब्देषु शास्त्रीयलौकिकोभयलिङ्गबोधकत्वं स्वीकार्यम्। उक्तं लिङ्गवचनविचारे-

**"ब्राह्मणक्षत्रियाणां प्राणिसात्राभिधायिनाम्।**

**पुंस्त्वादि लिङ्गं शास्त्रीयं वाच्यं यदि न मन्यते॥**

**तदाऽस्मिन् ब्राह्मणग्रामे पुरुषानथ च स्त्रियः।**

**ब्राह्मणान् विद्धि वाक्येऽस्मिन्न स्याननत्वस्य साधुता॥**

**ब्राह्मणादिशब्दानां हि शास्त्रीयलिङ्गावाचकत्वे स्त्रीपुरुषोभयपरत्वेन प्रयुक्ते 'एतस्मिन् ग्रामे वासिनः सर्वान् स्त्रियः पुरुषाँश्च ब्राह्मणानवेही'ति वाक्ये नत्वानापत्तिः। यदि ह्यत्र ब्राह्मणपदवाच्यं लौकिकं पुस्त्वं न विवक्ष्यते तदा पुंस्त्वबोधकत्वाभावेन नत्वाप्राप्तेः। अथ विवक्ष्यते तदापि तद्ग्रामवासिस्त्रीगणेषु तदसत्वान्नत्वाप्राप्तिरेव ब्राह्मणपदबोध्यत्वेन विवक्षितयावदर्थेषु पुंस्त्वाभावात्"।**[107]

**विशेष्यनिघ्नशब्दप्रयोगे वैचित्र्यम् –**

यदा एकधर्मिबोधकत्वरूपं सामानाधिकरण्यं तत्र विशेष्यनिघ्नाः त्रिलिङ्गा विशेषणशब्दा विशेष्यवाचकशब्दबोध्यलिङ्गका भवन्ति। यथा

---

[107] लिङ्गवचनविचारः, कारिके 36-37

नीलो घटः, श्वेतः पटः, कृष्णा शाटी, स्वच्छं जलम् इत्यादौ नीलादिशब्दा घटादिविशेष्यलिङ्गकाः, किन्तुविशेष्यनिघ्ना यदा असमानाधिकरणविशेषण-परास्तदा पुंस्त्रीबोधतात्पर्यं सत्तायां पुंस्त्रीलिङ्गा भवन्ति। यथा- अधमाद् उत्पन्नोऽयं पुरुषः अत्राधमेति उत्पत्तिं प्रति व्यधिकरणं विशेषणम्। अनेन पुरुषस्य विवक्षिततत्वेन अधमादित्यधमपदे पुँल्लिङ्गत्वम्। अधमपुरुषाद् उत्पन्नोऽयं पुरुष इत्यर्थः। यदा तु विशेष्यनिघ्नशब्दस्य स्त्रीबोधे तात्पर्यं तदा स्त्रीलिङ्गत्वमेव। यथा ज्येष्ठायाः पुत्रः इत्यत्र ज्येष्ठेति पुत्रस्य व्यधिकरणं विशेष्यनिघ्नविशेषणम्। ज्येष्ठशब्दस्य स्त्रीबोधे तात्पर्येण ज्येष्ठाया इत्यत्र स्त्रीलिङ्गस्य प्रयोगः। त्रिलिङ्गेषु विशेष्यनिघ्नेषु प्राप्तेषु सत्सु नपुंसकलिङ्गस्यैव प्रयोगः समीचीनः। यथा सत्कर्मणा इष्टं सिद्ध्यति अत्रेष्टपदेन लिङ्गत्रयविशिष्टाः पदार्था अभिप्रेताः। सत्कर्मणा हि स्वर्गः, अनुकूलस्त्री धनञ्च सिद्ध्यति एतत्त्रयमिष्टशब्देन विवक्षितम्। अतः 'इष्ट' इत्यस्य इष्टा इत्यस्य इष्टम् इत्यस्य च प्रयोगे वाप्ते इष्टम् इति नपुंसकलिङ्गस्यैव प्रयोगः शास्त्रसम्मतः। यदा विशेष्यनिघ्नशब्दा धात्वर्थं विशेषयति तदा क्लीबलिङ्गा एव भवन्ति। यथा- सानन्दं वदति, स्तोकं पचति, अल्पं ददाति, इत्यादौ सानन्दादिपदानि वदनादिधात्वर्थं विशेषयन्ति। अतस्तत्र नपुंसकलिङ्गस्यैव प्रयोगः। तिङन्तस्थले बोध्यमानो धात्वर्थः साध्यावस्थापन्न एव भवति, अतस्तत्र नपुंसकप्रयोगः। किन्तु यदा क्रियाघञादिप्रत्ययबोध्या विवक्ष्यते तदा यथायोगं लिङ्गम्। यथा- स्तोकः पाकः, स्तोका पङ्क्तिः, स्तोकं पचनम्। अत्रापि यद् धातुनैव बोध्या क्रिया विशेष्टुं विवक्षिता तदा नपुंसकलिङ्गमेव। यथा- स्तोकं पाकः, स्तोकं पङ्क्तिः, स्तोकं पचनम्। धातुबोध्या क्रिया साध्यैवेति नियमः।

उक्तं वैयाकरणभूषणसारे-

**"साध्यत्वेन क्रिया तत्र धातुरूपनिबन्धना।**

**सिद्धभावस्तु यस्तस्याः स घञादिनिबन्धनः"॥**[108]

---

[108] वैयाकरणभूषणसारः, धात्वर्थनिर्णयः, कारिका -15

यदा तु विशेष्यवाचकं पदमव्ययाद्यलिङ्गमेव भवति, तदा विशेष्यनिघ्नपदं क्लीबलिङ्गमेव भवति। यथा- स मिथ्या वदतीति न समीचीनम् अत्र विशेष्यवाचकम् 'इति' पदम् अलिङ्गं तथापि समीचीनम् इति विशेष्यनिघ्नपदं विशेषणं लिङ्गम्। द्रव्यविशेषणीभूतस्य पदार्थस्य विशेषणे नपुंसकलिङ्गत्वमेव। यथा- पटः अत्यन्तं शुक्लः इत्यत्र शुक्लगुणः पररूपद्रव्ये विशेषणीभूतः, तस्य विशेषणम् 'अत्यन्तम्' इति। अत्यन्तत्वेन शुक्लगुणो विशेष्यते तेन च पटः। एवं विशेष्यनिघ्नपदे सामान्येन नपुंसकलिङ्गं प्रयुज्यते। भावोऽयं वर्त्तते यद् व्याकरणे पदद्वयं स्वीकृतम्- पदसंस्कारो वाक्यसंस्कारश्च ।

**पदसंस्कारपक्षः –**

तत्र पदसंस्कारपक्षे संस्कृते पदे सामान्येन नपुंसकलिङ्गस्य प्रयोगः। यथा दृहि-धातोः क्तप्रत्यये दृढमिति सिद्धम् इत्युच्यते। पदसंस्कारपक्षे प्रयुक्तं नपुंसकत्वं वाक्यकालेऽपि कदाचिन्न न त्यज्यते। यथा दृढं भक्तिर्यस्य स दृढभक्तिरिति पदे भक्त्या सामानाधिकरण्येऽपि दृढशब्दे नपुंसकत्वमेव। दृढा भक्तिर्यस्येति विग्रहस्तु कर्त्तुं न शक्यते तथा सति दृढाभक्तिरिति सिद्ध्येन्न तु दृढभक्तिरिति। भक्तिशब्दस्य प्रियादिगणे पठितत्वेन **"स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियाऽऽदिषु"**[109] इत्यादिसूत्रेण दृढाशब्दस्य पुंवत्प्रयोगो न स्यात्। दृढभक्तिः, दृष्टभक्तिरित्यादय एव शब्दा महाकविभिः प्रयुक्ताः। यथा मेघदूते -

**"पश्चादुच्चैर्भुजतरुवनं मण्डलेनाभिलीनः,**

**सान्ध्यं तेजः प्रतिनवजपापुष्परक्तं दधानः।**

**नृत्यारम्भे हर पशुपतेरार्द्रनागाजिनेच्छाम्,**

**शान्तोद्वेगस्तिमितनयनं दृष्टभक्तिर्भवान्या"॥**[110]

[109] अष्टाध्यायीसूत्रसङ्ख्या - 6/3/34

[110] मेघदूतम्, 1/36

एवमेव स्त्रीकर्तृकं श्राद्धमित्यादौ बोध्यम्। स्त्री कर्तृ यस्य तद् इति विग्रहः। स्त्री कर्त्री यस्य तदिति विग्रहे स्त्रीकर्त्रीकम् इति स्यात्। एवमेव शरदः कृतार्थता इत्यादौ कृतार्थस्य भावः 'कृतार्थता' इति विग्रहः, न तु कृतार्थाया भाव इति। तथा सति 'कृतार्थाता' इति प्रयोगापत्तिः। एवञ्च सूचितं विशेष्यनिघ्नपदप्रयोगपरं लिङ्गवैचित्र्यं लिङ्गवचनविचारे वचनैरेभिः सविस्तरं विवेचितम् –

**"विशेष्यनिघ्नशब्दानां वैचित्र्यमिदमीक्ष्यताम् ॥**
**ते समानाधिकरणविशेषणसमर्पकाः।**
**विशेष्याधीनवचनलिङ्गाः प्रोक्ता मनीषिभिः॥**
**असमानाधिकरणविशेषणपरास्तु ते ।**
**पुंव्यक्तिबोधतात्पर्यसत्त्वे पुँल्लिङ्गभागिनः।**
**स्त्रीव्यक्तिबोधतात्पर्ये सति स्त्रीलिङ्गयोगिनः॥**
**प्राप्तेषु त्रिषु लिङ्गेषु क्लीबलिङ्गा भवन्ति ते ।**
**पुँल्लिङ्गास्तु प्रयुज्यन्ते यदि स्युः प्राणिबोधकाः॥**
**"न मे पार्थाऽस्ति कर्तव्यं त्रिषु लोकेषु किञ्चन।**
**नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि॥**
**ते क्लीबलिङ्गा धात्वर्थे विशेषणपरा यदि॥**
**विशेष्यवाचकपदमलिङ्गं यदि वर्तते।**
**तदा विशेष्यनिघ्नानां प्रयोगः क्लीबलिङ्गकः॥**
**द्रव्योपसर्जनीभूतगुणस्य च विशेषणे।**
**प्रयुक्ताः क्लीबलिङ्गाः स्युर्यथात्यन्तं पटुर्भवान्॥**
**येषां क्लीबत्वमत्रोक्तं त एकवचनगुणाः॥**
**न्याय्यं लिङ्गं परित्यज्य श्रयन्ति क्लीबतां क्वचित्।**
**तथा हि धीरैः सामान्ये नपुंसकमितीरितम्"॥**[111]

[111] लिङ्गवचनविचारः, 41-49 श्लोकाः

**एवंविधप्रयोगवैचित्र्ये प्रमाणम् -**

एतादृशप्रयोगवैचित्र्ये प्रामाणिकलोकव्यवहार एव प्रमाणम्। अत एव शास्त्रकृतः लिङ्गविधिं न प्रत्यपादयन्। भगवता पतञ्जलिनाऽपि- "**लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य**"[112] इत्यभिहितम्। प्रामाणिकप्रयोग एव शब्दलिङ्गप्रमाणे प्रमुखं कारणम्। अत्र प्रश्न एवं भवितुमर्हति यद् यदि लिङ्गज्ञाने लोक एव प्रमाणं तदा लिङ्गानुशासनसूत्रनिर्माणम् अमरादिभिर्नामलिङ्गानुशासनम् इति कोशस्य नामकरणं च कथं सङ्गच्छते। अस्योत्तरमिदं वर्त्तते यत् प्रामाणिकैः पाणिन्यमरप्रभृतिभिर्लोकादेव लिङ्गव्यवस्थां विज्ञाय लिङ्गबोधकानि कानिचन सूत्रादीनि प्रयुक्तानि। तत्रैका व्यवस्था वर्त्तते-

**"या विशेष्येषु दृश्यन्ते लिङ्गसङ्ख्याविभक्तयः।**

**प्रायस्ता एव कर्तव्याः समानार्थे विशेषणे"॥**[113]

नियम एष विशेष्यनिघ्नविशेषणविषयः। विशेष्यलिङ्गवचनविभक्तिकत्वमेव विशेष्यनिघ्नविशेषणे प्रायेणेत्युक्तव्यवस्थाया अभिप्रायः। तेन नीलं घटम् आनय इति साधु न तु नीलां घटम्, नीलौ घटम् इति वा। घटरूपविशेष्ये पुंस्त्वैकवचनप्रथमात्वम्, तदेव च नीले समीचीनम्। अत्र प्राय इति कथनेन स्वतन्त्रलिङ्गेषु नियतवचनेषु च विशेषणेष् नायं नियमः प्रवर्त्तते। तेन द्रव्यं पङ्कः, शतं ब्राह्मणाः, मैथिली रामस्य दाराः, इत्यादौ समानलिङ्गवचनविभक्तित्वस्य न नियमः। प्राय इति कथनेन मृदौ काव्ये इत्यत्र न समानलिङ्गत्वम्, अन्यथा मृदुनि काव्ये इत्येव साधु स्यान्न तु मृदौ काव्ये इति। मृदौ काव्ये इत्यत्र मृदुपदवाच्यं पुंस्त्वमेव लिङ्गम्। "**तृतीयाऽऽदिषु भाषितपुंस्कं पुंवद्गालवस्य**"[114] इति गालववचनेन पुंवद्भावः। स्वत्रन्त्रलिङ्गे

---

[112] समासान्ताः - अष्टाध्यायीसूत्रसङ्ख्या - 5/4/68 एतत्सूत्रभाष्यवचः

[113] व्युत्पत्तिवादः (व्याख्यायामुद्धृतवचः), पृष्ठसङ्ख्या- 07

[114] अष्टाध्यायीसूत्रसङ्ख्या - 7/1/34

लिङ्गमात्रे स्वातन्त्र्यम्। वचनविभक्त्यादौ तु नैष नियमः। यथा पङ्कं पङ्को वा जलमिश्रिता मृद् इति।

वैयाकरणैरपराऽपि लिङ्गव्यवस्था प्रयोगानुसारिणी विशेषणविषया स्वीकृता- "**सामान्ये नपुंसकम्**"[115] इति। सिद्धान्तकौमुद्याम्– "**स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियाऽऽदिषु**"[116] इति सूत्रे उक्तम् - सामान्ये नपुंसकम्, दृढं भक्तिर्यस्य स दृढभक्तिरिति।

अस्याभिप्रायो वर्तते यद् दृढशब्दः सामान्येन नपुंसकत्वस्य बोधकः। अस्याशयं प्रतिपादयन् नागेशभट्टो वदति यद् यदा लिङ्गविशेषस्याविवक्षा भवति तदैव नपुंसकत्वमाश्रीयते यदा दृढशब्देन दार्ढ्यभावमात्रस्य निवृत्तिरभिप्रेता तदा दृढभक्तिरिति युज्यते। यदा तु दृढशब्देन भक्तौ स्त्रीत्वस्यापि विवक्षा तदा तु दृढाभक्तिरिति। उक्तं लघुशब्देन्दुशेखरे– "**अदार्ढ्यनिवृत्तिमात्रपरत्वेन लिङ्गविशेषविवक्षा नेति**"।[117]

तात्पर्यमिदं यद् विशेष्यनिघ्ना विशेषणशब्दा लिङ्गविशेषस्य लिङ्गसामान्यस्य च बोधका यदा स्त्रीत्व-पुंस्त्व-नपुंसकत्वान्यतमलिङ्गविशेषस्तैः प्रतिपाद्यते तदा स्त्रीत्वादिनिमित्तानि टाबादिकार्याणि भवन्ति। यदा तु विशेष्यनिघ्नशब्दैः लिङ्गसामान्यमेव बोध्यते तदा लिङ्गविशेषप्रयुक्तानि टाबादिकार्याणि न भवन्ति। दृढशब्देन लिङ्गविशेषाबोधकत्वे एव दृढं भक्तिर्यस्य इति दृढाभक्तिरिति सिद्ध्यति। इदं लिङ्गवचनविचार एवं प्रतिपादितम्- "**अत्रेदं तत्त्वम्। विशेष्यनिघ्नानां पुंस्त्वत्वादिविशेषरूपेण लिङ्गत्वरूपसामान्यधर्मेण च लिङ्गबोधकत्वम्। तत्र पुंस्त्वादिनिमित्तकं कार्यं पुंस्त्वरूपेण लिङ्गबोधे भवति, एवं स्त्रीत्वनिबन्धनं स्त्रीत्वस्वरूपविशेषधर्मेण बोधे। नपुंसकत्वनिमित्तकं तु नपुंसकत्वरूपविशेष-धर्मेण लिङ्गत्वरूपसामान्यधर्मेण वा नपुसकत्वबोधे सति जायते। एतदेव सामान्ये नपुंसकमित्यनेनोच्यते। तथा च धनं वनमित्यादौ नपुंसकत्वस्य**

---

[115] लघुसिद्धान्तकौमुदी, "**अर्द्धर्चाः पुंसि च**" 2/4/31 इति व्याख्याने।

[116] अष्टाध्यायीसूत्रसङ्ख्या - 6/3/34

[117] लिङ्गवचनविचारः (अत्रोद्धृतम्), पृष्ठसङ्ख्या - 66

**नपुंसकत्वस्वरूपविशेषधर्मेण बोधादमादिकं प्रवर्तते, दृढभक्तिरित्यादौ तु लिङ्गत्वरूपसामान्यधर्मेण बोधात्। स्त्रीत्वत्वरूपविशेषधर्मेण लिङ्गस्य बोधाभावान्न स्त्रीत्वनिमित्तकं टाबादिकार्यम्"।**[118]

अत्रैकः प्रश्न उदेति यद् यदि "सामान्ये नपुसंकम्" इति स्वीक्रियते तदा घट इत्यस्य स्थाने घटमिति शब्दस्यापि साधुत्वं स्यात् किन्तु प्रश्नोऽयं न समीचीनः। सामान्ये नपुंसकम् इति नियमो हि विशेष्यनिघ्नविशेषणशब्दविषयो न तु विशेष्यविषयः। घटशब्दो विशेष्यो न तु तादृशं विशेषणम् इत्येवं न दोषः।

**अनुकरणशब्दविषया लिङ्गव्यवस्था –**

शब्दः प्रकारान्तरेण द्विधा- अनुकार्यः अनुकरणश्च। यथा केनचिद् गौरीत्युक्तम्, अन्येन तस्यानुकरणं गौरीति कृतम्। तत्र पूर्वोक्तो गौरीति शब्दोऽनुकार्यरूपः। गौरीति पश्चादनुकृतश्शब्दोऽनुकरणम्। व्याकरणशास्त्रेऽनुकार्यानुकरणशब्दविषये द्विधा व्यवस्था कृताऽस्ति- अनुकार्यानुकरणयोरभेद इति प्रथमा, तद्भेद इति द्वितीया च। तत्र **"भू सत्तायाम्"**[119] इत्यत्र निर्विभक्तिभूशब्दप्रयोगः प्रथमपक्षे **"भुवो वुग्लुङ्लिटोः"**[120] इत्यत्र भुव इति सविभक्तिकनिर्देशश्च द्वितीयपक्षे प्रमाणम्। अभेदपक्षेऽनुकरणशब्दस्य भूप्रभृतेर्निरर्थकत्वेन प्रातिपदिकत्वाभावे न विभक्त्युत्पत्तिः। भेदपक्षे त्वनुकरणशब्दस्यानुकार्यशब्दबोधकत्वेन सार्थकत्वे प्रातिपदिकसञ्ज्ञायां विभक्त्युत्पत्तिः। एवमनुकरणशब्दविषये शब्दशास्त्रे द्विधा व्यवस्था। तत्रानुकरणशब्दे किं लिङ्गविधेयमिति भवति प्रश्नः। तत्रेयं व्यवस्था कृता यद् अनुकरणशब्दोऽनुकार्यलिङ्गक एव भवति। यथा गौर्य्यां गकारः पीताम्बरायां पदद्वयस्य बहुव्रीहिः इत्यत्रानुकरणस्य गौरी पीताम्बरा चेत्यनयोः पदयोः गौरीपीताम्बरेत्यनुकार्यशब्दगतं स्त्रीत्वमेव। प्रकृति-

[118] लिङ्गवचनविचारः, पृष्ठसङ्ख्या - 66

[119] धातुसङ्ख्या- 1, भ्वादिर्गणः, सिद्धान्तकौमुदी

[120] अष्टाध्यायीसूत्रसङ्ख्या - 6/4/88

वदनुकरणम् इति नियमेनानुकरणपदेऽपि लिङ्गप्रयोज्यटाब्ङीनाभावादि-कार्यसिद्धिः। पुनरत्र प्रश्न एकः सम्भवति यद् यद्यनुकरणशब्दोऽनुकार्यलिङ्गक एव भवति तदा पाणिनिना "**बन्धुनि बहुव्रीहौ**"[121] इति सूत्रे बन्धुरिति पुँल्लिङ्गपदानुकरणे बन्धुपदे कथं नपुंसकत्वनिर्देशः? सौत्रत्वादिमित्युत्तरं स्वीकार्यमत्र भवत्यत्र। अध्याहृतशब्दस्वरूपशब्दापेक्षया बन्धुनीत्यत्र नपुंसकत्वमिति तु न समीचीनम्। तथाऽऽध्याहारे प्रमाणाभावात् अनुकरणबन्धुशब्दस्वरूपे लक्षणेति न समीचीनम्। लक्षणाश्रयणेऽपि हि लिङ्गव्यत्ययो न सम्भवति। इदं सर्वमेव प्रतिपादितं लिङ्गवचनविचारे-

**"अनुकरणमनुकार्यलिङ्गभाग् भवति। तेन गौर्यां गकारः पीताम्बरायां पदद्वयस्य बहुव्रीहिः इत्यादौ गौरीपीताम्बराप्रभृतिशब्दाः स्त्रीलिङ्गाः अनुकरणं प्रकृतिवदिति न्यायाद्। अत एव तत्र ङ्याबन्तप्रयुक्तमपि कार्यम्। बन्धुनि बहुव्रीहाविति तु सौत्र नपुंसकत्वम्, सामान्ये नपुंसकताया विशेष्यनिघ्नविषयत्वात्।**

**यत्तु सिद्धान्तकौमुद्यामुक्तं क्लीबनिर्देशस्तु शब्दस्वरूपापेक्षयेति, तस्य यदि शब्दस्वरूपे इत्यध्याहारे तात्पर्यं तदापि बन्धुशब्दस्य विशेष्यनिघ्नत्वाभावान्नपुंसकनिर्देशानुपपत्तिरेव। यदि वा बन्धुशब्दस्य बन्धुशब्दस्वरूपे लक्षणेत्याशयः, तदापि पुंस्त्वमेव स्यान्न नपुंसकत्वम्, न हि लक्षणायां लिङ्गव्यत्ययः, नदीरत्नं गङ्गेत्यादौ रत्नादिपदस्य रत्नसदृशादिलक्षकस्य लिङ्गव्यत्ययादर्शनात्। शुक्लादिशब्दास्तु गुणिनामपि वाचका एव न लक्षकाः, 'गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वती'त्युक्तत्वात्। न च कोषे लक्ष्योऽर्थो बोध्यते, अपितु शक्य एव। तस्मात् शब्दस्वरूपापेक्षयेति चिन्त्यमेतत्।**

**एवमलिङ्गे युष्मदस्मदी इत्यत्र कुतो नपुंसकता। यदि च लिङ्गबोधकौ तदाऽलिङ्गे इति कथनसङ्गतमिति"।**[122]

---

[121] अष्टाध्यायीसूत्रसङ्ख्या - 6/1/14

[122] लिङ्गवचनविचारः, पृष्ठसङ्ख्या- 67

**लिङ्गस्य वाच्यता द्योत्यता च -**

एवं लौकिके शास्त्रीये च लिङ्गस्वरूपे तदाधारेण शब्दविभागे लिङ्गव्यवस्था नियमे च प्रदर्शिते। जिज्ञासोदेति यल्लिङ्गं वाच्यं वर्तते द्योत्यं वा। एकं मतं वर्तते यल्लिङ्गं टाबादिप्रत्ययवाच्यं भवति। यथा 'अजा' इत्यत्र स्त्रीत्वं टापः प्रयोगे प्रतीयतेऽप्रयोगे च न प्रतीयत इत्यन्वयव्यतिरेकाभ्यां निर्णीयते यत् टाबादीनां स्त्रीत्वे शक्तिः। न हि 'अजा' इत्युक्ते टाबाद्यभावे स्त्रीत्वं प्रतीयते। एवं टाबादिसत्त्वे स्त्रीत्वस्य प्रत्ययस्तदभावे च तत्प्रत्ययाभाव इत्यन्वयव्यतिरेकौ फलतः। तेन लिङ्गे टाबादिवाच्यत्वमेवाङ्गीकर्त्तव्यम्। एवमेव बालकान् इत्यत्र शसो नत्वे पुंस्त्वस्य प्रतीतिर्ज्ञानान्यत्यत्र तदभावेन पुंस्त्वस्याप्रतीतिश्च। एवमेव राम इत्यत्रामोऽभावेन नपुंसकत्वस्याप्रतीतिः ज्ञानमित्यत्र तत्प्रतीतिश्च। एवं प्रत्ययवाच्यत्वमेव लिङ्गस्य सिद्ध्यति।

वस्तुतो लिङ्गस्य वाच्यत्वे टाबादिप्रत्ययान्वयव्यतिरेकौ व्यभिचरतः। अयं नियमो नास्ति यद् यत्र टाबादीनां सत्ता तथैव स्त्रीत्वादेः प्रत्ययः। टाबद्यभावेऽपि हि स्त्रीत्वादीनां भवत्येव प्रतीतिः। यथा स्त्रक्, दिक्, सम्पत्, विपद् इत्यादौ टाबाद्यभावेऽपि स्त्रीत्वस्य, राज्ञः इत्यत्र शसो नत्वाभावेऽपि पुंस्त्वस्य, दधि, मधु चेत्यादावमोऽभावेऽपि नपुंसकत्वस्य प्रतीतिः। एवं लिङ्गप्रत्ययस्य टाबादिप्रयोगस्य च यः कार्यकारणभावोऽन्वयव्यतिरेकाभ्यां कल्पितस्तस्य स्त्रग्, दिगादौ व्यभिचारः। स च कार्यकारणभावेऽपि कार्यसत्त्वदर्शनेन व्यतिरेकव्यभिचारः। एवं टाबादिवाच्यता न साधयितुं शक्यते अपितु टाबादयो लिङ्गस्य द्योतका एव। तेन टाबादिद्योत्यतैव लिङ्गस्य सैद्धान्तिकशाब्दिकैः सिद्ध्यति।

अत्र द्योत्यं नाम किमिति भवति प्रश्नस्तस्योत्तरं यद् द्योतकटाबादिबोध्यत्वमेव द्योत्यत्वम्। टाबादिषु द्योतकत्वं च स्वसमभिव्याहृतपदनिष्ठशक्त्युद्बोधकत्वम्। टाबादयः स्वसमभिव्याहृत-प्रातिपदिकस्य लिङ्गे विद्यमानां शक्तिम् उद्बोधयन्तीति द्योतका उच्यन्ते। 'अजा' इत्यत्र टाप्प्रत्ययेन तत्समभिव्याहृताज प्रातिपदिकशब्दस्य स्त्रीत्वे विद्यमाना शक्तिरुद्बोध्यते। अतः स द्योतक इत्युच्यते।

अभिप्रायोऽयं वर्तते यत् प्रातिपदिकार्थविषये षण्मतानि सन्ति। प्रातिपदिकार्थो जातिरित्येकं मतम्, जातिव्यक्तीति द्वितीयं मतम्, जातिव्यक्तिलिङ्गानीति तृतीयं मतम्, जातिव्यक्तिलिङ्गसङ्ख्यानीति चतुर्थं मतम्, जातिव्यक्तिलिङ्गसङ्ख्याकारकाणीति पञ्चमं मतम्, जातिव्यक्ति-लिङ्गसङ्ख्याकारकशब्दस्वरूपाणीति षष्ठं मतम्।

अत्र जातिपदं प्रवृत्तिनिमित्तस्योपलक्षणम्। तेन गुणक्रियासञ्ज्ञारूपा अपि प्रवृत्तिनिमित्तानि ग्राह्याणि। एवं पञ्चकं प्रातिपदिकार्थः -

**"एकं द्विकं त्रिकं चतुष्कं पञ्चकं तथा।**

**नामार्थ इति सर्वेऽमी पक्षाः शास्त्रे निरूपिताः"॥**[123]

इत्येतेन वैयाकरणभूषणसारगतवचनेन प्रतिपादितः। शब्दस्वरूपमपि प्रातिपदिकार्थ इति "**स्वं रूपं शब्दस्याशब्दसञ्ज्ञा"**[124] इति सूत्रेण, तद्भाष्येण -

**"विषयत्वमनापन्नैः शब्दैर्नार्थः प्रकाश्यते।**

**न सत्तयैव तेऽर्थानामगृहीताः प्रकाशकाः।**[125]

**न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।**

**अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते"॥**[126]

इति वाक्यपदीयवचनाभ्याञ्च सिद्ध्यति।

एवं प्रातिपदिकस्य लिङ्गेऽपि शक्तिः। सा च "**प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा"**[127] इत्यादौ लिङ्गग्रहणरूप-

---

[123] वैयाकरणभूषणसारः, नामार्थनिर्णयः, कारिका - 25

[124] अष्टाध्यायीसूत्रसङ्ख्या - 1/1/68

[125] वाक्यपदीयम्, 1/57

[126] अत्रैव, 1/131

[127] अष्टाध्यायीसूत्रसङ्ख्या - 2/3/46

वाद्यकसद्भावेन नाद्रियत इति त्वन्यत्। एवम् अजा इत्यत्र अजेति प्रातिपदिकमेव स्त्रीत्वं पुंस्त्वं च बोधयति, टाप् त्वजप्रातिपदिकस्य स्त्रीत्वे वर्त्तमानां शक्तिमुद्बोधयति। एवं लिङ्गं प्रातिपदिकेन वाच्यं टाबादिना द्योत्यञ्च। इत्थं लिङ्गे वाच्यता द्योत्यता च सिद्ध्यति। प्रातिपदिकापेक्षया वाच्यता प्रत्ययापेक्षया द्योत्यता च।

**टाबादिद्योत्यताया अस्वीकारे दोषः -**

यदा कथञ्चित् स्त्रीत्वादिलिङ्गस्य टाबादिवाच्यत्वम् अङ्गीक्रियते, तदा विवक्षितविपरीतशाब्दबोधापत्तिः। प्रकृतिप्रत्ययार्थयोर्हि प्रकृत्यर्थः प्रत्ययार्थं प्रति विशेषणं प्रत्ययार्थश्च विशेष्यो भवति। प्रत्ययार्थस्य प्रकृत्यर्थापेक्षया विशेष्यतारूपं प्राधान्यम्- **“प्रधानप्रत्ययार्थवचनमर्थस्यान्य-प्रमाणत्वात्”**[128] इति पाणिनिसूत्रेण ध्वनितम्। **“प्रकृतिप्रत्ययौ सहार्थं ब्रूतः”**[129] तयोः प्रत्ययार्थः प्रधानमिति फलितनियमेन सिद्धम्। यथा- पाचक इत्यत्र पज्धातुरूपार्थप्रकृतेः पाकरूपोऽर्थो ण्वुल्प्रत्ययार्थकर्त्तरि शाब्दबोधे विशेषणत्वेन भासते, ततश्च पाककर्तेति बोधो जायते। एतादृशो नियमस्तत्रैव स्वीक्रियते यत्र प्रत्ययो वाचको भवति। यदि टाबादयो वाचकास्स्युस्तदा ‘अजा’ इत्यत्र अजप्रातिपदिकरूपप्रकृत्यर्थः टाब्वाच्यं स्त्रीत्वं प्रति विशेषणं स्यात्। ततश्च अजनिष्ठं स्त्रीत्वम् इत्यनिष्टो बोधः स्यात् । अत्र तु स्त्रीत्वविशिष्टोऽज इति बोधोऽभिप्रेतः। प्रत्ययार्थस्य स्त्रीत्वस्य प्रकृत्यर्थं प्रति विशेषणत्वमेवात्राभिप्रेतम्। तेन लिङ्गे टाबादिप्रत्ययवाच्यत्वं नाङ्गीकर्त्तव्यम्। ततश्च टाबादिविषये प्रत्ययार्थप्राधान्यनियमस्य द्योतकप्रत्ययविषये न प्रवृत्तिः। इदं सर्वं प्रौढमनोरमायां शेखरादौ च स्पष्टम्।[130]

[128] अत्रैव, 1/2/56

[129] काशिकासूत्रवृत्तिः, 1/2/56 इति व्याख्याने

[130] द्रष्टव्यो लघुशब्देन्दुशेखरः, पृष्ठसङ्ख्याः – 591-595

इदमेव सर्वमनुसन्धाय **"अजाद्यतष्टाप्"**[131] इति सूत्रस्य वृत्तौ भट्टोजिदीक्षितेन **"अजादीनां वाच्यं यत् स्त्रीत्वं तस्मिन् द्योत्ये टाप् स्यात्"**[132] इत्यभिहितम्। अनेन लिङ्गेऽजादि-प्रातिपदिकवाच्यत्वं टाबादिद्योत्यत्वञ्च स्पष्टमेवाभिहितम्।

**पुँल्लिङ्गादिशब्दप्रयोगोपपत्तिः-**

घटशब्दः पुँल्लिङ्गः, नदीशब्दः स्त्रीलिङ्गः, फलशब्दो नपुंसकलिङ्गः चेत्यादयो विविधा व्यवहारा भवन्ति। अत्र पुँल्लिङ्गादिशब्दार्थः क इति विचारणीयः। इह पुं-स्त्री-नपुंसकशब्दाः पुंस्त्व-स्त्रीत्व-नपुंसकत्वरूपधर्मपराः। पुमादिशब्दानां हि पुंस्त्वाद्येन प्रवृत्तिनिमित्तम्। अतः पुमान् पुंस्त्वं लिङ्गं यस्य स पुँल्लिङ्गः, स्त्रीत्वं लिङ्गं यस्य स स्त्रीलिङ्गः, नपुंसकत्वं लिङ्गं यस्य स नपुंसकलिङ्ग इति चार्थः। पुंस्त्वादीनां लिङ्गपदार्थे समानाधिकरणेनान्वयः। यदि पुमादिशब्दानां पुंस्त्वादिधर्मिणि शक्तिस्तदा सामानाधिकरण्यानुपपत्तेः पुमादिशब्दानां पुंस्त्वादौ लक्षणाऽङ्गीकर्त्तव्या।

**"पुमान् पाप्मा"**[133] **"सुमनसः स्त्रियः"**[134] इत्यादौ पुमादिपदानां पुंस्त्वबोधके लक्षणा स्वीकरणीया, तेन पाप्मशब्दः पुंस्त्वविशिष्टार्थस्य सुमनश्शब्दः स्त्रीत्वविशिष्टस्यार्थस्य बोधक इत्यर्थः कोशादौ करणीयः। उक्तं लिङ्गवचनविचारे-

**"क्वचिद्धर्मपराः क्वापि स्वार्थबोधकलक्षकाः।**

**पुमादिशब्दा विज्ञेयाः क्वचिद्धमिसमर्पकाः॥**

---

[131] अत्रैव, 4/1/4

[132] सिद्धान्तकौमुदी, 4/1/4

[133] अमरकोषः, 1/4/23

[134] अत्रैव, 2/4/17

**पुँल्लिङ्गादौ धर्मपराः परिज्ञेयाः पुमादयः।**

**'पुमान् पाप्मे'त्यादिवाक्ये स्वार्थबोधक लक्षकाः"॥**[135]

एवं घटशब्दः पुँल्लिङ्ग इत्यस्यार्थो वर्त्तते- पुंस्त्वं लिङ्गं यस्य स घटशब्दः। एवं स्त्रीलिङ्गादावपि। अत्र बहुव्रीहिः षष्ठ्यर्थे। लिङ्गस्य शब्दनिष्ठत्वपक्षे तादात्म्यादिरूपः सम्बन्धः षष्ठ्यर्थः। यथा घटशब्दे घटत्वरूपा शब्दगता जातिः समवायेन तिष्ठति तथा गुणोपचयरूपं शास्त्रीयं लिङ्गमपि। शब्दे शास्त्रीयमेव लिङ्गं सम्भवति। शब्दगतलिङ्गस्य प्रत्यक्षत्वं तावत् घटसंयोगासम्पृक्तेन समवायेन गृह्यतेऽथ च घटशब्दगतस्य पुँल्लिङ्गस्य धर्मोऽर्थान् पुंस्त्वं संयुक्तसमवायेन प्रत्यक्षीक्रियत इति तावद् विषयसम्बद्धं परमपरं तथ्यम्।

अर्थनिष्ठत्वपक्षे तु वाच्यवाचकभावः। घटशब्दो ह्यर्थगतस्य लिङ्गस्य वाचकोऽर्थगतं लिङ्गं वाच्यञ्च। लिङ्गमर्थगतमेवेति वैयाकरणसिद्धान्तः। शास्त्रीयमपि हि लिङ्गम् अर्थनिष्ठमेव। सर्वे कोशशब्दा ह्यर्थपराः। एवं घटशब्दः पुँल्लिङ्गः, अस्यार्थो घटशब्दः पुंस्त्वस्य वाचकः। एवं नदीशब्दः स्त्रीलिङ्ग इत्यादावपि बोध्यम्।

---

[135] लिङ्गवचनविचारः, कारिके 9, 10, पृष्ठसङ्ख्या - 11

# तृतीयोऽध्यायः

## साहित्यशास्त्रदृशा लिङ्गविमर्शः

## क.साहित्यशास्त्रदृशा लिङ्गस्वरूपम् –

वैयाकरणमते लिङ्गविषये बहुधा व्यचारि किन्तु साहित्यशास्त्रे लिङ्गस्य कीदृक् स्वरूपं ग्राह्यमिति साक्षान्नास्मिन् शास्त्रेऽस्ति निरूपितम्, किन्त्वालङ्कारिकाणां निरूपणक्रमस्य दर्शनेन साहित्यशास्त्रसम्मतमेतत्स्वरूपं निश्चेतुं शक्यत एव। चतुष्टयी शब्दानां प्रवृत्तिरिति भाष्यमतानुसारिणाम् आलङ्कारिकाणां मते शब्दानां शक्तिर्जात्यादौ धर्मे एव न तु धर्मिणि व्यक्तौ वा। व्यक्तेर्बोधस्त्वर्थापत्त्या लक्षणया वा स्वीक्रियते। पञ्चकं प्रातिपादिकार्थ इति वादिनां मते तु शब्दो जात्यादिविशिष्टव्यक्तेर्वाचकः। एवं प्रायः समेषां शब्दानां धर्मपरत्वं धर्मिपरत्वञ्च सिद्धम्। अत एवाभिनवगुप्तेन स्वच्छशब्दस्य स्वच्छगुणपरत्वमपि लोचने व्याख्यातम्। एवमेव प्रकृते पुंस्त्रीनपुंसकशब्दाः भावपरत्वेन पुंस्त्वस्त्रीत्वनपुंसकत्वबोधकाः। तेन पुंस्त्वं लिङ्गमित्यर्थः परं पुमान् लिङ्गमिति विग्रहः। न हि पुमान् एव लिङ्गम् अपितु पुंस्त्वमेव। एवम्भूतविचारात् पश्चादत्र तावत् प्रथमं हि लिङ्गतत्त्वस्वरूपं साहित्यशास्त्रदृशा विचार्यते।

वस्तुतः स्त्रीपुंन्नपुंसकरूपेऽर्थे साहित्यशास्त्रे नैकत्र लिङ्गं चर्चितम्। तदाधारेण लिङ्गतत्त्वविवृतिः प्रयोगक्षेत्रविस्तरवशाद् विशेषतो विचारणीयताम्भजते। परं प्रश्नोऽयं समुदेति यत् साहित्ये शास्त्रीयं लिङ्गं स्वीकर्तव्यमाहोस्वित् लौकिकम्? तत्र साहित्ये लोकस्य प्राधान्येन रसाभिव्यञ्जकत्वानुगुण्येन च लौकिकं लिङ्गं प्रधानतया समाश्रयणीयम्। किन्तु व्याकरणशास्त्रीयमपि लिङ्गं साहित्ये सर्वथा न परित्यक्तुं शक्यम्। यतो जडचन्द्रादौ वर्ण्यमाने शास्त्रीयमेवोपचयादिरूपं लिङ्गं स्वीकर्तुं शक्यते। अतः साहित्यशास्त्रे व्याकरणशास्त्रीयलिङ्गाभिन्नं लौकिकं लिङ्गं रसाभिव्यञ्जकत्वेन प्रधानतया स्वीकर्तुं शक्यते। यथा ह्यत्र निदर्शनमेतस्य –

**“उपोढरागेण विलोलतारकं तथा गृहीतं शशिना निशामुखम्।**
**यथा समस्तं तिमिरांशुकं तया पुरोऽपि रागाद् गलितं न लक्षितम्”॥**[1]

---

[1] ध्वन्यालोकः, प्रथम उद्योतः, पृष्ठसङ्ख्या - 25

अत्र समासोक्तिरलङ्कारः। इह वर्ण्यमाने प्रकृते चन्द्रे निशायाञ्च लौकिकं लिङ्गवत्त्वरूपं पुंस्त्वं योनिमत्त्वरूपं स्त्रीत्वञ्च नाङ्गीकर्तुं शक्यते। एवमत्र निशाशशिनोः केवलं व्याकरणशास्त्रीयमेव लिङ्गं नाश्रयितुं शक्यं तथा सति निशाशशिनोर्नायिकानायकव्यवहारो न सङ्गच्छेत। निशायां शशिनि च नायकत्वस्य नायिकात्वस्य च सिद्धये लौकिकमपि पुंस्त्वं स्त्रीत्वञ्चावश्यमेवाश्रयणीयम्। एवमेव सर्वत्र साहित्ये नायकनायिकारूप-विचारणाक्रमिके रसचर्वणाप्रसङ्गे जडप्रकृत्यादिविषयेषु साक्षान्मेढ्रवत्त्व-योनिमत्त्वादिरूपाभावेऽपि शास्त्रोक्तलिङ्गस्वरूपमूरीकृत्य तत्र च लौकिकलिङ्गार्थमुद्भाव्य च शास्त्रीयलौकिकलिङ्गयोः साम्यं विनिर्धार्यते। एवं शास्त्रेऽस्मिन् हि शास्त्रीयलौकिकलिङ्गयोरभेद एव इति सिध्यति। अतः शास्त्रीयगुणपरिणामाभिन्नलौकिकपुंस्त्वादिरूपमेव लिङ्गमिति साहित्य-शास्त्रानुसारेण फलितम्भवति।

वस्तुतस्तु स्वभावेन सुकुमारैः सौन्दर्यप्रेमिभिश्च कविभिः स्वकृतिष्वपि भावपेशलतामानेतुं प्रायशः स्त्रीलिङ्गाख्या एव शब्दविशेषाः प्रयुज्यन्ते। तथा हि प्रथितिः - **"तटी तारं ताम्यति" इत्यत्र तटशब्दस्य पुंस्त्वनपुंसकत्वेऽनादृत्य स्त्रीत्वमेवाश्रितं सहृदयैः "स्त्रीति नामापि मधुरम्" इति कृत्वा"**।[2]

ईदृशं स्त्रीपुन्नपुंसकरूपार्थातिरिक्तं लिङ्गशब्दस्यान्यमर्थं स्वीकृत्यापि साहित्यशास्त्रं भवति प्रवृत्तमित्यन्यत्। तथा हि – **"लिङ्गं नानाऽर्थपदशक्यान्तरावृत्तिरेकशक्यगतः साक्षाच्छब्दवेद्यो धर्मः"**[3] इति। यथा हि कुपितो मकरध्वज इत्यत्र कोपशब्दद्वारा कामदेवरूपोऽर्थो भवति नियन्त्रितः। एवं कथञ्चिद् विशिष्टचिह्नमात्ररूपत्वमेवास्य लिङ्गस्यार्थ इति विशेषः साहित्यशास्त्रदृशा लिङ्गार्थनिर्धारणक्रमे। परमिह प्रसिद्धं स्त्रीपुन्नपुंसकरूपमर्थं समाधृत्यैव विशेषत स्त्रीपुन्नपुंसकार्थविशिष्टलिङ्ग-स्वरूपसमन्वितानि प्रयोगस्थलानि समुपस्थाप्येह तदाधारेण च लिङ्गतत्त्वोपस्थित्या समुद्भूताह्लादादिनिरूपकाः श्लोकव्याख्याऽऽदिरूपा विचारा इह विशद्यन्ते।

---

[2] अत्रैव, तृतीय उद्योतः (लोचनटीकावचः), पृष्ठसङ्ख्या - 393

[3] रसगङ्गाधरः, द्वितीयम् आननम् , पृष्ठसङ्ख्या - 61

## ख. लिङ्गस्य रसाद्यभिव्यञ्जकत्वम् -

लिङ्गं रसाद्यभिव्यञ्जकत्वेन ध्वनिवादिभिराचार्यैः स्वीकृतम्। साहित्ये रसस्य प्राधान्येन लिङ्गस्य रसानुगुणत्वमवश्यमेव वाच्यम्। तेन रसद्योतकं लिङ्गमिति सिद्धान्तविशेषः स्वीकरणीयः। एतत्प्रतिपादनात् पूर्वं प्रसङ्गोपात्तं रसविषयकमनतिसाधारणं परिचयं प्रदाय लिङ्गस्य रसाद्यभिव्यञ्जकत्वं विश्लेषयिष्यते। तत्रादौ रसपदार्थविचारः - रस्यते आस्वाद्यते इति रसोऽर्थाद् यस्यास्वादनं स्वद्यते स रसपदेनाभिधीयते। रसो नाम ब्रह्मेत्युच्यते। रसो ह्येवायं यं लब्ध्वाऽऽनन्दीभवति तथैवोक्तं तैत्तिरीयोपनिषदि – "**रसो वै सः**"[4] इति। तस्माद् रसेन यद् रस्यत आस्वाद्यते तद् ब्रह्मस्वरूपमेव, रसश्च ब्रह्मानन्दसहोदरत्वेन शास्त्रेषु व्याख्यातो विद्यते। तादृशस्य रसस्यास्वादनं को न किलेह जगतीच्छेन्नाम, सर्वेऽपि तत्पानं चिकीर्षन्ति। ततोऽपि काव्यात्मकस्य रसस्य महत्ता लौकिकरसास्वादनाद् भिन्नैव काव्यप्रकाशकारेण कथ्यते। नवरसरुचिराम् इत्यनेन कवेः कवितायाः नवरसैर्युक्तत्वं प्रत्यपादि। सा च कविता जागतिकानां प्राणवतां जनानां हृत्सु रसास्वादनमुखेन साक्षाद् ब्रह्मानन्दमिवानुभावयन्ती राजते। ते च रसाः काव्यशास्त्रे नवसङ्ख्याकाः स्वीकृताः सन्ति।[5] सङ्ख्या न्यूनाधिका भवितुमर्हा विविधविदुषाम्मते। अत्रेदं तावद् विचारणीयं यदानन्दस्वरूपो रसो विविधप्रकारेणाभिव्यक्तः सँश्चकास्ति विविधसहृदयहृदयाह्लादविषयीभूतान् अर्थानपि विभावयति। ते च अर्था लिङ्गमूलकत्वेन भाव्यन्ते। कथं च चमत्कारस्य प्रक्रिया स्यादिति यथाशास्त्रं यथारसमत्रोदाहरणमुखेन व्याक्रियते। तेषु शृङ्गारस्य लक्षणं पुरस्क्रियते। वस्तुतो यत्र नायकनायिकयोरनुरागस्य वियोगस्य वा वर्णनं क्रियते स शृङ्गाररस[6] इत्युच्यते। स च द्विधा

---

[4] तैत्तिरियोपनिषद् 3/2/7

[5] शृङ्गारहास्यकरुणरौद्रवीरभयानकाः। बीभत्सोऽद्भुत इत्यष्टौ रसाः शान्तस्तथा मतः॥

- साहित्यदर्पणः, तृतीयः परिच्छेदः, पृष्ठसङ्ख्या - 229

[6] शृङ्गं हि मन्मथोद्भेदस्तदागमनहेतुकः। उत्तमप्रकृतिप्रायो रसः शृङ्गार इष्यते ।।
परोढां वर्जयित्वा तु वेश्यां चाननुरागिणीम्।आलम्बनं नायिकाः स्युर्दक्षिणाद्याश्च नायकाः॥
चन्द्रचन्दनरोलम्बरुताद्युद्दीपनं मतम्।भ्रूविक्षेपकटाक्षादिरनुभावः प्रकीर्तितः।।

विप्रलम्भसम्भोगभेदात्।[7] कुतस्त्ये स्थले सम्भोगः कुतस्त्ये च विप्रलम्भः? इत्येवं प्रश्नोद्भवे सति एकेनैवोत्तरमुखेन पूर्वं विप्रलम्भस्वरूपं तदीयभेदाश्च तत्र ग्रन्थकारेण निरूपितम् – "**यत्र तु रतिः प्रकृष्टानाभीष्टमुपैति विप्रलम्भोऽसौ। स च पूर्वरागमानप्रवासकरुणात्मकश्चतुर्धा स्याद्**"।[8]

अत्रादौ सम्भोगशृङ्गारस्य समुदाहरणेन लिङ्गाभिव्यञ्जकतां विचारयामः। साहित्यशास्त्रे प्रकृतिगते वस्तुनि शास्त्रीयलिङ्गत्वमवबुध्यते। परं तत्र तत्र वस्तुनि लौकिकलिङ्गत्वमुपादाय रसादिचर्वणा जायते। अत्र तावदुदाहरणे शास्त्रीयलिङ्गेन लौकिकलिङ्गमभिव्यज्यते नायिकाया आरोपत्वात् -

**"विलोकनेनानुगृहाण तावद्दिशं जलानामधिपस्य दारान् ।**

**अक्षालि लाक्षापयसेव येयमपूरि पङ्कैरिव"॥**[9]

अस्मिन्नुदाहरणे नलो दिशमिति प्रकृतिसम्बद्धे पदे शास्त्रीयलिङ्गे लौकिकलिङ्गारोपेण नायिकाऽऽरोपे दमयन्त्यभिधानाया अभिव्यञ्जनं कुरुते। अत्र दमयन्तीरूपाया नायिकाया दिगिति पदेनाभिव्यक्तिर्जायते दिशश्शास्त्रीयस्त्रीलिङ्गवत्त्वस्य नायिकायाश्च लौकिकस्त्रीलिङ्गवत्त्वात्।

विप्रलम्भस्योदाहरणक्रमः साम्प्रतम् – तत्र च विप्रलम्भशृङ्गारस्य प्रथमो भेदोऽत्र पूर्वरागविप्रलम्भो लिङ्गद्वारा कथमभिव्यङ्ग्य इत्यनुशील्यते –

**"नवा लता गन्धवहेन चुम्बिता करम्बिताङ्गी मकरन्दशीकरैः।**

**दृशा नृपेण स्मितशोभिकुड्मला दरादराभ्यां दरकम्पिनी पपे"॥**[10]

---

त्यक्त्वौग्र्यमरणालस्यजुगुप्साव्यभिचारिणः। स्थायिभावो रतिः श्यामवर्णोऽयं विष्णुदैवतः॥ - अत्रैव, पृष्ठसङ्ख्या - 230

[7] विप्रलम्भोऽथ सम्भोग इत्येष द्विविधो मतः। - अत्रैव, पृष्ठसङ्ख्या – 232

[8] अत्रैव

[9] नैषधीयचरितम्, 22/3

[10] अत्रैव, 1/83

अत्र लतायाः शास्त्रीयलिङ्गत्वात् तत्र शास्त्रीयलिङ्गे लौकिकलिङ्गस्य समारोपवशादेव नायिकारूपार्थोऽभिव्यज्यते। तथैव गन्धवहो वायुरित्यत्रापि शास्त्रीयलिङ्गे गन्धवहपदेन नायकरूपार्थस्याभिव्यञ्जना क्रियते। ततश्चापरोऽस्यैव विप्रलम्भशृङ्गारस्य समुदाहरणरूपश्श्लोक एवायम् –

**“वियोगिनीमैक्षत दाडिमीमसौ प्रियस्मृतेः स्पष्टमुदीतकण्टकाम्।**
**फलस्तनस्थानविदीर्णरागिहृद्विशच्छुकास्यस्मरकिंशुकाशुगाम्”॥**[11]

प्रसङ्गोऽयं राजा नलसम्बद्धो विद्यते। स च राजा स्वनायिकायाः दमयन्त्याः स्मरणं दाडिमीवृक्षे नायिकात्वस्यारोपं कृत्वा विदधाति। दाडिमीमित्यत्र शास्त्रीयलिङ्गस्य सत्त्वात् तत्रापि वियोगिन्या आश्रयणं क्रियते, सर्वेऽपि गुणास्तथैव घटमानाः सन्तो दृश्यन्ते दाडिमीम् इति पदे यथा कस्याश्चिद्विरहिण्याः नायिकायाः दौर्बल्यादिवशाद् दशा सञ्जायते। एतेनात्रापि दाडिम्यामपि शास्त्रीयस्त्रीलिङ्गेन लौकिकस्य स्त्रीलिङ्गस्याभिव्यञ्जनवशादेव नायिकात्वमवबोध्यते। तेन व काव्यजगति चमत्कारो भाव्यते।

मानविप्रलम्भे लिङ्गाभिव्यञ्जकता -

**“उद्दामोत्कलिकां विपाण्डुररुचं प्रारब्धजृम्भां क्षणा-**
**दायासं श्वसनोद्गमैरविरलैरातन्वतीमात्मनः॥**
**अद्योद्यानलतामिमां समदनां नारीमिवान्यां ध्रुवं**
**पश्यन्  कोपविपाटलद्युति मुखं देव्याः करिष्याम्यहम्”॥**[12]

अत्रापि तथैवोदयस्य मानसिकी स्थितिः प्रदर्श्यते यथा उद्यानलता वृक्षे समालिङ्गिता सती स्थिता भवति। किन्तु तस्यां मुकुलितकलिकाः विद्यन्ते किन्तु गन्धवहस्य वेगवशात् सा खेदमनुभवति, अत्र गन्धवहस्य चलनेन यथोद्यानलतायाः खेदानुभवस्तथैव उद्यानलतास्थानिकायाः वासवदत्ताया अपि खेदो जायते। यदोदयनस्य  दृष्टिरन्यस्त्रीस्थानिकायां सागरिकायां प्रयातीति भावः। इदं हि मानविप्रलम्भस्योदाहरणम्। यथा

---

[11] अत्रैव, 1/85

[12] रत्नावली, 2/4

स्वनायिका परनायिकायामनुरक्तं स्वनायकं ज्ञात्वा तस्मै कुप्यति, तथैवोदयनस्य चिन्तनमपि। अत्रोद्यानलता इति पदद्वारा शास्त्रीयस्त्रीलिङ्गसमन्वयनेन लौकिकलिङ्गस्योद्भावनया वासवदत्ताख्या विप्रलम्भमानविशिष्टा नायिका इत्यर्थोऽभिव्यज्यते।

मानविप्रलम्भस्यापरमप्युदाहरणं यत्र नायके ईर्ष्यासमुत्पन्नो मानो मानविप्रलम्भरूपे शृङ्गारे कारणतामुपयाति। तथा हि मानिनीमनुनयति नायकस्तववचांसि श्लोकेऽस्मिन् -

**"कपोले पत्त्राली करतलनिरोधेन मृदिता**

**निपीतो निःश्वासैरयममृतहृद्योऽधररसः ।**

**मुहुः कण्ठे लग्नस्तरलयति बाष्पस्तनतटीं**

**प्रियो मन्युर्जातस्तव निरनुरोधे न तु वयम्"॥**[13]

अत्र कश्चिन्नायकः स्वनायिकामनुनयति यत् क्रोधवशाभिभूता सती भवती विहरति। तस्माद् भवत्या अधररसः शुष्यति, अश्रूणि च स्तनप्रदेशं क्लेदयन्ति। तस्माद् भवत्या मन्युरर्थात् क्रोध एव प्रियस्तेन सहानुरक्ता सत्यस्मान् परित्यजति भवती, न तु मदनुरोधेन क्रोधपरिवर्जनम्। तस्मादत्र नायकापेक्षया मन्युरेव नायिकायाः प्रियतां यातीत्यर्थः। अत्र च मन्युरिति शास्त्रीयलिङ्गे लौकिकलिङ्गत्वारोपादेव नायकत्वाभिव्यञ्जनत्वमिति प्रतिफलति। तेन काव्यार्थे शृङ्गाररसस्य विप्रलम्भोदाहरणवशादेव काव्यार्थस्य चमत्कृतिः जायते।

**प्रवासनिमित्तके विप्रलम्भे लिङ्गाभिव्यञ्जकता -**

प्रवासनिमित्तकस्यान्यतमस्य विप्रलम्भशृङ्गाररसस्योदाहरणत्वेन यत्र शापः कारणं जायते तादृशः प्रसङ्गोऽत्रोद्धर्तुं शक्यते। सम्पूर्णमेघदूतमेव प्रायो ग्रन्थदृशैतदुदाहरणभूतं विद्यते। तत्रापि श्लोकोऽयं प्रसङ्गेऽस्मिन् विभाव्यते -

---

[13] ध्वन्यालोकः, द्वितीय उद्योतः, पृष्ठसङ्ख्ये – 129-130

**“वीचिक्षोभस्तनितविहगश्रेणिकाञ्चीगुणायाः**

**संसर्पन्त्याः स्खलितसुभगं दर्शितावर्तनाभेः।**

**निर्विन्ध्यायाः पथि भव रसाभ्यन्तरः सन्निपत्य**

**स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु”॥**[14]

अत्र च मेघनिर्विन्ध्ययोः नायकत्वं नायिकात्वं च समारोप्यते। तत्र मेघे यक्षस्यारोपस्तथा च निर्विन्ध्यायां नायिकाया आरोपः। अत्र निर्विन्ध्याख्या नदी मेघस्याभावे शुष्यन्ती जायमाना विद्यते, तेन तस्याः शृङ्गाराय प्रणयनिवेदनं विद्यते। तथाभूतस्थितां तां दृष्ट्वा भवानवश्यमेव स्वकीयेन जलवर्षणेन सन्तुष्येत् तथैवाहं यक्षोऽपि स्वनायिकायाः विरहे जीवन् सन् विद्ये तथा भवान् मा भवतु। अत्रापि शास्त्रीयलिङ्गस्य निर्विन्ध्यापदघटितस्य लौकिकलिङ्गनिमित्तकत्वादेव नायिकात्वम्। तेन शापवशात् प्रवासनिमित्तस्य शृङ्गाराख्यस्य रसस्याभिव्यक्तिर्जायते।

**करुणात्मकविप्रलम्भस्योदाहरणं साम्प्रतम् –**

अत्रत्योदाहरणे नायकस्य करुणमूलायाः दशायाः वर्णनं प्राप्यते सा च दशेत्थं वर्ण्यते - नायकः नायिकाया आरोपं नद्यां करोति -

**“तरङ्गभ्रूभङ्गा क्षुभितविहगश्रेणिरशना**

**विकर्षन्ती फेनं वसनमिव संरम्भशिथिलम् ।**

**यथाविद्धं याति स्खलितमभिसन्धाय बहुशो**

**नदीरूपेणेयं ध्रुवमसहना सा परिणता”॥**[15]

अत्र नायको नद्यां जायमानानां तरङ्गाणां चापल्यं दृष्ट्वा तत्र नद्यां नायिकात्वमारोप्य तरङ्गेषु भ्रूविलासत्वं सम्भावयति। पक्षिणां पङ्क्तौ श्रेणिरसनात्वं फेनेषु वस्त्रत्वं चिन्तयति। ईदृगवस्थासंयुतां तरङ्गिणीं दृष्ट्वा नायिकाविरहवान्नायकश्चिन्तयति यन्नायिकया सह पुनर्मदीयं मेलनं भविष्यति। अनेन करुणरसो घट्यते, घटमाने च करुणे नायकस्य विश्वासो

---

[14] मेघदूतम् 1/2

[15] ध्वन्यालोकः, द्वितीय उद्योतः, पृष्ठसङ्ख्या - 110

द्रढीयाञ्जायते प्रियामेलनविषये। अत्र नदीपदघटितस्य शास्त्रीयलिङ्गस्य लौकिकलिङ्गारोपेणैव नायिकात्वं तथैव श्लोके विशेषणपदघटितपदेष्वपि लौकिकलिङ्गत्वारोपाद्रसाभिव्यक्तिः।

**करुणरसे लिङ्गाभिव्यञ्जकता -**

**"इष्टनाशादनिष्टापत्तेः करुणाख्यो रसो भवेत्।**

**धीरैः कपोतवर्णोऽयं कथितो यमदैवतः"॥**[16]

ईदृक्स्वरूपान्विते करुणरसे शोकस्थायिभावस्य पूर्णाभिव्यक्तिः जायते। आविर्भावोऽस्य रसस्येष्टनाशादनिष्टप्राप्त्या वा संजायते। एतस्योदाहरणमिदम्–

**"तेषां गोपवधूविलाससुहृदां राधारहःसाक्षिणां**

**क्षेमं भद्र कलिन्दशैलतनयातीरे लतावेश्मना ।**

**विच्छिन्ने स्मरतल्पकल्पनमृदुच्छेदोपयोगेऽधुना**

**ते जाने जरठीभवन्ति विगलन्नीलत्विषः पल्लवाः"॥**[17]

अत्र व्रजात् समागतमुद्धवं दृष्ट्वा श्रीकृष्णः पृच्छति यदद्यापि लताकुञ्जस्य कुशलता विद्यते न वा, मम स्मृतौ विलीनाः कालिन्दीतटे विराजमानाः गोपयुवतीनां क्रीडाविलासे नर्मसाचिव्यमिवाचरन्तः राधायाश्चैकान्ते क्रीडायाः साक्षात्कर्त्तारः ते वृक्षाः। बहोः कालान्मयि तत आगते सति तेषां पत्रादीनामनुपयोगात् त्रोटनाद्यभावान्नूतनहरितपत्राणि पाण्डुत्वादिवशाज् जठरत्वं प्रयान्ति। अत्र च लताकुञ्जेषु सचिवत्वारोपादेव जडेष्वपि चेतनत्ववदारोपो व्यधीयत।

अत्र च शास्त्रीयलिङ्गे लताकुञ्जम् इति पदे सचिवरूपार्थाय लौकिकलिङ्गारोपेणैव करुणरसाभिव्यक्तिरुद्भाव्यते। तात्पर्यमत्र यच्छ्रीकृष्णस्य विरहेऽचेतनानामपि दशैषा। श्रीकृष्णोऽपि वृन्दावनस्थानां जनानां विरहे क्लामति, तेन करुणरसाभिव्यञ्जना जायते। 'अपि ग्रावा रोदित्यपि दलति वज्रस्य हृदयम्' इत्यादिवत् करुणरसो

[16] साहित्यदर्पणः, तृतीयः परिच्छेदः, पृष्ठसङ्ख्या - 253

[17] ध्वन्यालोकः, द्वितीय उद्योतः, पृष्ठसङ्ख्या - 112

लौकिकलिङ्गवत्त्वरूपादेव वस्तुतोऽत्र व्यज्यते। एतस्माच्छास्त्रीयलौकिक-लिङ्गगतसामानाधिकरण्यवशादेव च काव्यार्थचमत्कृतिर्जन्यते।

**भयानकरसे लिङ्गाभिव्यञ्जकता**

यत्र च भयस्थायिभावस्यास्वादो नीयते स रसो भयानक इति निगद्यते। कृष्णवर्णकः कालदेवतकः, काव्यकोविदैरयं नीचप्रकृतिकपुरुषाणां स्त्रीणां चाश्रयत्वेनाभिहितो भयोत्पादनस्य भीषणचेष्टारूपोऽत्रोद्दीपनत्वेन कार्यं कुरुते।[18] तद्यथा लिङ्गस्याभिव्यञ्जकता परिभाव्यते श्लोकस्यास्य माध्यमेन -

**"नष्टं वर्षवरैर्मनुष्यगणनाभावादपास्य त्रपा-**
**मन्तः कञ्चुकिकञ्चुकस्य विशति त्रासादयं वामनः।**
**पर्यन्ताश्रयिभिर्निजस्य सदृशं नाम्नः किरातैः कृतं**
**कुब्जा नीचतयैव यान्ति शनकैरात्मेक्षणाशङ्किनः"।।**[19]

अत्र नपुंसककिरातगणकुब्जानां च वर्णनं भीतिमुखेन कृतं विद्यते। ते चिन्तयन्ति यदस्माकं गणना तु मानवेषु न विद्यते तदर्थं लज्जायाः प्रश्न एव न विद्यते, चिन्तयन्त एवं नपुंसकाः पलायिताः कुब्जाश्च कञ्चुकीनामन्तर्गात्रावरणे प्रविशन्ति। अर्थादात्मानं गोपयितुं कामयन्ते। आत्मेक्षणाशङ्किनः कुब्जाः पलायन्ते। अत्रोदाहरणे शास्त्रीयपुंस्त्वाभिन्नं व्यवहारगतं नपुंसकत्वं भयातिशयत्वमभिव्यनक्ति। वर्षवरशब्दस्य पुंस्त्वादुपचयार्थस्य भयोपचयरूपार्थस्य चाभिवृद्धिर्जायते।

यथैतया विचारणया रसानादाय तत्र तत्र शास्त्रीयलिङ्गानामाधारेण लौकिकलिङ्गानामारोपं विधाय काव्यार्थे च चमत्कृतिमानीय सहृदयहृदयेष्वाह्लादकत्वं शक्यतेऽनुभवितुम् अनुभावयितुमपि, तथैव

---

[18] "भयानको भयस्थायिभावो भूताधिदैवतः। स्त्रीनीचप्रकृतिः कृष्णो मतस्तत्त्वविशारदैः॥
यस्मादुत्पद्यते भीतिस्तदत्रालम्बनं मतम्। चेष्टा घोरतरास्तस्य भवेदुद्दीपनं पुनः॥
अनुभावोऽत्र वैवर्ण्यगद्गदस्वरभाषणम्। प्रलयस्वेदरोमाञ्चकम्पदिक्प्रेक्षणादयः॥
जुगुप्सावेगसम्मोहसन्त्रासग्लानिदीनताः। शङ्कापस्मारसम्भ्रान्तिमृत्य्वाद्या व्यभिचारिणः"॥
- साहित्यदर्पणः, तृतीयपरिच्छेदः पृष्ठसङ्ख्या- 260

[19] रत्नावली 1/2

विश्लेषणेन व्याख्यानेन च रसान्तरेष्वपि लिङ्गस्यारोपमुखेन काव्यार्थे चमत्कारमभिव्यज्य सहृदयहृदया आनन्दयितुं शक्यन्ते। तेन हि काव्याकाराकारितान्तःकरणा रसमास्वदन्ते।

न केवलं रसस्थले प्रत्युत रसाभासभावाभासादीनामपि स्थले लिङ्गद्वारा काव्येषु चमत्कारो भाव्यत एव। तद्यथा –

**"क्षिप्तो हस्तावलग्नः प्रसभमभिहतोऽप्याददानोंऽशुकान्तम्।**

**गृह्णन् केशेष्वपास्तश्चरणनिपतितो नेक्षितः सम्भ्रमेण।**

**आलिङ्गन् योऽवधूतस्त्रिपुरयुवतिभिः साम्रनेत्रोत्पलाभिः**

**कामीवार्द्रापराधः स दहतु दुरितं शाम्भवो वः शराग्निः"॥** [20]

उदाहरणेऽस्मिन् शृङ्गाररसो भावे पर्यवस्यति। शराग्निरूपशास्त्रीयपदघटितपुंस्त्वस्य कामीतिपदघटितस्य लौकिकपुंस्त्वस्य च वर्णनक्रमेऽस्मिञ्श्लोके, शृङ्गारस्य पर्यवसानं भावे जायत इति तत्त्वम्।

रससम्प्रदायातिरिक्तं षड्विधेषु साहित्यशास्त्रीयसम्प्रदायेषु ध्वनिसम्प्रदायस्य माहात्म्यमप्यतुलनीयमेव गीयते। तस्मात् काव्यस्यात्मा ध्वनिरिति कृत्वा ध्वनेरेव प्राधान्यं प्रदर्शयता तत्र भवताऽऽनन्दवर्धनाचार्येण स्वमतप्रदर्शनाय विद्वद्धौरेयाणां वैयाकरणानां ध्वनिसिद्धान्तमादाय स्वमतमपोष्यत तेन विरोधिनश्शान्ताः सन्तः विरोधं कर्तुं नापारयन्। यत्र च शब्दार्थयोर्गुणभावेन ध्वन्यर्थः प्राधान्येन व्यज्यते तत्काव्यमेव ध्वनिर्भवति वस्तुतः। स च ध्वनिस्त्रिविधो वस्तुरसालङ्कारभेदात्। एतेषु रसध्वनेरेव प्राधान्यम्। रसध्वनौ च प्रकृतं लिङ्गस्याभिव्यञ्जकत्वं साम्प्रतं प्रदर्श्यते। तथा हि –

**"वाचं न मिश्रयति यद्यपि मद्वचोभिः कर्णं ददात्यवहिता मयि भाषमाणे।**

**कामं न तिष्ठति मदाननसम्मुखीयं भूयिष्ठमन्यविषया न तु दृष्टिरस्याः"।।**[21]

---

[20] ध्वन्यालोकः, द्वितीय उद्योतः, पृष्ठसङ्ख्या -103

[21] अभिज्ञानशाकुन्तलम्, 1/33

अत्र वाचं वचोभिरिति स्त्रीनपुंसकलिङ्गनिर्देशेन स्वीयां सखीं प्रति तन्मित्रेण मेलयतीत्यर्थो य आयात्यसौ वस्तुतो शृङ्गाररूपं रसध्वनिविषयमेव स्पष्टीकरोति।

अथात्राग्रिमे श्लोके तावल्लिङ्गप्रयोगद्वारा निर्वेदभावाश्रितो भावध्वनिरपि स्पष्टीभवति –

**"न्यक्कारो ह्ययमेव मे यदरयस्तत्राप्यसौ तापसः**

**सोऽप्यत्रैव निहन्ति राक्षसकुलं जीवत्यहो रावणः ।**

**धिग्धिक्छक्रजितं प्रबोधितवता किं कुम्भकर्णेन वा**

**स्वर्गग्रामटिकाविलुण्ठनवृथोच्छूनैः किमेभिर्भुजैः"।।**[22]

अत्र स्वर्गग्रामटिका इति पदे स्वर्गे ग्रामटिकायाः प्रयोगेण स्वर्गस्य न्यूनतामुद्भावयति रावणः। यदि स्वर्गग्रामटक इति स्यात्तदा तु तावान् स्वर्गगतलघुतातुच्छताऽऽदिविषयरूपाभीप्सितोऽर्थो न समागच्छेत्। एतेन निसचीयत यत् स्त्रीत्वप्रयुक्तत्वादेव शब्दविशेषाल्लघुत्वमभिव्यज्यते। व्यभिचारिरूपस्य निर्वेदस्याभिव्यक्ततत्त्वादेव च तदा भावध्वनौ श्लोकार्थस्यास्य पर्यवसानम्।

अपरमप्युदाहरणमस्य -

**"क्षुद्राः सन्त्रासमेते विजहत हरयो क्षुण्णशक्रेभकुम्भा**

**युष्मद्देहेषु लज्जां दधति परममी शायका निष्पतन्तः ।**

**सौमित्रे! तिष्ठ पात्रं त्वमपि नहि रुषां नन्वहं मेघनादः**

**किञ्चिद्भ्रूभङ्गलीलानियमितजलधिं राममन्वेषयामि"॥**[23]

सौमित्रे! इति सम्बोधनेन मेघनादेन लक्ष्मणं युद्धान्निवारयितुकामेन सता लक्ष्मणस्य स्त्रीणामिव कोमलप्रकृतिकत्वादेव युद्धाभावायोग्यत्वम् अभिव्यज्यते। वस्तुतोऽत्र सौमित्रिपदेनैव तदीयव्यवहारो न तु दाशरथीतिपदेन, इत्येवम् अत्र लिङ्गमाहात्म्यनिबन्धना

---

[22] साहित्यदर्पणः, प्रथमः परिच्छेदः, पृष्ठसङ्ख्या – 5-6

[23] काव्यप्रकाशः, चतुर्थ उल्लासः, पृष्ठसङ्ख्या -151

सामर्थ्यस्याभिव्यक्तिः, यदि पुंस्त्वसंयुतेन पदेन स्यात् सम्बोधनं तदात्वे तु शत्रोर्बलवर्धकता स्यात् सिद्धा। अतश्शत्रोरनुत्साहं द्योतयितुमेव स्त्रीलिङ्गविशिष्टसम्बोधनपदप्रयोगस्तेन मेघनादमुखेन कविनोद्भावितः। एवं ह्यर्थवैशिष्ट्यमत्र भवति सन्निहितम्।

अन्यत्र रत्याद्याख्यानां भावानामप्यभिव्यञ्जकं लिङ्गं भवत्येव। तद्यथा –

**“बन्दीकृत्य नृप! द्विषां मृगदृशस्तां पश्यतां प्रेयसां**

**श्लिष्यन्ति प्रणमन्ति लान्ति परितश्चुम्बन्ति ते सैनिकाः”।**[24]

इह मृगदृशः पदान्तर्हितमृगशब्दघटकपुंस्त्वेन पराजितप्रियाणाम् अपराक्रमत्वविषयोऽभिव्यङ्ग्यः।

## ग. लिङ्गस्यालङ्कारचमत्कारित्वम्

यथा हि रसोऽधिकाव्यशास्त्रं सर्वथा मुख्यास्पदत्वं भजते तथैवालङ्कारतत्त्वमपि। यतः प्रामुख्येन सौन्दर्याधीनमेव रसस्थितिरिति न कलकलोऽत्र क्वचन। अलङ्कृतिरलङ्कारः, अलङ्करोतीत्यलङ्कारः, अलङ्क्रियतेऽसावलङ्कारः, अलङ्क्रियतेऽनेनेत्यलङ्कारः एवं विग्रहाधारा-धृतोऽयमलङ्कारशब्दः सौन्दर्यातिशयित्वरूपमर्थमेवाभिधत्ते। तथा हि अरङ्कृदादिशब्दैरलङ्कारार्थरूपसौन्दर्यपरत्वं तु वेदेष्वप्युद्धृतमवाप्यते।[25] यद्यपि वेदसंहितादिषु साक्षाद् एवम्भूतस्यालङ्करस्य परिनिष्ठितं स्वरूपं नाख्यातमवाप्यते परं सौन्दर्यपरमर्थमस्य शब्दस्य हृदि निधायैव निरुक्तकारेण[26] दर्भपवित्रपाणिना पाणिनिना[27] महाभाष्यकारेणापि[28] विहिता एव प्रयोगा इति सुप्रथितम्। काव्यशास्त्रपरम्परायां ह्याचार्य-

---

[24] काव्यप्रकाशः, पञ्चम उल्लासः, पृष्ठसङ्ख्या - 197

[25] अलङ्कृते भूषिते “यमोह यज्ञो गच्छत्यग्निदूतोऽरङ्कृतः” ऋ. 10/14/13

– वाचस्पत्यम्, पृष्ठसङ्ख्या - 349

[26] निरुक्तम् 3/13

[27] उपमितं व्याघ्रादिभिः सामान्याप्रयोगे – अष्टाध्यायीसूत्रसङ्ख्या – 2/1/56

[28] अष्टाध्यायीसूत्रसङ्ख्या – 2/1/55 - महाभाष्यम्

भरतेनालङ्काराणां चातुर्विध्यं प्रतिपाद्य प्रथमतयोल्लेखो व्यधायीति तथ्यशेषः –

**“उपमा दीपकं चैव रूपकं यमकं तथा।**

**काव्यस्यैते ह्यलङ्काराश्चत्वारः परिकीर्तिताः”॥**[29]

भरतमुनेः पश्चादलङ्कारतत्त्वविचारकोऽभवद् आचार्यभामहः। ततः पश्चादेवालङ्कारशब्दगतसौन्दर्यरूपार्थस्य विस्तृतिस्वीकृतिवशात् काव्यशास्त्रस्याभिधानमपि प्राधान्येन व्यपदेशकरणरूपकारणत्वम् अङ्गीकृत्यालङ्कारशास्त्रम् इत्येवञ्जातम्। ततो हि पश्चाद्वर्तिना दण्डिनाऽप्युक्तं यथा –

**“काव्यशोभाकरान् धर्मान् अलङ्कारान् प्रचक्षते।**

**यच्च सन्ध्यङ्गवृत्त्यङ्गलक्षणाद्यागमान्तरे।**

**व्यावर्णितमिदं चेष्टमलङ्कारतयैव नः”॥**[30]

एवं काव्यशोभाकराणां धर्माणाम् अलङ्काराणाम्माहात्म्यमङ्गीकृत्यैव तदीयलोकचमत्कारित्वं प्रतिपादयता वक्रोक्तिकारेण कुन्तकेनैवमभ्यधायि –

**“लोकोत्तरचमत्कारकारिवैचित्र्यसिद्धये ।**

**काव्यस्यायमलङ्कारः कोऽप्यपूर्वो विधीयते”॥**[31]

एवमलङ्कारचमत्कारसंयुते काव्यशास्त्रे लिङ्गतत्त्वमाधृत्य कथमिव चमत्कृतिरियं विवर्धत इति तावदत्र केषाञ्चन प्रमुखालङ्काराणामुदाहरण-मुखेन विचार्यते। वस्तुतस्त्वधिकाव्यशास्त्रं लिङ्गस्यालङ्कारविशेषघटकत्वं क्वचन साक्षात् कुत्रचिच्च परम्परयाऽभिहितम्। तत्र शब्दालङ्कारेषु श्लेषोऽन्यतमः। **“श्लिष्टैः पदैरनेकार्थाभिधानं श्लेषः”**[32] इति साहित्यदर्पणकारः।

---

[29] नाट्यशास्त्रम् 17/43

[30] काव्यादर्शः 2/364

[31] वक्रोक्तिजीवितम् 1/2

[32] साहित्यदर्पणः, दशमः परिच्छेदः, पृष्ठसङ्ख्या - 675

**"वर्णप्रत्ययलिङ्गानां प्रकृत्योः पदयोरपि। श्लेषाद् विभक्तिवचनभाषाणामष्टधा च सः"॥**[33] इत्येवम्भूतेष्वष्टविधेषु श्लेषेषु लिङ्गश्लेष एकतमः।[34]

तथा हि प्रसिद्धमुदाहरणमिदमस्य –

**"भक्तिप्रह्वविलोकनप्रणयिनी नीलोत्पलस्पर्धिनी,**
**ध्यानालम्बनतां समाधिनिरतैर्नीतेहितप्राप्तये।**
**लावण्यस्य महानिधी रसिकतां लक्ष्मीदृशोस्तन्वती,**
**युष्माकं कुरुतां भवार्तिशमनं नेत्रे तनुर्वा हरेः"॥**[35]

अत्र नेत्रे इति पदस्य तनुरिति पदस्य च विशेषणत्वेन प्रयुक्तानीमानि पदानि – भक्तिप्रह्वविलोकनप्रणयिनीत्यादीनि। एवमत्र जायते नपुंसक-लिङ्गस्य स्त्रीलिङ्गस्य च श्लेषः। तस्मान्नेत्रे तनुः इत्येतत् पदद्वयं क्रमशः नपुंसकत्वस्त्रीत्ववशाल्लिङ्गाधृतं श्लेषघटकत्वं समुपस्थापयतीति विवेकः। तत्र नेत्रशब्दवाच्ये नयनद्वये तनुशब्दवाच्ये शरीरे च क्रमेण शास्त्रीयस्यैव नपुंसकत्वस्य स्त्रीत्वस्य च श्लेषघटकत्वं न तु लौकिकस्य, लौकिकलिङ्गस्यात्र समन्वयाभावात्। भक्तिप्रह्वविलोकनप्रणयिनीत्यत्र तयोर्लिङ्गयोः सभङ्ग-श्लेषस्याथ नीते हितप्राप्तये इत्यत्र च सभङ्गश्लेषस्य घटकत्वम्। एवं शास्त्रीयं लिङ्गं श्लेषालङ्कारघटकमिति स्पष्टम्।

अपरेषूदाहरणेषु तावल्लिङ्गश्लेषस्य चमत्कारः परीक्षितुं शक्यते। तद्यथा –

**"मनस्तुदन्ती क्षणदावतेष्टा विधौ विरुद्धे तमसि प्रवृद्धे ।**
**तस्मिन् प्रवृद्धे हरितः प्रसादं धन्या लभन्ते तमसि प्रणष्टे"।।**[36]

---

[33] अत्रैव, पृष्ठसङ्ख्या - 376

[34] "स च वर्णपदलिङ्गभाषाप्रकृतिप्रत्ययविभक्तिवचनानां भेदादष्टधा।"

- काव्यप्रकाशः, नवम उल्लासः, पृष्ठसङ्ख्या - 445

[35] अत्रैव, पृष्ठसङ्ख्या - 446

[36] साहित्यकौमुदी, पृष्ठसङ्ख्या - 153

अत्र वस्तुतो विधावित्युकारेकारयोः सारूप्यादस्ति वर्णभेदः । क्षणदा ईक्षणदाश्चेति दाञ्दापोः सारूप्यात् प्रकृतिभेदः। तुदन्तीति शतृङीबन्तत्वात् ङ्यन्तत्वाच्च प्रत्ययभेदः। इष्टेति स्त्रीलिङ्गैकवचनत्वात्, इष्टा इति पुँल्लिङ्गबहुवचनान्तत्वाच्च लिङ्गभेदो वचनभेदश्च। हरित इति प्रथमान्तत्वात् पञ्चम्यन्तत्वाच्च विभक्तिभेदश्चेति षोढा ।[37]

इह रात्रौ दिक्षु च शास्त्रीयं स्त्रीत्वम्। नेत्रखण्डकेषु सुहृदादिषु धन्यजनेषु च लौकिकमपि पुंस्त्वम्। एवमिहेष्टा इति, रात्रिदिशोः नेत्रखण्डकानाञ्च, विशेषणे शास्त्रीयस्त्रीत्वस्य लौकिकपुंस्त्वस्य च भेदाध्यवसायः स्वीकर्तव्यः। तत एव लिङ्गश्लेषसिद्धिः। एवमिह शास्त्रीयस्त्रीत्वस्य लौकिकपुंस्त्वस्य च लिङ्गश्लेषघटकत्वम्।

**"नीतानामाकुलीभावं लुब्धैर्भूरिशिलीमुखैः।**

**सदृशे वनवृद्धानां कमलानां तदीक्षणे"॥**[38]

अत्र कमलपदवाच्येषु पद्मेषु शास्त्रीयं नपुंसकत्वम्। तादृशेषु मृगेषु च लौकिकमपि पुंस्त्वम्। एवमिह शास्त्रीयनपुंसकत्वस्य लौकिकपुंस्त्वस्याभेदाध्यवसायेनाप्रकृतलिङ्गश्लेषघटकत्वम्।

**"सम्भूत्यर्थं सकलजगतो विष्णुनाभिप्रपन्न।**

**यन्नालं स त्रिभुवनगुरुर्वेदनाथो विरिञ्चिः।**

**ध्येयं धन्यालिभिरतितरां स्वप्रकाशस्वरूपं**

**पद्माख्यं तत् किमपि ललितं वस्तु वस्तुष्टेऽयस्तु"॥**[39]

इह पद्माख्यम् इति पदे नपुंसकलिङ्गस्य पद्मशब्दस्य स्त्रीलिङ्गस्य पद्माशब्दस्य च श्लेषः। पद्मे शास्त्रीयं नपुंसकत्वम्, पद्मायां तु लौकिकमपि स्त्रीत्वम्। इत्थमिहाभेदाध्यवसायेन शास्त्रीयलौकिकलिङ्गयोः श्लेषघटकत्वम्।

---

[37] अत्रैव, पृष्ठसङ्ख्या - 154

[38] अलङ्कारसर्वस्वम्, पृष्ठसङ्ख्या - 352

[39] रसगङ्गाधरः, द्वितीयम् आननम्, पृष्ठसङ्ख्या - 287

इतोऽग्रे समासोक्त्यलङ्कारे लिङ्गस्याभिव्यञ्जकत्वं स्पष्टीक्रियते - यत्र समेन कार्येण लिङ्गेन विशेषणेन च प्रस्तुतेऽप्रस्तुतव्यवहारसमारोपरूपो भवति स चालङ्कारविशेषः समासोक्त्यलङ्कारः। अलङ्कारस्यास्य त्रिधाभेदनिरूपणमस्त्येवमुक्तम् –

**"समासोक्तिः समैर्यत्र कार्यलिङ्गविशेषणैः।**

**व्यवहारसमारोपः प्रस्तुतेऽन्यस्य वस्तुनः"।।**[40]

प्रथमे हि भेदे तावत् समेन कार्येण समासोक्तिनिरूपणमिदम् –

**"व्याधूय यद्वसनमम्बुजलोचनाया**

**वक्षोजयोः कनककुम्भविलासभाजोः।**

**आलिङ्गसि प्रसभमङ्गमशेषमस्या**

**धन्यस्त्वमेव मलयाचलगन्धवाह"॥**

इह हि गन्धवाहे हठकामुकव्यवहारसमारोपरूपे समकार्यपरे समासोक्त्यलङ्कारनिरूपणेऽपि लिङ्गगतश्चमत्कारो नूनं निभालयितुं शक्यते, तद्धि गन्धवाहगतं शास्त्रीयं लिङ्गम् अथ हठकामुकगतं लौकिकलिङ्गं समाश्रित्या। यथा गन्धवाहो विदधात्यालिङ्गनं तथैव हठकामुकोऽपि विधत्ते। एवमर्थनिरूपणे हि शास्त्रीयलौकिकलिङ्गरूपयोर्भेदयोः सत्योरपि समकार्यसमारोपोऽप्युभयथा पुंस्त्वरूपलिङ्गसमत्वनिरूपणं लिङ्गगतमेवं चमत्कारं निरूपयतीत्यवधेयम्। द्वितीयो हि समासोक्त्यलङ्कारसम्बद्धो लिङ्गसाम्यपरश्श्लोकोऽयम् -

**"असमाप्तजिगीषस्य स्त्रीचिन्ता का मनस्विनः।**

**अनाक्रम्य जगत्कृत्स्नं नो सन्ध्यां भजते रविः"॥**[41]

अत्र हि पुंस्त्रीलिङ्गमात्रेण रविसन्ध्ययोर्नायकनायिकाव्यवहार उपपद्यते। तस्माच्चोभयत्र रविसन्ध्ययोः शास्त्रीयलिङ्गवत्त्वेऽपि लौकिकं

---

[40] साहित्यदर्पणः, दशमः परिच्छेदः, पृष्ठसङ्ख्या- 777

[41] अत्रैव

नायकनायिकारूपं लौकिकं लिङ्गमभिकल्प्य लिङ्गसाम्यनिरूपणपरत्वं श्लोकार्थस्य निरूपितञ्जायते।

तृतीयो हि समासोक्त्यलङ्करसम्बद्धो विशेषणसाम्यपरश्लोकोऽयम्, यत्रौपम्यगर्भत्वस्य उपमारूपकसङ्करगर्भत्वोदाहरणमिदम् –

**"दन्तप्रभापुष्पचिता पाणिपल्लवशोभिनी।**

**केशपाशालिवृन्देन सुवेषा हरिणेक्षणा"॥**[42]

इह तु विशेषणत्वमाधृत्य साम्यनिरूपकेऽस्मिन्नपि श्लोके लिङ्गघटकत्वं शक्यत एवानुसन्धातुम्। तद् यथा हरिणेक्षणायां लतायाः समारोपक्रमेऽपि लौकिके लिङ्गपरे हरिणेक्षणरूपे पदे शास्त्रीयलिङ्गघटकस्य लतारूपस्य पदस्य समारोपो यो भूतः, स हि सत्यपि विशेषणत्वे तत्राप्युपमारूपकरूपविशेषणत्वसाम्य एवं लौकिकशास्त्रीयलिङ्गयोरर्थ-चर्वणाक्रमे साम्यनिरूपणं यद् विशिष्टं तदपि लिङ्गसमाश्रितमिति स्पष्टमेव। एवमेवालङ्कारगतं लिङ्गतत्त्वसमाश्रितञ्च चमत्कारत्वमनुशीलयितुं शक्यते।

**लिङ्गस्य अलङ्कारध्वनिघटकत्वम् –**

नानाऽर्थकस्य शब्दस्य वाचकतायां संयोगाद्यनियन्त्रितायाम-प्राकरणिकोऽर्थः प्राकरणिकाप्राकरणिकयोश्च उपमाद्यलङ्कारश्च प्राधान्येन यत्र व्यज्यते तत्र ध्वनिवादिभिः शब्दशक्तिमूलोऽलङ्कारध्वनिरङ्गीकृतः। तत्र लिङ्गस्य तद्ध्वनिघटकत्वं यद्यपि कण्ठतः नोक्तं तथापि प्राकरणिकाप्राकरणिकयोः लिङ्गसाम्यमप्यभीष्टमेवेति विविधोदाहरणै-रुपलभ्यते। यानि यान्युदाहरणानि लभ्यन्ते तत्र सर्वत्र लिङ्गसाम्यमपि दृश्यते। यथा साहित्यदर्पणस्य –

**दुर्गालङ्घितविग्रहो मनसिजं सम्मीलयंस्तेजसा**

**प्रोद्यद्राजकलो गृहीतगरिमा विष्वग्वृतो भोगिभिः।**

**नक्षत्रेशकृतेक्षणो गिरिगुरौ गाढां रुचिं धारयन्-**

**गामाक्रम्य विभूतिभूषिततनू राजत्युमावल्लभः॥**[43]

---

[42] अत्रैव, पृष्ठसङ्ख्या - 780

इत्यस्मिन् हि पद्ये नरपतिविशेषः प्राकरणिकः शिवश्चाप्राकरणिकः। अत्रोभयत्र लौकिकं पुंस्त्वं समानमेव। एवं काव्यप्रकाशस्य –

**"उल्लास्य कालकरवालमहाम्बुवाहं**

**देवेन येन जरठोर्जितगर्जितेन ।**

**निर्वापितः सकल एव रणे रिपूणां**

**धाराजलैस्त्रिजगति ज्वलितः प्रतापः"॥**[44]

अस्मिन् पद्ये प्राकरणिके राजन्यप्राकरणिके महेन्द्रे च लौकिकं पुंस्त्वं तुल्यमेव। माघस्य –

**"क्वचिज्जलापायविपाण्डुराणि धौतोत्तरीयप्रतिमच्छवीनि।**

**अभ्राणि बिभ्राणमुमाऽङ्गसङ्गविभक्तभस्मानमिव स्मरारिम्"॥**[45]

पद्येऽस्मिन् प्राकरणिके रैवतकपर्वते अप्राकरणिके शिवे च पुंस्त्वं समानमेव। इदमन्यद् यदत्र रैवतकपर्वते शास्त्रीयं पुंस्त्वं शिवे च लौकिकम्। किन्तु लौकिकशास्त्रीयपुंस्त्वयोरभेदाध्यवसायेन लिङ्गैकत्वस्य निर्वाहः।

**"गन्धमुद्धतरजःकणवाही विक्षिपन् विकसतां कुमुदानाम्।**

**आदुधाव परिलीनविहङ्गा यामिनीमरुदपां वनराजीः"॥**[46]

अत्र वनराजिषु कामिनीत्वस्य मरुति नायकत्वस्य चारोपः, यथा कश्चित् कामिनीं गन्धोदकादिनां सिञ्चन् आकर्षति तथा मरुदिति भावः। एवं मरुति तादृशनायकव्यवहारस्य वनराजिषु नायिकाव्यवहारस्य चाप्यभिव्यक्तिः। अत्र वनराजिषु शास्त्रीयं स्त्रीत्वं मरुति च तदेव पुंस्त्वम्। किन्तु प्रतीयमाने नायके लौकिकं पुंस्त्वम्, नायिकासु तु तदेव स्त्रीत्वम्।

---

[43] अत्रैव, द्वितीयः परिच्छेदः, पृष्ठसङ्ख्या - 80

[44] काव्यप्रकाशः, चतुर्थ उल्लासः पृष्ठसङ्ख्या - 169

[45] शिशुपालवधम् 4/5

[46] किरातार्जुनीयम् 9/31

**"अयमतिजरठाः प्रकामगुर्वीरलघुविलम्बिपयोधरोपरुद्धाः।**

**सततमसुमतामगम्यरूपाः परिणतदिक्करिकास्तटी बिभर्ति"॥47**

तटीषु रैवतकपर्वते च शास्त्रीयं क्रमेण स्त्रीत्वं पुंस्त्वञ्च। प्रतीयमाने वृद्धानां नायिकानां भर्तरि नायके तथावर्णितवृद्धनायिकासु च लौकिकं क्रमेण पुंस्त्वं स्त्रीत्वञ्च।

**"भानोरंसनिधिवशात् तिमिरेण सार्ध-**

**मह्नाय सङ्गतिमवाप्य कुमुद्वतीभिः।**

**चन्द्रोदये कुमुदकुक्षिगतास्तदीय-**

**गर्भद्विषः सुखमसाविषत द्विरेफाः"॥48**

अत्र कुमुदवतीषु शास्त्रीयं स्त्रीत्वम्, प्रकृतद्विरेफेषु लौकिकपुंस्त्वम्। प्रतीयमानासु बन्धकीषु लौकिकं स्त्रीत्वं गर्भद्वेषिषु पुत्रेषु लौकिकपुंस्त्वञ्च। एवं लिङ्गानामेषामभेदाध्यवसायाल्लिङ्गसाम्यम्। यद्यपीह तिमिरपदे शास्त्रीयं नपुंसकत्वं तथापि पुंस्त्वनपुंसकत्वविशिष्टयोश्शब्दयोः तृतीयैकवचने रूपस्य साम्येन तिमिरेण इति पदे तद्वाच्यान्धकारे वा शास्त्रीयं पुंस्त्वम्। प्रतीयमाने परनायके लौकिकञ्च पुंस्त्वं स्वीकार्यम्। अतः तिमिरे परनायक-व्यवहाराभिव्यक्तौ न काचनानुपपत्तिः। सूर्यस्याभावे तिमिररूपपरनायकेन सङ्गताः बन्धकीतुल्याः कुमुदिन्यः चन्द्रोदये सति विकसिताः सत्यः गर्भद्वेषिसुतसदृशान् पुत्रान् प्रसूतवत्यः इति भावः दिने सङ्कुचितेषु कुमुदेषु बद्धाः मधुकराः चन्द्रोदये सति विकसितेभ्यः कुमुदेभ्यः निर्गता इति तात्पर्यम्।

## अप्रस्तुतप्रशंसाऽलङ्कारस्य लिङ्गघटकत्वम् -

अप्रस्तुतेन व्यवहारेण सादृश्यादिप्रकारेण प्रस्तुतव्यवहारो यत्र प्रशस्यते साऽप्रस्तुतप्रशंसा। एषा भवति मुख्यतस्त्रिधा – कार्यकारणभावमूला, सामान्यविशेषभावमूला, सादृश्यमूला च। तत्र सादृश्यमूलायाम् अनुक्तमपि लिङ्गसाम्यम्, तदुदाहरणभूतश्लोकदर्शनेन सिद्ध्यति। लिङ्गभेदैः

---

47 रसगङ्गाधरः, द्वितीयम् आननम् , पृष्ठसङ्ख्या - 304

48 हरविजयम् 20/36

सादृश्यमूलाऽप्रस्तुतप्रशंसा क्वचिदपि नोदाहृता। अत्रापि लौकिकशास्त्रीयलिङ्गयोरभेदाध्यवसायो यथायोगं पूर्ववदेव विचारणीयः। कानिचनोदाहरणानि प्रस्तूयन्तेऽत्र।

**"यान्ति स्वदेहेषु जरामसंप्राप्तोपभोक्तृकाः।**

**फलपुष्पर्द्धिभाजोऽपि दुर्गदेशवनश्रियः"॥[49]**

अत्राभुज्यमानाः फलपुष्पसमृद्धिभाजो निष्फलाः दुर्गदेशवन-श्रियोऽप्रस्तुताः। आभिः शिवरूपभोक्तुरभावे व्यर्थीभवन्ति भगवत्याः पार्वत्याः कठिनतपश्चरणादीनि प्रस्तुतानि चेष्टितानि व्यज्यन्ते। अत्र वनश्रियां शास्त्रीयं स्त्रीत्वं भगवत्यां पार्वत्यां च लौकिकं तत्। एवम् अनयोरभेदाध्यवसायादत्र अप्रस्तुतप्रशंसायाः मूलत्वम्।

**"हारं वक्षसि केनापि दत्तमज्ञेन मर्कटः।**

**लेढि जिघ्रति सङ्क्षिप्य करोत्युन्नतमाननम्"॥[50]**

अत्र वर्णितमर्कटव्यवहारेण व्यज्यते यदनभिज्ञेषु रमणीयवस्तुसमर्पणं तन्नाशायैव भवति। इह मर्कटेऽनभिज्ञे च पुरुषे शास्त्रीयमेव पुंस्त्वम्। एवम् -

**"आपेदिरेऽम्बरपथं परितः पतङ्गा**

**भृङ्गा रसालमुकुलानि समाश्रयन्त।**

**सङ्कोचमञ्चति सरस्त्वयि दीनदीनो**

**मीनो नु हन्त! कतमां गतिमभ्युपैतु"॥[51]**

अत्र प्रस्तुते सरसि, भृङ्गेषु च शास्त्रीयं पुंस्त्वम्, यद्यपि सरश्शब्दस्य नपुंसकत्वेन सरस्यपि नपुंसकत्वमेव सिद्ध्यति तथापि सम्बुद्धौ पुंस्त्वनपुंसकत्वविशिष्टयोः सान्तशब्दयोः एकरूपत्वेन पुंस्त्वनपुंसकत्वयो-

---

[49] काव्यालङ्कारसारसङ्ग्रहः, पृष्ठसङ्ख्या - 381

[50] रसगङ्गाधरः, द्वितीयमाननम् , पृष्ठसङ्ख्या - 335

[51] अत्रैव, पृष्ठसङ्ख्या - 339

रभेदाध्यवसायाः। प्रस्तुते वाच्ये मीने तु लौकिकमपि पुंस्त्वम्। प्रतीयमाने क्षीणे राजनि, तं राजानं विहायापरं राजानमाश्रितवत्सु राजाश्रयेषु पुरुषेषु क्षीणायामपि दशायां तं राजानमपरित्यजति। स्वामिभक्ते च शास्त्रीयमेव पुंस्त्वम्। एवं प्रस्तुते रसाले शास्त्रीयम् अपरस्मिन् राजनि च लौकिकं पुंस्त्वम्।

**“कस्त्वं भो कथयामि दैवहतकं मां विद्धि शाखोटकम्**

**वैराग्यादिव वक्षि साधु विदितं कस्मादिदं कथ्यते?**

**वामेनात्र वटस्तमध्वगजनः सर्वात्मना सेवते**

**नच्छायाऽपि परोपकारकरणे मार्गस्थितस्यापि मे”॥**[52]

अत्राप्रस्तुते शाखोटके शास्त्रीयं पुंस्त्वम्। प्रतीयमाने प्रस्तुतेऽनुपयुज्यमानसम्पदि निर्विण्णे पुरुषे तु लौकिकं तत्। एवं समासोक्त्यलङ्कारे लिङ्गघटकत्वमेव।

**“लावण्यद्रविणव्ययो न गणितः क्लेशो महान् स्वीकृतः**

**स्वच्छन्दस्य सखीजनस्य वसतश्चिन्ताज्वरो निर्मितः ।**

**एषाऽपि स्वयमेव तुल्यरमणाभावाद् वराकी हता**

**कोऽर्थश्चेतसि वेधसा विनिहितस्तन्व्यास्तनुं तन्वता”॥**[53]

अप्रस्तुतायां नायिकायां लौकिकं स्त्रीत्वम्। वेधसि च लौकिकमेव पुंस्त्वम्। किन्तु प्रतीयमाने असाधारणवैदुष्ये निष्फलविद्ये सम्भवतः प्रसिद्धिवशात् प्रकरणवशाद् वा धर्मकीर्तविवाहोस्वित् कस्मिंश्चिद् वक्तरि लौकिकं पुंस्त्वम्। अनुपलब्धश्रोत्रिकायां तद्विद्यायाञ्च शास्त्रीयं स्त्रीत्वम्।

**“आहूतेषु विहङ्गमेषु मशको नायान् पुरो वार्यते**

**मध्ये वारिधि वा वसंस्तृणमणिर्धत्ते मणीनां रुचम्।**

**खद्योतोऽपि न कम्पते प्रचलितुं मध्येऽपि तेजस्विनां**

**धिक् सामान्यमचेतनं प्रभुमिवानामृष्टतत्त्वान्तरम्”॥**[54]

---

[52] ध्वन्यालोकः, तृतीय उद्योतः, पृष्ठसङ्ख्या - 540

[53] ध्वन्यालोकः, तृतीय उद्योतः, पृष्ठसङ्ख्या - 532

अत्राप्रस्तुते वाच्ये मशके प्रतीयमाने प्रस्तुते मूर्खे च लौकिकमेव पुंस्त्वम्।

**"भावव्रात हठाज्जनस्य हृदयान्याक्रम्य यन्नर्तयन्**

**भङ्गीभिर्विविधाभिरात्महृदयं प्रच्छाद्य संक्रीडसे ।**

**स त्वामाह जडं ततः सहृदयम्मन्यत्वदुःशिक्षितो**

**मन्येऽमुष्य जडात्मता स्तुतिपदं त्वत्साम्यसम्भावनात्"।।[55]**

अत्राप्रस्तुते भावव्राते शास्त्रीयं पुंस्त्वम्। प्रतीयमाने प्रस्तुते परमगम्भीरे विदुषि च लौकिकं पुंस्त्वम्।

**"पुंस्त्वादपि प्रविचलेद् यदि यद्यधोऽपि**

**यायाद् यदि प्रणयने न महानपि स्याद-**

**भ्युद्धरेत् तदपि विश्वमितीदृशीयं**

**केनापि दिक् प्रकटिता पुरुषोत्तमेन"॥[56]**

अत्राप्रस्तुते भगवति विष्णौ प्रतीयमाने प्रस्तुते महापुरुषे च शास्त्रीयमेव पुंस्त्वम्।

विषमालङ्कारचमत्कृतौ लिङ्गघटकत्वम् -

**"नपुंसकमिति ज्ञात्वा प्रियायै प्रेषितं मनः।**

**तत्तु तत्रैव रमते हताः पाणिनिना वयम्"॥[57]**

अत्र मनसि लौकिकशास्त्रीयनपुंसकत्वयोरभेदाध्यवसायः एव प्रियां प्रति तत्प्रेषणे हेतुः, यद्वशात् विषमविशेषस्य समुल्लासः।

---

[54] काव्यप्रकाशः, दशम उल्लासः, पृष्ठसङ्ख्या - 630

[55] ध्वन्यालोकः, प्रथम उद्योतः (लोचनटीकावचः)

[56] काव्यप्रकाशः, दशम उल्लसः, पृष्ठसङ्ख्या - 511

[57] कुवलयानन्दः, पृष्ठसङ्ख्या - 158

एवं विविधेष्वलङ्कारेष्वलङ्कारध्वन्यादिषु च यत् सौन्दर्यं तल्लिङ्गघटकत्वमाश्रित्य जायते तत्र तत्र चमत्कृतिवर्धनत्वं परिशील्यैतत्घटकत्वमितोऽपि पुरस्कर्तुं शक्यते।

## घ.लिङ्गस्य वक्रोक्तिघटकत्वम्

भिन्नलिङ्गयोः शब्दयोर्विच्छित्तिप्रयोजकः सामानाधिकरण्येन प्रयोगो लिङ्गवक्रता। लिङ्गान्तरे सत्यपि स्त्रीलिङ्गस्यैव प्रयोगेऽपि भवति हि वक्रतैषा। वस्तुतः कुन्तकेनास्ति लिङ्गवक्रता स्वीकृता। तथा हि भिन्नलिङ्गानामपि शब्दानां वैचित्र्यरूपवक्रतायाः अर्थाद् वैदग्ध्यभङ्गीभणित्याः निदर्शनम् - **मैथिली तस्य दाराः**,[58] **एतां पश्य पुरस्तटीम्**[59] इत्याद्युदाहरणमुखेन विशदयितुं शक्यते। वस्तुत एतादृग्लिङ्गवक्रतायां तु पदसङ्घटनरूपवैशिष्ट्यमेवेति तत्त्वम्। तथा हि स्त्री रमणीयं तत्त्वम्। तथोक्तम् -

**"भिन्नयोर्लिङ्गयोर्यस्यां सामानाधिकरण्यतः।**

**कापि शोभाभ्युदेत्येषा लिङ्गवैचित्र्यवक्रता॥**[60]

लिङ्गवैचित्र्यस्वरूपं विवेचयता वक्रोक्तिकारेण स्त्र्यादिविचित्रभाववक्रतायां सौन्दर्यातिशयित्वमस्ति प्रोक्तम्।[61]

**सति लिङ्गान्तरे यत्र स्त्रीलिङ्गश्च प्रयुज्यते।**

**शोभानिष्पत्तये यस्मान्नामैव स्त्रीति पेशलम्"॥**[62]

---

[58] वक्रोक्तिजीवितम्, प्रथमोन्मेषः, पृष्ठसङ्ख्या - 81

[59] अत्रैव

[60] अत्रैव 2/21

[61] "एषा कथितस्वरूपा लिङ्गवैचित्र्यवक्रता स्त्र्यादिविचित्रभाववक्राताविच्छित्तिः । भवतीति सम्बन्धः, क्रियान्तराभावात्। कीदृशी, यस्यां यत्र विभिन्नयोर्विभक्तस्वरूपयोर्लिङ्गयोः सामानाधिकरण्यतस्तुल्याश्रयत्वादेक-द्रव्यवृत्तित्वात् काप्यपूर्वा शोभाभ्युदेति कान्तिरुल्लसति"।

- अत्रैव 2/21 इत्यत्र व्याख्याक्रमे

[62] अत्रैव, 2/22

एवं हि स्त्रीति नामैव मधुरमित्येवं प्रतिपाद्य लिङ्गवैचित्र्यवक्रतैवैषा वक्रोक्तिकारेण व्याख्यायामप्यस्यां विशदिता।[63] यथा -

**“यस्यारोपणकर्मणापि बहवो वीरव्रतं त्याजिताः**

**कार्यं पुङ्खितबाणमीश्वरधनुस्तद्दोर्भिरेभिर्मया।**

**स्त्रीरत्नं तदगर्भसम्भवमितो लभ्यं च लीलायिता**

**तेनैषा मम फुल्लपङ्कजवनं जाता दृशां विंशतिः**”॥[64]

अस्यायमर्थः – अत्र फुल्लपङ्कजवनमिति शास्त्रीयनपुंसकलिङ्गस्य सामानाधिकरण्येन विंशतिरिति शास्त्रीयस्त्रीलिङ्गस्य प्रयोगः। लौकिकं नपुंसकत्वं स्त्रीत्वं चाभेदेन भासत एव। नपुंसकस्य स्त्रीभवनं विरोधं प्रकाशयद् विस्मयं व्यनक्ति। एवमिह यथा -

**“नभस्वता लासितकल्पवल्लीप्रबालबालव्याजेन तस्य।-**

**उरःस्थलेऽकीर्यत दक्षिणेन सर्वास्पदं सौरभमङ्गरागः”**॥[65]

अस्यायमर्थः – अत्राङ्गराग इति पुँल्लिङ्गस्य सामानाधिकरण्येन सर्वास्पदं सौरभमिति नपुंसकलिङ्गस्य प्रयोगः। अनेनाङ्गरागे सौरभातिशयः प्रकाश्यते। सौरभमित्यस्याङ्गरागे कार्यकारणभावमूलया शुद्धया लक्षणया प्रयोगः। अङ्गरागो हि कारणम्,कार्यं च सौरभम्। अङ्गरागस्य सौरभन्न , कदाचन व्यभिचार इति तात्पर्यम्। पूर्ववदत्रापि विस्मयस्य प्रतीतिः।

एवमिह यथा -

**“आयोज्य मालामृतुभिः प्रयत्नसम्पादितामंसतटेऽस्य चक्रे।**

**करारविन्दे मकरन्दबिन्दुस्यन्दि श्रिया विभ्रमकर्णपूरः”**॥[66]

---

[63] “यत्र यस्यां लिङ्गान्तरे सति अन्यस्मिन् सम्भवत्यपि लिङ्गे ‘स्त्रीलिङ्गं प्रयुज्यते’ निबध्यते । अनेकलिङ्गत्वेऽपि पदार्थस्य स्त्रीलिङ्गविषयः प्रयोगः क्रियते। किमर्थम्? शोभानिष्पत्तये। कस्मात् कारणात् यस्मान्नामैव स्त्रीति पेशलम्। स्त्रीत्यभिधानमेव हृदयहारि। विच्छित्यन्तरेण रसादियोजनयोग्यत्वात्”।

- अत्रैव 2/22 इत्यत्र व्याख्याक्रमे

[64] अत्रैव 2/21 इत्यत्र व्याख्याक्रमे

[65] अत्रैव 2/21/77

अस्यायमर्थः - इह करारविन्दमिति नपुंसकस्य कर्णपूर इति पुँल्लिङ्गस्य च तथा प्रयोगः, एवमिह यथा -

**"यथेयं ग्रीष्मोष्मव्यतिकरवती पाण्डुरभिदा**

**मुखोद्भिन्नम्लानानिलतरलवल्लीकिसलया।**

**तटी तारं ताम्यत्यतिशशियशाः कोऽपि जलदस्-**

**तथा मन्ये भावी भुवनवलयाक्रान्तिसुभगा"॥**[67]

इह सत्यपि पुँल्लिङ्गनपुंसकलिङ्गतटशब्दे तटीति स्त्रीत्वविशिष्टस्य तटीति पदस्य प्रयोगो रमणीयस्त्रीस्मृतिजननेन चमत्करोति।

मैथिली तस्य दारा इत्यत्र पुंस्त्वं मैथिल्यां सर्वसद्गुणोपचयं लौकिकपुंस्त्वसमानाधिकरणं शौर्यादि च प्रकाशयति।

अपरतस्तु विशेषशोभावर्धनार्थं लिङ्गान्तरे सत्यपि विशिष्टलिङ्गप्रयोगो विधीयत इत्येतन्निरूपकं वक्रोक्तिकारवचश्चेदम् -

**"विशिष्टं योज्यते लिङ्गमन्यस्मिन् सम्भवत्यपि।**

**यत्र विच्छित्तये साऽन्या वाच्यौचित्यानुसारतः"॥**[68]

यत्र लिङ्गान्तरे सति विशेषशोभाऽभिवृध्यर्थं विशिष्टलिङ्गप्रयोगो विधीयते तत्राप्युच्यते विशिष्टा लिङ्गवैचित्र्यवक्रतैव। सा हि यथा -

**"त्वं रक्षसा भीरु यतोऽपनीतां तं मार्गमेताः कृपया लता मे ।**

**अदर्शयन् वक्तुमशक्नुवन्त्यः शाखाभिरावर्जितपल्लवाभिः"॥**[69]

इह रामानुभूतं विरहं लताभिर्मृगिभिश्च सह तोलयितुं रामं प्रति सहानुभूतिः कालिदासेनास्ति सम्प्रदर्शिता। कुन्तकस्यायमभिप्रायो यत् कविः

---

[66] अत्रैव, 2/21/78

[67] अत्रैव 2/21/79

[68] अत्रैव 2/23

[69] रघुवंशम् 13/24

कालिदासोऽत्र वृक्षाणां मृगाणां चोपस्थापनं विधायापि काव्यं प्रस्तोतुं शक्नुयात् परं तेन लतानां मृगिणामेव समुल्लेखो व्यधायीति सौन्दर्याभिवर्धनार्थमात्रमेव विशिष्टलिङ्गवक्रतोदाहरणभूतमिदमिति विवेकः।

एवं भवति तावल्लिङ्गस्य वक्रताघटकत्वम्। सर्वत्र तावच्छास्त्रीय-लौकिकलिङ्गयोर्भेदेनावभासवशादेव मुख्यतश्चमत्कृतिसमुद्भव इति नूनम्।

## ङ. लिङ्गस्यौचित्यघटकत्वम्

लिङ्गमप्यौचित्यस्यानौचित्यस्य च घटकम्। काव्य उचितस्यैव लिङ्गस्य प्रयोगः कर्तव्यः। उचितेन लिङ्गेन काव्यं तथा शोभते यथा साम्राज्यसूचकेन सुलक्षणेन शरीरम्। उक्तम् -

**"उचितेनैव लिङ्गेन काव्यमायाति भव्यताम्।**
**साम्राज्यसूचकेनेव शरीरं शुभलक्ष्मणा"॥**[70]

यथा -

**"निद्रां न स्पृशति त्यजत्यपि धृतिं धत्ते स्थितिं न क्वचिद्**
**दीर्घां वेत्ति कथां व्यथां न भजते सर्वात्मना निर्वृतिम्।**
**तेनाराधयता गुणस्तव जपध्यानेन रत्नावलीं**
**निःसङ्गेन पराङ्गनापरिगतं नामापि नो सह्यते"॥**[71]

अस्यायमर्थः - अत्र वत्सेश्वरे पराङ्गनासमपर्कस्यात्यन्ताभावो विवक्षितः। तत्र निद्रादौ विद्यमानं शास्त्रीयस्त्रीत्वविशिष्टं लौकिकं स्त्रीत्वं नितरामौचित्यं पुष्णाति। स्त्रीत्वविशिष्टत्वेन निद्रादयोऽपि न सेव्यन्ते ततश्चेतनस्त्री सेवनस्य का शङ्केति व्यज्यते। तेन वासवदत्ताविरहितस्य विप्रलम्भातिशयः प्रकाश्यते। उक्तम् -

**"अत्र वत्सेश्वरस्य रत्नावलीविरहविधुरचेतसः स्मरावस्थासमुचितं विदूषकेण सुसङ्गतायै यदभिहितम् – निद्रां न स्पृशति, धृतिं त्यजति, स्थितिं**

---

[70] औचित्यविचारचर्चा, कारिकासङ्ख्या – 12

[71] अत्रैव , पृष्ठसङ्ख्या - 113

**न धत्ते, दीर्घां कथां व्यथामिव वेत्ति, निर्वृत्तिं न भजते, तां विना तेन तद्गुणजापिना तद्ध्याननिरतेन जनसङ्गत्यागिनाऽन्यासा-मङ्गनानां नामापि न सह्यते। तत्र स्थितिधृतिकथानिर्वृतीनां स्त्रीलिङ्गाभिधानेनाङ्गनात्वाध्यारोपेण परमौचित्यं प्रतिपादितम्"।**[72]

क्वचिल्लिङ्गेनानौचित्यं पुष्यते। यथा -

**"वरुणरणसमर्थास्वर्गभङ्गैः कृतार्था,**

**यमनियमनशक्ता मारुतोन्माथसक्ता।**

**धनदनिधनशय्या लज्जते मर्त्ययुद्धे**

**दहनदलनचण्डा मण्डली मद्भुजानाम्"॥**[73]

अस्यायमर्थः - अत्र रावणस्य पराक्रमस्य कठोरता विवक्षिता, किन्तु भुजमण्डलीति स्त्रीलिङ्गप्रयोगेण सा न प्रतीयते। स्त्री कोमला भवति। तत्कार्यमपि प्रायेण कोमलमेव भवति। स्त्रीत्वविशिष्टभुजमण्डलजन्ये प्रतापेऽपि कोमलतैव प्रतीयते न तु कठोरता। अनेन वीररसोऽपकृष्यते। उक्तम्-

**"अत्र रावणः कपिनिकरामर्षविषमविकाराविष्कारोचितं ब्रूते – वरुणादिलोके कपालविशालबलावलेपविप्लवकारिणी मर्त्यमात्रयुद्धे लज्जते प्रचण्डा मद्भुजमण्डलीति स्त्रीलिङ्गेन निर्देशस्त्रैलोक्यविजयोचितस्य प्रतापस्य कठोरतामपहरन्ननौचित्यं सूचयति"।**[74]

एवं शास्त्रीयविशिष्टलौकिकलिङ्गमौचित्यस्य पोषकमपोषकं च भवति। एवं साहित्यशास्त्रे क्वचन शास्त्रीयलिङ्गभिन्नलौकिकलिङ्गस्य क्वचित् लौकिकलिङ्गाभिन्नशास्त्रीयलिङ्गस्य च विवक्षा। उभयोर्लिङ्गयोरभेदेन अवस्थानम्।

---

[72] अत्रैव, पृष्ठसङ्ख्या – 113-114

[73] औचित्यविचारचर्चा, कारिका - 12 (अत्रत्या व्याख्या)

[74] अत्रैव

## च.लिङ्गभेदस्योपमादौ दोषत्वम् –

प्रस्फुटप्रकृतार्थोपस्कारकसादृश्यलक्षणे उपमाऽलङ्कारे उपमेयोपमानयोः वचनादिभेदवल्लिङ्गभेदोऽपि दोषावह उक्तः। एवं स्वभेदद्वारोपमादोषघटकत्वं लिङ्गस्य सिध्यति। यथासम्भवमुपमानोपमेययो-र्लिङ्गसाम्यमेव समीचीनमित्यालङ्कारिकसमयः। यथा "सुधेव विमलश्चन्द्रः" इत्यत्र सुधायां शास्त्रीयं स्त्रीत्वं चन्द्रे तु शास्त्रीयं पुंस्त्वमिति शास्त्रीयलिङ्गभेदः। एवं "सक्तवो भक्षिता देव! शुद्धाः कुलवधूरिव" इत्यत्रोपमाने कुलवध्वां लौकिकं स्त्रीलिङ्गम् उपमेयभूतसक्तुषु च शास्त्रीयं पुंस्त्वमिति लिङ्गभेदः। एवमेव "चिन्तारत्नमिव च्युतोऽसि करतो..." इत्यत्र च्युतेति पदगतं शास्त्रीयं पुंस्त्वं चिन्तारत्ने चोपमानभूते शास्त्रीयं नपुंसकत्वम्। च्युतेत्यस्योपमेये एवान्वयः सम्भवति, न तु नपुंसकत्वविशिष्टे चिन्तारत्ने इत्युपमानभूते पदे। किन्त्वत्र यदा साधारणधर्मस्य लिङ्गभेदेऽपि नान्यथा भावो भवति तदा लिङ्गभेदो न दोषावहः। यथा "मुखं चन्द्र इवाभाति" इत्यत्राभाति पदस्य मुखे चन्द्रे चान्वये स्वरूपभेदाभावेन मुखगतस्य शास्त्रीयनपुंसकत्वस्य चन्द्रगतस्य शास्त्रीयपुंस्त्वस्य च भेदेऽपि न दोषः। एवमेव गुणैरनर्घ्यैः प्रथितो रत्नैरिव मद्वार्णवः" इत्यत्रापि रत्नरूपोपमानगतस्य शास्त्रीयनपुंसकत्वस्य उपमेयभूतगुणगतस्य शास्त्रीयपुंस्त्वस्य च भेदेऽपि न दोषः।

उपमाऽलङ्कारे भिन्नलिङ्गत्वम्, प्रसङ्गादनतिदूरं भिन्नवचनत्वञ्च दोषत्वेन प्रख्याप्येते। तथोक्तम् - **"यत्रोपमा भिन्नलिङ्गा भिन्नलिङ्गं तदुच्यते। भवेत्तद्भिन्नवचनं यद्भिन्नवचनोपमम्"॥**[75] साधारणधर्मवाचकादेर्लिङ्गभेदो दोषभाङ्न वेति विवादः। "**सुधेव विमलश्चन्द्रः**",[76] इह तु साधारणधर्मस्यान्यथाभावत्वाद् दोषः, परं "**मुखश्चन्द्र इवाभाति**",[77] अत्र **न**

---

[75] सरस्वतीकण्ठाभरणम्, प्रथमः परिच्छेदः, पृष्ठसङ्ख्या - 24

[76] साहित्यदर्पणः, सप्तमः परिच्छेदः, पृष्ठसङ्ख्या - 618

[77] अत्रैव, पृष्ठसङ्ख्या - 618

**"साधारणधर्मस्यान्यथाभावस्तत्र न दोषः"**,[78] इति वचनप्रामाण्येन दोषरहितत्वम् उपमाया दोषनिराकरणाय प्रोच्यते। अन्यत्रापि काव्यादर्शादिषु नैकैरुदाहरणैः[79] विषयोऽयं चर्चाङ्गतः। अतः परं दुष्टपदनिरूपण-क्रमेऽप्रयुक्तदोषो लिङ्गाधारितोऽपि वर्णितो जातः –

**"यथाऽयं दारुणाचारः सर्वदैव विभाव्यते।**

**तथा मन्ये दैवतोऽस्य पिशाचो राक्षसोऽथ वा॥**

**अत्र दैवतशब्दो "दैवतानि पुंसि वा" इति पुंस्याम्नातोऽपि न केनचित् प्रयुज्यते"।**[80] इह दैवतशब्दस्याल्पीयःप्रयोगविषयत्वाद् दोष एव।

ध्वनिवादिन आलङ्कारिकाः उपमानोपमेयगतं लिङ्गभेदं भग्नप्रक्रमदोषं मन्यन्ते। भोजेन तूपमानोपमेययोर्लिङ्गभेदः भिन्नलिङ्गनामा वाक्यदोषः स्वीकृतः, अप्रक्रमदोषस्य चतुर्थो भामहस्य पद्यमिदमुदाहृतञ्च –

**"अविगाह्योऽसि नारीणामनन्यमनसामपि।**

**विषमोपलभिन्नोर्मिरापगेवोत्तित्तीर्षताम्"॥**[81]

एवं काव्यप्रकाश-ध्वन्यालोक-साहित्यदर्पणातिरिक्तं शृङ्गारप्रकाशादि-ग्रन्थेषु विशेषेणैतत्सम्बद्धसङ्कलनं कुत्रचिच्च नूतनतरमप्युपस्थापनं समग्रविवेचनार्थं समुपयुक्तम्। यथा दोषहानगुणोपादानाख्ये नवमे प्रकाशे **"अक्ताः शर्कराः उपदधाति, तेजो वै घृतम्"**,[82] इति वचनमुपन्यस्य शर्कराणां घृताक्तत्वरूपमर्थावगमनं लिङ्गादर्थात् सङ्केताद् भिद्यत इति प्रतिपादनम्। ततश्च गुणानामपचयोपचयरूपलिङ्गस्य विविधं विभाजनं[83] तत्रत्यं विशेषेण चर्चाऽऽस्पदम्।

---

[78] अत्रैव, पृष्ठसङ्ख्या - 618

[79] स्त्रीव गच्छति षण्डोऽयम्, वक्त्येषा स्त्री पुमानिव, विद्या धनमिवार्जिता

- काव्यादर्शः, द्वितीयः परिच्छेदः, पृष्ठसङ्ख्या - 46-47

[80] काव्यप्रकाशः, सप्तम उल्लासः, पृष्ठसङ्ख्या – 270-271

[81] शृङ्गारप्रकाशः, नवमः प्रकाशः, पृष्ठसङ्ख्या - 492

[82] अत्रैव, पृष्ठसङ्ख्या - 478

[83] तदेतच्छुद्धमिश्रभेदात् षोढा विप्रथते – शुद्धम्, मिश्रम्, सङ्कीर्णम्, उपसर्जनम्, आविष्टम् अव्यक्तञ्च।

अन्यत्र बहुधा परं विशिष्टलिङ्गस्वरूपसमन्वितैः प्रयोगैरपि सहृदयहृदयं चमत्कृतिमनुभवत्येव। तद्यथा अभिज्ञानशाकुन्तले चरित्रत्रितयसमुपस्थान-प्रसङ्गे महाकविकालिदासेन ईदृशः मनोहारी प्रयोगोऽस्ति विहितः –

**"दिष्ट्या शकुन्तला साध्वी सदपत्यमिदं भवान्।**

**श्रद्धा वित्तं विधिश्चेति त्रितयं तत् समागतम्"॥**[84]

त्रितयमित्यनेन कविर्विवक्षति यद् एषां सम्यक् समानयोग एव कल्याणाय भवति।

अथ **"गृहिणी सचिवः सखी मिथः प्रियशिष्या ललिते कलाविधौ ।**

**करुणाविमुखेन मृत्युना हरता त्वां वद किं न मे हृतम्"॥**[85]

श्लोकेऽस्मिन् हि सचिवगतशास्त्रीयपुंस्त्वेन लौकिकस्त्रीत्वविशिष्टायाम् इन्दुमत्यां पुंस्त्वसमानाधिकरणधृत्युत्साहबुद्धिमत्त्वपराक्रमादयो गुणाः द्योत्यन्ते तद्विशिष्टाया इन्दुमत्याः मरणेन शोकातिशयस्य ध्वनिः। अत एव कालिदासेन सचिवेति स्त्रीत्वविशिष्टः शब्द इहास्ति प्रयुक्तः।

एवमेव बहुधा साहित्यार्थं सार्थीकुर्वतां नैकेषामुदाहरणानां मुखेन साहित्यस्थं लिङ्गगतं विशिष्टमेव स्वरूपं तदाधृतैश्च विविधवर्णन-पुरस्करणादिभिश्च शक्यते सुविशदयितुमिति दिक्।

---

अत्रैव, पञ्चमः प्रकाशः, पृष्ठसङ्ख्या – 277-278

[84] अभिज्ञानशाकुन्तलम् , 7/29

[85] साहित्यदर्पणः, दशमः परिच्छेदः, पृष्ठसङ्ख्या -830

# चतुर्थोऽध्यायः

## व्याकरणसाहित्यशास्त्रदृशा वचनविमर्शः

## वचनशब्दार्थविमर्शः –

व्यक्तायां वाचि विद्यमानस्य ब्रवीतेः[1] परिभाषणे पठिताद् वक्तेर्वा भावे कर्मणि करणे वा ल्युटि वचनशब्दः साध्यते। भावसाधनोऽयमुक्तेः पर्यायः। यथा- "**व्याहार उक्तिर्लपितं भाषितं वचनं वचः**"[2] इत्यमरकोषेऽभिहितम्। पदमिदमुच्चार्यमाणपरम्। यथा- "**मुखनासिकावचनोऽनुनासिकः**"[3] इति सूत्रे। अनेन हि मुखसहितया नासिकयोच्चार्यमाणस्य वर्णस्यानुनासिकसंज्ञा विधीयते। अत एवास्य सूत्रस्य वृत्तौ वैयाकरणसिद्धान्तकौमुद्याम्- "**मुखसहित-नासिकयोच्चार्यमाणो वर्णोऽनुनासिकसञ्ज्ञः स्याद्**"[4] इत्यभिहितम्। करणसाधनोऽयम् एकवचनादिप्रत्ययपरः। किन्तु व्याकरणशास्त्रे वचनशब्दः सङ्ख्यायामेकवचनादौ प्रत्यये च प्रयुक्तः। सङ्ख्यारूपस्य वचनस्य वाच्यता द्योत्यता च विचारिता। साहित्यशास्त्रेऽपि व्याकरणसम्मत एव वचनपदार्थः, वचनस्य रसादिव्यञ्जकत्वमुपमादौ क्वचन सदोषत्वं चाङ्गीकृतम्। तदेतत्सर्वमिहाध्याये विचार्यते। विचारणीया विषयबिन्दव इमे सन्ति-

1. **वचनस्वरूपम्**
2. **वचनभेदाः**
3. **वचनस्य वाच्यत्वं द्योत्यत्वं वा**
4. **विभक्तिरूपवचनार्थः**
5. **शब्दविशेषे वचनानुपपत्तिपरिहारः**
6. **विशेष्यविशेषणभावनियमः**
7. **वचनस्य रसाद्यभिव्यञ्जकत्वम्**
8. **वचनस्य वक्रोक्तावुपयोगः**
9. **वचनस्यौचित्य उपयोगः**
10. **वचनभेदस्योपमादावदोषत्वम्**

---

[1] "ब्रूञ् वक्तायां वाचि " – धातुसङ्ख्या 1119, सिद्धान्तकौमुदी, पृष्ठसङ्ख्या - 393

[2] अमरकोषः, 1/6/1

[3] अष्टाध्यायीसूत्रसङ्ख्या - 1/1/8

[4] वैयाकरणसिद्धान्तकौमुदी, पृष्ठसङ्ख्या - 05

## 11. वचनाश्रितं तत्त्वान्तरविवेचनम्

क्रमेणैतत् सर्वं प्रतिपाद्यते -

### 1. वचनस्वरूपम् –

व्याकरणशास्त्रे संख्यैकवचनद्विवचनबहुवचनप्रत्ययाश्च वचनपदेनाभिधीयन्ते। "**प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा**"[5] सूत्रेऽस्मिन् "**लुपि युक्तवद्व्यक्तिवचने**"[6] चेति सूत्रे वचनशब्दः सङ्ख्यापरः। प्रातिपदिकार्थसूत्रे वचनं संख्येति वैयाकरणसिद्धान्तकौमुद्यामभिहितम्।[7] प्रातिपदिकार्थमात्रे लिङ्गमात्राद्याधिक्ये च प्रथमा भवतीति तत्सूत्रस्यार्थः। तत्र वचनपदस्यैकवचनादूरूपोऽर्थो नान्वितः। अतः सङ्ख्यायां प्रथमेत्यर्थः। एको द्वौ बहव इत्यत्र प्रातिपदिकेनैवैकादिनैकत्वादेरुक्तत्वेन "**उक्तार्थानामप्रयोगः**" [8] इति परिभाषया प्रथमाया अप्राप्तौ प्रकृतसूत्रे वचनस्य ग्रहणम्। "**क्रियासमभिहारे लोट् लोटो हिस्वौ वा च तध्वमौ**" [9] सूत्रस्यास्य वृत्तौ भट्टोजिदीक्षितेन– "**पुरुषवचनसञ्ज्ञे नातिदिश्येते**"[10] इत्यभिहितम्। अत्र वचनशब्द एकवचनादिप्रत्ययपरः। व्युत्पत्तिवादेऽपि विशेष्यवाचकपदोत्तरविभक्तितात्पर्यविषयसङ्ख्यातो विरुद्धायाः सङ्ख्याया अविवक्षायां विशेष्यविशेषणवाचकयोः पदयोः समानवचनकत्वं प्रतिपादयता गदाधरभट्टाचार्येण वचनपदमेकवचनादिसञ्ज्ञके प्रत्यय एव प्रयुक्तम्। उक्तं तेन-

**"यत्र विशेष्यवाचकपदोत्तरविभक्तितात्पर्यविषयसङ्ख्याविरुद्धसङ्ख्याया अविवक्षितत्वं तत्र विशेष्यविशेषणवाचकपदयोः समानवचनकत्वम्"।**[11]

---

[5] अष्टाध्यायीसूत्रसङ्ख्या - 2/3/46

[6] अष्टाध्यायीसूत्रसङ्ख्या - 1/2/51

[7] "वचनं सङ्ख्या" – सिद्धान्तकौमुदी, पृष्ठसङ्ख्या - 131

[8] वैयाकरणसिद्धान्तकौमुदी (बालमनोरमाटीकायामुद्धृतम्), पृष्ठसङ्ख्या - 399

[9] अष्टाध्यायीसूत्रसङ्ख्या – 3/4/2

[10] सिद्धान्तकौमुदी, पृष्ठसङ्ख्या - 477

[11] व्युत्पत्तिवादः, पृष्ठसङ्ख्या - 08

एवं वचनपदं सङ्ख्यापरमेकवचनादिपरं च।[12] **"नामैकदेशो नामग्रहणेन गृह्यते"** इति नियमेन वचनपदम् एकवचनादिविभक्तिरूपप्रत्ययबोधनक्षमम्। सुपां तिङां च त्रिकस्यैकवचनद्विवचनबहुवचनसंज्ञा व्याकरणशास्त्रसम्मता।

**वाक्यपदीयानुसारेण वचनविमर्शः –**

वचनपदवाच्या सङ्ख्या एकत्वद्वित्वबहुत्वादिका परार्धपर्यवासाना द्रव्यस्य धर्मः। द्रव्याणां परस्परभेदस्य कारणं सङ्ख्यैव द्रव्यात् सङ्ख्याया भेदोऽपोद्धारदिशा सङ्ख्यासङ्ख्येययोरभेदो वास्तवः, भेदश्च काल्पनिकः। यद्यपि सङ्ख्या द्रव्यमात्रधर्मस्तथापि सा गुणादिष्वपि अध्यारोप्यते। अत एव "चतुर्विंशतिर्गुणाः, पञ्च कर्माणि, द्वे सामान्ये" इत्यादयः प्रयोगाः सङ्गच्छन्ते। गुणकर्मसामान्यानि हि द्रव्यभिन्नानि तेषु चतुर्विंशत्यादिसङ्ख्या स्वभावतो न सम्भवति। सङ्ख्या हि गुणत्वेन द्रव्याश्रया। उक्तं वाक्यपदीये –

**"सङ्ख्यावान् सत्त्वभूतोऽर्थः सर्व एवाभिधीयते।**
**भेदाभेदविभागो हि लोके सङ्ख्यानिबन्धनः॥**
**स धर्मो व्यतिरिक्तो वा तेषामात्मैव वा तथा।**
**भेदहेतुत्वमाश्रित्य सङ्ख्येत्यभिधीयते॥**
**समवेता परिच्छेद्ये कवचिदन्यत्र सा स्थिता।**
**प्रकल्पयति भावानां सङ्ख्याभेदं तथाऽऽत्मनः"॥**[13]

"द्रव्यस्य गुणाः चतुर्विंशतिः" इत्यादिवाक्ये द्रव्यात् पृथक्कृतो गुणो द्रव्यवन्मन्यते। तेन तत्रापि स्वातन्त्र्येण निर्दिष्टे गुणे चतुर्विंशतिः सङ्ख्या सम्भवति। द्रव्यान्निष्कृष्टानां गुणानां प्राधान्येन निर्देशे तत्रापि गुणस्य सत्ता व्यवहारतः सिद्धा। अभिहितं वाक्यपदीये –

**"अस्वतन्त्रे स्वतन्त्रत्वं परधर्मो यथा गुणे।**
**अभेद्ये भेद्यभावोऽपि द्रव्यधर्मस्तथा गुणे"॥**[14]

---

[12] "प्रोच्यते वचनं सङ्ख्या तथैकवचनादिकम्"। - लिङ्गवचनविचारः , कारिका - 54, पृष्ठसङ्ख्या - 77

[13] **वाक्यपदीयम्,** 3/8/1-3

**"सामान्येष्वपि सामान्यं विशेषेषु विशिष्टता।**

**सङ्ख्यासु सङ्ख्या लिङ्गेषु लिङ्गमेवं प्रकल्प्यते"॥**[15]

एवं द्रव्याश्रिता सङ्ख्या द्रव्याश्रिता सती भवति द्विधा। काचिद् भेदिका काचिदभेदिका च। एकत्वसङ्ख्याऽभेदबोधस्य निमित्तं भवति। द्वित्वादिका तु भेदबोधस्य निमित्तम्। एतदेवं प्रतिपादितमत्र वाक्यपदीये –

**"अतो द्रव्याश्रितां सङ्ख्यामाहुः संसर्गवादिनः।**

**भेदाभेदव्यतीतेषु भेदाभेदविधायिनी"॥**[16]

एवं भर्तृहरिमते वचनपदवाच्या सङ्ख्या द्रव्यमात्राश्रिता भेदाभेदप्रत्ययनिमित्तं च। "एकः पटः" इत्यत्र पटो द्रव्यं तत्रैकशब्दो द्रव्योपसर्जनभूताम् एकत्वसङ्ख्यां वदति। पटे "तिस्रः सङ्ख्याः" इति प्रयोगे सङ्ख्या द्रव्यवत् प्रयुक्ता। अतस्तस्यामपि त्रित्वसङ्ख्यायाः सम्भवः। अत एव सङ्ख्यायामपि सङ्ख्या भवतीति भर्तृहरिणा पूर्वोक्तकारिकया प्रतिपादितम्।

## 2. वचनभेदाः –

इह वचनस्य भेदाः प्रतिपाद्यन्ते। सुपः स्वौजसादय एकविंशतिः, तिङश्च तिप्तस्झ्यादयोऽष्टादश क्रमेणैकवचन-द्विवचन-बहुवचनसञ्ज्ञाश्च भवन्ति। एवं विभक्तिरूपो वचनपदार्थस्त्रिधा - एकवचनम्, द्विवचनम, बहुवचनं च। सुपस्तिङश्च विभक्तय एकत्वादीनां सङ्ख्यानां बोधिका भवन्ति। विभक्तिबोध्या सङ्ख्यैकत्वमारभ्य परार्धं यावद् भवति। त्रित्वादिव्यापकं बहुत्वमपि सङ्ख्योच्यते। **"बहुगणवतुडति सङ्ख्या"**[17] इति सूत्रेण बहुपदस्याप्यन्वर्था सङ्ख्या सञ्ज्ञा भगवता पाणिनिना कृता। इत्थं सङ्ख्यारूपं वचनमेकत्वादि परार्धान्तं बहुत्वं च।

---

[14] वाक्यपदीयम्, 3/8/5

[15] अत्रैव, 3/8/11

[16] अत्रैव, 3/8/12

[17] अत्रैव, 1/1/23

### 3. वचनस्य वाच्यत्वं द्योत्यत्वं वा –

सङ्ख्यारूपं वचनं विभक्तिप्रत्ययैर्बोध्यते। इदं विभक्त्या वाच्यं द्योत्यं वेति पक्षद्वयम्। तत्र नैयायिका सङ्ख्यारूपं वचनं विभक्तिवाच्यमेव मन्यन्ते। विभक्तिश्रवणे हि सङ्ख्या प्रतीयते, तदश्रवणे तु न प्रतीयत इत्यन्वयव्यतिरेकाभ्यां सङ्ख्याया वाच्यत्वमेव सिद्ध्यति। यथा - बालः, बालम्, बालेन, बालाय, बालकात्, बालस्य, बाले - इत्यादौ स्वादीनां श्रवण एकत्वं प्रतीयते। बालौ, बालाभ्याम् इत्यादौ तदश्रवणे न प्रतीयत इत्यन्वयेन व्यतिरेकेण चैकत्वे स्वादिवाच्यता सिद्ध्यति। एवं द्वित्वबहुत्वयोरपि ज्ञातुं शक्यते। किन्तु वैयाकरणाः सङ्ख्यां विभक्त्या द्योत्यमेव मन्यन्ते। वारि, मधु, इत्यादौ स्वादेरश्रवणेऽप्येकत्वस्य प्रतीत्याऽन्वयव्यतिरेकनियमो भज्यते। तेन सङ्ख्याऽपि लिङ्गादिवत् प्रातिपदिकस्यैव वाच्या, द्योत्या तु विभक्त्या। विभक्तौ "**द्योतकत्वं च स्वसमभिव्याहृतपदनिष्ठवृत्त्युद्बोधकत्वरूपम्**"।[18] एवं सङ्ख्यारूपस्य वचनस्य विषये वाच्यत्वं द्योत्यत्वं च। उक्तं भर्तृहरिणा वाक्यपदीये- "**द्योतिका वाचिका वा स्युर्द्वित्वादीनां विभक्तयः**"।[19]

### 5. विभक्तिरूपवचनार्थः –

विभक्तयस्त्रिषु वचनेषु विभक्ताः - एकवचनम्, द्विवचनं बहुवचनं च। तत्रैकवचनार्थः (वाच्यो द्योत्यो वा) एकत्वसङ्ख्या। क्वचनैकत्वाभावेऽप्येकवचनम्। भाष्यकृता हि "**द्व्येकयोर्द्विवचनैकवचने**"[20] इति सूत्र एकग्रहणं प्रत्याख्यातम्, एकवचनमुत्सर्गतः स्वीकृतं च। तेनैकत्वाभावेऽप्येकवचनं भवति। तेनाद्रव्यार्थकेभ्योऽपि सङ्ख्याऽनभिधायकेभ्योऽव्ययादिभ्य एकवचनं भवति पदत्वं सिद्ध्यति च। अत एव च– "उच्चैस्तेऽध्ययनम्" - इत्यादावुच्चैरिति पदात् परस्य तवेतिस्थाने ते इत्यादेशः तेमयावेकवचने- इति सूत्रेण सिद्ध्यति। अनेन सूत्रेण हि पदादेव परयोः षष्ठ्येकवचनस्थयोर्युष्मदस्मदोस्तेमयावादेशौ विधीयेते। "तत एव पुनस्ते वां वो वा आगमनम्, उच्चैर्मे नौ नो वाऽध्ययनम्, प्रातस्त्वा मा वां नौ वो नो वा स

---

[18] परमलघुमञ्जूषा, पृष्ठसङ्ख्या - 169

[19] वाक्यपदीयम् 2/164

[20] अष्टाध्यायीसूत्रसङ्ख्या - 1/4/22

द्रक्ष्यति, पुनस्ते मे वां नौ वो नो वा हितम्" इत्यादयः प्रयोगाः सिद्धाः। औत्सर्गिकं वचनमिदं सर्वस्या विभक्तेः। अत्र प्रमाणम् "**अव्ययादाप्सुपः**"[21] इति सूत्रे सुप इति प्रत्याहारस्य, "**नाव्ययीभावादतोऽम्त्वपञ्चम्याः**"[22] इति सूत्रेऽपञ्चम्याः, "**तृतीयासप्तम्योर्बहुलम्**"[23] इति सूत्रे तृतीयासप्तम्योश्च ग्रहणम्। तेनोपकण्ठम्, उपकण्ठेन, उपकण्ठे - इत्यादयः प्रयोगाश्चोपपन्ना भवन्ति। एवमेकवचनस्य क्वचनैकत्वं सङ्ख्याऽर्थः, क्वचन च न। एकत्वं क्वचन विवक्षितं भवति, क्वचन च न। घटोऽस्तीत्यादावेकवचनेनैकत्वसङ्ख्यारूपोऽर्थो लोकप्रमाणेन बुध्यते। लोके हि घटौ न, नापि च घटाः, अपितु घट इत्यनुभवेन लोक एकवचनार्थो निश्चीयते। यदा तु नैकत्वस्य विवक्षा तदैकवचनस्य सत्त्वेऽपि नैकत्वमर्थः। यथा ब्राह्मणो न हन्तव्य इत्यत्र। इहैकत्वं न विवक्षितम्। तस्य विवक्षायां हि कश्चनैकमेव ब्राह्मणमहत्वाऽन्याँश्च तान् हत्वा महापापभाजनं स्यात्। किन्तु न तथा, एकस्यापि हि ब्राह्मणस्य हनने महापापम्। एवमेकवचनस्यैकत्वं क्वचनार्थः क्वचन च नेति फलितम्। उक्तं लिङ्गवचनविचारे- "**अथैवमेकत्वे एकवचनमित्यर्थभावे एकवचने एकत्व-निरूपितशक्तिग्राहकाभावात् अत्र घटो स्तीत्यादित एकघटबोधः कथमिति चेत् लोकत इति गृहाण। लोके हि अत्र घटो स्ति न तु घटौ इत्यादिव्यवहारात् एकवचने एकत्ववाचकत्वं गृह्यते। न हि व्याकरणत एव व्याकरणोपदिष्टानां शक्तिग्रह इत्यस्ति नियमः। तृजादेः संख्यायां दारलाजादेश्च बहुत्वेऽन्यत् एव शक्तिग्रहात्। तथा चायं निष्कर्षः लोकव्यवहारात् एकवचनस्य गृहीतैकत्वशक्तिकत्वेन यदैकत्वबोधने वक्तुस्तात्पर्यं तदा तद्बोधो भवति। यदा त्वसंभवात् संभवे वा। बोधने प्रयोजनविरहादेकत्वं न विवक्ष्यते तदैकवचनसत्त्वेऽपि नैकत्वबोधः। यथा भूतले घटोऽस्ति, ब्राह्मणो न हन्तव्यः**"॥[24]

"**बहुषु बहुवचनम्**"[25] इति सूत्रेण, "**द्व्येकयोर्द्विवचनैकवचने**"[26] इति सूत्रेण च नियमो विधीयते यद् बहुत्वे विवक्षित एव बहुवचनं द्विवचनं च।

---

[21] अत्रैव 2/4/82

[22] अत्रैव 2/4/83

[23] अत्रैव 2/4/84

[24] लिङ्गवचनविचारः, पृष्ठसङ्ख्या - 80

[25] अष्टाध्यायीसूत्रसङ्ख्या - 1/4/21

तेनैकद्विकर्तृके पाके पचन्तीति प्रयोगो न भवति, एवमेकबहुलकर्तृके पाके इमौ पचतः- इति प्रयोगो न भवति। वैयाकरणमते स्वार्थद्रव्यलिङ्गसङ्ख्या-कारकाणि प्रातिपदिकादेव, क्रियात्वक्रियाकालसङ्ख्याकारकाणि धातुत एव च लभ्यन्त इति विभक्त्या ते तेऽर्था द्योत्यन्त एवेत्येकवचनविधायकयोः सूत्रयोर्नियमार्थता। एवं बहुवचनस्य बहुत्वं वैयाकरणनये द्योत्योऽर्थः, न तु त्रित्वाद्यपि, त्रित्वादि हि त्रयो ब्राह्मणा इत्यादौ त्र्यादिपदेन लभ्यन्ते, एवमेव द्विवचनस्य द्वित्वं तदेवार्थः। इदं द्विप्रभृतिशब्दानामप्रयोगेऽपि लभ्यते। तदेवं वक्तुं शक्यते यदेकवचनस्य क्वचनैकत्वमर्थः, क्वचन तु न, द्विवचनस्य द्वित्वमर्थः, बहुवचनस्य तु बहुत्वम्, न तु त्रित्वादि। उक्तं लिङ्गवचनविचारे-

**"अपि च "बहुषु बहुवचनम्" "द्व्येकयोर्द्विवचनैकवचने" इति सूत्रद्वयं नियमार्थम्। बहुत्वादौ च विवक्षिते एव बहुवचनादि साध्विति। अत एवैकद्विकर्तृके पाके एते पचन्तीति न प्रयोगः। न वैकबहुलकर्तृके इमौ पचत इति।**

**नियमार्थता कथमिति चेत्? इत्थम्। वैयाकरणाः स्वार्थद्रव्यलिङ्ग-सङ्ख्याकारकाणां नामार्थत्वम्, क्रियात्वक्रियाकालसंख्याकारकानां धात्वर्थं मन्यते। तथा च स्वादीनां तिबादीनां बहुत्वादिकर्मत्वाद्यर्थपुरस्कारेण विधानाऽभावे पि स्वौजसित्यादिना तिपतसित्यादिना च शास्त्रेण सामान्यतो विधानेनैव 'अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्ती'ति न्यायाद्बहुत्वादौ कर्मत्वादौ च सिद्धया बहुषु बहुवचनमित्यादेः कर्मणि द्वितीयेत्यादेः लः कर्मणि चेत्यादेश्च नियमत्वम्। इत्थं नियमार्थता भाष्यकृतैव सिद्धान्तिता"**।।[27]

भाष्योक्तौत्सर्गिकैकवचनविषये नागेशस्य भट्टोजिदीक्षितस्य च मतं भिन्नम्। तत्र नागेशभट्टस्यायमभिप्राय- एकवचनमिति महासंज्ञा। तदनुरोधेनैकग्रहणस्य प्रत्याख्यानेऽप्येकत्वरूपार्थे विविक्षिते सत्येवैकवचनम्। अव्ययादेकत्वस्याबोध्यत्वेऽपि "अव्यायादाप्सुपः" इति ज्ञापकस्य सत्त्वादेवैक-वचनम्। पचतिरूपमित्यादावेकवचनप्रयोगस्य गमकं "**प्रशंसायां रूपब्**"[28]

---

[26] अत्रैव 1/4/22

[27] लिङ्गवचनविचारः, पृष्ठसङ्ख्या - 78

[28] अष्टाध्यायीसूत्रसङ्ख्या - 5/3/66

इतिसूत्रस्थं भाष्यमेव। भूतले घटो नास्ति, पटोऽस्ति इत्यादौ घटत्वपटत्वादिजातिगतमेकत्वम् आदायैकवचनस्य सिद्धिः। एवं गमकाभावे सर्वत्रैकत्वे विवक्षिते सत्येवैकवचनमिति शेखरे नागेशस्य मतम्।[29]

अप्पयदीक्षितादयस्त्वैकत्वस्याविवक्षायामपि सर्वत्रैवैकवचनमङ्गीकुर्वन्ति। तत्र प्रमाणं भाष्यकृतैकग्रहणस्य प्रत्याख्यानं महासंज्ञाकृतोत्कर्षस्यात्रानाश्रयणं च। तेन घटोऽस्तीत्यादावनेकघटबोधतात्पर्येणोच्चारिते घट इत्यादावेकवचनमेकत्वस्याविवक्षायामपि भवति। घटत्वजातिगतमेकत्वमाश्रित्यैकवचनमिति कथनं तु न समीचीनम्। प्रत्यया हि प्रकृत्यर्थान्वितमेव स्वार्थं बोधयन्ति। प्रकृत्यर्थान्वितस्वार्थबोधकत्वं प्रत्ययानामिति हि व्युत्पत्तिः।[30] प्रकृत्यर्थेतिशब्देन तत्र प्रधानीभूत एव प्रकृत्यर्थो गृह्यते, न तु प्रकृत्यर्थतावच्छेदकं घटत्वाद्यपि। तैनैकवचनप्रत्ययः स्वार्थमेकत्वं प्रधाने प्रकृत्यर्थे घटादावेव व्यक्तौ प्रतिपादयितुमलम्, न तु घटत्वादौ। अतो प्रकृत्यर्थतावच्छेदकं घटत्वादिजादिगतमेकत्वमादायैकवचनस्य सिद्धिरिति नागेशमतं न रुचिरम्। एकत्वस्य विवक्षायामविवक्षायां वा सर्वत्रौत्सर्गिकमेकवचनम्।[31] एवमेकवचनार्थत्वेनैकत्वं क्वचन विवक्षितम्, क्वचनाविवक्षितं च। द्वित्वं बहुत्वं च क्रमेण द्विवचनस्य बहुवचनस्य चार्थः।

किन्तु विशेषणभूतप्रातिपदिकाद् विहितानामेकवचनादीनां न प्रायेण कश्चनैकत्वादिरूपोऽर्थः, अपितु ततो विहितान्येकवचनादीनि साधुत्वार्थानि। एकत्वाद्यर्थो हि विशेष्यवाचकप्रातिपदिकोत्तरविभक्त्या लभ्यते।[32] विशेषणवाचकेभ्यस्तासामेव विभक्तीनां वचनानां च प्रयोगः साधुता च, या यानि च विशेष्यवाचकेभ्यो भवन्ति। अतः - "नीलो घटौ, नीलौ घटाः" -

---

[29] "औत्सर्गिकमेकवचनं सत्येव गमके भवेत्।

यथाव्ययत् तद्दत्पतौ लुग्विधिर्गमकः स्थितः।

इति नागेशभट्टेन सिद्धान्तः शेखरे कृतः"॥ - लिङ्गवचनविचारः, पृष्ठसङ्ख्या - 84

[30] लिङ्गवचनविचारः, पृष्ठसङ्ख्या - 85

[31] "औत्सर्गिकमेकवचनं सर्वत्र स्वेच्छया भवेत्।

एकेत्यापाकृतं यस्मादित्याहुर्दीक्षितादयः"॥ - अत्रैव, पृष्ठसङ्ख्या - 84

[32] "विशेष्यवाचिपदतः परवर्त्तिविभक्तिभिः। प्रत्यायमाना संख्या हि विशेषणविभक्तिभिः। न बोध्यते परं तासां प्रयोगः साधुताफलः"॥ - अत्रैव, पृष्ठसङ्ख्या - 88

इत्यादीनां न साधुत्वम्।[33] किन्तु क्वचन विशेषणवाचकात् प्रयुक्तेन सङ्ख्या विवक्ष्यते। तत्र विशेषणवाचकपदोत्तरा विभक्तिर्न साधुत्वमात्रार्था, अपितु सङ्ख्यार्थाऽपि। यदा विशेष्यपदोत्तरविभक्तिबोध्यसङ्ख्याविरुद्धा सङ्ख्या विशेषणपदोत्तरविभक्त्या विवक्ष्यते तदैषा स्थितिः। अत्र विशेष्यविशेषणवाचकपदयोर्न समानवचनकत्वस्य नियमः। यथा- "वेदाः प्रमाणम्, कलशाः, शतम्, शक्तिव्युत्पत्त्यभ्यासाः काव्यस्य हेतुः" - इत्यादौ। अत्र वेद-कलश-शक्तिव्युत्पत्त्यभ्यासरूपेभ्यो विशेष्यपदेभ्यो विहितया बहुवचनविभक्त्या बहुत्वसङ्ख्या विवक्षिता, किन्तु प्रमाण-शत-हेतुपदोत्तरैकवचनविभक्त्या तद्विरुद्धैकत्वसङ्ख्याविवक्षिता। इह विशेषण-विभक्तिवचनमेकत्वस्य बोधकत्वेन सार्थकम्, न तु साधुत्वमात्रार्थम्। एवं यत्र विशेषणविभक्त्या विशेष्यविभक्तिबोध्यसङ्ख्याविरुद्धा सङ्ख्या विवक्षिता भवति तत्र न विशेष्यविशेषणयोः समानवचनकत्वं न भवति।[34] इत्थं विशेषणाद्विहितं वचनं क्वचनैकत्वाद्यर्थम्।

### 6. शब्दविशेषे वचनानुपपत्तिपरिहारः –

केचन शब्दास्तथा लभ्यन्ते यत्र विवक्षितबहुत्वसङ्ख्याया अभावेऽपि बहुवचनं दृश्यते, विशेष्यविशेषणयोः समानवचनकत्वस्य व्यभिचारो भवति। तत्र कथं बहुवचनप्रयोगस्य साधुतेति प्रश्न उदेति। यथा- **दाराः, अप्सरसः, आपः, नारा** इत्यादौ। एते शब्दा कोशे बहुवचनान्ता एव पठिताः, नैषामेकवचने प्रयोगः। किन्त्वेषां प्रयोगस्तत्रापि दृश्यते यत्र न बहुत्वम्। यथा दारशब्दस्य प्रयोगः –

**“शृणुत जनककल्पाः क्षत्रियाः शुल्कमेते**

**दशवदनभुजानां कुण्ठिता यत्र शक्तिः।**

---

[33] “तासां विशेष्यवचनतुल्यानामेव साधुता।

अतश्च न घटा नील इत्यादेः साधुता मता”॥ - लिङ्गवचनविचारः, पृष्ठसङ्ख्या - 90

[34] “प्रमाणत्वशतत्वादिगतैकत्वस्य बोधकाः।

वेदाः प्रमाणं कलसाः शतमित्यादयो मताः”॥ - अत्रैव, पृष्ठसङ्ख्या - 90

**नमयति धनुरैशं यस्तदारोपणेन**

**त्रिभुवनजयलक्ष्मीमैथिली तस्य दाराः"॥** [35]

अत्र जनक उद्घोषयति यद्यः शूरो माहेश्वरमिदं धनुरवनमयेद् मैथिली तस्य दाराः स्यादिति। इह मैथिल्यामेकत्वम्, अतस्तद्विशेषणदारशब्दाद् अप्येकवचनमेवोचितम्। एवमेकस्यामपि देवाङ्गनायामप्सरस इति प्रयोगेऽपि विसङ्गतिः। अस्या विसङ्गतेः समाधानं विधीयते यदेकस्यामप्ययवयगतं बहुत्वमारोप्य बहुवचनस्य सङ्गतिः कार्या। यद्यपि मैथिली व्यक्तिरेका तथापि तत्कराद्यवयवगतबहुत्वं दारपदबोध्यायां तस्यामारोप्य दारा इत्यत्र बहुवचनस्य साधुता सम्पादनीया। एतादृश आरोपस्तत्रैव स्वीकार्यो यत्र कोशः प्रमाणम्। तेन नातिप्रसङ्गः। दारादिपदानां बहुवचनान्तत्वे "**भार्या जायाऽथ पुम्भूम्नि दाराः"**[36] इत्यादिकोषः प्रमाणम्। एवं दारा इति बहुबचनस्य प्रयोगेण बहुत्वं प्रतीयत इति वैयाकरणनयः, कोषप्रामाण्येन दारा इत्यादीनां बहुत्वाभावेऽपि बहुवचनान्तानां साधुत्वमनुमीयते, न तु बहुत्वं प्रतीयत इति नैयायिकनयः।[37]

**पञ्चगोधनः-** अस्य पञ्च गावो धनं यस्येति लौकिको विग्रहो वैयाकरणसिद्धान्तकौमुद्यां प्रदर्शितः। तत्र गाव इति विशेष्यवाचकाद् बहुवचनम्, धनमिति विशेषणवाचकादेकवचनं कथमिति भवति प्रश्नः। अस्योत्तरं यद् द्वित्वबहुत्वार्थैकविभक्त्यन्तविशेष्यवाचकात् पदाज्जातेर-बोधकाद् भिन्नलिङ्गाद् विशेषणवाचकात् पदाद् औत्सर्गिकमेकवचनं भाष्यकारादिसम्मतं वर्तते। तेन धनमिति कथितविग्रहस्थे नपुंसकपद औत्सर्गिकमेकवचनम्। यदा तु नौत्सर्गिकमेकवचम्, किन्तु बहुत्वस्य विवक्षा तदा धनानीत्यपि प्रयोगः। तेन पञ्च गावो धनानि यस्येत्यपि प्रयोगः साधुः, धनमित्यपि च। अत एव महाभाष्ये "**रक्षोहागमलघ्वसन्देहाः प्रयोजनम्"**[38]

---

[35] हनुमन्नाटकम्, 1/18

[36] अमरकोषः, 2/6/6

[37] "दाराः पुंसि च भूम्न्येवेत्यादिकोषानुसारतः। आश्रित्यारोपितां दारप्रभृतौ बहुतां बहोः।

वचनं साधु भवति दारप्रभृतिशब्दतः॥ आहुर्नैयायिका दारा भूम्नीत्याद्यनुशासनात्।

रामस्य दारा इत्यादेः साधुत्वं न बहुत्वधीः"॥ - लिङ्गवचनविचारः -57 -58 कारिका, पृष्ठसङ्ख्या – 86-88

[38] व्याकरणमहाभाष्यम् (नवाह्निकान्वितम्), पस्पशाह्निकम्, पृष्ठसङ्ख्या - 13

इत्यत्र प्रयोजनपदाद् औत्सर्गिकमेकवचम्, **“इमानि च भूयः शब्दानुशासनस्य प्रयोजनानि”**[39] इत्यत्र बहुत्वे बहुवचनं च, **“नेमौ रहौ कार्यिणौ, किन्तर्हि निमित्तमिमौ द्विर्वचनस्य”**[40] इत्यत्र निमित्तमित्यत्र चौत्सर्गिकमेकवचनम्। **“भिन्नाः क्रियाः संकलनबुद्ध्याऽनुसंह्रियमाणाश्चिरक्षिप्रादिव्यपदेशस्य निमित्तं भवन्ति”** इति हेलाराजवाक्ये निमित्तपदादौत्सर्गिकमेवैकवचनम्।[41] एवम् -

**“उपकर्त्राऽरिणा सन्धिर्न मित्रेणापकारिणा।**

**उपकारापकारौ हि लक्ष्यं लक्षणमेतयोः।।**

**प्रज्ञोत्साहवतः स्वामी यतेताधातुमात्मनि।**

**तौ हि मूलमुदेष्यन्त्या जिगीषोरात्मसम्पदः”॥** [42]

अस्मिन् हि माघस्य पद्ययोर्लक्षणं मूलमित्यत्र, अथ -

**“दिगन्ते श्रूयन्ते मदमलिनगण्डाः करटिनः**

**करिण्यः कारुण्यास्पदमसमशीलाः खलु मृगाः।**

**इदानीं लोकेऽस्मिन्ननुपमशिखानां पुनरयं**

**नखानां पाण्डित्यं प्रकटयतु कस्मिन् मृगपतिः”॥** [43]

इत्यस्मिन् भामिनीविलासे पण्डितराजजगन्नाथपद्ये चास्पदमित्यत्रौत्सर्गिकमेवैकवचनम्। एवं वेदाः प्रमाणमित्यादयोऽपि प्रयोगाः संगच्छन्ते। अतः “पञ्च गावो धनं यस्य”, इत्यत्र धनपदादेकवचनं साधु। एतादृशमौत्सर्गिकमेकवचनं तत्रैव यत्र विशेषणं विशेष्याद् भिन्नलिङ्गम्, न तु समानलिङ्गम्। तेन पञ्च गावः पशवो यस्य स पञ्चगोपशुरित्यत्र पशव इति बहुवचनस्यैव प्रयोग न तु पशुरित्येकवचनस्यापि। एतादृशानि प्रामाणिक-

---

[39] अत्रैव, पृष्ठसङ्ख्या - 17

[40] अत्रैव, प्रत्याहाराह्निकम्, पृष्ठसङ्ख्या - 108

[41] वाक्यपदीयम् (तृतीयकाण्डम्), कालसमुद्देशः, कारिका – 57, पृष्ठसङ्ख्या - 579

[42] शिशुपालवधम् - द्वितीय सर्गः

[43] भामिनीविलासः - 1/2, पण्डितराजजगन्नाथग्रन्थावली

प्रयोगस्थलानि विशेष्यविशेषणयोः समानवचनकत्व-नियमस्यापवाद-स्वरूपीण्येव।[44]

**चैत्रो मैत्रश्च गच्छतः[45] -** विशेष्यविशेषणयोरसति गमके समानवचनकत्वमिति नियमः तिङन्तविषयोऽपि। अत एव-

**"या विशेष्येषु दृश्यन्ते लिङ्गसङ्ख्याविभक्तयः।**

**प्रायस्ता एव प्रयोक्तव्याः समानार्थे विशेषणे"॥[46]**

इत्यत्र विभक्तिपदं सामान्येन तिङोऽपि ग्रहणाय प्रयुक्तम्। तेन बालको गच्छति, बालकौ गच्छतः, बालका गच्छन्ति, तण्डुलः पच्यते, सूपतण्डुलौ पच्येते, सूपतण्डुलव्यञ्जनानि पच्यन्ते, इत्यादौ बालक-तण्डुलादीनां विशेषणानां गच्छति-पच्यते-प्रभृतीनां विशेष्याणां च समानवचनकत्वम्। वैयाकरणमते तिङन्तार्थक्रियामुख्यविशेष्यकः शाब्दबोध इति कारकपदानां सुबन्तानां तिङन्तार्थक्रियां प्रति विशेषणत्वम्। वैयाकरणमते गच्छतीति पदेन पञ्चार्था उपस्थाप्यन्ते- उत्तरदेशसंयोगः, तदनुकूलः पादप्रक्षेपादिरूपो व्यापारः, कर्ता, एकत्वम्, वर्तमानकालश्च। तत्रोत्तरदेशः स्वजनकत्वेन, कर्ता स्वजन्यत्वेन वर्तमानकालः, स्वावच्छेद्यत्वेन च व्यापारे विशेषणं भवति, एकत्वसङ्ख्या तु समवायेन, बालक इति प्रथमान्तार्थश्चाभेदेन तिङर्थे कर्तरि विशेषणं भवति। ततो बालको गच्छतीति वाक्याद् बालकाभिन्नैकत्वसमवायिकर्तृजन्य उत्तरदेशसंयोगजनको वर्तमानकालाच्छिन्नः पादप्रक्षेपादिव्यापार इति बोधो भवति। एवं पच्यते इत्यनेन विक्लित्तिः, तज्जनकोऽधिश्रयणादिरूपो व्यापारः, वर्तमानकालः, एकत्वसङ्ख्या, कर्म कारकं च। प्रथमान्तार्थः सूपोऽत्र कर्मण्यभेदेन विशेषणं भवति। तेन तण्डुलः पच्यते - इति वाक्यात् तण्डुलाभिन्नैकत्वावच्छिन्नकर्मनिष्ठविक्लित्तिजनको वर्तमानकालिकोऽधिश्रयणादिरूपो व्यापार इति बोधो भवति। नव्यवैयाकरणनागेशमते तु कर्माख्याते फलविशेष्यकः शाब्दबोधः। तन्मते

---

[44] "विशेष्यवाचके द्वित्वबहुत्वार्थविभक्तिके। विशेष्यवाचितो भिन्नलिङ्गाज्जातेरवाचकम्॥

विशेषणपराच्छब्दात् परत्र समवस्थितम्। औत्सर्गिकैकवचनमपि साधु मतं विदाम्"॥

- लिङ्गवचनविचारः, पृष्ठसङ्ख्या - 98

[45] व्युत्पत्तिवादः, पृष्ठसङ्ख्या - 193

[46] अत्रैव, पृष्ठसङ्ख्या - 07

तद्वाक्याद् वर्तमानकालिकाधिश्रयणादिव्यापारजन्या तण्डुलाभिन्नैकत्वावच्छिन्नकर्मनिष्ठा विक्लित्तिरिति बोधः। एवं वैयाकरणमते सुबन्तानां विशेषणत्वम्, तिङन्तस्य विशेष्यत्वं च। किन्तु न्यायमते वैपरीत्यम्। तन्मते प्रथमान्तार्थमुख्यविशेष्यकः शाब्दबोधः। अत्र तिङन्तार्थ एव विशेषणं प्रथमान्तमेव विशेषणं च। बालको गच्छतीति वाक्याद् उत्तरदेशसंयोगानुकूलव्यापारानुकूलकृतिमान् बालक इति बोधः। एवं विशेष्यविशेषणविषये वैपरीत्येऽपि विशेष्यविशेषणयोः समानवचनकत्वे न विवादः। वैयाकरणमते तिङन्तरूपं विशेष्यं यद्वचनकं तद्वचनकं समानाधिकरणं सुबन्तं विशेषणमिति नियमः फलति। न्यायमते तु यद्वचनकं मुख्यविशेष्यवाचकं सुबन्तं तद्वचनकं तिङन्तमिति नियमः। एवमुभयमतेऽपि "**चैत्रो मैत्रश्च गच्छतः**" इत्यत्र तन्नियमस्य व्यभिचारः। वैयाकरणमते चैत्र इति मैत्र इति च विशेषणमेकवचनान्तम्, गच्छत इति विशेष्यं तु द्विवचनान्तम्। तत् कथमिति भवति प्रश्नः। तस्योत्तरमिदम्-

उक्तसमानवचनकत्वनियमे संकोचः कर्तव्यः। अत एव "या विशेष्येषु दृश्यन्ते" इत्यत्र प्राय इति पदं प्रयुक्तम्। तेन यत्रैकमेव विशेष्यवाचकं पदं तत्रैव विशेष्यविशेषणयोः समानवचनकत्वस्य नियमः स्वीकार्यः। अत्र वाक्ये तु नैकमेव विशेष्यसमर्पकं पदम्, अपितु द्वे- चैत्र इति, मैत्र इति च। अतो न काचिदनुपपत्तिः। समानवचनकत्वनियम उत्सर्ग इति भावः। तस्य ह्यनेकेऽपवादाः। अत एव चैत्रो मैत्रश्च गतौ- इत्यत्र गतेतिविशेषणसमर्पकाद् द्विवचनम्, चैत्र इत्यस्य मैत्र इत्यस्य च विशेष्यस्य समर्पकादेकवचनम्। इत्येवं विविधा विचारा लिङ्गवचनविचारे विशेषतोऽवाप्यन्ते विचारिताः।[47]

"नारीणां वक्षोजौ स्तनौ" - नारीणां बहुत्वेन तद्वक्षोजानां स्तनानां वा बहुत्वेन स्तनाविति द्विवचनं विरुद्धम् इत्येवंविधा नैके महाकविप्रयोगाः। यथा लिङ्गवचनविचारकारः स्वकृतौ रसिकरञ्जिन्यामेवं प्रायुङ्क्त -

**"मृदौ काव्ये कश्चिद् भजति यदि भागः कठिनतां**

**न वैरस्याय स्यादपि तु परितोषाय विदुषाम्।**

---

[47] द्रष्टव्यो लिङ्गवचनविचारः, पृष्ठसङ्ख्या - 101-102

**शरीरे नारीणां परमसुकुमारत्वभरिते**

**कठोरौ वक्षोजौ तरुणजनचेतांसि हरतः"॥**[48]

एवं शिशुपालवधे माघस्य प्रयोगोऽप्ययम् -

**"प्राणच्छिदां दैत्यपतेर्नखानामुपेयुषां भूषणतां क्षतेन।**

**प्रकाशकार्कश्यगुणौ दधानाः स्तनौ तरुण्यः परिवव्रुरेनम्"॥**[49]

अत्र तरुण्य इत्यत्र बहुत्वेन बहुवचनम्, स्तनावित्यत्र तरुणीगतैकत्वमादायैव द्विवचनं च कथमिति प्रश्नः। अस्योत्तरमिदम् - वक्षोजस्तनादयः शब्दा द्विधा भवन्ति। तत्र केचन स्तनादि बोधयन्ति, केचन च वामत्व-दक्षिणत्वरूपजातिद्वयविशिष्टं स्तनादि बोधयन्ति। एते वामत्वदक्षिणत्वजातिद्वयविशिष्टस्तानादिबोधका वक्षोजस्तनादयः शब्दा नित्यद्विवचनान्ता भवन्ति। उक्तपद्ययोस्तादृशस्यैव वक्षोजशब्दस्य स्तनशब्दस्य च प्रयोगान्न द्विवचनस्यानुपपत्तिः। इह द्विवचनबोध्यस्य द्वित्वस्य वक्षोजस्तनरूपप्रकृत्यर्थस्यैकदेशयोर्वामत्वदक्षिणत्वजात्योरेवान्वयः। यदि वामत्वादेर्जातित्वं नाङ्गीक्रियते, अपितु वामादिभागस्थितत्वमेव वामत्वादि मन्यते, तदैतादृशानां वक्षोजादिशब्दानां शक्तिर्वामत्वदक्षिणत्वोपलक्षित-जातिविशेषद्वयेन विशिष्टं स्वीकार्या। एददेव समाधानं बहुसम्बन्धिद्विवचनान्तलोचनश्रवःश्रवणादावपि मन्तव्यम्। यदा तु वक्षोजादीनां स्तनत्वादिविशिष्टमात्रपरत्वं तदा बहुवचनान्तताऽपि।[50]

**विंशत्यादिशब्दगतवचनव्यवस्थोपपत्तिः-**

विंशत्याद्याः परार्धान्ताः संख्याः सन्ति। विंशत्यादीनां शब्दानां त्रिधा गतिः। कदाचिदेते विशंतित्वादिसङ्ख्याविशिष्टं संख्येयं बोधयन्ति। इमे नित्यमेकवचनान्ता एव प्रयुज्यन्ते - विंशतिर्घटः, विंशतिं घटान्, विंशत्या घटैः,

---

[48] लिङ्गवचनविचारः (अत्रोद्धृतम्), पृष्ठसङ्ख्या - 110

[49] शिशुपालवधम्, 3/14

[50] "वक्षोजनयनादीनि नित्यद्विवचनाभ्यपि।

अतः प्रायो बहुत्वेऽपि तेषां द्विवचनान्तता"॥ - लिङ्गवचनविचारः, पृष्ठसङ्ख्या - 131

विंशत्यै घटेभ्यः, विंशत्या घटेभ्यः, विंशतेर्घटानाम्, विंशतौ घटेषु - इत्यादि।[51] अत्रैकवचनस्यैकत्वं नार्थः। विंशत्यादयः कदाचन विंशतित्वादिसङ्ख्यामात्रे प्रयुज्यन्ते। तदानीमेते यथायोगम् एकद्विबहुवचनान्ता भवन्ति।[52] यथा - घटानां विंशतिः, विंशती, विंशतयो वा। अत्र क्रमेणैकं विंशतित्वं द्वे विंशतित्वं, बहूनि विंशतित्वानि च विवक्षितानि। कदाचनैते शब्दा विंशतित्वादि-सङ्ख्याविशिष्टसंख्येयानां समूहस्य बोधकाः। तदैते यथायोगं सर्ववचनान्तानि भवन्ति, एभिर्योगे षष्ठी भवति च। यथा- घटानां विंशतिः, विंशती, विंशतयः, शतम्, शते, शतानि वा[53] सङ्ख्यारूपवचनवाचकशब्दविषये सङ्कलनेन पञ्च मतानि प्रतिपादितानि -

1. **एकादिपरार्धान्ताः सङ्ख्यावच्छिन्नवाचका इति गदाधरस्य मतं प्रयोगेषु न कश्चिद् भेदः।**
2. **ते सर्वे संख्यामात्रवाचका इति नागेशस्य।**
3. **एकादयोऽष्टादशान्ताः संख्यावच्छिन्नवाचकाः। एकोनविंशत्यादयस्तु संख्यावाचकाः संख्यावच्छिन्नवाचकाश्च इत्यमरसिंहस्वरसः।**
4. **एकाद्यष्टादशान्ताः संख्यावच्छिन्नवाचकाः। एकोनविंशत्यादयस्तु संख्यावच्छिन्नवाचकाः संख्यावच्छिन्नसंघातवाचकाश्चेति भट्टादीनां कैयटस्य च मतम्।**

---

[51] "विंशत्याद्याः परार्धान्ताः परार्धान्तास्त्रिविधा अर्थभेदतः॥

ये विंशतित्वादिसङ्ख्यायुक्तसंख्येयवाचकाः ।

नित्यैकवचनान्तास्ते भवन्तीति विनिर्णयः"॥ - लिङ्गवचनविचारः, कारिके - 71, 72

[52] "द्वितीयभेदास्ते सङ्ख्यामात्रं प्रत्याययन्ति ते।

इमे तु सर्ववचनाः एकशेषप्रवर्तनात्"॥ - लिङ्गवचनविचारः , कारिकासङ्ख्या - 74

[53] "तृतीयभेदाः संख्येयसमूहप्रतिपादकाः।

एभिर्योगे च षष्ठ्येव परिच्छेद्यार्थवाचकात्॥

तथात्वे चैकशेषेण समुदायादिशब्दवत्।

इमेऽपि सर्ववचनाः प्रयुज्यन्ते यदृच्छया।

विशेष्यबोधका एव संख्येयार्थस्य ते ध्रुवम्"॥ - लिङ्गवचनविचारः, कारिके - 75,76

5. **अस्माभिस्तु सर्वेषां मतानि विभाव्य एकाद्यष्टादशान्तानां संख्यावच्छिन्ने विंशत्यादीनान्तु संख्यावच्छिन्ने संख्यावच्छिन्नसमुदाये च शक्तिरुक्ता। एषां मतभेदेन शाब्दबोधे भेदेऽपि प्रयोगेषु न कश्चिद् भेदः।**[54]

**आदरादौ बहुवचनोपपत्तिः –**

एकस्मिन्नपि श्रीगुरुचरणा वदन्ति, वयं कुर्मः - इत्यादौ बहुवचनस्य प्रयोगः कथं संगच्छत इति भवति प्रश्नः। अस्योत्तरमिदम् - यथाऽवयवगतबहुत्वमारोप्य मैथिली दाराः- इत्यादौ दारादिशब्दाद् बहुवचनमुपपद्यते तथेहाप्युप-पादनीयम्। किञ्चादरे नैके बहुवचनान्ता महाकविप्रयोगा एतादृशां प्रयोगाणां साधुत्वे मूलम्।[55] किन्तु रामायणमहाभारतादावीदृशाः प्रयोगा न दृशन्ते। वयं कुर्म- इत्यादौ साधुत्वं तु **"अस्मदो द्वयोश्च"**[56] इति सूत्रेण। एतादृशस्थलेऽवयवगतं बहुत्वं समूह आरोप्यन्त इत्यारोपितबहुत्वस्य बहुवचनेन बोधः। एवं प्रौढमनोरमायाम्– **"ध्यायं ध्यायं परं ब्रह्म स्मारं स्मारं गुरोर्गिरः। सिद्धान्तकौमुदी व्याख्यां कुर्मः प्रौढमनोरमाम्"॥**[57] इत्यादौ कुर्म इत्यादिबहुवचनान्तप्रयोगसंगतिः।[58]

7. **विशेष्यविशेषणभावनियमः -**

वचनव्यवस्थायां विशेष्यपदस्य विशेषणपदस्य च नैकधा प्रयोगः कृतः। तत्र प्रकृतोपयोगितया विशेष्यपदस्य विशेषणपदस्य च परिचयः प्रस्तूयते। वैयाकरणमते तिङन्ताबोध्यक्रियावाचकस्य गुणवाचकस्य च पदस्य समभिव्याहारे जातेः संज्ञायाश्च बोधकं पदं विशेष्यम्। यथा - पटो जीर्ण इत्यत्र पटत्वजातिप्रवृत्तिनिमित्तकस्य पटपदस्य जीर्णेतिक्रियानिमित्तकस्य पदस्य,

---

[54] लिङ्गवचनविचारः, पृष्ठसङ्ख्या - 123

[55] "तदेवं बहुवचनानां साधुत्वे महाकविसम्प्रदाय एव शरणम्"। - लिङ्गवचनविचारः, पृष्ठसङ्ख्या - 129

[56] अष्टाध्यायीसूत्रसङ्ख्या - 1/2/59

[57] प्रौढमनोरमा, मङ्गलपद्यम्

[58] "आदरे क्वचिदेकस्मिन् द्वयोरपि च कुत्रचित्।

बहूनां वचनं काव्ये नाटकेऽपि दारादितः परे"॥ - लिङ्गवचनविचारः, पृष्ठसङ्ख्या - 129

नीलो घट इत्यत्र घटत्वजातिप्रवृत्तिनिमित्तकस्य घटपदस्य नीलेतिगुण-प्रवृत्तिनिमित्तकस्य पदस्य समभिव्याहारे विशेष्यपदत्वम्। एवं "सीता हृता, रामो महान्" इत्यादौ सीतारामादिसञ्ज्ञापदानां विशेष्यत्वम्। गुणक्रियापदयोस्तु विशेषणत्वम्। किन्तु तिङन्तक्रियासमभिव्याहारे घटोऽस्ति, रामो गच्छति- इत्यादौ वैयाकरणमते जातिसंज्ञापदानां विशेषणत्वमेव, न्यायनये तु विशेषणत्वमेव। एवं व्याप्यजातिवाचकं विशेषणम्, व्यापकजातिवाचकं तु विशेष्यं भवति। यथा आम्रो वृक्ष इत्यत्राम्रपदस्य विशेषणत्वम्, तेन वृक्षत्वव्याप्याया आम्रत्वजातेर्बोधात्, वृक्ष इति विशेष्यम्, तेनाम्रत्वव्यापिकाया जातेरवगमात्। अत एवाम्रवृक्ष इत्यत्र **"विशेषणं विशेष्येण बहुलम्"**[59] इति सूत्रेण समासे विशेषणस्याम्रस्योपसर्जनत्वेन पूर्वनिपातः। गुणप्रवृत्तिनिमित्तकयोः, क्रियाप्रवृत्तिनिमित्तकयोः, व्याप्यव्यापकभावानापन्नजातिप्रवृत्तिनिमित्तकयोश्च द्वयोर्विशेष्यविशेषणभावे कामचारः। यथा- **"कुब्जखञ्जः-खञ्जकुब्जः, पाचकपाठकः- पाठकपाचकः, भूतमूर्तः-मूर्तभूतः"**। अत्र विशेष्यविशेषणभावस्य कामचारेण पर्यायेण समासे पूर्वनिपातः। भूतत्वं मूर्तत्वं च वैयाकरणमते जातिः, न च तयोर्व्याप्यव्यापकभावः। न्यायनये तु सांकर्येण भूतत्वमूर्तयोर्न जातित्वम्। तन्मते घटपटः-पटघट इत्याद्युदाहार्यम्। स्पष्टमिदं लिङ्गवचनविचारे।[60] एवं त्यदादीनि सर्वनामानि विशेषणानि भवन्ति।[61] एवमेषां विषये नैके विचाराः सन्ति।

एवं व्याकरणदृशा वचनविषयेऽभिहितम्। वचनं संख्यैकवचनादि-विभक्तिश्च। एकवचनादीनां क्वचनैकत्वादिरूपोऽर्थः संभवति, क्विचिच्च नेत्यपि व्याकरणादिदृशा विचारितम्। सम्प्रति साहित्यशास्त्रदिशा वचनस्योपयोगो विचार्यते।

---

[59] अष्टाध्यायीसूत्रसङ्ख्या - 2/1/57

[60] "विशेष्ये जातिसञ्ज्ञे द्वे क्रियायाश्च गुणस्य च।

विशेष्या व्यापिका जातिर्व्याप्यजातिविशेषणम्"॥

"विशेषणविशेष्यत्वे ऐच्छिके क्रिययोर्द्वयोः।

गुणयोश्च तथा स्यातां क्रियायाश्च गुणस्य च"॥ - लिङ्गवचनविचारः, पृष्ठसङ्ख्या - 107-108

[61] "त्यदादयो विशेष्यार्थपरा ये वाक्यवर्त्तिनः।

विशेषणस्य लिङ्गैः च वचनं च भजन्ति ते"। - लिङ्गवचनविचारः, पृष्ठसङ्ख्या - 110

## 8. वचनस्य रसाद्यभिव्यञ्जकत्वम् -

साहित्यशास्त्रेऽपि वचनशब्देन सङ्ख्यैकवचनादि च रसादि-व्यञ्जकतादिविचारस्थले विवक्षितम्। यथाहाऽनन्दवर्धनो वचनस्य च रसाभिव्यञ्जकत्वस्वरूपविषय एवम्– **"सुप्तिङ्वचनसम्बन्धैस्तथा कारक-शक्तिभिः। कृत्तद्धितसमासैश्च द्योत्योऽलक्ष्यक्रमः क्वचित्"॥**[62] एतेन वचन-पदार्थमनुसृत्यालक्ष्यक्रमरूपो ध्वन्यर्थो रसाभिव्यञ्जको वा विचारणीयताङ्गतो दृश्यते। वचनस्य रसादीनां व्यञ्जकतायां वक्रोक्तावौचित्येऽलङ्कारे दोषादि-विचारे चोपयोगः।

तत्रादौ रसादिव्यञ्जकतायां वचनोपयोगो यथारसादिकं विचार्यते।

तावल्लोके यानि रत्यादेरुद्बोधस्य कारणानि, कार्याणि, सहकारीणि च सन्ति तान्येव काव्ये नाट्ये च विभावा अनुभावा व्यभिचारिणश्चोच्यन्ते। तैर्विभावादिभिरभिव्यक्तः सहृदयादीनां रत्यादिस्थायी भावो रस उच्यते।[63] स नव- शृङ्गारः, हास्यः, करुणः, रौद्रः, वीरः, भयानकः, बीभत्सः, अद्भुतः, शान्तश्च।[64] देवादिविषया रतिः प्राधान्येनाभिव्यक्तो निर्वेदादिरूपो व्यभिचारी च भाव उच्यते।[65] अनौचित्यप्रवर्तितो रसो भावश्च क्रमेण रसाभासो भावाभासश्चोच्यते। क्वचन कस्यचन भावस्य शान्तिरुदयश्च व्यज्येते, तत्र भावशान्तिर्भावोदयश्च भवतः। क्वचन भावयोः सन्धिर्भावानां शबलता च प्राधान्येन व्यज्येते। तत्र भावसन्धिर्भावशबलता च भवतः।[66] एवं नवविधस्य रसस्य, भावस्य, रसाभासस्य, भावशान्तेः, भावोदयस्य,

---

[62] ध्वन्यालोकः, तृतीय उद्योतः, कारिकासङ्ख्या - 16

[63] "कारणान्यथ कार्याणि सहकारीणि यानि च।

रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः"॥

"विभावा अनुभावास्तत् कथ्यन्ते व्यभिचारिणः।

व्यक्तः स तैर्विभावाद्यैः स्थायी भावो रसः स्मृतः"॥

काव्यप्रकाशः, चतुर्थ उल्लासः, पृष्ठसङ्ख्या - 119

[64] अत्रैव, द्रष्टव्ये पृष्ठसङ्ख्ये – 141, 157

[65] "रतिर्देवादिविषया व्यभिचारी तथाऽञ्जितः भावः प्रोक्तः"। - अत्रैव, पृष्ठसङ्ख्या - 158

[66] "भावस्य शान्तिरुदयः सन्धिः शबलता तथा"। - अत्रैव, पृष्ठसङ्ख्या - 164

भावसन्धेर्भावशबलतायाश्च व्यञ्जकं वचनमपि भवति। वचनस्यैतद्व्यञ्जकत्वं यथासम्भवं क्रमेणैवं प्रदर्श्यते -

**वचनस्य नवरसव्यञ्जकता-**

शृङ्गाररसे वचनाभिव्यञ्जकता -

**"तेषां गुणग्रहणानां तासामुत्कण्ठानां तस्य प्रेम्णः।**
**तासां भणितीनां सुन्दरेदृशं जातमवसानम्"॥**[67]

अत्र गुणग्रहणादीनां बहुत्वं प्रेम्णश्चैकत्वं क्रमेण बहुवचनेनैकवचनेन च व्यज्यते। तेन गुणग्रहणादाववस्थाभेदेन भेदः, प्रेम्णश्च सर्वावस्थास्वेकत्वमेव द्योत्यते। एवं तथाविधस्य सर्वावस्थास्वभिन्नस्य परमोत्कृष्टस्य प्रेम्णोऽवसानेनोद्दीपनविभावेन विप्रलम्भस्योत्कर्षो व्यज्यते। एवम् -

**"कश्चित् कान्ता विरहगुरुणा स्वाधिकारात् प्रमत्तः**
**शापेनास्तङ्गमितमहिमा वर्षभोग्येण भर्तुः।**
**यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु**
**स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु"॥**[68]

अत्र मेघदूतस्य पद्ये रामगिर्याश्रमेष्वित्यत्र सप्तमीबहुवचनेन विरहिणि यक्षे क्वचिदप्येकत्रानवस्थानत्वं तेनारतिस्तया विरहातिशयश्च प्रकाश्यते।

**"वाचं न मिश्रयति यद्यपि मद्वचोभिः**
**कर्णं ददात्यवहिता मयि भाषमाणे।**
**कामं न तिष्ठति मदाननसम्मुखीयं**
**भूयिष्ठमन्यविषया न तु दृष्टिरस्याः"**[69]

वचोभिरित्यत्र बहुत्वेन द्योत्यते यत् शकुन्तला दुष्यन्तस्य बहूनां प्रश्नानामुत्तरं न ददौ । अत्र वाचो न मिश्रयति यथापेक्षावचनम् इष्टमासीत् परं

---

[67] काव्यप्रकाशः, चतुर्थः उल्लासः, पृष्ठसङ्ख्या - 208

[68] मेघदूतम्, 1/1

[69] अभिज्ञानशाकुन्तलम्, 1/33

वक्रता वचनगता सा च विशेषार्थं ब्रूते। मुग्धा नायिका लज्जाशीला च सेति रत्युद्दीपकत्वाच्छृङ्गाररसव्यञ्जकता नूनमिह वचनस्य।

अन्यस्मिन्नपि संयोगपरे शृङ्गार आप्यते वचनद्योत्यतानिरूपणम्। तथा हि -

**“शयिता सविधेऽप्यनीश्वरा सफलीकर्तुम् अहो मनोरथान्।**

**दयिता दयिताननाम्बुजं दरमीलन्नयना निरीक्ष्यते”॥**[70]

इह श्लोके “मनोरथान्” इत्यत्र बहुवचनेन नायिका, हृद्यनेकेषां मनोरथानां सद्भावं प्रतिपादयति। एतेन बहुवचनबोध्यबहुत्वसंख्यया शृङ्गारोत्कर्षो द्योत्यते ।

हास्यरसे वचनाभिव्यङ्ग्यत्वम्-

**“भिक्षो! मांसनिषेवणं प्रकुरुषे, किं तेन मद्यं विना**

**मद्यं चापि तव प्रियं प्रियमहो वाराङ्गनाभिः सह ।**

**वेश्याप्यर्थरुचिः कुतस्तव धनं द्यूतेन चौर्येण वा**

**चौर्यद्यूतपरिग्रहोऽपि भवतो, नष्टस्य काऽन्या गतिः”॥**[71]

अत्र वाराङ्गनाभि: इत्यत्र बहुवचनेन नैकस्या: द्वयोर्वा साह्यचर्यं द्योत्यते अपितु बहूनाम्/बह्वीनां वारङ्गणानाम् । एतेन हासस्यातिशय: प्रकाश्यते।

**“आकुञ्च्य पाणिमशुचिं मम मूर्ध्नि वेश्या मन्त्राम्भसां प्रतिपदं पृषतैः पवित्रे।**

**तारस्वनं प्रथितथूत्कमदात्प्रहारं हा हा हतोऽहमिति रोदिति विष्णुशर्मा”॥**[72]

मन्त्राम्भसां पृषतै: इत्यत्र बहुवचनेन बोध्यते यद् विष्णुशर्मणः मूर्धा अभिमन्त्रितस्य एकस्य द्वयोर्वा जलस्य न अपितु जलानाम् । न पृषतोभ्याम्

---

[70] रसगङ्गाधरः, प्रथमम् आननम्

[71] साहित्यदर्पणः, षष्ठः परिच्छेदः - पृष्ठसङ्ख्या - 524

[72] काव्यप्रकाशः, चतुर्थ उल्लासः, पृष्ठसङ्ख्या - 148

अपितु पृषतैः पवित्रितो वर्तते मूर्धा । एतादृशो मूर्धिनि वेश्याहस्तन्यासेन हास्यातिशयः प्रकाश्यते ।

करुणरसे वचनाभिव्यङ्ग्यत्वम् –

**"हा मातस्त्वरितासि कुत्र किमिदं हा देवताः क्वाशिषः**

**धिक् प्राणान् पतितोऽशनिर्हुतवहस्तेऽङ्गेषु दग्धे दृशौ।**

**इत्थं घर्घरमध्यरुद्धकरुणाः पौराङ्गनानां गिरश्-**

**चित्रस्थानपि रोदयन्ति शतधा कुर्वन्ति भित्तीरपि"॥**[73]

अत्र देवताः गिरः भित्तीः इत्यत्र बहुवचनेन शोकातिशयो व्यज्यते । नैकस्या द्वयोर्वा देवतयोराशिषो निष्फला अपितु सर्वासाम्, पौराङ्गाणानां नैका गीर्देवा गिरौ अपितु सर्वाः गिरः , नैकां भित्तिम्, द्वे भित्ती एव नापितु सर्वाः भित्तीः शतधा कुर्वन्ति इति बहुवचनं पौराङ्गणादिगतशोकातिशयं प्रकाशयति ।

करुणरसे वचनाभिव्यङ्ग्यत्वनिरूपकोऽयं श्लोकः -

**"गृहिणी सचिवः सखी मिथः प्रियशिष्या ललिते कलाविधौ ।**

**करुणाविमुखेन मृत्युना हरता त्वां वद किं न मे हृतम्"॥** [74]

अत्र गृहिण्यादिपदे एकवचनेन द्योत्यते यन्मदीया एकैव गृहिणी एक एव सचिव एकैव शिष्या च इन्दुमत्यासीत् । एतस्याः भिन्नः कश्चनापि गृहिंण्यादिपदार्थो नासीत् । करुणाविमुखेन इन्दुमतीं हरता मृत्युना गृहिणीसचिवादिसर्वमेव हृतम् इत्याशयः । अत्रैकवचने इन्दुमत्याम् अनन्यसाधारणगृहिणीत्वसचिवत्वादिप्रकाशनाद् अजगतशोकातिशयो ध्वन्यते। तेन करुणस्य प्रकर्षः ।

[73] अत्रैव - पृष्ठसङ्ख्या - 149

[74] साहित्यदर्पणः, दशमः परिच्छेदः, पृष्ठसङ्ख्या - 830

रौद्ररसे वचनव्यङ्ग्यत्वम् -

**"कृतमनुमतं दृष्टं वा यैरिदं गुरुपातकं**
**मनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदायुधैः।**
**नरकरिपुणा सार्धं तेषां सभीमकिरीटिनाम-**
**यमहमसृङ्मेदोमांसैः करोमि दिशां बलिम्"॥**[75]

"सभीमकिरीटिनाम्" इत्यत्र षष्ठीबहुवचनेन अश्वत्थामगतः क्रोधातिशयः प्रकाश्यते। अभिप्रायो भवति यदश्वत्थामा एकस्यैव द्वयोर्वा वधं न विधास्यति अपितु भीमादिसहितानां सकलानाम् इति ।

**"कर्ता द्यूतच्छलानाम् जतुमयशरणोद्दीपनः सोऽभिमानी**
**कृष्णाकेशोत्तरीयव्यपनयनमरुत् पाण्डवा यस्य दासाः।**
**राजा दुश्शासनादेः गुरुः. अनुजशतस्य अंगराजस्य मित्रम्**
**क्व आस्ते दुर्योधनः असौ कथयत न रुषा द्रष्टुम् अभ्यागतौ स्वः"॥**[76]

**"नवोच्छलितयौवनस्फरदखर्वगर्वज्वरे मदीयगुरुकार्मुकं गलितसाध्वसं वृश्चति ।**
**अयं पततु निर्दयं दलितदृप्तभूभृद्गलस्खलद्रुधिरघस्मरो मम परश्वधो भैरवः"।।**[77]

गर्वज्वरे वृश्चति इत्यत्रैकवचनेन प्रकाश्यते यदेक एव रामः परशुरामगुरुधनुर्भङ्गं कृतवान्। एकेन तादृशेन रामेण गुरोः शिवस्यापि धनुषो भङ्गविधानस्य ज्ञानात् परशुरामे क्रोधातिशयः प्रकाश्यते ।

वीररसे वचनाभिव्यङ्ग्यत्वम् -

**"भो लङ्केश्वर ! दीयतां जनकजा रामः स्वयं याचते**
**कोऽयं ते मतिविभ्रमः स्मर नयं नाद्यापि किञ्चिद् रतम्।**
**नैवं चेत् खरदूषणत्रिशिरसां कण्ठासृजा पङ्किलः**

---

[75] काव्यप्रकाशः, चतुर्थः उल्लासः, पृष्ठसङ्ख्या - 150

[76] वेणीसंहारम्, 5/32

[77] रसगङ्गाधरः, प्रथमम् आननम् , पृष्ठसङ्ख्या - 160

**पत्री नैष सहिष्यते मम धनुर्ज्याबन्धबन्धूकृतः"॥**[78]

**"क्षुद्राः सन्त्रासमेते विजहत हरयः क्षुण्णशक्रेभकुम्भा**

**युष्मद्देहेषु लज्जां दधति परममी सायका निष्पतन्तः।**

**सौमित्रे तिष्ठ पात्रं त्वमसि न हि रूषां नन्वहं मेघनादः**

**किञ्चिद् भ्रूभङ्गलीलानियमितजलधिं राममन्वेषयामि"।।** [79]

अत्र हरय इत्यत्र बहुवचनेन प्रकाश्यते यद् बहवोऽपि यूयं वानराः ममैकस्य मेघनादस्य पुरा किमपि न भवन्ति । एतेन वानरेषु तुच्छत्वं तृणप्रायत्वञ्च प्रकाश्यते। मेघनाद इत्यत्रैकवचनेन ध्वन्यते यन्मेघनाद एक एवास्ति एतत् सदृशः कश्चनान्यो न वर्तत इति। एवं वानराणां बहुवचनप्रकाश्यतुच्छत्वेनैकवचनेन स्वोत्कर्षस्य प्रकाशनाद् मेघनादे उत्साहातिशयः विद्योतते।

धर्मवीरे वचनाभिव्यङ्ग्यत्वम् –

**"राज्यं च वसु देहश्च भार्या भ्रातृसुताश्च ये।**

**यच्च लोके ममायत्तं तद्धर्माय सदोद्यतम्"॥**[80]

अत्र भ्रातृसुताः इत्यत्र बहुवचनेन युधिष्ठिरे धर्मकृते सर्वस्यापि प्रियस्य परित्यागः प्रकाश्यते। तेन युधिष्ठिरस्य धर्म उत्साहातिशयो ध्वन्यते।

**"सपदिविलयमेतु राज्यलक्ष्मीरुपरि पतन्त्वथवा कृपाणधाराः।**

**अपहरतुतरां शिरः कृतान्तो मम तु मतिर्न मनागपैति धर्मात्"॥**[81]

कृपाणधारा इत्यत्र बहुवचनेन युधिष्ठिरे धैर्यातिशयो व्यज्यते।

दानवीरे तावद् वचनाभिव्यङ्ग्यत्वं यथा साहित्यदर्पणे उद्धृतम्–

---

[78] साहित्यदर्पणः, तृतीयः परिच्छेदः, पृष्ठसङ्ख्या -258

[79] काव्यप्रकाशः, चतुर्थ उल्लासः, पृष्ठसङ्ख्या - 158

[80] साहित्यदर्पणः, तृतीयः परिच्छेदः, पृष्ठसङ्ख्या - 258

[81] रसगङ्गाधरः, प्रथमम् आननम् ,पृष्ठसङ्ख्या - 175

**“त्यागः सप्तसमुद्रमुद्रितमहीनिर्व्याजदानावधिः”**[82] इति।

दयावीरे तावद् वचनाभिव्यङ्ग्यत्वम् –

**“शिरामुखैः स्यन्दत एव रक्तमद्यापि देहे मम मांसमस्ति।**
**तृप्तिं न पश्यामि तवापि तावत् किं भक्षणात् त्वं विरतो गरुत्मन्”॥**[83]

अत्र शिरामुखैरिति तृतीयाबहुवचनेन रक्तप्रवाहस्यातिशय: प्रकाश्यते । तेन जीमूतवाहने दयाया: अतिशयो ध्वन्यते ।

भयानके वचनाभिव्यङ्ग्यत्वम् –

**“ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः,**
**पश्चार्धेन प्रविष्टशरपतनभयाद् भूयसा पूर्वकायम्।**
**दर्भैरर्धावलीढैश्श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा,**
**पश्योदग्रप्लुतत्वाद् वियति बहुतरं स्तोकमुर्व्यां प्रयाति”॥**[84]

अत्र मृगे भयस्याप्यभिव्यक्तेर्भयानको रसः, दर्भैरित्यत्र बहुवचनेन मृगे चावनातिशस्तेन भयातिशयश्च ध्वन्यते।

**“नष्टं वर्षवरैर्मनुष्यगणनाभावापास्य त्रपा-**
**मन्त: कञ्चुकिकञ्चुकस्य विशति त्रासादयं वामनः।**
**पर्यन्ताश्रयिभिर्निजस्य सदृशं नाम्नः किरातैः कृतं**
**कुब्जा नीचतयैव यान्ति शनकैरात्मेक्षणाशङ्किनः”॥**[85]

वर्षवरैः किरातैरित्यत्र बहुवचनेन प्रकाश्यते यदेकोऽपि वर्षवरः किरातो वा तत्रावस्थितो वानरसम्मुखे वस्तुतः । एतेन भयातिशयः प्रकाशितः।

---

[82] अत्रैव, पृष्ठसङ्ख्या - 257

[83] अत्रैव, पृष्ठसङ्ख्या - 258

[84] अभिज्ञानशाकुन्तलम्, 1/7

[85] रत्नावली, 2/3

बीभत्से वचनाभिव्यङ्ग्यत्वम् –

**“उत्कृत्योत्कृत्य कृत्तिं प्रथममथ पृथूच्छोथभूयांसि मांसा-**

**न्यंसस्फिक्पृष्ठपिण्डाद्यवयवसुलभान्युग्रपूतीनि जग्ध्वा ।**

**आर्तः पर्यस्तनेत्रः प्रकटितदशनः प्रेतरङ्कः करङ्का-**

**दङ्कस्थादस्थिसंस्थं स्थपुटगतमपि क्रव्यमव्यग्रमत्ति”॥**[86]

मांसानित्यत्र द्वितीयाबहुवचनेन जुगुप्सायाः अतिशयः प्रकाश्यते यतो हि प्रेतरङ्गो न केवलं मांस मांसे वा जग्धवान् मांसान् ।

**“नखैर्विदारितान्त्राणां शवानां पूयशोणितम्।**

**आननेष्वनुलिम्पन्ति हृष्टा वेतालयोषितः”॥**[87]

शवानामिति षष्ठीबहुवचनेन न प्रकाश्यते यद् वेतालयोषितो न केवलमेकस्य शवस्य नापि द्वयोरपितु बहूनां शवानां पूयशोणितं स्वमुखेषु लिम्पन्ति। शवगतबहुत्वेन पूयशोणितजातं बहुत्वं तेन च जुगुप्साया अतिशयः प्रकाश्यते।

अद्भुते वचनाभिव्यङ्ग्यत्वम् -

**“दोर्दण्डाञ्चितचन्द्रशेखरधनुर्दण्डावभङ्गोद्यतष्-**

**टङ्कारध्वनिरार्यबालचरितप्रस्तावनाडिण्डिमः।**

**द्राक्पर्यस्तकपालसम्पुटमिलद्ब्रह्माण्डभाण्डोदर-**

**भ्राम्यत्पिण्डितचण्डिमा कथमहो नाद्यापि विश्राम्यति”॥**[88]

टङ्कारध्वनिरित्यत्रैकवचनेन शिवधनुर्भङ्गेत्पन्नानां शब्दानां पिण्डीभूतत्वं प्रकाश्यते तेन चाद्भुतस्य प्रकाशनम् । यद्यपि ध्वनयो बहवः सन्ति तथापि घनीभूतत्वेन तेषामेकत्वं प्रतीयत इति भावः।

---

[86] साहित्यदर्पणः, तृतीयः परिच्छेदः, पृष्ठसङ्ख्या - 261

[87] रसगङ्गाधरः, प्रथमम् आननम्, पृष्ठसङ्ख्या - 186

[88] साहित्यदर्पणः, तृतीयः परिच्छेदः, पृष्ठसङ्ख्या - 262

**“चराचरजगज्जालसदनं वदनं तव।**

**गलद्गगनगाम्भीर्यं वीक्ष्यास्मि हृतचेतना”॥**[89]

अत्र वदनमित्येकवचनेन कृष्णवदनस्य एकत्वेऽपि तत्र चराचरजगतां स्थितेर्वर्णनेन अद्भुतस्यातिशयः प्रकाश्यते।

शान्तरसे वचनाभिव्यङ्ग्यत्वम् –

**“अहौ वा हारे वा बलवति रिपौ वा सुहृदि वा।**

**मणौ वा लोष्टे वा कुसुमशयने वा दृषदि वा ।**

**तृणे वा स्त्रैणे वा मम समदृशो यान्तु दिवसाः।**

**क्वचित् पुण्येऽरण्ये शिव शिव शिवेति प्रलपतः”॥**[90]

अत्र अहौ इत्यादिषु विद्यमानमेकत्वं समत्वबुद्धेरतिशयं प्रकाशयच्छान्तमभिव्यनक्ति। अहिषु हारेषु वा इत्येवं कथनेऽनेकत्वावच्छिन्नतत्तद्व्यक्तिरूपाकारग्रहणाद् बुद्धेरेकत्वं तथा न प्रतीयेत अथ दिवसा इत्यत्र बहुवचनेन द्योत्यते यदेकोऽपि दिवसस्तथा नास्ति यत्र शिव शिवेति प्रलापो न भवति। अनेन निर्वेदातिशयः प्रकाश्यते ।

**“मलयानिलकालकूटयोरमणीकुन्तलभोगिभोगयोः।**

**श्वपचात्मभुवो निरन्तरा मम जाता परमात्मनि स्थितिः”॥**[91]

स्थितिरित्यत्रैकवचनेन प्रकाश्यते यत् परमात्मनि कदाचिदपि मम दृश्यन्तरं न भवति। मलयानिलकालकूटयोरिति द्विवचनेन द्वित्वं तेन च मलयानिलकालकूटादिषु विरोधः प्रकाश्यते । एवं विरुद्धयोरपि पदार्थयोः समत्वभावनया वक्तरि निर्वेदातिशयस्य प्रकाशनम्।

---

[89] रसगङ्गाधरः, प्रथमम् आननम्, पृष्ठसङ्ख्या - 180

[90] काव्यप्रकाशः, चतुर्थः उल्लासः, पृष्ठसङ्ख्या - 157

[91] रसगङ्गाधरः, प्रथमम् आननम्, पृष्ठसङ्ख्या - 156

एवं भावादयोऽपि वचनव्यङ्ग्या भवन्ति। तत्र देवादिविषया रतिर्भाव इत्येवम्भूतलक्षणे भावे वचनाभिव्यञ्जकतत्वमेतच्छलोकद्वारा स्पष्टीकर्तुं शक्यते –

**"भवद्वारि क्रुध्यज्जयविजयदण्डाहतिदलत्-**

**किरीटास्ते कीटा इव विधिमहेन्द्रप्रभृतयः।**

**वितिष्ठन्ते युष्मन्नयनपरिपातोत्कलिकया**

**वराकाः के तत्र क्षपितमुरनाकाधिपतयः"॥ [92]**

नाकाधिपतय इति प्रथमाबहुवचनान्तेन भगवतो माहात्म्यातिशयस्तेन च स्तोतरि भगवद्विषयरत्यतिशयश्च प्रकाश्यते। देवादिविषयारतिः प्राधान्येन व्यक्तोव्यभिचारिभावश्च भाव उच्यते। तत्र मुनिविषयकरतिभावो यथा बहुवचनेनाधोलिखिते पद्ये प्रकाशते -

**"हरत्यघं सम्प्रति हेतुरेष्यतः शुभस्य पूर्वाचरितैः कृतं शुभैः ।**

**शरीरभाजां भवदीयदर्शनं व्यनक्ति कालत्रितयेऽपि योग्यताम्"॥ [93]**

शुभैरिति बहुवचनेन मुनिदर्शनस्य पुण्यातिशयलभ्यत्वं तेन च भगवत्कृष्णनिष्ठनारदमुनिविषयकरतिभावस्य ध्वननं भवति ।

प्राधान्येनाभिव्यक्तो निर्वेदो व्यभिचारिभावो यथा -

**"न्यक्कारो ह्ययमेव मे यदरयस्तत्राप्यसौ तापसः,**

**सोऽप्यत्रैव निहन्ति राक्षसकुलं जीवत्यहो रावणः।**

**धिग्धिक्छक्रजितं प्रबोधितवता किं कुम्भकर्णेन वा**

**स्वर्गग्रामटिकाविलुण्ठनवृथोच्छूनैः किमेभिर्भुजैः"॥[94]**

अत्र "अरयः" इति बहुवचनप्रयोगद्वारा रावणस्य शत्रोरभावत्वे सत्यरीणां कथमुद्भव इति क्रोधरूपविभाववत्त्वात्[95] कथञ्चिद् वीररसाभि-

---

[92] अत्रैव, पृष्ठसङ्ख्या - 362

[93] काव्यप्रकाशः, चतुर्थः उल्लासः, पृष्ठसङ्ख्या - 160

[94] अत्रैव, सप्तम उल्लासः, पृष्ठसङ्ख्या – 304

व्यञ्जनमपि, परमापाततस्तु “तापसः” इत्यत्रैकवचनद्वारा हि प्रकृत-निर्वेदातिशयो यो द्योत्यतेऽसौ शान्तरसानुकूलं निर्वेदनामानं व्यभिचारिभावं मुख्यतः सम्प्रकाशयतीति विशेषः। एकस्याप्यरेः सद्भावो रावणे निर्वेदायालं किं बहूनाम् ?

अवहित्थाभावो यथा वचनाभिव्यज्यतेऽत्र –

**“एवं वादिनि देवर्षौ पार्श्वे पितुरधोमुखी।**

**लीलाकमलपत्राणि गणयामास पार्वती”॥**[96]

लीलाकमलपत्राणीति द्वितीयाबहुवचनेन लीलाकमलपत्रेषु बहुत्वं तेन पार्वत्याम् अवहित्थाया अतिशयश्च प्रकाश्यते ।

स्मृतिभावो यथा वचनाभिव्यज्यतेऽत्र -

**“तन्मञ्जुमन्दहसितश्वसितानि तानि**

**सा वै कलङ्कविधुरा मधुराननश्रीः।**

**अद्यापि मे हृदयमुन्मदयन्ति हन्त!**

**सायन्तनाम्बुजसहोदरलोचनायाः”॥**[97]

श्वसितानि तानीति प्रथमाबहुवचनान्तेन स्मृतेरुत्कर्षः प्रकाश्यते । एवं नैकेषु भावेषु वचनमभिव्यज्यते।

अथानौचित्येन प्रवृत्तो रसो भावश्च क्रमेण रसाभावो भावाभासश्च कथ्यते। तत्र शृङ्गाररसाभासस्य वचनप्रकाश्यता यथा –

---

[95] “ममारय इति - मम शत्रुसद्भावो नोचित इति सम्बन्धानौचित्यं क्रोधविभावं व्यनक्ति अस्य इति बहुवचनम्”। - ध्वन्यालोकः, तृतीयः उद्योतः (लोचनटीका), पृष्ठसङ्ख्या - 153

[96] कुमारसम्भवम्, 6/84

[97] रसगङ्गाधरः, प्रथमम् आननम्, पृष्ठसङ्ख्या - 300

**"शतेनोपायानां कथमपि मतः सौधशिखरं**

**सुधाफेनस्वच्छे रहसि शयितां पुष्पशयने।**

**विबोध्य क्षामाङ्गी चकितनयनां स्मेरवदनां**

**सनिश्श्वासं श्लिष्यत्यहह! सुकृती राजरमणीम्"॥**[98]

अत्रत्येन उपमानमिति षष्ठीबहुवचनेन नायके राजरमणीविषयकरत्युत्कर्षः प्रकाश्यते। अत्रागम्यराजरामणी विषयत्वेन रतैराभासता। अत्र सम्भोगशृङ्गाररसाभासः।

**"व्यत्यस्तं लपति क्षणं क्षणमथो मौनं समालम्बते,**

**सर्वस्मिन् विदधाति किं च विषये दृष्टिं निरालम्बनाम्।**

**श्वासं दीर्घमुरीकरोति न मनागङ्गेषु धत्ते धृतिं**

**वैदेहीकमनीयताकवलितो हा हन्त! लङ्केश्वरः"॥**[99]

अत्रत्येन अङ्गेष्विति सप्तमीबहुवचनेन लङ्केश्वरस्य धृतेरत्यन्ताभावस्तेन विप्रलम्भत्यस्यातिशयश्च ध्वन्यते। अगम्यसीताविषयकत्वेन अनुभयनिष्ठत्वेन लङ्केश्वरनिष्ठरतेराभासता ।

भावाभासस्य वचनप्रकाश्यता यथा -

**"सर्वेऽपि विस्मृतपथं विषयाः प्रयाता**

**विद्याऽपि खेदकलिता विमुखीबभूव।**

**सा केवला हरिणशावकलोचना मे**

**नैवापयाति हृदयादधिदेवतेव"॥**[100]

विषया इति प्रथमा बहुवचनेन वक्तरि निषिद्धनायिकाविषयकस्मृतिभावस्यातिशयः प्रकाश्यते। निषिद्धनायिकाविषया स्मृतिः सर्वान् विषयान् अपहृतवतीति भावः।

---

[98] अत्रैव, पृष्ठसङ्ख्या - 367

[99] अत्रैव, पृष्ठसङ्ख्या - 373

[100] रसगङ्गाधरः, प्रथमम् आननम्, पृष्ठसङ्ख्या - 375

भावशान्तेर्वचनप्रकाश्यतानिरूपणम् –

यत्र कस्यचन भावस्य  नाशो व्यज्यते तदा भावशान्तिः। यथोक्तं रसगङ्गाधरे - **"भावस्य प्रागुक्तस्वरूपस्य शान्तिर्नाशः"॥**[101]

भावशान्तेरुदाहरणरूपश्श्लोकश्चात्रस्थ एवायम्  -

**"मुञ्चसि  नाद्यापि  रुषं  भामिनि!  मुदिरालिरुदियाय।**

**इति  तन्व्याः  पतिवचनैरपायि  नयनाब्जकोणशोणरुचिः"॥**[102]

इह पतिवचनैरिति तृतीयाबहुवचनेन नश्यत्क्रोधस्य प्रगाढता द्योत्यते। क्रोधो हि पत्युः एकेन वचनेन  द्वाभ्यां वा वचनाभ्यां न शान्तोऽपितु वचनैरिति भावः। एवं रोषनाशोऽत्र पतिवचनैरित्येतेन बहुवचनयुतेन पदेन व्यङ्ग्यः। अत एवात्र भावशान्तिः।

भावोदयः –

प्राधान्येन व्यज्यमाना भावस्योत्पत्तिस्तावद् भवति भावोदयः।

**"चरणपतनप्रत्याख्यानात् प्रसादपराङ्मुखे**

**निभृतकितवाचारेत्युक्त्वा रुषा परुषीकृते।**

**व्रजति रमणे निःश्वस्योच्चैः स्तनस्थितहस्तया**

**नयनसलिलच्छन्ना दृष्टिः सखीषु निवेशिता"॥**[103]

इह रमणे इति सप्तम्येकवचेनन नायिकायाः पुरुषान्तरे रत्यभावः तेन विषादोदयस्यातिशयश्च प्रकाश्यते।

भावसन्धेर्वचनप्रकाश्यतानिरूपणं यथा –

---

[101] अत्रैव, पृष्ठसङ्ख्या - 377

[102] अत्रैव, पृष्ठसङ्ख्या -378

[103] साहित्यदर्पणः, तृतीयः परिच्छेदः, पृष्ठसङ्ख्या - 277

प्राधान्येन प्रकाश्यमानः तुल्यबलयोर्भावयोः सन्धिर्भावसन्धिरित्युच्यते। तद् यथा –

**"यौवनोद्गमनितान्तशङ्किताः शीलशौर्यबलकान्तिलोभिताः।**

**सङ्कुचन्ति विकसन्ति राघवे जानकीनयननीरजश्रियः"॥**[104]

अत्र प्रथमाबहुवचनपदेन लट्प्रथमपुरुषबहुवचनेन च सीतायाः राघवेऽनुरागातिशयः प्रकाश्यते, तेन च व्रीडौत्सुक्ययोः सन्धिः।

भावशबलतायाः वचनप्रकाश्यतानिरूपणम् –

तत्र हि भावशबलताऽर्थः - **"भावशबलत्वं भावानां बाध्यबाधकभावमापन्नानामुदासीनानां वा व्यामिश्रणम्"।** [105]

बाध्यबाधकभावं प्राप्तानाम् उदासीनानां वा भावानां मिश्रणं प्राधान्येन व्यज्यमानं भावशबलतेत्युच्यते। तद् यथा –

**"क्वाकार्यं शशलक्ष्मणः क्व च कुलं भूयोऽपि दृश्येत सा**

**दोषाणां प्रशमाय मे श्रुतमहो कोपेऽपि कान्तं मुखम् ।**

**किं वक्ष्यन्त्यपकल्मषाः कृतधियः स्वप्नेऽपि सा दुर्लभा**

**चेतः स्वास्थ्यमुपैहि कः खलु युवा धन्योऽधरं धास्यति"॥**[106]

अत्र वितर्कस्य औत्सुक्यस्य मतेः मरणस्य शङ्कायाः दैन्यस्य धृतेः चिन्तायाश्च शबलता अर्थाद् मिश्रणं दोषाणाम् इत्यत्र बहुवचनेन श्रुतस्य माहात्म्यं कृतधिय इति प्रथमाबहुवचनेन च शङ्कायाः अतिशयोऽनिवार्यत्वञ्च प्रकाश्यते। एवं वचनस्य रसादिव्यङ्ग्यता सम्प्रकाशिता।

---

[104] अत्रैव, पृष्ठसङ्ख्या - 377

[105] रसगङ्गाधरः, प्रथमम् आननम्, पृष्ठसङ्ख्या - 381

[106] साहित्यदर्पणः, तृतीयः परिच्छेदः, पृष्ठसङ्ख्या - 277

## 9. वचनस्य वक्रोक्तावुपयोगः -

प्रथिततराण्येव साहित्यशास्त्रे षट् प्रस्थानानि प्रसिद्धानि - रसः, अलंकारः, रीतिः, ध्वनिः, वक्रोक्तिः, औचित्यं च। तत्र मुख्यतया कुन्तकेन प्रवर्तिते वक्रोक्तिप्रस्थाने प्रसिद्धाभिधाविलक्षणा विचित्राभिधारूपा चमत्कारिण्युक्तिलक्षणा वा । तत्र च "**विचित्रैवाभिधा वक्रोक्तिरित्युच्यते**"[107] इत्येतद्वचनप्रमाणपुरस्सरं वक्रोक्तिर्विशिष्टशब्दार्थरूपस्य काव्यस्य जीवितमभिहिता।

पदपूर्वार्धवक्रता, पदपरार्धवक्रता, पदवक्रता, वाक्यवक्रता, प्रकरणवक्रता, प्रबन्धवक्रता चेत्येवं मुख्यरूपेणैषा षोढा।[108] तत्र पदपूर्वार्धवक्रता धातुप्रातिपदिकरूपप्रकृतिवक्रता, पदपरार्धवक्रता तु प्रत्ययवक्रताऽभिधीयते। वचनं पदपरार्धवक्रताविशेषस्य घटकं भवति। एषा वचनवक्रता सङ्ख्यावक्रता वोच्यते। उक्तं कुन्तकेन- "**प्रत्ययः सुप्तिङ् च यस्याश्रयः स्थानं स तथोक्तः। तस्यापि बहवः प्रकाराः सम्भवन्ति- सङ्ख्यावैचित्र्यविहितः, कारकवैचित्र्यविहितः, पुरुषवैचित्र्यविहितश्च। तत्र सङ्ख्यावैचित्र्यविहितः- यस्मिन् वचनवैचित्र्यं काव्यबन्धशोभायै निबध्यते**"।[109] अत्र लोकदृशा प्रसिद्धस्य वचनस्य स्थाने विच्छित्तेः सिद्धये वचनान्तरस्य प्रयोगो भवति। उक्तं वक्रोक्तिजीविते– "**कुर्वन्ति काव्यवैचित्र्यविवक्षापरतन्त्रिताः। यत्र सङ्ख्याविपर्यासं तां सङ्ख्यावक्रतां विदुः॥ यत्र यस्यां कवयः काव्यवैचित्र्यविवक्षापरतन्त्रिताः स्वकर्मविचित्रभावाभिधित्सापरवशाः सङ्ख्याविपर्यासं वचनपरिवर्तनं कुर्वन्ति विदधते, तां सङ्ख्यावक्रतां विदुः। तद्वचनवक्रत्वं जानन्ति तद्विदः। तदयमत्रार्थः यदेकवचने द्विवचने वा प्रयोक्तव्ये वैचित्र्यार्थं वचनान्तरं यत्र प्रयुज्यते, भिन्नवचनयोर्वा यत्र सामानाधिकरण्यं विधीयते**"।[110]

---

[107] वक्रोक्तिजीवितम्, 1/10 (वृत्त्याम्)

[108] "कविव्यापारवक्रत्वप्रकाराः सम्भवन्ति षट्। प्रत्येकं बहवो भेदास्तेषां विच्छित्तिशोभिनः"॥

- अत्रैव, 1/18

[109] अत्रैव, प्रथमोन्मेषः

[110] अत्रैव, द्वितीयोन्मेषः

अस्य कानिचनोदाहरणानीह वक्रोक्तिजीवितादिदिशा प्रदर्श्यन्ते -

**"मैथिली तस्य दाराः"**[111]

अत्र दारा इति बहुवचनस्य प्रयोगेण मैथिल्यां बहुत्वस्य प्रतिपादनेन सर्वेषां सद्गुणानां सद्भावस्तेन वरणीयतातिशयस्तेन तस्या वरे सौभाग्यातिशयश्च ख्याप्यते। त्रैलोक्यराज्यमपि मैथिल्याः समक्षं तुच्छमिति सूच्यते।

**"कपोले पत्राली करतलनिरोधेन मृदिता**
**निपीतो निःश्वासैरयममृतहृद्योऽधररसः !**
**मुहुर्कण्ठे लग्नस्तरलयति बाष्पः स्तनतटं**
**प्रियो मन्युर्जातस्तव निरनुरोधे न तु वयम्"॥**[112]

अस्यायमर्थः- अत्र वक्त्रा स्वकृतेऽस्मच्छब्दो वयमिति बहुवचनान्तः प्रयुक्तः। अनेन वक्ता नायिकां विवक्षति यदहं तवान्तरङ्गो नास्मि, तटस्थोऽस्मि, अपितु मन्युरेव तवान्तरङ्गः प्रियो वर्तते। अहमित्येकवचनेन वक्तरि तथाऽनन्तरङ्गतोपालम्भातिशयश्च न प्रतीयेत। एवमेकवचनेऽहमिति प्रयोक्तव्ये वयमिति बहुवचनस्य प्रयोगेण वैचित्र्यं सिद्ध्यति। उक्तम्- **"अत्र 'न त्वहम्' इति वक्तव्ये 'न तु वयम्' इत्यन्तरङ्गत्वप्रतिपादनार्थं ताटस्थ्यप्रतीतये बहुवचनं प्रयुक्तम्"**।[113]

एवमेवाभिज्ञानशाकुन्तलस्यास्मिन् श्लोके -

**"चलापाङ्गां दृष्टिं स्पृशसि बहुशो वेपथुमतीं**
**रहस्याख्यायीव स्वनसि मृदु कर्णान्तिकचरः ।**

---

111 अत्रैव, 1/56

112 अत्रैव, 2/101

113 अत्रैव, पृष्ठसङ्ख्या - 278

**करौ व्याधुन्वन्त्याः पिबसि रतिसर्वस्वमधरं**

**वयं तत्त्वान्वेषान्मधुकर ! हतास्त्वं खलु कृती"॥**[114]

अस्यायमर्थः - अत्राप्यहमिति प्रयोक्तव्ये वयमिति बहुवचनं प्रयुक्तम्। अनेन दुष्यन्ते शकुन्तलां प्रत्यनन्तरङ्गताऽकृतार्थतातिशयश्च, भ्रमरे त्वन्तरङ्गता कृतार्थतातिशयश्च प्रतीयते।

**"फुल्लेन्दीवरकाननानि नयने पाणी सरोजाकराः"॥**[115]

अत्र नयने इति द्विवचनस्य सामानाधिकरणयेन फुल्लेन्दीवरकानने इति द्विवचनस्यैव प्रयोगः समीचीनः, तथापि फुल्लेन्दीवरकानानीति बहुवचनस्य प्रयोगेण नयनयोरविकासरमणीयतादीनामतिशयः प्रतीयते। एवमेव पाणी इति द्विवचनस्य सामानाधिकरण्येन सरोजाकरा इति बहुवचनस्य प्रयोगेण पाण्योर्लौहित्यकोमलत्वरमणीयताद्यतिशयः प्रत्याय्यते। उक्तम् –

**"अत्र द्विवचनबहुवचनयोः सामानाधिकरण्यलक्षणः सङ्ख्याविपर्यासः सहृदयहृदयहारितामावहति"।** [116]

**"आज्ञा शक्रशिखामणिप्रणयिनी शास्त्राणि चक्षुर्नवं**

**भक्तिर्भूतपतौ पिनाकिनि पदं लङ्केति दिव्या पुरी ।**

**उत्पत्तिर्द्रुहिणान्वये च तदहो नेदृग्वरो लभ्यते**

**स्याच्चेदेष न रावणः क्व नु पुनः सर्वत्र सर्वे गुणाः"॥**[117]

अस्यायमर्थः - अत्र शास्त्राणीति बहुवचनान्तस्य सामानाधिकरण्येन चक्षुरित्यत्रापि बहुवचनमेव प्रयोक्तव्यमासीत् किन्तु प्रयुक्तमेकवचनम्। अनेन रावणे नानाशास्त्रसमन्वयेन विचारकत्वं प्रत्याय्यते। रावणस्यैकैकमेव शास्त्रं चक्षुरिति न, अपितु सर्वाणि शास्त्राणि सम्भूय रावणस्यैकज्ञानरूपचक्षूरूपेण

---

114 अभिज्ञानशाकुन्तलम्, 1/25

115 वक्रोक्तिजीवितम्, 2/103

116 वक्रोक्तिजीवितम् - द्वितीयोन्मेषः, पृष्ठसङ्ख्या - 279

117 साहित्यदर्पणः, सप्तमः परिच्छेदः, पृष्ठसङ्ख्ये - 606-607

परिणतानीति तात्पर्यम्। रावणो मन्त्रणाऽऽद्यवसरे सर्वाणि शास्त्राणि समालोचयतीति विवेकित्वेन सीतादानपात्रतौचित्यस्यातिशयः प्रत्याय्यते शास्त्रमित्येकवचनेन। एवमेवास्मिन्नैषधीयचरितपद्येऽपि -

**“दिगीशवृन्दांशविभूतिरीशिता दिशां स कामप्रसरावरोधिनीम्।**

**बभार शास्त्राणि दृशं द्वयाधिकां निजत्रिनेत्रावतरत्वबोधिकाम्”**।[118]

अस्यायमर्थः - अत्रापि दृशमित्येकवचनान्तेन पूर्ववदेव नले समग्रशास्त्र-समन्वयनशक्त्यतिशयः ख्याप्यते। एवं वचनं वचनवक्रताघटकम्।

## 10. वचनस्यौचित्य उपयोगः

औचित्यप्रस्थान औचित्यमेव काव्यस्य जीवितम्। यद्यस्य सदृशं तत्तस्योचितं कथ्यते, उचितस्य भाव औचित्यमित्युच्यते। वस्तुतो रसस्यापि जीवनमौचित्यमेव- **“औचित्यं रससिद्धस्य स्थिरं काव्यस्य जीवितम्”**।[119] अलङ्कारादीनामपि जीवनमौचित्यमेव। उक्तम्-

**“उचितस्थानविन्यस्तादलङ्कृतिरलङ्कृतिः।**

**औचित्यादच्युता नित्यं भवन्त्येव गुणा गुणाः”॥**

**“अलङ्कृतिरुचितस्थानविन्यासादलङ्कर्तुं क्षमा भवति, अन्यथा त्वलङ्कृतिव्यपदेशमेव न लभते। तद्वदौचित्यादपरिच्युता गुणा गुणतामासादयन्ति अन्यथा पुनरगुणा एव”।**

**“कण्ठे मेखलया नितम्बफलके तारेण हारेण वा,**

**पाणौ नूपुरबन्धनेन चरणे केयूरपाशेन वा ।**

**शौर्येण प्रणते रिपौ करुणया नायान्ति के हास्यता-**

**मौचित्येन विना रुचिं प्रतनुते नालङ्कृतिर्नो गुणाः”**॥[120]

---

[118] नैषधीयचरितम् - 1/6

[119] औचित्यविचारचर्चा – कारिका - 5

[120] अत्रैव, कारिका - 6

औचित्यस्य पदादीनि स्थानानि सप्तविंशतिर्वर्तन्ते प्रोक्तानि। तानि चेमानि परिगणितान्यौचित्यविचारचर्चाकारेण -

**“पदे वाक्य प्रबन्धार्थे गुणेऽलङ्करणे रसे।**

**क्रियायां कारके लिङ्गे वचने च विशेषणे।**

**उपसर्गे निपाते च काले देशे कुले व्रते ॥**

**तत्त्वे सत्त्वेऽप्यभिप्राये स्वभावे सारसंग्रहे ॥**

**प्रतिभायामवस्थायां विचारे नाम्न्यथाशिषि ।**

**काव्यस्याङ्गेषु च प्राहुरौचित्यं व्यापि जीवितम्” ॥**

**“एतेषु पदप्रभृतिषु स्थानेषु मर्मस्विव काव्यस्य सकलशरीरव्यापि जीवितमौचित्यं स्फुटत्वेन स्फुरदवभासते”**॥[121]

एषु स्थानेषु वचनमप्यौचित्यस्य स्थानम्। उचितैरेव वचनैः काव्यं रामणीयकं तथा बिभर्ति यथा मनीषिणां मुखम् उक्तम्-

**“उचितैरेव वचनैः काव्यमायाति चारुताम् ।**

**अदैन्यधन्यमनसां वदनं विदुषामिव”**।।[122]

वचनं कदाचनौचित्यं कदाचित्त्वनौचित्यं पुष्णाति। तत्र वचनेनौचित्यस्य पोषणं यथा -

**“त्रैलोक्याक्रमणैर्वराहविजयैर्निःसंख्यरत्नाप्तिभिः**

**प्रख्यातः स्वरसस्वयंवरशतैर्युद्धाब्धिमध्ये श्रियः ।**

**साश्चर्यैर्बलिबन्धनैश्च बहुभिर्नित्यं हसत्युत्थितः**

**पौलस्त्यः सकृदुस्यमश्रमवशाद्यासक्तनिद्रं हरिम्”**।[123]

---

[121] अत्रैव, कारिकाः - 8-10

[122] अत्रैव, कारिका - 22

[123] अत्रैव, कारिका – 22 इत्यस्याः व्याख्यायाम्, पृष्ठसङ्ख्या - 116-117

अस्यायमर्थः - अत्र शुकसारणाभ्यां रामस्याग्रे रावणस्य पराक्रमे वर्ण्यमाणे रावणस्य निद्राप्रियाद्धरेर्व्यतिरेकस्तेनोत्साहादिशयश्च त्रैलोक्याक्रमणैरित्यादिबहुवचनेनैव प्रतीयते, न तु त्रैलोक्याक्रमणेनेत्यादिनैकवचनेन। उक्तम् -

**"अत्र शुकसारणाभ्यां रघुपतेरग्रे दशग्रीवपराक्रमेऽभिधीयमाने यदुक्तं पौलस्त्यः शेषशायिनं हरिमेकवारोद्योगश्रमवशेन संसक्तालस्यनिद्रमनेकत्रैलोक्याक्रमणैर्वराहविजयिनां सुभटानां जयैरनेकरत्नप्राप्तिभिः समरसमुद्रमध्ये बहुवारविहितैः श्रियः स्वयंवरशतैर्बलिनां च लोकपालानां बन्धनैः प्रख्यातः सदोत्थितः सोत्साहः सततं हसतीति बहुवचनैरेव हरिवैलक्षण्यलक्षणमुपचितमौचित्यमुदञ्चितम्"।**[124]

वचनेनानौचित्यपरिपोषो यथा -

**"नायं निशाकरमुखसरोरुहराजहंसः,**

**कीरीकपोलतलकान्ततनुः शशाङ्कः।**

**आभाति नाथ ! तदिदं दिवि दुग्धसिन्धु-**

**पिण्डीरपिण्डपरिपाण्डु यशस्त्वदीयम्"।**[125]

अस्यायमर्थः - भवतो यशः सर्वत्र प्रसरणशीलं शुभ्रं चेति विविक्षितम्। किन्त्वेकवचनेन पिण्डमात्रपरिच्छिन्नत्वेन यशसः संकोचः प्रतीयते। इहैकवचनस्य विवक्षितविरुद्धबोधकत्वेनानौचित्यं परिपोष्यते। उक्तम्-

**"अत्र नायं शशी त्वदीयं दुग्धाब्धिफेनपिण्डपाण्डुरं यश इति यदभिहितं तदविच्छिन्नप्रसराणां यशसां बहुवचनेन वर्णनायां समुचितायामेकवचनोपन्यासश्चन्द्रबिम्बाकारेण पिण्डमात्रपरिच्छिन्नतया सङ्कोचरूपमनौचित्यमुद्भावयति"।**[126]

एवं वचनमौचित्यस्यानौचित्यस्य चाधिकरणम्।

---

[124] अत्रैव, पृष्ठसङ्ख्या - 118

[125] अत्रैव, पृष्ठसङ्ख्या – 118

[126] अत्रैव, पृष्ठसङ्ख्या - 119

अतो वक्तुं शक्यते यत् साहित्यशास्त्रेऽपि वचनस्य तदेव स्वरूपं स्वीकृतं यद् व्याकरणे, किन्तु साहित्ये वचनस्य तदेव स्वरूपं वास्तवमभिमतं यद् रसस्य वक्रोक्तेरौचित्यस्य वाऽनुगुणम्। वस्तुतो रसानुगुणत्वमेव वचनस्य साहित्यशास्त्रीयं स्वरूपम्। वक्रोक्त्यादेर्हि सिद्धान्ते रस एव पर्यवसानमिति विचारितमालङ्कारिकैः।

### 11. वचनभेदस्योपमादावदोषत्वम्

साहित्यशास्त्रानुगुणसिद्धान्तेषु श्लेषवक्रोक्त्युपमा-रसाद्यभिव्यक्त्यादिषु च शक्यते वचनस्य सङ्ख्याया वा स्वरूपवैशिष्ट्यं विशेषेणान्वेष्टुम्। तद्यथा - पूर्वोद्धृताष्टविधश्लेषेषु वचनश्लेषस्वरूपं तावल्लिङ्गश्लेषोदाहरणभूतश्लोक एव शक्यते द्रष्टुम्। तथा हि "भक्तिप्रह्वविलोकनप्रणयिनी नीलोत्पलस्पर्धिनी" इत्यत्र स्त्रीप्रत्ययान्तत्वमथ च तदभावे नपुंस्त्वमालक्ष्य विहितप्रयोगद्वयमेकवचनद्विवचनगतश्लेषेण वर्त्तते संयुतम्। एवमेव "मैथिली तस्य दाराः", **"फुल्लेन्दीवरकाननानि नयने पाणी सरोजाकाराः"**,[127] **"वक्रे भ्रुवावतितराम्"** [128] इत्याद्युदाहरणेषु वचनवक्रतासौन्दर्यं शोभतेतराम्।

उपमाऽलङ्कारे च वचनभेदरूपो भवति दोषः, यथा- **"ज्योत्स्ना इव सिता कीर्त्तिः"**,[129] इत्यत्रोपमानोपमेययोर्वचनभेदः, एवमन्यत्रापि बहुधेदृशाः प्रयोगा एतत्तत्त्वविचारायोपयुक्ताः।[130]

अन्यत्र च दोषप्रकरणेऽपि वचनस्वरूपं साहित्यशास्त्रीयं शक्यते निभालयितुम्। तद्यथा -

**"आदावञ्जनपुञ्जलिप्तवपुषां श्वासानिलोल्लासित-**

**प्रोत्सर्पद्विरहानलेन च ततः सन्तापितानां दृशाम्।**

---

[127] वक्रोक्तिजीवितम्, प्रथमोन्मेषः, पृष्ठसङ्ख्या - 86

[128] साहित्यदर्पणः, तृतीयः परिच्छेदः, पृष्ठसङ्ख्या - 160

[129] अत्रैव, सप्तमः परिच्छेदः, पृष्ठसङ्ख्या -618

[130] "प्राणा इव प्रियोऽयं मे" – काव्यादर्शः, द्वितीयः परिच्छेदः, पृष्ठसङ्ख्या - 47

"अविगाह्योऽसि नारीणामनन्यवचसामपि। विषमोपलभिन्नोर्मिरापगेवोत्तितीर्षतः"॥

- सरस्वतीकण्ठाभरणम्, प्रथमः परिच्छेदः, पृष्ठसङ्ख्या - 24

**सम्प्रत्येव निषेकमश्रुपयसा देवस्य चेतोभुवो**

**भल्लीनामिव पानकर्म कुरुते कामं कुरङ्गेक्षणा"॥**[131]

अत्र तावद् दृशां वपुषां चेत्यनयोर्बहुवचनप्रयोगो वृत्तपूरणायैवोपात्तञ्जातम्, तस्माच्च वचनगतदोषरूपोऽयं कविकर्म्मणि। न चात्र **"जात्याख्यामेकस्मिन् बहुवचनमन्यतरस्याम्"** इत्यस्य कथमपि प्रसङ्गः, श्लोकस्थात् साक्षात् "कुरङ्गेक्षणा" इत्येतत्पदाद् एकस्या एव स्त्रियो वर्णनात्। अनयैव दिशा प्रक्रमभङ्गान्तर्हितवचनदोषस्वरूपमप्यनुशीलयितुं शक्यते।[132]

**"लिङ्गवचनभेदोऽपि, उपमानोपमेययोः साधारणं चेत् धर्ममन्यरूपं कुर्यात् तदा, एकतरस्यैव तद्धर्मसमन्वयावगतेः सविशेषणस्यैव तस्योपमानत्वमुपमेयत्वं वा प्रतीयमानेन धर्मेण प्रतीयते, इति प्रक्रान्तस्यार्थस्य स्फुटमनिर्वाहादस्य भग्नप्रक्रमरूपत्वम्। यथा- चिन्तारत्नमिव च्युतोऽसि करतो धिङ्मन्दभाग्यस्य मे"।**[133]

**"सक्तवो भक्षिता देव शुद्धाः कुलवधूरिव"** [134]

अत्र कुलवधूरूपोपमेये सक्तुरूपोपमाने च क्रमेण एकत्वस्य बहुत्वस्य च सत्त्वेन सङ्ख्याभेदः । अत्र हि शुद्धाः इत्यस्य बहुवचनत्वेन उपमानेनैव सम्बन्धोऽर्थात् अन्वयो भवति न तूपमेयेन । यद्युपमेयेन योज्यं तदा शुद्धेति वचनविपरिणामो विधातव्यः । एवं वचनविपरिणामे सहृदयचेतसः संलग्नत्वेन रसभङ्गः।

---

[131] काव्यप्रकाशः, सप्तम उल्लासः, पृष्ठसङ्ख्या - 321

[132] "काचित् कीर्णा रजोभिर्दिवमनुविदधौ मन्दवक्त्रेन्दुलक्ष्मीरश्रीकाः काश्चिदन्तर्दिश इव दधिरे दाहमुद्भ्रान्तसत्त्वाः। भ्रेमुर्वात्या इवान्याः प्रतिपदमपरा भूमिवत् कम्पमानाः प्रस्थाने पार्थिवानामशिवमिति पुरो भावि नार्यः शशंसुः"॥

- अत्रैव, सप्तम उल्लासः, पृष्ठसङ्ख्या - 373

[133] काव्यप्रकाशः (वामनीटीकान्वितः)

[134] काव्यप्रकाशः, दशमः उल्लासः,पृष्ठसङ्ख्या - 622

**"सिन्धुसमाः पृथुरावा घनमालेवासारवृष्टिमुचः।**

**तरुभञ्जने प्रवाता भटसंहारे कीनाशाः"॥**[135]

अत्र प्रसङ्गप्राप्ता गजा उपमेया आसारवृष्टिमुच इति साधारणधर्मप्रतिपादकः शब्दो घनमालेत्युपमानम् एवमुपमानमेकत्वं गजे तद् विशेषेण च बहुत्वं तत्र घनमालापक्षे आसारवृष्टिमुगिति वचनपरिणामेन योजनं कर्तव्यं तेन रसभङ्गः । अतोऽत्र वचनभेदो दोषाय।

**"द्राक्षेव मधुरं वाक्यं चरितं कौमुदी यथा।**

**सदैवार्दाणि चेतांसि सुधेव सुमहात्मनाम्॥**[136]

उपपानभूतायां सुधायाम् एकत्वम् उपमेयभूते चेतसि बहुत्वं वर्तते। एकत्वबहुत्वसङ्ख्ययो: परस्परविरुद्धत्वाद् सादृश्यरूपोपमा विद्योतते। उपमायां समानधर्मोऽपेक्षित: सङ्ख्यारूपः अत्र विषम: अतो दोष: ।

**"सरांसीवामलं व्योम काशा इव सितः शशी ।**

**शशीव धवला हंसा हंसीव धवला दिशः"॥**[137]

अत्र पूर्वार्धे व्योमशशिनोरूपयोरुपमेययोः सरःकाशरूपयोरुपमानयोः क्रमेणैकत्वं बहुत्वं च वर्तते। उत्तरार्धे हंसदिग्रूपयोरुपमेययोर्बहुत्वं शशीहंसीरूपोपमानयोरेकत्वं चेते सङ्ख्याभेदेनोपमादोषः।

क्वचिद् वचनभेदो दोषाय न कल्पते यत्रोपमेयोपानाभ्याम् अन्वये वचनपरिवर्तनं न भवति। यथा-

**"तद्वेशोऽसदृशोऽन्याभिः स्त्रीभिर्मधुरताभृतः ।**

**दधते स्म परां शोभां तदीया विभ्रमा इव"॥**[138]

---

[135] प्रसन्नभारतम्, 8/25

[136] रसगङ्गाधरः, द्वितीयम् आननम्

[137] शृङ्गारप्रकाशः, 9/168

[138] साहित्यदर्पण:, सप्तम: परिच्छेद: पृष्ठसङ्ख्या - 619

यद्यपि तद्वेषरूपोपमेये विभ्रमरूपोपमाने च क्रमेण एकत्वस्य बहुत्वस्य च सत्त्वेन सङ्ख्याभेदोऽस्ति तथापि स नात्र दोष: । यतो हि असदृश इत्यत्र सदृशह्याकारान्त स्वीक्रियते मधुरताऽऽभृत इत्यत्र भृत इत्याकारान्तः शब्दोऽङ्गीक्रियते तदा तद्वेषरूपेणोपमेयेन अनयो: सम्बन्धः । यदा तु सदृक् इति हलन्तशब्द: अथ भृत इत्यत्र च हलन्तशब्दोङ्गीक्रियते तदा विभ्रमरूपोपमानेन अनयो: सम्बन्ध: । तथैव दधते इति दध धातो: आत्मनेपदे एकवचनं स्वीक्रियते तदोपमेयेन वेषेणस्य सम्बन्धा स्वीक्रियते तदा विभ्रमरूपोपमानेनास्य सम्बन्धः। अत्र यद्यपि उपमानोपमेययोः सङ्ख्याकृतभेदस्तयापि साधारणधर्मबोधकानां शब्दानाम् एकवचने बहुवचने चापि सम्भवेन दोषाय न भवति।

### 12. वचनाश्रितं तत्त्वान्तरविवेचनम्

वचनाश्रितं हि तत्त्वान्तरविचारक्रमे भोजराजप्रणीतः शृङ्गारप्रकाश इत्याख्यो ग्रन्थविशेषो नूनमतीव महत्त्वपूर्णः। तत्र हि सङ्ख्यायाः वचनस्य वा भेदविषयो व्याकरणं साहित्यञ्चेति शास्त्रद्वयसमन्वयेन सह कथञ्चिन्नवीनशैल्यां चर्चितः। तत्र हि सङ्ख्यायाः षड् भेदाः सन्ति प्रोक्ताः। ते सोदाहरणं यथाक्रमञ्चेमे- सा षोढा– आभिधानिकी, वैवक्षिकी, नैमित्तिकी, पारिभाषिकी, वैभाषिकी, पारिशेषिकी च।[139]

सङ्ख्यायाः वचनस्य वा निर्धारणं येषां शब्दानां जातमस्ति तेषां शक्यते परिगणनम् आभिधानिक्याः सङ्ख्यायाः वर्गे। तद्यथा – आपः, दाराः, लाजाः, द्वयम्, नियुतम् इत्यादयः नैकेऽन्ये शब्दाः।

यत्र च विवक्षाधीना भवति सङ्ख्या सा वैवक्षिकी इत्युच्यते। तद्यथा – रोदसी, रोदस्यौ, कबरी, कबर्यः, स्तनौ, स्तनाः, दृक्, दृशौ, दृशः, विशाखा, विशाखे, विशाखाः, जगत्, जगती, जगन्ति।

यत्र च वस्तुनो निमित्तस्य सद्भावो भवति सा सङ्ख्या नैमित्तिकीत्युच्यते। तद्यथा – वृक्षः, शोभनः, दम्पती, पितरौ, अक्षाः, गभस्तयः।

---

139 शृङ्गारप्रकाशः, षष्ठः प्रकाशः, पृष्ठसङ्ख्या - 289

यत्र द्वित्वबहुत्वादिषु एकत्वादिपरिभाषणं विधीयते शास्त्रानुसारं सा हि सङ्ख्या पारिभाषिकीति निगद्यते। तद्यथा – पञ्चाला जनपदः (काशिका 1/2/52), मार्दङ्गिकपाणविकं पुरुषौ (काशिका 2/4/2), खलतिकं वनानि (काशिका 2.4.12), गोदौ ग्रामः (काशिका 1/2/51), तिष्यपुनर्वसू तारकाः (काशिका 1/2/63), स चाहं पचाव इत्यादिप्रयोगाः।

यत्र भवन्ति विभाषयैकत्वद्वित्वबहुत्वानि सा हि सङ्ख्या वैभाषिकीत्युच्यते। तद्यथा – प्लक्षन्यग्रोधं प्लक्षन्यग्रोधाः (काशिका 2/4/12), अश्ववडवम् अश्ववडवौ (काशिका 2/4/12), पूर्वे फल्गुन्यौ पूर्वाः फल्गुन्यः (काशिका 1/2/60) इत्यादयो नैके प्रयोगाः।

एकाद्युक्तसङ्ख्यापरिशेषे स्वादयो जायन्ते सा हि सङ्ख्या पारिशेषिकीति कथ्यते। परिशेषादागता पारिशेषिकी भवति.... तद्यथा अग्रलिखितेषु शब्दगतप्रकृतिभिः स्वयमेव सङ्ख्या वचनं वा प्रोक्तमेव..परं विभक्त्यन्तर्भूतसङ्ख्यात्वं पुनः प्रत्ययद्वारा परिशेषरूपेण – एकः, द्वौ, बहवः, उभौ, द्वित्राः, अर्धतृतीया इति। वाक्यपदीये तावदुक्तम् –

**“निमित्तमेकमित्यत्र विभक्त्या नाभिधीयते।**

**तद्गतस्तु यदेकत्वं विभक्तिस्तत्र वर्तते”॥**[140]

अत्रैव शृङ्गारप्रकाशे साधर्म्यादिभिरर्थान्तरेऽनुवृत्तः पदार्थधर्मो वचनने निवर्त्यते सा भवति वचननैषेधिकी[141]-नाम्नी व्यपेक्षा, तस्याः एव विशिष्टः कश्चन प्रसङ्गोऽस्ति समुपन्यस्तः। प्रतीयमाननिमित्ता निवृत्तिनिमित्ता च भवतीयं वचननैषेधिकी। प्रतीयमाननिमित्ता यथा–

---

140 वाक्यपदीयम् 3/11/7

141 अत्रैव, अष्टमः प्रकाशः, पृष्ठसङ्ख्या - 403

**"मूले कण्टकसन्ततिरुपरि च विकचानि रक्तकुसुमानि।**

**एतावतैव शाल्मलिरनुहरति न पङ्कजवनस्य"॥**[142]

इह शाल्मलिसादृश्यं कण्टककुसुमसाधर्म्यात् पङ्कजवनेऽनुवृत्तं प्रतीयमानसौगन्ध्यादिगुणाभावसूचकेन वचनेन निवर्त्यते।

निवृत्तिनिमित्ता यथा –

**"कार्यज्ञः प्रष्टव्यो न पुनर्मान्यो मम प्रियो वेति।**

**गुरुरत्रासनसेव्यः प्रियानितम्बः कदा मन्त्री"॥**[143]

अत्र यो यस्य मान्यः प्रियो वा स तस्य मन्त्रीति सामान्येन मान्यत्व-प्रियत्वाभ्यां मान्यप्रियानुवृत्ता प्रष्टव्यता प्रियानितम्बदृष्टान्तावष्टम्भशोभिनाभिधीयमानकार्यज्ञत्वाभावसूचकेन वचनेन निवर्त्यते। एवं वचनगतं साहित्य-शास्त्रीयं गूढं स्वरूपमप्यस्य वैलक्षण्यं सुस्पष्टयत्येव।

---

142 अत्रैव समुद्धृतः

143 अत्रैव समुद्धृतः

# पञ्चमोऽध्यायः

## लिङ्गवचनज्ञानोपायविमर्शः

सत्त्वरजस्तमसां साम्यावस्थैव प्रकृतिः प्रधानं वा। अर्थात् पूर्वोक्तानां सत्त्वरजस्तमोरूपाणां गुणानां साम्यावस्थैव प्रकृतिः। गुणत्रये केनापि रूपेणोपचयापचयावस्थाप्राप्तौ सृष्टिकार्यं जायतेऽर्थात् स्त्रीत्वं पुंस्त्वञ्च सृष्टिकार्यसक्षमं परं नपुंसकत्वं तु सृष्टिकार्याक्षमत्वमेव ब्रूते।

वस्तुतस्तु शब्दस्यापि प्रकृतिव्यतिरिक्तत्वं नास्ति यतो गुणक्षोभकार्यं शब्दार्थयोरपि प्रकाशते। अतोऽर्थे गुणगतं प्राधान्यं वैशिष्ट्यं वाऽवलोक्य पुरा सकलतत्त्वज्ञा साक्षात्कृतधर्म्माण ऋषयः शब्देऽपि विभिन्नलिङ्गस्थितिं साधयन्ति स्म। यथा - ब्रह्म, ब्रह्मा, ब्रह्माणी। अनन्तानन्दचैतन्यैकरसे किमपि गुणगतं वैशिष्ट्यं न भवतीति ब्रह्मशब्दो नपुंसकलिङ्गः, किन्तु सत्त्वाधिक्ये 'ब्रह्मा' इति शब्दस्य पुँल्लिङ्गत्वम्। एवमेव रजस आधिक्ये ब्रह्माणीत्यस्य स्त्रीलिङ्गत्वम्।

यद्यपि तत्त्वज्ञैर्ऋषिभिः शब्दानां लिङ्गनिर्णयः कृतः किन्तु परवर्तिकाले लोकप्रयोगे बहुधा विपर्ययोऽपि सञ्जातः। अत एव संस्कृतसाहित्ये वृद्धव्यवहारं शब्दसंस्कारञ्च परित्यज्य अनेकेषु प्रयोगेषु लिङ्गनिर्णयव्यवस्था न सम्भाव्यते।

महर्षिपतञ्जलिनाप्युक्तम् – **"तस्मान्न वैयाकरणैः शक्यं लौकिकं लिङ्गमास्थातुम्। एवं लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्येति"**।[1] लिङ्गनिर्णयस्य दुःसाध्यत्वसाधनं 'स्त्रियाम्' इति पाणिनीयसूत्रभाष्ये व्याघ्रभूतेः श्लोकवार्तिकस्थप्राचीनकारिकामुपजीव्य व्याडीयसङ्ग्रहदृष्टिसाहाय्येन पतञ्जलिना यदुक्तं तदुच्यते- 'का स्त्री नाम? लौकिकस्त्रीग्रहणे खट्वादिष्वव्याप्तिस्तथा भ्रूकुंसादिष्वतिव्याप्तिरिति दर्शनात्। लोकत एते शब्दाः प्रसिद्धाः स्त्री पुमान् नपुंसकमिति। यल्लोके दृष्ट्वैतदवसीयत इयं स्त्री, अयं पुमानिदं नपुंसकमिति सा स्त्री स पुमांस्तन्नपुंसकमिति। किं पुनर्लोके दृष्ट्वैतदवसीयत इयं स्त्री, अयं पुमानिदं नपुंसकमिति? लिङ्गम्। किं पुनस्तत्?

---

[1] पाणिनीयव्याकरणमहाभाष्यम् – अष्टाध्यायीसूत्रसङ्ख्या – 4/1/3 इत्यत्र

एवं प्रश्नोदये सत्यपरोऽपि प्रश्न एको विशिष्टोऽयं प्रादुर्भवति यल्लिङ्गात् स्त्रीपुंसयोर्ज्ञाने सत्यपि स्त्रीवेषधारिणि पुरुष एव नटे पुँल्लिङ्गत्वं परं वेषाधारं स्वीकृत्य भ्रूकुंसशब्दतष्टाप् कथं न स्यादित्यवशिष्यते नूनं विना लिङ्गाधृतविशिष्टज्ञानोपायस्वरूपम्। एवमेव तटे खल्वपि सर्वाणि लिङ्गानि दृष्ट्वा तटः, तटी, तटम्, कस्तदध्यवसातुमर्हतीयं स्त्रयं पुमानिदं नपुंसकमिति। तस्मान्न वैयाकरणैः शक्यं लौकिकं लिङ्गमास्थातुम्। अवश्यं च कश्चित् स्वकृतान्त आस्थेयः। कोऽसौ स्वकृतान्तः? एवं प्रश्नसमुदायो भवत्याविर्भूतः। परं यथाविनिर्धारितवचनम् एकैकश इममेव कृतान्तं राद्धान्तं सिद्धान्तजातं वा व्याकरणसाहित्यशास्त्रदृशा पूर्वत्राध्यायेषु विचार्य लिङ्गगतम् अथ प्राणः प्राणाः आपः दाराः इत्येवम्भूतेषु बहुविधेष्वेवोदाहरणेषु वचनगतं चापि स्वरूपसिद्धान्तविश्लेषणादिकं यथायोगं कर्तुं प्रयत्तम्।

साम्प्रतं सर्वप्रथमं तु सर्वतः स्वीकृतव्याकरणस्वरूपमष्टाध्यायीग्रन्थमाधृत्य तद्गतसूत्रवार्तिकस्वरूपं वा विशदीकृत्य लिङ्गवचनज्ञानोपायार्थम् आदौ विमृश्यते।

## अष्टाध्याय्याः केषाञ्चित् प्रमुखसूत्राणां लिङ्गवचनपराणां ज्ञानोपायविमर्शः –

महति व्याकरणनिकाये पाणिनेराचार्यस्य व्याकरणमतिप्रसिद्धं सुव्यवस्थितञ्च, कारणं तत्र मानकता, सूत्रात्मिका शैली च। तदेतत्पाणिनेराचार्यस्य व्याकरणमष्टस्वध्यायेषूपनिबद्धम्, अत एव **अष्टाध्यायी** (अष्टानामध्यायानां समाहारात्मको ग्रन्थविशेषः) इति सुप्रथितम्। अस्मिन् व्याकरणे पाणिनिनाचार्येण सूत्रेषु लिङ्गविभक्तिवचनगतसामान्यनियमस्वरूप-मतिक्राम्याप्यनेकत्र विशिष्टप्रयोगो व्यधाय्यनेकत्र चाजन्तहलन्तरूपात्मकोऽपि। नैतावदेव विशेषणविशेष्यसम्बन्धिनियमोऽप्यनेकत्रात्यक्रामि। तद्यथा विशेषण-विशेष्यसम्बद्धोऽयं नियमो वैयाकरणनिकायेऽतीव सुप्रसिद्धो यत् -

“या विशेष्येषु दृश्यन्ते लिङ्गसङ्ख्याविभक्तयः।

प्रायस्ता एव कर्त्तव्याः समानार्थे विशेषणे”॥

अर्थाद् यल्लिङ्गं यद्वचनं या च विभक्तिर्विशेष्यस्य, तल्लिङ्गं तद्वचनं सैव विभक्तिर्विशेषणस्यापि भवेदिति। अत्राष्टाध्याय्याः कानिचिद्विशिष्टसूत्राणि लिङ्गविभक्तिवचनविचारनिदर्शनाय अधस्तात् प्रस्तूयन्ते। तत्रेमानि सूत्राणि वचनसम्बद्धानि, लिङ्गसम्बद्धानि, लिङ्गवचनोभयसम्बद्धानि सन्ति। सूत्रस्वरूपतद्गतोदाहरणव्याख्यादिभिर्वस्तुतः स्वयमेवाधारभूतं लिङ्गवचनज्ञानमाप्यते। इह तावत् तज्ज्ञानोपायविमर्शः सूत्राणां वर्गीकृतस्वरूपमनुश्रित्य क्रमशः प्रस्तूयते।

**वचनसम्बद्धानां केषाञ्चित् प्रमुखसूत्राणां ज्ञानोपायविमर्शः -**

सूत्राणीमानि द्विधा विभक्तुं शक्यानि -

1. येषु सूत्रेषु साक्षाद्वचनशब्दप्रयोगः शब्दसिद्धौ विहितङ्गतो वचनपरकार्यं वा स्याद् विहितम्। तद्यथा -

**ईदूदेद्द्विवचनं प्रगृह्यम्[2]**

ईकारान्तमूकारान्तमेकारान्तं च द्विवचने प्रयुक्तं पदं प्रगृह्यसंज्ञं भवति । यथा हरी एतौ, विष्णू इमौ, गङ्गे अमू इत्यत्र क्रमशः ईकारान्तस्योकारान्तस्यैकारान्तस्य च प्रगृह्यसंज्ञत्वात् प्लुतप्रगृह्या अचि नित्यमिति प्रकृतिभावः।

**लुपि युक्तवद्व्यक्तिवचने[3]**

लिङ्गवचने लुपि सति प्रकृतिवत् भवतः । यथा पञ्चालानां निवासो जनपदः पञ्चालाः इत्यत्र लुपि सति लिङ्गवचने पञ्चालप्रकृतिवत् भवतः।

**विशेषणानां चाजातेः[4]**

---

[2] अत्रैव 1/1/11

[3] अत्रैव 1/2/51

**हरीतक्यादिषु व्यक्तिः (वार्त्तिकम्), खलतिकादिषु वचनम् (वार्त्तिकम्), मनुष्यलुपि प्रतिषेधः (वार्त्तिकम्)**

जातिं वर्जयित्वा लुबर्थस्य विशेषणानामपि लिङ्गवचने प्रकृतिवत् भवतः। यथा पञ्चाला रमणीयाः गोदौ रमणीयौ इत्यत्र पञ्चाला, गोदौ इति उभावपि जनवाचकौ शब्दौ अतस्तयोः विशेषणस्य रमणीयपदस्य लिङ्गं वचनं च प्रकृतिवत् वर्त्तते। एषा लिङ्गवचनानां प्रकृतिवत्ता जातिवाचकपदाय न भवति, यथा पाञ्चाला जनपदः, गोदौ ग्रामः  इत्यत्र लिङ्गवचने प्रकृतिवन्न स्तः। हरीतक्यादिषु लुबर्थस्य विशेषणानां लिङ्गं प्रकृतिवत् भवति, यथा हरीतक्याः फलानि हरीतक्यः इत्यत्र हरीतक्या लिङ्गमेव प्रकृतिवत् वर्त्तते। खलतिकादिषु लुबर्थस्य विशेषणानां वचनं प्रकृतिवत् भवति। यथा खलतिकस्य पर्वतस्यादूरभवानि खलतिकं वनानि इत्यत्र खलतिकशब्दस्य वचनमेव प्रकृतिवत् वर्त्तते। मनुष्यलक्षणे लुबर्थे विशेषणानां लिङ्गवचनं प्रकृतिवत् न भवति, लुबन्तस्य तु भवतीत्यर्थः। चञ्चा अभिरूपः । अभिरूपस्य विशेषणपदं यच्चञ्चारूपं तदाधृत्य लिङ्गवचने न विशेष्यपदे भवतः। विशेष्यपदं तु मनुष्यपदसमानत्वमाश्रयते।

**तदशिष्यं संज्ञाप्रमाणत्वात्[5]**

उपर्युक्तयुक्तवद्भावकथनम् संज्ञाप्रमाणत्वात् शासितुं न शक्यते। संज्ञाशब्दाः विविधलिङ्गवचनेषु पठिताः प्रमाणं भवन्ति। पञ्चालाः, वरणा इति चैते योगशब्दाः नापितु जनपदादीनां संज्ञाः वर्त्तन्ते। तत्र लिङ्गं वचनं च यत्नैर्न प्रतिपाद्येते अपितु स्वभावत एव सिध्यतः, यथा आपः, दाराः, गृहाः, सिकताः, वर्षाः इत्यादिषु लिङ्गं वचनं च स्वभावसंसिद्धं वर्त्तते।

---

[4] अत्रैव 1/2/52

[5] अत्रैव 1/2/53

**प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात्**[6]

प्रधानार्थवचनमर्थात् समासादिषु इदं पदं प्रधानमिदमप्रधानम्, प्रत्ययार्थवचनमर्थात् तव्यदादिषु प्रत्ययेषु अयं प्रत्ययोऽस्मिन् अर्थे भवतीति वचनम्। द्वयमपीदमर्थस्य लोकाधीनत्वात् शासितुं न शक्यते। अभिप्रायोऽयं यद्यैर्व्याकरणं नाधीतं तेऽपि राजपुरुषमानयेत्युक्ते राजपुरुषमेवानयन्ति न तु राजानं पुरुषमात्रं वानयन्ति। औपगवमानयेत्युक्ते च न कश्चिदुपगुमानयति न वा केवलमपत्यमपितु उपगुविशिष्टं पुरुषमेवानयन्ति। अत इदं प्रधानप्रत्ययार्थवचनं लोकाधीनन्ततः शासितुं न शक्यते।

अस्मिन् सूत्रे आगतं वचनपदं कथनपर्यायो न सङ्ख्यामभिव्यनक्त्यभिधातव्यम्। एवंविधानि अन्यान्यपि सूत्राणि सन्ति, यत्र वचनशब्दस्य कथनपर्यायत्वेन निदर्शनं वर्त्तते यथा, **मध्ये पदे निवचने च**[7] इति सूत्रे **निवचनं वचनाभावः अव्ययीभावः**, निपातनादेकारान्तत्वं निवचने इति। अत्रापि वचनशब्दः कथनपर्यायोऽवबोध्यः। **विभाषितं विशेषवचने बहुवचनम्**[8] अस्मिन् सूत्रे आगतस्यापि वचनशब्दस्य पूर्ववत् कथनार्थः सहैव च सङ्ख्याऽर्थोऽपि।

**जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्**[9]

जातिर्नाम एकः पदार्थः। एकत्वाभिधाने एकवचनमेव प्राप्यते, अत एवेदं वचनम्। जातेः आख्यायाम् एकत्वार्थे बहुवचनं विकल्पेन स्यात्। जातिवचनवत् तद्विशेषणानामजातिशब्दानामपि बहुवचनमुपपद्यते। यथा सम्पन्नो व्रीहिरित्यत्रैकत्वम्, सम्पन्ना व्रीहय इत्यत्र च बहुत्वम्।

---

[6] अत्रैव 1/2/56

[7] अत्रैव 1/4/75

[8] अत्रैव 8/1/74

[9] अत्रैव 1/2/58

**अस्मदो द्वयोश्च**[10]

**सविशेषणस्य प्रतिषेधो वक्तव्यः (वार्त्तिकम्), युष्मदि गुरावेकेषाम् (वार्त्तिकम्)**

अस्मदोऽर्थस्य एकत्वे द्वित्वे चान्यतरस्यां बहुवचनं भवति। अहं ब्रवीमि इत्यस्य वयं ब्रूम इति विकल्पेन एकत्वे बहुवचनम्। आवां ब्रूव इत्यस्य वयं ब्रूम इति विकल्पेन द्वित्वे बहुवचनम्। विशेषणयुक्तस्य अस्मदोऽर्थस्य बहुवचनस्य प्रतिषेधो वक्तव्यः। अहं देवदत्तो ब्रवीमि, अहं गार्ग्यो ब्रवीमि, अहं पटुर् ब्रवीमि इत्यादिषु बहुवचनं न भवति। केषाञ्चिदाचार्याणां मतेन युष्मदि बहुवचनं विकल्पेन भवति। यथा त्वं मे गुरुः, यूयं मे गुरवः इत्यत्र विकल्पेन बहुवचनमस्ति।

**फल्गुनीप्रोष्ठपदानां च नक्षत्रे**[11]

फल्गुन्यौ द्वे नक्षत्रे, प्रोष्ठपदेऽपि द्वे नक्षत्रे। द्वयोर्द्विवचने प्राप्ते इदं वचनम्। द्वयोः फल्गुन्योः द्वयोः प्रोष्ठपदयोश्च विकल्पेन बहुवचनं भवति। यथा उदिते पूर्वे फल्गुन्यौ इति द्विवचनम्, उदिताः पूर्वाः फल्गुन्य इति बहुवचनम्, उदिते पूर्वे प्रोष्ठपदे इति द्विवचनम्, उदिताः पूर्वाः प्रोष्ठपदाः इति बहुवचनम्।

**छन्दसि पुनर्वस्वोरेकवचनम्**[12]

पुनर्वस्वोः द्वयोः नक्षत्रयोः एकवचनं विकल्पेन भवति छन्दसि। यथा पुनर्वसुर्नक्षत्रम्, पुनर्वसू नक्षत्रे इति क्रमशः एकवचनद्विवचने।

---

[10] अत्रैव 1/2/59

[11] अत्रैव 1/2/60

[12] अत्रैव 1/2/61

**विशाखयोश्च**[13]

द्वयोर्विशाखयोर्नक्षत्रयोः विकल्पेन एकवचनं भवति छन्दसि। यथा विशाखा नक्षत्रम्, विशाखे नक्षत्रे इति क्रमशः एकवचनद्विवचने।

**तिष्यपुनर्वस्वोर्नक्षत्रद्वंद्वे बहुवचनस्य द्विवचनं नित्यम्**[14]

तिष्य एकः, पुनर्वसू द्वौ, एतेषां द्वन्द्वे बहुत्वं प्राप्तं नित्यं द्विवचनं विधीयते। उदितौ पुनर्वसू दृश्येते इति नित्यं द्विवचनम्।

**बहुषु बहुवचनम्**[15]

बहुत्वविवक्षायां बहुवचनं स्यात्। बहुवचनविधायकं सामान्यसूत्रमिदम्।

**द्व्येकयोर्द्विवचनैकवचने**[16]

द्वित्वैकत्वविवक्षायां द्विवचनैकवचने भवतः। द्विवचनैकवचनविधायकं सामान्यसूत्रमिदम्।

**तान्येकवचनद्विवचनबहुवचनान्येकशः**[17]

लब्धप्रथमादिसंज्ञानि तिङस्त्रीणि त्रीणि वचनानि प्रत्येकमेकवचनादिसंज्ञानि भवन्ति।

---

[13] अत्रैव 1/2/62

[14] अत्रैव 1/2/63

[15] अत्रैव 1/4/21

[16] अत्रैव 1/4/22

[17] अत्रैव 1/4/102

**सुपः**[18]

सुपस्त्रीणि त्रीणि वचनान्येकश एकवचनद्विवचनबहुवचनसंज्ञानि भवन्ति।

**एकवचनं संबुद्धिः**[19]

संबोधने प्रथमाया एकवचनं संबुद्धिसंज्ञं भवति।

**द्विगुरेकवचनम्**[20]

सङ्ख्यापूर्वो द्विगुरित्युक्तो द्विगुसमास एकस्यार्थस्य वाचको भवति। यथा पञ्च पूलाः समाहृताः पञ्चपूली इत्यत्र द्विगुसमासस्य एकवद्भावात् एकवचनम्।

**अवृद्धादपि बहुवचनविषयात्**[21]

अनेन सूत्रेण वृद्धसंज्ञकात् अवृद्धसंज्ञकाच्च जनपदवाचिशब्दात् जनपदावधिवाचिशब्दाच्च बहुवचनविषयकात् शैषिकार्थेषु वुञ्प्रत्ययो विधीयते। तदनेन आङ्गकः इत्यादयोऽवृद्धाः जनपदवाचिनः, आजमीढकः इत्यादयोऽवृद्धाः जनपदावधिवाचिनः, दार्वकः इत्यादयो वृद्धाः जनपदवाचिनः, कालञ्जरक इत्यादयश्च वृद्धाः जनपदावधिवाचिनः प्रयोगाः सिध्यन्ति।

**जनपदिनां जनपदवत् सर्वं जनपदेन समानशब्दानां बहुवचने**[22]

बहुवचने जनपदेन समानशब्दानां जनपदिनां (जनपदस्वामिनां) जनपदवत् प्रत्ययः प्रकृतिश्च सर्वं भवति, सोऽस्य भक्तिः इत्येतस्मिन् विषये। जनपदतदवध्योश्च इत्यत्र प्रकरणे ये प्रत्यया विहितास्ते जनपदिभ्योऽस्मिन्नर्थे

---

[18] अत्रैव 1/4/103

[19] अत्रैव 2/3/49

[20] अत्रैव 2/4/1

[21] अत्रैव 4/2/125

[22] अत्रैव 4/3/100

अतिदिश्यन्ते। अङ्गा क्षत्रिया भक्तिरस्य, अङ्गा जनपदो भक्तिरस्य आङ्गकः इत्यत्र जनपदिनां जनपदवत् बहुवचने प्रकृतिः प्रत्यययादिकं सर्वं समानमेव।

**एकवचनस्य च**[23]

युष्मदस्मद्भ्यामुत्तरस्य पञ्चम्या एकवचनस्य अत् इत्यादेशो भवति। त्वत्, मत् इत्युदाहरणे।

**ई च द्विवचने**[24]

अस्थ्यादीनाम् छन्दसि विषय उदात्त ईकारादेशो भवति छन्दसि विषये। अक्षीभ्यां ते नासिकाभ्यामित्यत्र ईकारादेशः।

**प्रथमायाश्च द्विवचने भाषायाम्**[25]

भाषायां विषये युष्मदस्मदोराकारोऽन्तादेशो भवति द्विवचने। युवाम् आवाम् इत्युदाहरणेऽस्य भवतः।

**युवावौ द्विवचने**[26]

द्विवचने युष्मदस्मदोर्मपर्यन्तस्य युवावौ आदेशौ भवतो विभक्तौ। युवाम्, आवाम्, युवाभ्याम्, आवाभ्याम्, युवयोः, आवयोः इत्युदाहरणान्यस्य भवन्ति।

---

[23] अत्रैव 7/1/3

[24] अत्रैव 7/1/77

[25] अत्रैव 7/2/88

[26] अत्रैव 7/2/92

**त्वमावेकवचने**[27]

एकवचने युष्मदस्मदोर्मपर्यन्तस्य त्वमौ भवतो विभक्तौ। त्वाम्, माम्, त्वया, मया, त्वत्, मत्, त्वयि, मयि इत्युदाहरणान्यस्य भवन्ति।

**बहुवचनस्य वस्नसौ**[28]

युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयायाः बहुवचनस्य वस्नसौ आदेशौ भवतः। अस्माकम्, अस्मभ्यम्, अस्मान् इत्येषां स्थाने नः, युष्माकम्, युष्मभ्यम्, युष्मान् इत्येषां स्थाने वः इति।

**तेमयावेकवचनस्य**[29]

युष्मदस्मदोः षष्ठीचतुर्थ्योः एकवचनस्य ते मे इत्येतावादेशौ भवतः। तव इत्यस्य स्थाने ते, मम इत्यस्य स्थाने मे च।

**एत ईद्बहुवचने** [30]

बहुवचने अदसो दात्परस्य एकारस्य स्थाने ईकारः स्याद् दकारस्य च स्थाने मकारः स्यात्। अमी इत्यस्योदाहरणं वर्त्तते।

2. येषु सूत्रेषु वचनानि विशिष्टतया प्रायोजिषत।

[27] अत्रैव 7/2/97

[28] अत्रैव 8/1/21

[29] अत्रैव 8/1/22

[30] अत्रैव 8/2/81

**हलोऽनन्तराः संयोगः**[31]

अत्र **"संयोगः"** इति पुँल्लिङ्गे प्रथमाविभक्तेरेकवचनस्य रुपं, पदमिदमत्र विशेष्यं वर्त्तते। अस्य च विशेषणपदं भवति- **"हलोऽनन्तरा"** इति, पुँल्लिङ्गे प्रथमाविभक्तेर्बहुवचनान्तं रूपम्। तत्कथमिदमाचरितम्माचार्येण एकवचनान्तविशेष्यस्य बहुवचनान्तं विशेषणम् ? तदत्र व्याख्यानतो विशेषप्रतिपत्ति: क्रियते । तद्यथा- **"इन्द्र:"** इत्यत्र अनन्तरा हल: (न्,द्,र्) समस्ता न तु व्यस्ता: संयोगसञ्ज्ञका: । यद्यत्र **"संयोगाः"** इति पदस्य प्रयोगं कुर्यात् तर्हि न्,द्,र् इत्येते हलो व्यस्तरुपेऽपि संयोगसञ्ज्ञका: स्यु:। यथा काव्यप्रकाशे काव्यहेतुप्रसङ्गे मम्मटाचार्यः -

**"शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवक्षणात्।**

**काव्यज्ञशिक्षयाऽभ्यास इति हेतुस्तदुद्भवे"॥**[32]

इत्यत्र हेतुत्रयमुपदिश्याप्यन्ते **"हेतु:"** इत्येकवचनान्तप्रयोग: कृतो व्याख्यानतश्च **"हेतुर्न तु हेतव"** इति । अत्रापि सूत्रे स्यात्तद्वदेवान्यथाऽनुपपत्तेः।

अपि च काशिकाकृन्मतानुसारेण अनन्तराणां हलां समुदायः संज्ञी, इदं च बहुवचनं जातौ वर्त्तते। तेन द्वयोर्हलोर्बहूनां च हलां संयोगसंज्ञा सिध्यति।[33]

**तरप्तमपौ घः[34], क्तक्तवतू निष्ठा[35], आदिर्ञिटुडवः[36], यू स्त्र्याख्यौ नदी[37], लः परस्मैपदम्[38], तङानावात्मनेपदम्[39], तौ सत्[40]** इत्यादिषु सूत्रेषु संज्ञिपदे द्विवचनं

---

[31] अत्रैव 1/1/7

[32] काव्यप्रकाशः1/3

[33] काशिकावृत्तिः, 1/1/7

[34] अत्रैव 1/1/22

[35] अत्रैव 1/1/26

[36] अत्रैव 1/3/5

बहुवचनं वा संज्ञापदे च एकवचनम्, संज्ञापदेऽपि द्विवचनं बहुवचनं स्यात्। संज्ञिपदे इतरेतरयोगद्वन्द्वसमासो वर्त्तते ततः संज्ञायाः इतरेण इतरेण योगो भवति। अत्र संज्ञिनामेका एव संज्ञा अस्तीति निर्देष्टुं संज्ञापदे एकवचनमभिहितम्।

कुत्रचित्संज्ञिपदेषु बहुषु सत्स्वपि एकवचनमाचार्येण विहितं, यथा **बहुगणवतुडति संख्या**[41]**, वृद्धिरादैच्**[42]**, अदेङ् गुणः**[43] इत्यादिषु सूत्रेषु संज्ञिपदे एकवचनमभिधाय सूत्रे लिङ्गवचनानामतन्त्रतापि द्योतिता।

**मिदचोऽन्त्यात्परः**[44]

अस्मिन् सूत्रे अच इत्यस्मिन् पदे षष्ठीविभक्त्या एकवचनम्, किन्तु अर्थनिर्धारणावसरे व्याख्याकाराः अचामिति व्यक्तिपक्षमाश्रित्य बहुवचनत्वेन अच इति पदं विपरिणमयन्ति।

**हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः**[45]

हेतु-मनुष्याभ्यामित्यपेक्षितमासीत् स्वरूपविधिनिरासमाश्रित्य एतद्द्वयवाचकेभ्यः शब्देभ्यः विकल्पेन रूप्यप्रत्ययो भवति।

---

[37] अत्रैव 1/4/3

[38] अत्रैव 1/4/99

[39] अत्रैव 1/4/100

[40] अत्रैव 3/2/127

[41] अष्टाध्यायी 1/1/23

[42] अत्रैव 1/1/1

[43] अत्रैव 1/1/2

[44] अत्रैव 1/1/47

[45] अत्रैव 4/3/81

**उगिदचां सर्वनामस्थानेऽधातोः**[46]

अत्र उगिच्छब्दस्य अञ्चुधातोश्च सत्त्वात् सूत्रवपुषि उगिदचोः इति द्विवचनमेव युक्तियुक्तं भाति। परन्तु दर्भपवित्रपाणिनिना आचार्यपाणिनिना कथमिवात्र बहुवचनं प्रयुक्तमिति सन्देहे समुत्पन्ने वस्तुतः उगिद्रूपेण समान् उगितान् अङ्गान् मनसि निधाय अत्र बहुत्वमुल्लिखितम्।

एकवचनद्विवचनबहुवचनप्रतिपादकसूत्राणां ज्ञानोपायविमर्शानन्तरमष्टके कानिचन सूत्राणि एवंविधानि प्राप्यन्ते यानि द्वित्वकार्यविधायकानि सन्ति। इदानीं तेषां ज्ञानोपायविमर्शः विधीयते। अष्टाध्याय्यां यत्र कस्यचिद् शब्दस्य वर्णस्य वा द्वे भवतस्तदेव द्वित्वशब्देनात्राभिप्रीयते। तेषामपि संक्षेपेणेह वर्णनं क्रियते।

**वर्णद्वित्वम्** -

**अचो रहाभ्यां द्वे** [47]**, अनचि च**[48] **-** अचः परतः यौ रेफहकारौ ताभ्यां परस्य यरः प्रत्याहारस्य स्थाने द्वित्वं भवति। अर्कः, अर्क्कः। अचः परस्य यरः अनचि परं विकल्पेन द्वित्वं भवति। दध्यत्र, दद्ध्यत्र। इदमेकं स्थलं यत्र वर्णद्वित्वं भवति। अपरं चाधस्तात् दीयते-

**"एकाचो द्वे प्रथमस्य"**[49] **-** अधिकारसूत्रमिदं **"चङि**[50]**"** इति यावत्, सूत्रेणानेन प्रथमस्यैकाचो द्वित्वं विधीयते। यथा - पपाच, इयाय। **"अजादेर्द्वितीयस्य"**[51] -

---

[46] अत्रैव 7/1/70

[47] अत्रैव 8/4/45

[48] अत्रैव 8/4/46

[49] अत्रैव 6/1/1

[50] अत्रैव 6/1/11

[51] अत्रैव 6/1/2

तत्रैव द्वित्वप्रकरणे अजादेः शब्दस्य तु द्वितीयस्यैकाचो द्वित्वं विधीयतेऽनेन। अस्याप्यधिकारः **"चङि "** इति यावदेव। ''द्वितीयस्य'' इति ग्रहणसामर्थ्यादेवात्र ''प्रथमस्य'' इति पदस्य सम्बन्धो नानुवृत्यते।

वस्तुतोऽस्मिन् द्वित्वप्रकरणे लिटि[52], सनि[53], यङि[54], श्लौ[55], चङि[56] च परतो द्वित्वं विधीयते। "श्लु" इति जुहोत्यादिभ्यो[57] विहितस्य प्रत्ययस्यादर्शनस्य संज्ञेयम्।[58] विहिते च द्वित्वप्रकरणेऽस्मिन् विविधाः संज्ञाः आप्यन्ते। तद्यथा - पूर्वस्य 'अभ्यास-सञ्ज्ञा[59], समुदितयोरुभयोश्च 'अभ्यस्तसंज्ञा'[60] विधीयते।

**पदद्वित्वम् -**

**सर्वस्य द्वे**[61]- इत उत्तरं यानि वक्ष्यन्ते सूत्राणि तेषु सूत्रेष्वस्याधिकारः, **"पदस्य"** [62] इत्यतः प्रागेव। तत्र सर्वस्य द्वे भवत इत्येवं वेदितव्यम्। यथा

[52] "लिटि धातोरनभ्यासस्य", अत्रैव 6/1/8

[53] "सन्यङोः", अत्रैव 6/1/9

[54] अत्रैव 6/1/9

[55] "श्लौ", अत्रैव 6/1/10

[56] "चङि", अत्रैव 6/1/11

[57] "जुहोत्यादिभ्यः श्लुः" - अत्रैव 2/4/75

[58] "प्रत्ययस्य लुक्श्लुलुपः" - अत्रैव 1/1/60

[59] 'पूर्वोऽभ्यासः", अत्रैव 6/1/4

[60] "उभे अभ्यस्तम्", अत्रैव 6/1/5

[61] अत्रैव 8/1/1

[62] अत्रैव 8/1/16

**"नित्यवीप्सयोः"**[63] इत्यनेन सर्वस्य स्थाने द्वे विधीयते। तद्यथा - पचति पचति, ग्रामो ग्रामो रमणीयः। अत्र पदद्वित्वं विधीयते।

पदद्वित्वकार्येऽस्मिन् पारिभाषिकं पदमाम्रेडितमिति प्राप्यते। यस्यायमभिप्रायः यदस्मिन् सर्वस्य द्वे इत्यधिकारे येषां द्वित्वं विधीयते। तस्मिन् द्वित्वे यत्परमस्ति तस्य आम्रेडितसंज्ञा विधीयते।[64] चौर चौर३, वृषल वृषल३ इत्यत्र परं यत् चौर३, वृषल३ इति च पदमाम्रेडितसंज्ञं भवति। तस्याम्रेडितसंज्ञत्वात् भर्त्सनेऽर्थे प्लुतत्वं[65] भवतीत्याम्रेडितसंज्ञायाः फलम्।

**लिङ्गविशिष्टानां केषाञ्चित्प्रमुखसूत्राणां ज्ञानोपायविमर्शः -**

**उच्चैरुदात्तः[66], तस्यादित उदात्तमर्धह्रस्वम्[67]**

यथा अर्धर्चादिषु बहूनां शब्दानां लिङ्गद्वैविध्यमाप्यते, तामेव शब्दगतां लिङ्गविशिष्टां शैलीमनुसृत्य अनयोः सूत्रयोः उदात्तशब्दे लिङ्गद्वैविध्यं व्यधायि।

**कर्मणा यमभिप्रैति स सम्प्रदानम्[68]**

यम्, स इति सर्वनामशब्दयोः पुंल्लिङ्गे विहितयोः संज्ञाशब्दः सूत्रे न दृश्यते। सामान्यरूपेण एवंविधेषु प्रयोगेषु सामान्ये नपुंसकमिति नियममाश्रित्य नपुंसकत्वं विधीयेत। नूनमेव कश्चित् पुँल्लिङ्गः संज्ञाशब्द आचार्यमनोगतः स्यात्। अत एव

---

[63] अत्रैव 8/1/4

[64] "तस्य परमाम्रेडितम्", अत्रैव 8/1/2

[65] "आम्रेडितं भर्त्सने", अत्रैव 8/2/95

[66] अत्रैव 1/2/29

[67] अत्रैव 1/2/32

[68] अत्रैव 1/4/32

टीकाकृद्भिरप्यस्य सूत्रस्य व्याख्यानप्रसङ्गे स सम्प्रदानसंज्ञः स्यादित्यर्थो विहितः।[69]

**शि सर्वनामस्थानम्**[70]

जश्शसोः शि इति सूत्रेण नपुंसकलिङ्गे विधीयमानस्य शिप्रत्ययस्य ग्रहणम्। सूत्रेणानेन शि इत्येतस्य सर्वनामस्थानसंज्ञा विधीयते।

**सुडनपुंसकस्य**[71]

सुट् प्रत्याहारेण सु, औ, जस्, अम्, औट् इत्येषां पञ्चप्रत्ययानां ग्रहणम्। अनेन सूत्रेण स्वादिपञ्चप्रत्ययानां नपुंसकभिन्नानां सर्वनामस्थानसंज्ञा विधीयते।

**ह्रस्वो नपुंसके प्रातिपदिकस्य**[72]

अनेन सूत्रेण नपुंसके प्रातिपदिकस्याजन्तस्य ह्रस्वो विधीयते। तदा श्रीपम् इत्यादयः प्रयोगाः सिद्ध्यन्ति।

**गोस्त्रियोरुपसर्जनस्य**[73]

अनेन सूत्रेण उपसर्जनस्य गोशब्दस्य स्त्रीप्रत्ययान्तस्य च प्रातिपदिकस्य ह्रस्वो विधीयते। चित्रगुः शबलगुः, निष्कौशाम्बिः, अतिखट्वः इत्येवमादयः प्रयोगा अनेन सिध्यन्ति।

---

[69] द्रष्टव्या सिद्धान्तकौमुदी

[70] अष्टाध्यायी 1/1/41

[71] अत्रैव 1/1/42

[72] अत्रैव 1/2/47

[73] अत्रैव 1/2/48

## लुक् तद्धितलुकि[74]

सूत्रमिदमुपसर्जनस्त्रीप्रत्ययस्य तद्धितलुकि सति लुकं विदधाति। श्रविष्ठासु जातः श्रविष्ठः, फल्गुन्योः जातः फल्गुनः इत्यादिषु स्त्रीप्रत्ययस्य लुक् विदधाति।

## चित्रारेवतीरोहिणीभ्यः स्त्रियामुसंख्यानम् (वार्त्तिकम्)

अनेन वार्तिकेन चित्रारेवत्यादिषूदाहरणेषूपसर्जनस्त्रीप्रत्ययस्य तद्धितलुकि सति लुक् विधीयते। पुनश्च स्त्रीत्वविवक्षायां स्त्रीप्रत्ययो भवति।

## फल्गुन्यषाढाभ्यां टानौ वक्तव्यौ (वार्त्तिकम्)

वार्तिकेनानेन फल्गुन्यषाढाभ्यां शब्दाभ्यामुपसर्जनस्त्रीप्रत्ययस्य तद्धितलुकि सति लुगनन्तरं स्त्रियां यथाक्रमं टानौ प्रत्ययौ भवतः।

## श्रविष्ठाषाढाभ्यां छण्वक्तव्यः (वार्त्तिकम्)

उपसर्जनस्त्रीप्रत्ययस्य तद्धितलुकि सति लुगनन्तरं श्रविष्ठाषाढाभ्यां शब्दाभ्यां स्त्रियामस्त्रियां वा छण् प्रत्ययो विधीयते। एवं श्राविष्ठीयः, आषाढीयः इत्यादयः प्रयोगाः सिध्यन्ति।

## सरूपाणामेकशेष एकविभक्तौ[75], विरूपाणामपि समानार्थानाम् (वार्त्तिकम्)

सूत्रेणानेन एकविभक्तौ परतः एकशेषो विधीयते। यथा, वृक्षश्च वृक्षश्च वृक्षश्च वृक्षाः इत्येवमादीनि उदाहरणानि सिध्यन्ति। समानार्थानाम् विरूपाणामपि एकविभक्तौ परतः एकशेषो भवति। अनेन वक्रदण्डश्च कुटिलदण्डश्च इत्यनयोः एकशेषे वक्रदण्डौ कुटिलदण्डौ वा प्रयोगः सिध्यति।

---

[74] अत्रैव 1/2/49

[75] अत्रैव 1/2/64

### वृद्धो यूना तल्लक्षणश्चेदेव विशेषः[76]

अनेन सूत्रेण वृद्धशब्दः (गोत्रप्रत्ययान्तः शब्दः) युवप्रत्ययान्तेन सह शिष्यते, युवा च निवर्त्तते। यदि वृद्धयुवप्रत्ययनिमित्तकमेव वैरुप्यं स्यात्। अत्र गार्ग्यगार्ग्यायणयोः समासे गार्ग्यौ इत्येकशेषो भवति।

### स्त्री पुंवच्च[77]

अस्मिन् सूत्रे वृद्धा स्त्री शिष्यते, पुंस्त्वं च विधीयते इति पूर्वसूत्राद्विशेषः। अत्र गार्गी च गार्ग्यायणश्च इति समासे गार्ग्यौ इत्येकशेषो भवति।

### पुमान् स्त्रिया[78]

स्त्रिया सह समासे पुमान् शिष्यते, स्त्री निवर्त्तते। यथा हंसी च हंसश्च इति समासे हंसौ इत्येकशेषः।

### भ्रातृपुत्रौ स्वसृदुहितृभ्याम्[79]

स्वसृदुहितृभ्यां सह समासे यथाक्रमेण भ्रातृपुत्रौ शब्दौ शिष्येते। भ्राता च स्वसा च इति समासे भ्रातरौ इत्येकशेषः। पुत्रश्च दुहिता च इति समासे पुत्रौ इत्येकशेषः।

### पिता मात्रा[80]

अनेन सूत्रेण मात्रा समासे पिता वा शिष्यते । माता च पिता च पितरौ इत्येकशेषः। मातापितरौ इति विकल्पो भवति।

---

[76] अत्रैव 1/2/65

[77] अत्रैव 1/2/66

[78] अत्रैव 1/2/67

[79] अत्रैव 1/2/68

[80] अत्रैव 1/2/70

**श्वशुरः श्वश्र्वा**[81]

अनेन सूत्रेण श्वश्र्वा समासे श्वशुरो वा शिष्यते। श्वश्रूश्च श्वशुरश्च इति समासे श्वशुरौ इत्येकशेषः । श्वश्रूश्वशुरौ इति वा विकल्पो भवति।

**ग्राम्यपशुसंघेषु अतरुणेषु स्त्री**[82]**, अनेकशफेष्विति वाच्यम् (वार्त्तिकम्)**

अतरुणेषु ग्राम्यपशुसंघेषु स्त्री शिष्यते, पुमांश्च निवर्त्तते। गावश्च वृषभाश्चेति समासे गाव इत्येकशेषः। अनेकशफत्वात् अश्वादीनां ग्रहणं न क्रियते।

**यू स्त्र्याख्यौ नदी**[83]

अनेन सूत्रेण ईकारान्तानाम् ऊकारान्तानां च स्त्र्याख्यानां कुमार्यै, ब्रह्मबन्ध्वै इत्यदिशाब्दानां नदीसंज्ञा विधीयते।

**नेयङुवङ्स्थानावस्त्री**[84]

सूत्रेणानेन इयङुवङ्स्थानिनां ईकारान्तानामूकारान्तानां च स्त्र्याख्यानां श्रीः, भ्रूः इत्यादिशब्दानां नदीसंज्ञायाः निषेधः क्रियते।

**वाऽऽमि**[85]

सूत्रेणानेन आमि परत इयङुवङ्स्थानिनां ईकारान्तानामूकारान्तानां च स्त्र्याख्यानां शब्दानां नदीसंज्ञायाः विकल्पेन निषेधः क्रियते। तेन श्रियाम् श्रीणाम् इत्येवं नदीसंज्ञाविकल्पो भवति।

---

[81] अत्रैव 1/2/71

[82] अत्रैव 1/2/72

[83] अत्रैव 1/4/3

[84] अत्रैव 1/4/4

[85] अत्रैव 1/4/5

**ङिति ह्रस्वश्च**[86]

सूत्रेणानेन इयङुवङ्स्थानिनां ईकारान्तानामूकारान्तानां, इकारान्तानामुकारान्तानां च स्त्र्याख्यानां शब्दानां नदीसंज्ञानिषेधो विकल्पेन क्रियते। श्रियै, श्रिये, भ्रुवै, भ्रुवे, कृत्यै, कृतये, धेन्वै, धेनवे इत्यादिप्रयोगा अनेन सिद्ध्यन्ति।

**अर्धं नपुंसकम्**[87]

नपुंसके योऽर्धशब्दः समांशवाची स एकाधिकरणवाचिना एकदेशिना सुबन्तेन सह समस्यते विकल्पेन। समासस्तत्पुरुषसंज्ञको भवति। यथा पिप्पल्या अर्धम् अर्धपिप्पली।

**स नपुंसकम्**[88]

**अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्टः (वार्त्तिकम्), आबन्तो वा (वार्त्तिकम्), अनो नलोपश्च, वा च द्विगुः स्त्रियाम् (वार्त्तिकम्), पात्राद्यन्तस्य न (वार्त्तिकम्), पुण्यसुदिनाभ्यामह्नः क्लीबतेष्टा (वार्त्तिकम्), पथः संख्याव्ययादेः (वार्त्तिकम्), सामान्ये नपुंसकम् (वार्त्तिकम्)**

अनेन सूत्रेण समाहारे द्वन्द्वे द्विगौ चोक्तस्यैकवद्भावस्य नपुंसकलिङ्गता विधीयते। पञ्चगवम्,पाणिपादम्। अकारान्तोत्तरपदे द्विगुसमासे स्त्रीलिङ्गता – पञ्चमूली। आबन्तस्य विकल्पेन स्त्रीलिङ्गता – पञ्चखट्वी, पञ्चखट्वम्। द्विगुसमासे अनन्तस्य नलोपः, विकल्पेन स्त्रीलिङ्गता च – पञ्चतक्षी, पञ्चतक्षम्। पात्राद्यन्तस्य स्त्रीलिङ्गता न – त्रिभुवनम्, चतुर्युगम्। पुण्यसुदिनाभ्यामुत्तरस्य

---

[86] अत्रैव 1/4/6

[87] अत्रैव 2/2/2

[88] अत्रैव 2/4/17

अह्नशब्दस्य क्लीबता – पुण्याहम्, सुदिनाहम्। संख्याव्ययादेः परः पथशब्दस्य क्लीबता – त्रिपथम्, विपथम्। सामान्ये क्लीबता – मृदु पचति।

**अव्ययीभावश्च**[89]

अनेन सूत्रेण अव्ययीभावस्य नपुंसकता विधीयते – अधिहरि, उपकुम्भम् इत्यादयः अव्ययीभावसमासान्ताः शब्दा अस्योदाहरणानि भवन्ति।

**तत्पुरुषोऽनञ् कर्मधारयः**[90]

अनेन सूत्रेण नञ्तत्पुरुषं कर्मधारयं च विहाय यो अन्यस्तत्पुरुषः समासः स नपुंसकलिङ्गो भवतीति इत्यधिक्रियते**, विभाषा सेनासुराच्छायाशालानिशानाम्**[91]इति सूत्रं यावत्।

**संज्ञायां कन्थोशीनरेषु**[92]

सूत्रेणानेन संज्ञायां विषये अनञ्कर्मधारयः उशीनरजातकन्थान्तस्तत्पुरुषो नपुंसकलिङ्गः क्रियते। सौशमीनां कन्था सौशमिकन्थम्, आह्वरकन्थम् इत्यादिषु नपुंसकलिङ्गता विधीयते।

**उपज्ञोपक्रमं तदाद्याचिख्यासायाम्**[93]

अनेन सूत्रेणानञ्कर्मधारय उपज्ञान्तः उपक्रमान्तश्च तत्पुरुष आद्याचिख्यासायां विषये नपुंसकं क्रियते ।पाणिनेरुपज्ञा पाणिन्युपज्ञं ग्रन्थः इत्यादिवत्।

---

[89] अत्रैव 2/4/18

[90] अत्रैव 2/4/19

[91] अत्रैव 2/4/25

[92] अत्रैव 2/4/20

[93] अत्रैव 2/4/21

**छाया बाहुल्ये**[94]

अनञ्कर्मधारयश्छायान्तस्तत्पुरुषो नपुंसकं भवति बाहुल्ये गम्यमाने । इक्षूणां छाया इक्षुच्छायम् इत्ययं प्रयोगो भवति।

**सभा राजामनुष्यपूर्वा**[95]

**पर्यायस्यैवेष्यते (वार्त्तिकम्)**

अनञ्कर्मधारयः राजपर्यायपूर्वोऽमनुष्यपूर्वश्च सभान्तस्तत्पुरुषो नपुंसकलिङ्गो विधीयतेऽनेन सूत्रेण। यथा इनसभम्, ईश्वरसभम् इत्यादिषु नपुंसकलिङ्गता विधीयते।

**अशाला च**[96]

अनञ्कर्मधारयः शालाभिन्नस्सभान्तस्तत्पुरुषः क्लीबं भवत्यनेन सूत्रेण। स्त्रीसभम् इत्येवं नपुंसकलिङ्गता विधीयते।

**विभाषा सेनासुराच्छायाशालानिशानाम्**[97]

अनेन सूत्रेणैषां विभाषा क्लीबता विधीयते। यथा ब्राह्मणसेनम् । ब्राह्मणसेना । यवसुरम् । यवसुरा । कुड्यच्छाम् । कुड्यच्छाया । गोशालम् । गोशाला । श्वनिशम्। श्वनिशा । इत्यादिषु प्रयोगेषु विभाषा नपुंसकलिङ्गता विधीयते।

**परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः**[98]

**द्विगुप्राप्तापन्नाल्पूर्वगतिसमासेषु प्रतिषेधो वाच्यः (वार्त्तिकम्)**

---

[94] अत्रैव 2/4/22

[95] अत्रैव 2/4/23

[96] अत्रैव 2/4/24

[97] अत्रैव 2/4/25

[98] अत्रैव 2/4/26

अनेन सूत्रेण द्वन्द्वतत्पुरुषसमासयोः परपदवल्लिङ्गता विधीयते। यथा कुक्कुटमयूर्यौ, मयूरीकुक्कुटौ, अर्धपिप्पली इत्यादिप्रयोगेषु द्रष्टुं शक्यते परवल्लिङ्गता। द्विगुसमासे, प्राप्त-आपन्न-अलं-पूर्वशब्दानां समासे, गतिसमासे पूर्वोक्तस्य प्रतिषेध उच्यते – पञ्चकपालः पुरोडाशः, प्राप्तजीविकः, आपन्नजीविकः, अलंकुमारिः, निष्कौशाम्बिः इत्यादिवत्।

**पूर्ववदश्ववडवौ**[99]

अनेन सूत्रेण द्वन्द्वसमासे अश्ववडवाशब्दयोः पूर्ववल्लिङ्गता भवति। यथा अश्वश्च वडवा च अश्ववडवौ इत्यत्र पूर्ववल्लिङ्गता विधीयते।

**हेमन्तशिशिरावहोरात्रे च च्छन्दसि**[100]

अनेन सूत्रेण वेदविषये द्वन्द्वसमासे हेमन्तश्च शिशिरं च हेमन्तशिशिरौ, अहानि च रात्रयश्च अहोरात्रमिति पूर्ववल्लिङ्गता भवति ।

**रात्राह्नाहाः पुंसि**[101]

**सङ्ख्यापूर्वं रात्रं क्लीबम्**

सूत्रेणानेन रात्र, अह्न, अह इत्येषां कृतसमासानां पुंस्त्वं विधीयते। अहोरात्रः । रात्रेः पूर्वभागः पूर्वरात्रः । पूर्वाह्णः । द्व्यहः। संख्यापूर्वे सति रात्रशब्दस्य क्लीबता विधीयते - द्विरात्रम् । त्रिरात्रम् । गणरात्रम् ॥

---

[99] अत्रैव 2/4/27

[100] अत्रैव 2/4/28

[101] अत्रैव 2/4/29

**अपथं नपुंसकम्**[102]

अपथमिति तत्पुरुषान्तशब्दस्य नपुंसकलिङ्गता भवति। अपथम्, विपथमित्यादयोऽत्र प्रयोगाः सिध्यन्ति।

**अर्धर्चाः पुंसि च**[103]

अर्धर्चम्, अर्धर्च इत्येवमर्धर्चादयः शब्दाः पुंसि क्लीबे च भवन्ति।

**तद्राजस्य बहुषु तेनैवास्त्रियाम्**[104]

बहुवचने वर्त्तमानस्य अस्त्रीलिङ्गस्य तद्राजसंज्ञकस्य प्रत्ययस्य लुक् भवति। यदि तेनैव तद्राजसंज्ञकेनैव कृतं बहुवचनं स्यात्। यथा मगधाः, कलिङ्गाः।

**यस्कादिभ्यो गोत्रे**[105]

बहुवचने वर्त्तमानस्य अस्त्रीलिङ्गस्य यस्कादिविहितस्य गोत्रप्रत्ययस्य लुक् भवति। यदि तेनैव गोत्रप्रत्ययेनैव कृतं बहुवचनं स्यात्। यथा यस्काः, लभ्याः।

**यञञोश्च**[106]

बहुवचने वर्त्तमानस्य अस्त्रीलिङ्गस्य गोत्रे विहितस्य यञञोर्लुक् भवति। यदि तेनैव गोत्रप्रत्ययेनैव कृतं बहुवचनं स्यात्। यथा यञ उदाहरणानि – गर्गाः, वत्साः, अञ उदाहरणानि – बिदाः उर्वाः।

---

[102] अत्रैव 2/4/30

[103] अत्रैव 2/4/31

[104] अत्रैव 2/4/62

[105] अत्रैव 2/4/63

[106] अत्रैव 2/4/64

**अत्रिभृगुकुत्सवसिष्ठगोतमाङ्गिरोभ्यश्च**[107]

बहुवचने वर्त्तमानस्य अस्त्रीलिङ्गस्य अत्रिभृगुकुत्सवसिष्ठगोतमाङ्गिरोभ्यो विहितस्य गोत्रप्रत्ययस्य लुक् भवति। यदि तेनैव गोत्रप्रत्ययेनैव कृतं बहुवचनं स्यात्। अत्रयः, भृगवः, कुत्साः, वसिष्ठाः, गौतमाः, अङ्गिरसः।

**कर्मव्यतिहारे णच् स्त्रियाम्**[108]

अनेन सूत्रेण कर्मव्यतिहारे गम्यमाने स्त्रियां कर्तृभिन्ने कारके संज्ञायां च धातोर्णच् प्रत्ययो भवति, अनेन व्यावक्रोशी, व्यावहासी इत्यादयः प्रयोगाः सिध्यन्ति।

**स्त्रियां क्तिन्**[109]

**श्रुयजीषिस्तुभ्यः करणे (वार्त्तिकम्), ॠल्वादिभ्यः क्तिन्निष्ठावद्वाच्यः (वार्त्तिकम्), चायतेः क्तिनि चिभावो वाच्यः (वार्त्तिकम्), सम्पदादिभ्यः क्विप् (वार्त्तिकम्), क्तिन्नपीष्यते (वार्त्तिकम्)**

सूत्रेणानेन स्त्रीलिङ्गे कर्तृभिन्ने कारके संज्ञायां भावे च धातोः क्तिन् प्रत्ययो भवति। कृतिः, चितिः इत्येवमादयोऽस्य उदाहरणानि भवन्ति। श्रुयजीषिभ्यः करणे क्तिन् विधीयते – श्रूयतेऽनया श्रुतिः। ॠल्वादिभ्यः निष्ठावत् क्तिन् भवति, निष्ठावत्त्वात् नत्वम् – कीर्णिः। चायतेः क्तिनि सति चिभावः – चितिः। सम्पदादिभ्यः क्विप् क्तिन् च – सम्पत्, सम्पत्तिः।

स्त्रियामिति अनुवृत्तिः **आक्रोशे नञ्यनिः**[110] इति सूत्रं यावत् गच्छति। तत्र स्त्रियां **क्यप्, श, अ, अङ्, युच्, ण्वुल्, इञ्, ण्वुच्, अनिः** इत्येते नव प्रत्ययाः भवन्ति।

---

[107] अत्रैव 2/4/65

[108] अत्रैव 3/3/43

[109] अत्रैव 3/3/94

**नपुंसके भावे क्तः[111], ल्युट् च[112], कर्मणि च येन संस्पर्शात् कर्तुः शरीरसुखम्[113]**

नपुंसके भावे क्तप्रत्ययः ल्युट्प्रत्ययश्च क्रियते। - हसितम्, हसनम्। येन कर्मणा संस्पर्शात् कर्तुः शरीरसुखमुत्पद्यते तस्मिन् कर्मण्युपपदे धातोर्ल्युट् विधीयते। पयःपानं सुखम्।

**पुंसि संज्ञायां घः प्रायेण[114]**

समुदायेन संज्ञा गम्यते चेत् पुंल्लिङ्गयोः करणाधिकरणयोरभिधेययोः धातोर्घप्रत्ययो विकल्पेन भवति। तत्र करणे उरश्छद्यते अनेनेति उरश्छदः, अधिकरणे च आलीयतेऽस्मिन् इति आलयः इत्युदाहरणानि भवन्ति।

**स्त्रियाम्[115]**

अधिकारसूत्रमिदं वर्त्तते। अस्य सूत्रस्य अधिकारः **समर्थानां प्रथमाद्वा[116]** इति सूत्रं यावत् याति। अस्मिन् अधिकारे वक्ष्यमाणाः प्रत्ययाः स्त्रीत्वं द्योतयन्ति। अधिकारेऽस्मिन् अष्टौ प्रत्ययाः भवन्ति। ते च प्रत्ययाः सन्ति - टाप्, डाप्, चाप्, ङीप्, ङीष्, ङीन्, ऊङ्, ति।

---

[110] अत्रैव 3/3/112

[111] अत्रैव 3/3/114

[112] अत्रैव 3/3/115

[113] अत्रैव 3/3/116

[114] अत्रैव 3/3/118

[115] अष्टाध्यायीसूत्रपाठः - 4/1/3

[116] अत्रैव 4/1/82

**गोत्राद्यून्यस्त्रियाम्**[117]

अनेन सूत्रेण कार्यद्वयं विधीयते । प्रथमं यून्यपत्ये गोत्रप्रत्ययान्तादेव प्रत्ययः क्रियते यथा- गर्गस्य गोत्रापत्यं गार्ग्यायणः इत्यत्र गर्गात् गोत्रप्रत्यये सति गार्ग्यः, ततः गोत्रप्रत्ययान्तात् गार्ग्यशब्दात् ष्फप्रत्ययः। द्वितीयं च स्त्रियां युवसंज्ञानिषेधो विधीयते।

**लुक् स्त्रियाम्**[118]

वतण्डशब्दाद् विहितस्य यञ् प्रत्ययस्य आंगिरसे गोत्रे स्त्रीत्वाभिधेये लुक् स्यात्। स्त्रीगोत्रापत्यस्याभिप्रायः पौत्रप्रभृति स्त्र्यपत्येन (कन्यया) वर्तते। शाङ्गरवादिषु पठितत्वात् वतण्डशब्दात् ङीन् भवति, तदेवं वतण्डी (वतण्डस्य गोत्रापत्यं कन्या) इत्यादयः प्रयोगाः सिध्यन्ति।

**स्त्रीभ्यो ढक्**[119]

अनेन सूत्रेण स्त्रीप्रत्ययान्तेभ्यो अपत्यार्थे ढक् प्रत्ययो विधीयते। यथा - विनतायाः अपत्यं वैनतेयः इति। किन्तु सुमित्राया अपत्यं सौमित्रिर्भवति तत्र बाह्वादिभ्यश्च इत्यनेन इञ् भवति। अथ च सपत्न्याः अपत्यं सापत्यम् इत्यत्र शिवादिभ्योऽण इत्यनेन अण् भवति। अतः अत्र ढक् न भवति।

**द्व्यचः**[120]

द्व्यचः स्त्रीप्रत्ययान्तात् प्रातिपदिकात् तदपत्यार्थे ढक् प्रत्ययो विधीयतेऽनेन । गांगेयः, दात्तेयः इत्येवमादयः प्रयोगाः सिध्यन्ति। स्त्रीभ्यो ढक् इत्यनेन ढक् प्रत्यये सति पुनर्विधानमणो बाधनार्थं वर्त्तते।

---

[117] अत्रैव 4/1/94

[118] अत्रैव 4/1/109

[119] अत्रैव 4/1/120

[120] अत्रैव 4/1/121

**स्त्रियामवन्तिकुन्तिकुरुभ्यश्च**[121]

क्षत्रियाभिधायिनो जनपदवाचिनो ये शब्दाः अवन्तिकुन्तिकुरुप्रभृतयस्तेभ्यः तद्राजसंज्ञकस्य प्रत्ययस्य स्त्रियां लुक् विधीयते सूत्रेणानेन। अवन्ती, कुन्ती, कुरूः इत्येवमादयोऽस्य उदाहरणानि भवन्ति।

**अतश्च**[122]

स्त्रीत्वाभिधेये जनपदशब्दाद् क्षत्रियाद् विहितस्य तद्राजसंज्ञकस्याकारप्रत्ययस्य लुग् भवति। तेन शूरसेनी, मद्री इत्येवमादीनि अस्योदाहरणानि भवन्ति।

**न प्राच्यभर्गादियौधेयादिभ्यः**[123]

क्षत्रियाभिधायिभ्यो जनपदशब्देभ्यः प्राच्येभ्यः प्रातिपदिकेभ्यो भर्गादिभ्यो यौधेयादिभ्यश्चोत्पन्नस्य तद्राजसंज्ञकस्य प्रत्ययस्य स्त्रियामभिधेयायां लुङ् न भवति। पाञ्चाली । वैदर्भी । आङ्गी । वाङ्गी । मागधी । एते प्राच्याः । भार्गी । यौधेयी ।

**स्त्रीषु सौवीरसाल्वप्राक्षु**[124]

अनेन सूत्रेण सौवीरसाल्वप्राक्षु स्त्रीलिङ्गे देशेऽभिधेये ङ्याप्प्रतिपदिकाच्चातुरार्थिकोऽञ्प्रत्ययः क्रियते। सौवीरे- दत्तामित्रेण निर्वृत्ता दात्तामित्री नगरी । साल्वे- वैधूमाग्नी । प्राचि- माकन्दी ॥

---

[121] अत्रैव 4/1/174

[122] अत्रैव 4/1/175

[123] अत्रैव 4/1/176

[124] अत्रैव 4/2/75

**विभाषाञ्चेरदिक्स्त्रियाम्**[125]

अञ्चतेरुत्तरपदस्थात् प्रातिपदिकात् अदिक्स्त्रियां वर्तमानात्  स्वार्थे विकल्पेन ख प्रत्ययः स्यात्। प्राक्, प्राचीनम् । प्रत्यक्, प्रतीचीनम् । अर्वाक्, अर्वाचीनम् ।

**णचः स्त्रियामञ्**[126]

णजन्तात् प्रातिपदिकात् स्वार्थे स्त्रियामञ्  विधीयते। व्यावक्रोशी, व्यावहासी।

**अनसन्तान्नपुंसकाच्छन्दसि**[127]

नपुंसकलिङ्गे वर्तमानात् अनन्तादसन्तात् तत्पुरुषात् समासान्तः  टच् प्रत्ययो भवति छन्दसि।

हस्तिचर्मे जुहोति। देवच्छन्दसानि ॥

**नपुंसकादन्यतरस्याम्**[128]

अनन्तं यन्नपुंसकं तदन्तादव्ययीभावाद् विकल्पेन टच् प्रत्ययः समासान्तो विधीयतेऽनेन। उपचर्मम् । उपचर्म ॥

**स्त्रियां संज्ञायाम्**[129]

बहुव्रीहौ समासे अन्यपदार्थस्य स्त्रियां वाच्यायां दन्तशब्दस्य स्थाने दतृ इत्ययमादेशो भवति संज्ञायां विषये। अयोदती । फालदती ।

---

[125] अत्रैव 5/4/8

[126] अत्रैव 5/4/14

[127] अत्रैव 5/4/103

[128] अत्रैव 5/4/109

[129] अत्रैव 5/4/143

**इनः स्त्रियाम्**[130]

इन्नन्ताद् बहुव्रीहे स्त्रियां कप् प्रत्ययो भवति समासान्तः। बहुदण्डिका नगरी ॥

**हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्**[131]

हलन्ताद् ङ्यन्ताद् आबन्ताच्च दीर्घात् परं सु ति सि इत्येतदपृक्तं हल् लुप्यते। राजा, कुमारी, खट्वा

**मतोः पूर्वमात् संज्ञायां स्त्रियाम्**[132]

मतोः पूर्व आकार उदात्तो भवति। तच्चेन्मत्वन्तं शब्दरूपं स्त्रीलिङ्गे संज्ञायां स्यात्। उदुम्बरावती । शरावती ।

**मात्रोपज्ञोपक्रमच्छाये नपुंसके**[133]

अनेन सूत्रेण नपुंसकवाचिनि तत्पुरुषसमासे मात्रा, उपज्ञा, उपक्रम, छाया, इत्येतेषूत्तरपदेषु पूर्वपदं प्रकृतिस्वरं भवति। भिक्षायास्तुल्यप्रमाणम् - भिक्षामात्रम्। पाणिन्युपज्ञम् । नन्दोपक्रमम् । इषुच्छायम् ।

**सभायां नपुंसके**[134]

नपुंसकलिङ्गे समासे सभाशब्दोत्तरपदे पूर्वपदमन्तोदात्तं भवति। गोपालसभम् । स्त्रीसभम् ।

---

[130] अत्रैव 5/4/152

[131] अत्रैव 6/1/66

[132] अत्रैव 6/1/213

[133] अत्रैव 6/2/14

[134] अत्रैव 6/2/98

**तत्पुरुषे शालायां नपुंसके**[135]

सूत्रेणानेन नपुंसकलिङ्गे शालाशब्दान्ते तत्पुरुषसमासे उत्तरपदमाद्युदात्तं विधीयते। ब्राह्मणशालम् ।

**स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियाऽऽदिषु** [136]

यस्माद् भाषितपुंस्कात् पर ऊङ् न कृतस्तस्य स्त्रीशब्दस्य पुंशब्दस्येव रूपं भवति, पूरणीप्रियादिवर्जिते स्त्रीलिङ्गे समानाधिकरण उत्तरपदे परतः। दर्शनीया भार्या यस्य स दर्शनीयभार्यः । श्लक्ष्णचूडः। स्त्रियाः पुंवद्भावमाश्रित्य इमान्यपि कतिपयसूत्राणि सूत्रमिमनुवर्तन्ते - तसिलादिष्वाकृत्वसुचः[137], क्यङ्मानिनोश्च[138], न कोपधायाः[139], संज्ञापूरण्योश्च[140], वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे[141], स्वाङ्गाच्चेतः[142], जातेश्च[143]।

**पुंवत्कर्मधारयजातीयदेशीयेषु** [144]

कर्मधारयसमासे जातीयदेशीयप्रत्यययोः परतः भाषितपुंस्कादनूङ् पुवंद् भवति।प्रतिषेधार्थोऽयमारम्भः। पाचकस्त्री । दत्तभार्या । पञ्चमभार्या । स्त्रौघ्नभार्या। सुकेशभार्या । ब्राह्मणभार्या । पाचकजातीया । पाचकदेशीयेत्यादि ।

---

[135] अत्रैव 6/2/123

[136] अत्रैव 6/3/33

[137] अत्रैव 6/3/34

[138] अत्रैव 6/3/35

[139] अत्रैव 6/3/36

[140] अत्रैव 6/3/37

[141] अत्रैव 6/3/38

[142] अत्रैव 6/3/39

[143] अत्रैव 6/3/40

[144] अत्रैव 6/3/41

**घरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु ङ्योऽनेकाचो ह्रस्वः**[145]

भाषितपुंस्कात् परो यो ङीप्रत्ययस्तदन्तस्यानेकाचो ह्रस्वो भवति, घ, रूप, कल्प, चेलट्, ब्रुव, गोत्र, मत, हत इत्येतेषु परतः। ब्राह्मणितरा । ब्राह्मणितमा । ब्राह्मणिरूपा । ब्राह्मणिकल्पा । ब्राह्मणिचेली । ब्रह्मणिब्रुवा । ब्रह्मणिगोत्रेत्यादि । एतत्सूत्रसम्बद्धं ह्रस्वविधाननिरूपकं सूत्रद्वयमिदमपि - नद्याः शेषस्यान्यतरस्याम्[146], उगितश्च[147] ।

**स्त्रियाः**[148]

स्त्रीशब्दस्य अजादौ प्रत्यये परतः इयङ् आदेशो विधीयतेऽनेन। स्त्रियौ । स्त्रियः ॥

**वाऽम्शसोः**[149]

अमि शसि च परतः स्त्रियाः इयङादेशो वा स्यात् । स्त्रियम् । स्त्रीम् । स्त्रियः । स्त्रीः ।

**औङ आपः**[150]

आबन्तादङ्गात्परस्यौङः स्थाने शी इत्ययमादेशो विधीयतेऽनेन । "औङ्" इति औ, औट् इत्येतयोः पूर्वाचार्याणां संज्ञा । रमे। बहुराजे।

---

[145] अत्रैव 6/3/42

[146] अत्रैव 6/3/43

[147] अत्रैव 6/3/44

[148] अत्रैव 6/4/79

[149] अत्रैव 6/4/80

[150] अत्रैव 7/1/18

**नपुंसकाच्च**[151]

नपुंसकादङ्गात् परस्यौङः शी स्यात् । कुण्डे तिष्ठतः। कुण्डे पश्य।

**जश्शसोः शिः**[152]

नपुंसकादङ्गादुत्तरयोर्जश्शसोः स्थाने शि इत्ययमादेशो भवति। कुण्डानि तिष्ठन्ति। कुण्डानि पश्य।

**स्वमोर्नपुंसकात्**[153]

क्लीबादङ्गादुत्तरयोः सु, अम् इत्येतयोर्लुक् भवति। वारि। मधु।

**अतोऽम्**[154]

अदन्तान्नपुंसकादुत्तरयोः स्वमोः स्थाने अम् इत्ययमादेशो विधीयतेऽनेन । ज्ञानम् । कार्यमिमाश्रित्य प्रवृत्तं सूत्रद्वयमिदमपि - अद्ड् डतरादिभ्यः पञ्चभ्यः[155], नेतराच्छन्दसि[156] ।

**नपुंसकस्य झलचः**[157]

झलन्तस्याजन्तस्य च क्लीबस्याङ्गस्य सर्वनामस्थाने परतो नुमागमः क्रियते सूत्रेणानेन ।उदश्विन्ति। ज्ञानानि ।

---

[151] अत्रैव 7/1/19

[152] अत्रैव 7/1/20

[153] अत्रैव 7/1/23

[154] अत्रैव 7/1/24

[155] अत्रैव 7/1/25

[156] अत्रैव 7/1/26

[157] अत्रैव 7/1/72

**इकोऽचि विभक्तौ**[158]

सूत्रेणानेन इगन्तस्य नपुंसकस्याङ्गस्य अचि परतो नुम्विधीयते। अनेन त्रपूणि जतूनि इत्यादयः प्रयोगाः भवन्ति।

**तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य**[159]

आचार्यगालवस्य मतेन तृतीयादिषु अज्विभक्तिषु परतः नपुंसकं भाषितपुंस्कमिगन्तमङ्गं पुंवद्भवति। आचार्यगालवमतेन ग्रामण्या इत्यादिवत्, अन्येषां मतेन ग्रामणिना इत्यादिवत्प्रयोगाः भवन्ति।

**वा नपुंसकस्य**[160]

अनेन सूत्रेण अभ्यस्तात्परो यः शता तदन्तस्य क्लीबस्य नुम्वा विधीयते सर्वनामस्थाने परे । ददन्ति, ददति इत्यादयः प्रयोगा भवन्त्यस्य सूत्रस्य।

**स्त्रियां च**[161]

अत्र स्त्रियां क्रोष्टुशब्दस्य तृज्वत्कार्यं क्रियते। तृज्वत्कार्यत्वात् ऋन्नेभ्यो ङीप् इति ङीप् विधाय क्रोष्ट्री इति प्रयोगः साध्यते।

**त्रिचतुरोः स्त्रियां तिसृचतसृ**[162]

**अचि र ऋतः**[163]

---

[158] अत्रैव 7.1.73

[159] अत्रैव 7.1.74

[160] अत्रैव 7.1.79

[161] अत्रैव 7.1.96

[162] अत्रैव 7.2.99

[163] अत्रैव 7.2.100

स्त्रियां त्रि चतुर् इत्येतयोः शब्दयोः तिसृ चतसृ इत्यादेशौ भवतः। तिसृभि। अजादौ विभक्तौ परतः अनयोः रेफादेशो भवतः। तिस्रः, चतस्रः इत्यादयः प्रयोगाः भवन्ति सिद्धा अनेन सूत्रेण।

**इदोऽय् पुंसि**[164]

इदमः इद्रूपस्य अय इत्ययमादेशो भवति पुंसि सौ विभक्तौ परतः। अयम् इति प्रयोगः।

**प्रत्ययस्थात् कात् पूर्वस्यात इदाप्यसुपः**[165]

**मामकनरकयोरुपसंख्यानम् (वार्त्तिकम्), त्यक्त्यपोश्च (वार्त्तिकम्)**

**न यासयोः**[166]

**क्यकनश्च निषेधः (वार्त्तिकम्), आशिषि वुनश्च न (वार्त्तिकम्), उत्तरपदलोपे न (वार्त्तिकम्), क्षिपकादीनां च (वार्त्तिकम्), तारका ज्योतिषि (वार्त्तिकम्), वर्णका तान्तवे (वार्त्तिकम्), वर्त्तका शकुनौ प्राचाम् (वार्त्तिकम्) अष्टका पितृदैवत्ये (वार्त्तिकम्), सूतकापुत्रिकावृन्दारकाणां वेति वक्तव्यम् (वार्त्तिकम्)**

प्रत्ययस्थात् ककारात् पूर्वस्य अकारस्य स्थाने इकारादेशो भवति आपि परतः, सा चेदाप् सुपः परो न भवति । जटिलिका, मुण्डिका अस्य उदाहरणानि सन्ति। मामकनरकयोस्त्यक्त्यप्प्रत्ययान्तयोरपीकारादेशो भवति; यथा- मामिका, दाक्षिणात्यिका। यासयोस्तु प्रतिषेधः क्रियते – यका सका इत्युदाहरणे। उपत्यकादिषु त्यकनोरपि प्रतिषिध्यते। आशिषि वुनन्तस्यापि न भवति, यथा-

---

164 अत्रैव 7.2.111

165 अत्रैव 7/3/44

166 अत्रैव 7/3/45

जीवका। देवकादिशब्देषु उत्तरपदलोपेऽपि प्रतिषिध्यते। क्षिपकादीनां शब्दानां, ज्योतिषि तारकाशब्दस्य, तान्तवे वर्णकाशब्दस्य, प्राचां शकुनौ वर्तकाशब्दस्य, पितृदैवत्ये अष्टकाशब्दस्य सूतकादीनां च विकल्पेन इकारादेशो न भवति।

**उदीचामातः स्थाने यकपूर्वायाः [167]**

**धात्वन्तयकोस्तु नित्यम् (वार्त्तिकम्)**

उदीचामाचार्याणां मतेन यकारककारपूर्वस्य स्त्रीप्रत्ययाकारस्य स्थाने इकारादेशस्य प्रतिषेधः क्रियते – आर्यका, चटकका इत्यादय उदीचामाचार्याणां मतेन प्रयोगाः अन्येषामाचार्याणां मतेन तु इत्त्वं भवत्यतः आर्यिका, चटकिका इत्यादयः प्रयोगाः भवन्ति। धात्वन्तयोः यकोस्तु नित्यमित्त्वं भवति। यथा सुनायिका, सुपाकिका प्रयोगाः सन्ति।

**भस्त्रैषाऽजाज्ञाद्वास्वानञ्पूर्वाणामपि[168]**

उदीचां मतेन भस्त्रादीनां शब्दानां नञ्पूर्वाणामनञ्पूर्वाणां चाकारस्य इत्त्वं न भवति। उदीचामाचार्याणां मते भस्त्रका, एषका, अभस्त्रका, अनेषका इत्येवमादयः प्रयोगाः भवन्ति। अन्येषां मतेन भस्त्रिका, अभस्त्रिका इत्येवमादयः प्रयोगाः बोध्याः।

**अभाषितपुंस्काच्च[169]**

उदीचां मतेन अभाषितपुंस्कात् नञ्पूर्वादपि शब्दात् अकारस्य इत्त्वं न भवति। उदीचामाचार्याणां मतेन खट्वका, अखट्वका इत्येवमादयः प्रयोगा अन्येषां च

---

[167] अत्रैव 7/3/46

[168] अत्रैव 7/3/47

[169] अत्रैव 7/3/48

मतेन खट्विका, अखट्विका इत्यादयः प्रयोगाः भवन्ति।

**आदाचार्याणाम्**[170]

पूर्वसूत्रविषये आकारादेशो भवति उदीग्भिन्नाचार्याणां मतेन। तत्र खट्वाका, अखट्वाका इत्येवमादयश्च प्रयोगाः भवन्ति।

**आङि चापः** [171]

अनेन सूत्रेण आबन्तस्याङ्गस्य आङि ओसि च परे आबन्तस्याङ्गस्य एकारो विधीयते। रमया, रमयोः इत्यादिवत् उदाहरणानि बोध्यानि।

**सम्बुद्धौ च** [172]

सूत्रेणानेन सम्बुद्धौ आप एकारः क्रियते। हे रमे इतिवत् प्रयोगाः भवन्ति।

**आङो नाऽस्त्रियाम्** [173]

घेरुत्तरस्य आङो ना इत्ययमादेशः क्रियते। अग्निना, वायुना इत्यादिवत् प्रयोगाः सिध्यन्ति।

**लिङ्गवचनविशिष्टानां केषाञ्चित्प्रमुखसूत्राणां ज्ञानोपायविमर्शः –**

द्वन्द्वसमासे लिङ्गं वचनं चाश्रित्य कानिचन सूत्राणि आप्यन्ते यानि एतदुभयस्वरूपमुदाहरणप्रत्युदाहरणमुखेन विनिर्धारयन्ति। तद्यथा समाहारद्वन्द्वे–

---

[170] अत्रैव 7/3/49

[171] अत्रैव 7/3/105

[172] अत्रैव 7/3/106

[173] अत्रैव 7/3/119

**त्यदादीनि सर्वैर्नित्यम्[174], त्यदादीनां मिथः सहोक्तौ यत्परं तच्छिष्यते (वार्त्तिकम्), त्यदादितः शेषे पुन्नपुंसकतो लिङ्गवचनानि (वार्त्तिकम्), अद्वन्द्वतत्पुरुषविशेषानामिति वक्तव्यम् (वार्त्तिकम्)**

त्यदादीनां सर्वैः सह समासे एकशेषो नित्यं विधीयते। यथा स च देवदत्तश्चेति समासैकशेषे सति तौ इत्येकशेषः। मिथः सहोक्तौ तु यत्परं तस्यैकशेषो यथा स च यश्चेति समासे यौ इत्येकशेषः। स्त्रीपुन्नपुंसकानां समासे नपुंसकं शिष्यते यथा तच्च देवदत्तश्च यज्ञदत्ता चेति समासे तानि इत्येकशेषः। अथ पुन्नपुंसकद्वयोदाहरणे तु वार्तिकस्वरूपानुसारेण परत्वान्नपुंसकपदमेवावशिष्यते। परमग्रिमाद् अद्वन्द्वादिरूपवार्तिकात् साधारणतः पुन्नपुंसकत्वरूपैकशेषत्वं निषिध्यते। अत एव मयूरी च कुक्कुटश्च इत्यत्र सति द्वन्द्वे कुक्कुटगतपुंस्त्वानुसारिलिङ्गं भवत्येवाथ पदविपर्यये सति कुक्कुटश्च मयूर्य्यश्चेत्येवं विग्रहे सति कुक्कुटमयूर्यौ इत्येवंरूपं परपदमाधृत्य लिङ्गम्। वस्तुतोऽत्र पूर्ववार्तिकविरोधमात्रत्वमेव परं सूत्रार्थसापेक्षत्वमत्र।

**द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्[175]**

अस्मिन् सूत्रे प्राण्यङ्गानां तूर्याङ्गानां सेनाङ्गानां च एकवत्त्वं भवति, अग्रे च **स नपुंसकमि**ति सूत्रेण नपुंसकलिङ्गता विधीयते। यथा पाणी च पादौ च इत्यत्र समासे कृतेऽर्थस्य बहुत्वाद्बहुवचनं, पुंस्त्वाच्च पुंल्लिङ्गता स्यात् किन्तु पूर्वोक्तसूत्राभ्यां समाहारद्वन्द्वसमासे विहिते एकत्वं नपुंसकतां च विधाय पाणिपादमित्यादयः प्रयोगाः सिध्यन्ति।

**अनुवादे चरणानाम्[176]**

अनेन सूत्रेण चरणानां द्वन्द्व एकवद्भवति, पूर्वोक्तरीत्या च नपुंसकता विधीयते।

---

[174] अत्रैव 1/2/72

[175] अत्रैव 2/4/2

[176] अत्रैव 2/4/3

यथा कठाश्च कालापाश्च इत्यत्रार्थस्य बहुत्वात् बहुवचनं पुंस्त्वाच्च पुंल्लिङ्गता विधीयेत। किन्तु प्रकृतसूत्रेण एकवत्त्वं विधाय पूर्ववत् नपुंसकलिङ्गतां विधाय कठकालापमित्यादयः प्रयोगाः सिध्यन्ति।

**अध्वर्युक्रतुरनपुंसकम्**[177]

अनेन सूत्रेण अनपुंसकानामध्वर्युक्रतुवाचिनां (यजुर्वेदविहितयज्ञवाचिनां) शब्दानां द्वन्द्व एकवद्भवति। यथा अर्काश्च अश्वमेधाश्च इत्यत्रार्थस्य बहुत्वात् बहुवचनं पुंस्त्वाच्च पुंल्लिङ्गता विधीयेत। किन्तु प्रकृतसूत्रेण एकवत्त्वं विधाय पूर्ववत् नपुंसकलिङ्गतां च कृत्वा अर्काश्वमेधमित्यादयः प्रयोगाः सिध्यन्ति।

**अध्ययनतोऽविप्रकृष्टाख्यानाम्**[178]

अनेन सूत्रेण अध्ययननिमित्तेन अविप्रकृष्टाख्यानां (समीपाख्यानां) शब्दानां द्वन्द्वस्य एकवद्भावः क्रियते। यथा वैयाकरणाश्च नैरुक्ताश्च इत्यत्रार्थस्य बहुत्वात् बहुवचनं पुंस्त्वाच्च पुंल्लिङ्गता विधीयेत। किन्तु प्रकृतसूत्रेण एकवत्त्वं विधाय पूर्ववत् नपुंसकलिङ्गतां च कृत्वा वैयाकरणनैरुक्तमित्यादयः प्रयोगाः सिध्यन्ति।

**जातिरप्राणिनाम्**[179]

अनेन सूत्रेण अप्राणिवाचिनां जातिशब्दानां द्वन्द्वस्य एकवत्त्वं विधीयते। यथा घटाश्च पटाश्च इत्यत्रार्थस्य बहुत्वात् बहुवचनं पुंस्त्वाच्च पुंल्लिङ्गता विधीयेत। किन्तु प्रकृतसूत्रेण एकवत्त्वं विधाय पूर्ववत् नपुंसकलिङ्गतां च कृत्वा घटपटमित्यादयः प्रयोगाः सिध्यन्ति।

---

[177] अत्रैव 2/4/4

[178] अत्रैव 2/4/5

[179] अत्रैव 2/4/6

**विशिष्टलिङ्गो नदी देशोऽग्रामाः**[180]

अनेन सूत्रेण नदीदेशवाचिनां भिन्नलिङ्गानां ग्रामवर्जितानां समाहारे द्वन्द्व एकवद्विधीयते। यथा गङ्गा च शोणश्च इत्यत्रार्थस्य द्वित्वात् द्विवचनं परवल्लिङ्गत्वाच्च पुंल्लिङ्गता विधीयेत। किन्तु प्रकृतसूत्रेण एकवत्त्वं विधाय पूर्ववत् नपुंसकलिङ्गतां च कृत्वा गङ्गाशोणमित्यादयः प्रयोगाः सिध्यन्ति।

**क्षुद्रजन्तवः**[181]

अनेन सूत्रेण क्षुद्रजन्तुवाचिनां द्वन्द्व एकवत्क्रियते। यथा यूकाश्च लिक्षाश्च इत्यत्रार्थस्य बहुत्वात् बहुवचनं स्त्रीत्वाच्च स्त्रीलिङ्गता विधीयेत। किन्तु प्रकृतसूत्रेण एकवत्त्वं विधाय पूर्ववत् नपुंसकलिङ्गतां च कृत्वा यूकालिक्षमित्यादयः प्रयोगाः सिध्यन्ति।

**येषां च विरोधः शाश्वतिकः**[182]

अनेन सूत्रेण शाश्वतिकविरुद्धानां जीववाचिनां शब्दानां द्वन्द्व एकवद्विधीयते। यथा अहिश्च नकुलश्च इत्यत्रार्थस्य द्वित्वात् द्विवचनं पुंस्त्वाच्च पुंल्लिङ्गता विधीयेत। किन्तु प्रकृतसूत्रेण एकवत्त्वं विधाय पूर्ववत् नपुंसकलिङ्गतां च कृत्वा अहिनकुलमित्यादयः प्रयोगाः सिध्यन्ति।

**शूद्राणामनिरवसितानाम्**[183]

अनेन सूत्रेण अनिरवसितशूद्रवाचिशब्दानां द्वन्द्व एकवद्विधीयते। यथा तक्षाश्च अयस्काराश्च इत्यत्रार्थस्य बहुत्वात् बहुवचनं पुंस्त्वाच्च पुंल्लिङ्गता विधीयेत। किन्तु प्रकृतसूत्रेण एकवत्त्वं विधाय पूर्ववत् नपुंसकलिङ्गतां च कृत्वा तक्षायस्कारमित्यादयः प्रयोगाः सिध्यन्ति।

---

[180] अत्रैव 2/4/7

[181] अत्रैव 2/4/8

[182] अत्रैव 2/4/9

[183] अत्रैव 2/4/10

**गवाश्वप्रभृतीनि च**[184]

गवाश्वप्रभृतीनि द्वन्द्वकृतैकवद्भावपठितानि साधूनि भवन्ति। यथा गावश्च अश्वाश्च इत्यत्रार्थस्य बहुत्वात् बहुवचनं परवल्लिङ्गत्वाच्च पुंल्लिङ्गता विधीयेत। किन्तु प्रकृतसूत्रेणैषामेकवत्त्वे पठितानां नपुंसकलिङ्गानां च शब्दानां साधुत्वं प्रतिपाद्यते।

**विभाषा वृक्षमृगतृणधान्यव्यञ्जनपशुशकुन्यश्ववडवपूर्वापराधरोत्तराणाम्**[185] अनेन सूत्रेण उपर्युक्तशब्दानां द्वन्द्वो विभाषा एकवत्क्रियते। यथा प्लक्षाश्च न्यग्रोधाश्च इत्यत्रार्थस्य बहुत्वात् बहुवचनं पुंस्त्वाच्च पुंल्लिङ्गता एव विधीयेत। किन्तु प्रकृतसूत्रेण विभाषा एकवत्त्वं विधाय पूर्ववत् नपुंसकलिङ्गतां च कृत्वा प्लक्षन्यग्रोधम्, प्लक्षन्यग्रोधाश्चेत्यादयः प्रयोगाः सिध्यन्ति।

**विभाषा समीपे**[186]

अनेन सूत्रेण अधिकरणस्य एतावत्त्वस्य समीपेऽर्थे गम्यमाने द्वन्द्वो विभाषा एकवत्क्रियते। यथा दन्ताश्च ओष्ठाश्च इत्यत्रार्थस्य बहुत्वात् बहुवचनं पुंस्त्वाच्च पुंल्लिङ्गता एव विधीयेत। किन्तु प्रकृतसूत्रेण विभाषा एकवत्त्वं विधाय पूर्ववत् नपुंसकलिङ्गतां च कृत्वा उपदशं दन्तोष्ठम्, उपदशाः दन्तोष्ठाश्चेत्यादयः प्रयोगाः सिध्यन्ति।

**ऊकालोऽज्झ्रस्वदीर्घप्लुतः**[187]

ह्रस्वश्च दीर्घश्च प्लुतश्च इत्यत्र समासे समाहारद्वन्द्वे एकत्वं नपुंसकता च स्यात्, इतरेतरयोगद्वन्द्वे वा बहुत्वं स्यात्, परन्तु न सूत्रे बहुत्वं दृश्यते, न तु नपुंसकता

---

[184] अत्रैव 2/4/11

[185] अत्रैव 2/4/12

[186] अत्रैव 2/4/16

[187] अत्रैव 1/1/27

चेत्कथमत्र पुंस्त्वम्? तत्र समाधानं दीयते यत् इदं पुंस्त्वं सौत्रं वर्त्तते।[188]

**नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम्**[189]

अनेन सूत्रेण अनपुंसकेन सह समासे नपुंसकं शिष्यते अनपुंसकं च निवर्त्तते। शिष्टशब्दस्य च विकल्पेन एकवचनेऽपि कार्यं भवति। शुक्लः पटः, शुक्ला शाटी, शुक्लं वस्त्रम् एषां समासे शुक्लम् शुक्लानि वा इत्येकशेषो भवति।

**संस्कृतं भक्षाः**[190]

संस्कृताः भक्षा इति सूत्रस्वरूपं स्यात् विशेषणविशेष्यनियमात्, किन्तु जात्याख्यया संस्कृतमिति एकवचनमभिहितम्, नपुंसकत्वं चात्र सौत्रमवगन्तव्यम्। एवं तावत्सूत्रमिदं लिङ्गवचनयोः विशिष्टं प्रयोगमभिदधाति।

एवं स्वयं व्याकरणसूत्रस्वरूपं समुपयुज्यापि लिङ्गवचनज्ञानोपायपन्था आप्यत इति तु नूनमेक उपायविशेषः परं सूत्रस्वरूपतद्गतवार्तिकव्याख्यादिकमतिरिच्यापि लिङ्गवचनस्वरूपगतं सरलं समुपस्थापनं कोषसाहित्यादिभिरपि सहजतया शक्यते सम्भावयितुम्।

व्याकरणसाहित्ययोः सिद्धान्तं समनुश्रित्य तदुभयशास्त्रदृशा लिङ्गवचनतत्त्वविमर्शनार्थं कोशसाहित्याध्ययनं लिङ्गानुशासनादीनां समग्रः परिचयः यथाविस्तरं प्रस्तूयते।

प्रथमं तावत् कोशसाहित्यस्य समग्रपरिचयो भवत्यपेक्षितः।

वस्तुतः प्रत्येकं शब्दोऽर्थापेक्षो भवति। यथा गोशब्दोच्चारणमात्रात् गोः पूर्णं मूर्त्तरूपं मस्तिष्के प्रतिबिम्बितमिव भवति। तस्याकारप्रकाररागगुणशृङ्गपुच्छादिभिः समन्वितस्य गतिसंयुतस्य जीवस्य

---

188 सिद्धान्तकौमुदी, तत्त्वबोधिनी, पृष्ठसङ्ख्या - 04

189 अष्टाध्यायी 1/2/69

190 अत्रैव 4/2/16

बोधो भवति। तात्पर्यमिदं यदतीव लघ्वाकारो गोशब्दः स्वात्मनि कियद्व्यापकमर्थं समाविश्य तिष्ठति तथैव नानाशब्दानां प्रयोगोऽपि न्यूनं वैचित्र्यं न स्थापयति। अतः शब्दार्थौ अन्योऽन्याश्रितौ भवतः। संसारभाषासु कश्चन एवंविधः शब्दो नास्ति यस्य कोऽप्यर्थो न स्यात्। तथा च भाषावैज्ञानिकैः एवंविधवाक्यानां प्रयोगोऽक्रियत येषामुपयोगो नास्ति किन्तु तेषां कश्चनार्थस्तु भवत्येव। कालिदासेनापि शब्दार्थयोः अन्योऽन्याश्रयसम्बन्धः प्रोक्तः।[191] सन्दर्भेऽस्मिन् वक्तुं शक्यं यत् कोषशब्दोऽप्ययमर्थसापेक्ष एव।

कोषशब्दस्य प्राथम्येन प्रयोग ऋग्वेदे प्राप्यते। ऋग्वेदे कोषशब्दोऽयं प्रायः पञ्चसु स्थानेषु प्रयुक्तो वर्त्तते। प्रथममण्डले कोषशब्दस्य[192] प्रथमतः सायणेन मेघेऽर्थे[193] द्वितीये च स्थाने मध्यभागेऽर्थे[194] प्रयोगो व्यधायि।

अन्यत्र चैकस्मिन् स्थान आयुधादीनां स्थापनस्थानङ्कोष[195] इत्युच्यते। ऋग्वेदस्य दशमे मण्डले कोषशब्दः द्युलोके पृथिवीलोके चार्थे प्रयुक्तो[196] वर्त्तते।

वैदिकसाहित्यानन्तरं लौकिकसंस्कृतेऽपि कोषशब्दस्य प्रयोगो विविधेष्वर्थेषु विहितो वर्त्तते। अमरकोषे कोषशब्दस्य प्रयोगोऽनेकेष्वर्थेषु दृश्यते। एकस्मिन् स्थले कोषशब्दस्य प्रयोगः स्वर्णरजतादिष्वर्थेषु विहितः।[197] अपरत्र च

---

[191] "वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ"॥ - रघुवंशम् 1/1

[192] "श्चोतन्ति कोशा उव नो रथेष्वा"। ऋग्वेदः 1/87/2

[193] "कोशाः मेघनामैतत्। वो युष्माकं रथेष्वासक्त मेघाश्चोतन्ति जले मुञ्चन्ति"। - अत्रैव, सायणभाष्यम्

[194] "रथे कोशे कोशवद्वेष्टिते मध्यभागे"। - अत्रैव 8/20/8 इत्यत्र सायणभाष्यम्

[195] "कोश आयुधादीनां कोशस्थाने रमणशीले रथे"। - ऋग्वेदः 8/22/9

[196] "द्यौर्भूमिः कोश आसीत्"। - ऋग्वेदः 10/85/7

[197] "स्यात्कोषश्च हिरण्यं च हेमरूप्ये कृताकृते"। - अमरकोषः 2/9/91

कोषशब्दस्य प्रयोगः पुष्पाणामविकसितकोरकार्थे, निध्यर्थे च कृतः।[198] रघुवंशेऽप्यनेकत्र कोषशब्दः निध्यर्थे प्रयुक्तः।[199] शिवराजविजये कोषशब्दः पुष्पाणामविकसितकोरकेऽर्थे प्रयुक्तो दृश्यते।[200] हेमचन्द्राचार्येण स्वसमस्तेषु कोषेषु कोषशब्दः प्रायोजि। अभिधानचिन्तामण्यां कोषशब्दस्त्रिषु स्थलेषु वर्त्तते यस्यार्थाः निध्य[201]सिपिधाना[202]दयस्तत्र सन्ति। अनेकार्थसङ्ग्रहेऽपि कोषशब्दप्रयोगः निध्यर्थेऽवलोक्यते।[203] बाणभट्टोऽपि कादम्बर्यामस्मिन्नेवार्थे कोषशब्दं प्रयुङ्क्ते।[204]

यथा द्रव्यादीनां सङ्ग्रहोऽर्थकोष उच्यते, तथैव शब्दानां सङ्ग्रहोऽपि शब्दकोषसंज्ञां लभते। क्रमिककोषमानदण्डानुसारेण यः शब्दानां सङ्ग्रहः स एव कोष उच्यते, यतः शब्दानां सङ्ग्रहस्तु काव्यग्रन्थेष्वपि भवति किन्तु सः सङ्ग्रहः क्रमिको न भवति अतः कोषसंज्ञां न लभते। एवमेव द्रव्याणामित्थम्भूतः सङ्ग्रहो यो निधावेव क्रियते स एवार्थकोष उच्यते, अन्यद्धनं यन्न सङ्गृह्यते तत्कोषाभिधन्न भवति। केषाञ्चित्पदार्थानां विशेषतः शब्दानां तदर्थानां च सङ्ग्रहः कोष इत्युच्यते। एतस्मिन्नेवार्थेऽयं शब्दः संस्कृते निघण्टुरित्यभिधीयते। अभिधानं तु प्रायस्तेष्वेवार्थेषु प्रसिद्धो येषु कोषो यथा वाचस्पत्याभिधानचिन्तामण्यादि। निघण्टुः मुख्यतः कस्यचिद्विशिष्टस्य विषयस्य शब्दावलीं सूचयति यथा वैदिकवैद्यकनिघण्ट्वादयः।

---

[198] "कोषो स्त्री कङ्मले खड्गपिधाने अर्थौशदित्ययोः"। - अत्रैव 3/3/221

[199] " प्रातः प्रमाणाभिमुखाय तस्मै सविस्मयाः कोषगृहे नियुक्ताः"। - रघुवंशम् 5/29

[200] "रात्रिर्गमिष्यति भविष्यति सुप्रभातम्, भास्वानुदेष्यति हसिष्यति पङ्कजश्रीः।

इत्थं विचिन्तयति कोषगते द्विरेफे, हा हन्त हन्त नलिनीं गज उज्जहार"। - शिवराजविजयम् 2/1

[201] अभिधानचिन्तामणिः 3/378

[202] अत्रैव 3/447

[203] अनेकार्थसंग्रहः, पृष्ठसङ्ख्या - 555

[204] "कोषस्तपसः" - कादम्बरीपूर्वभागः, पृष्ठसङ्ख्या - 95

अमुना प्रकारेण शब्दकोषस्य तात्पर्यं क्रमिकशब्दानां सङ्ग्रहाद्वर्त्तते, यस्याध्ययननेन शब्दानां विविधावयवानां विविधार्थानाञ्च ज्ञानं भवति।

संस्कृतसाहित्ये शब्दकोषेषु शब्दानां सङ्ग्रहो विभिन्नप्रकारेणाक्रियत। केषुचित्तु एवम्भूतः सङ्ग्रहो वर्त्तते यत्र केवलं शब्दानां पर्यायाः अर्थात् एकस्य शब्दस्यानेकेऽर्थाः प्रादीयन्त यथा निघण्टुप्रभृतयः कोषग्रन्थाः। द्वितीयेषु च शब्दानां सः सङ्ग्रहो वर्त्तते यस्मिन् शब्दानां विविधा अर्थाः प्रास्तूयन्त अर्थादेकस्य शब्दस्यानेकार्थानां प्रदानाय प्रायत्यत। उक्तपूर्वमिदं यत् शब्दार्थानां मिथः अन्योन्याश्रितः सम्बन्धः। सन्दर्भेऽस्मिन्नेवादो वक्तुं शक्यं यत् कोषेषु शब्दार्थाविव मुख्यौ, एतयोरेव शब्दार्थयोः ध्वनिपदादयः आश्रिताः भवन्ति। कस्मिंश्चित्कोषे शब्दानां माध्यमेन सम्बन्धितशब्दस्याधिकाधिकार्थानां प्रयोगो दृश्यते, केषुचिच्च कोषेषु शब्दस्य माध्यमेन शब्दस्यानेके पर्यायाः प्रयुज्यन्ते। अर्थात् सम्बन्धितशब्दस्य यावन्तोऽपि पर्यायाः शक्यन्ते तेषामुल्लेखः क्रियते। भिन्नशब्देषु अमुकनाम अमुकेऽर्थे कति प्रकारेण प्रयोक्तुं शक्यतेऽथ शब्दानां पर्यायेष्वपि विविधा अर्था एव संलक्ष्यन्ते अर्थात् शब्दपर्यायाणामुद्देश्यमेकस्य शब्दस्य अनेकैर्नामभिर्ज्ञानप्रदानं वर्त्तते। पर्यायेषु सत्स्वपि विविधार्थानां बोधस्तु भवत्येव, यथा अमरकोषे देवताशब्दस्य षड्विंशतिर्पर्याया[205] उच्यन्ते किन्तु समस्तान्यपि नामानि पृथक् पृथगर्थैरभिधीयन्ते। अमरा न म्रियन्त इति[206], निर्जराः जराया निष्क्रान्ता, देवो दीव्यन्ति[207] इति देवाः, त्रिदशा तृतीया यौवनाख्या दशा सदा येषाम्।[208] अमरा इति कथनेन देवानां स्वरूपं ध्यानमायाति यद् देवाः न कदाचिन्म्रियन्ते। निर्जरा इति कथनेन प्रतीयते यत् देवाः न कदाचित् वृद्धावस्थां प्राप्नुवन्ति। त्रिदशाशब्देनाप्ययमेव बोधो यत् ते देवाः ये सर्वदा तृतीयावस्थायां

---

[205] अमरकोषः, 1/7-9

[206] अत्रैव, सुधाव्याख्या, पृष्ठसङ्ख्या - 5

[207] अत्रैव

[208] अत्रैव

यौवनावस्थायामेव भवन्ति। निष्कर्षतः स्पष्टमिदं यत् कोषशब्दस्य तात्पर्यमेवंविधशब्दैर्वर्त्तते यैः शब्दानामर्थप्रतीतिरेव भवति। द्वितीयशब्देषु कोषाः समानार्थकाः अनेकार्थकाः वा भवेयुः किन्तु तेषामुद्देश्यं तु विविधार्थप्रकटनमेव भवति।

संस्कृतसाहित्यस्य शब्दभण्डारोऽतिविस्तृतो वर्त्तते। भाषायामस्यां नवनवैः प्रयोगैः कोटिशः शब्दानां सहस्रवर्षेषु विकासोऽभवत्। शब्दतत्त्वमिदं स्वभाषासम्पत्तिं अक्षुण्णां कुर्वद् अन्यभाषाणां विकासाय महतीं सहायतां कर्त्तुं सक्षमम्भवति। कस्या अपि भाषाया शब्दभण्डारस्योपयोग एव विकासकारणं भवति। उपयोगाच्च तात्पर्यं तस्य वास्तविकार्थतत्त्वज्ञानाद् वर्त्तते। अर्थतत्त्वस्य च ज्ञानं शब्दस्य वाच्यार्थभावार्थतात्पर्यार्थप्रक्रियया सम्भवति। भर्तृहरिणाऽर्थनिश्चयाय निम्नसाधनान्युदलेखिषत - १.संयोगः, २.विप्रयोगः, ३.साहचर्यम्, ४.विरोधिता, ५.अर्थः, ६.प्रकरणम्, ७.लिङ्गम्, ८.अन्यशब्दसाहचर्यम्, ९.सामर्थ्यम्, १०.औचित्यम्, ११.देशः, १२.कालः, १३.व्यक्तिः, १४स्वर इत्यादयः।[209] किन्त्वेतैरुपर्युक्तैः प्रकारैः केवलं शब्दानां सोऽर्थोऽवबुध्यते यस्य विशिष्टार्थो भवति। अर्थज्ञानाय मुख्यरूपेण संकेतग्रहणमावश्यकम्। यावच्च शब्दानां संकेतो न गृह्यते तावत्तेषां नोपयोगित्वम्। यत इदं स्पष्टं यत् शब्दो विविधसंकेतैर्विविधार्थान् प्रतिभासयति। स एव शब्दोऽपरेषु संकेतेषु अपरप्रकारकं भिन्नसंकेतेषु च भिन्नप्रकारकमर्थं बोधयति। विदुषां सम्मतं यत् प्रत्येकं व्यक्तिः स्वस्वनियतवासनानुसारेणैवार्थस्वरूपं निश्चिनोति।[210] अर्थादेकस्य शब्दस्यैव स्वस्वक्षमतानुसारं मनुष्यः पृथक् पृथक् नियोजयति, अर्थे साम्यं न भवति। वक्ता कैश्चिदन्यैर्भावैः शब्दान् प्रयुङ्क्ते, श्रोता

---

[209] "संयोगो विप्रयोगश्च साहचर्यं विरोधिता। अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः॥

सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः। शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः"॥

- काव्यप्रकाशः, द्वितीय उल्लासः, पृष्ठसङ्ख्या - 89

[210] "प्रीतिनियतवासना वसेऽनेव प्रतिनियताकारोऽर्थः।

तत्त्वतस्तु कश्चिदपि नियतो नाभिधीयते"॥ - वाक्यपदीयम् 2/136

कैश्चिदन्यैर्भावैः शब्दान् गृह्णाति। अपि च विविधश्रोतारो विविधभावान् गृह्णन्ति। अत एव इमां विविधतां समापयितुं शब्दानामर्थेषु एकरूपतां सम्पादयितुं वास्तविकमर्थतत्त्वं च ज्ञातुं संकेतग्रहणमत्यावश्यकमभवत्। संकेतग्रहणं विना शब्दस्य वास्तविकोऽर्थो न शक्यते ज्ञातुम्। विद्वद्भिः अर्थज्ञानाय संकेतग्रहणं विविधप्रकारकमुच्यते। तत्र व्याकरणात्, उपमानात्, कोशात्, आप्तवाक्यात्, व्यवहारात्, वाक्यशेषात्, विवरणात्, प्रसिद्धशब्दस्य च सान्निध्यात् संकेताः गृह्यन्ते।[211]

व्याकरणं शब्दानां विभिन्नावयवान् व्युत्पादयति किन्तु सहैव यौगिकशब्दानामेव संकेतं गृह्णाति। रूढशब्दानां संकेतग्रहणं व्याकरणान्न संभवति। व्याकरणातिरिक्तानि अन्यानि यानि साधनानि सन्ति तान्यपि सर्वप्रकारकाणां शब्दानां यथार्थसंकेतान् न ग्राहयितुं शक्नुवन्ति। केवलं कोष एव माध्यममात्रं वर्त्तते यः सर्वप्रकारकाणां शब्दानां संकेतान् ग्राहयितुं शक्नोति। अस्या एव आवश्यकतायाः पूर्त्यर्थं संस्कृतकोषाः व्यरच्यन्त। इतरशब्देष्वेवंविधा समस्या विदुषां समक्षमुपस्थिताऽभवद् येन कोषग्रन्थानां निर्माणमभवत्।

कोष एवार्थज्ञानस्य तत्साधनं यत् कस्मिन्नपि समये किंविधस्यापि शब्दस्य विविधार्थान् ददत् सर्वाङ्गीणतामाप्नोति। यत उपर्युक्तेषु समस्तेषु अर्थज्ञानसाधनेषु सर्वाण्यपि साधनानि भिन्नभिन्नप्रकारैरर्थावबोधे सक्षमाः सन्ति। किञ्चित्संयोगमाध्यमेनार्थमवबोधयति किञ्चिच्च वियोगेन साहचर्येण विरोधितया अर्थप्रकरणादिना वा माध्यमेन तथा किञ्चिदाप्तवाक्यव्यवहारादिद्वारा रूढयोगरूढशब्दानामर्थावबोधे सहायकोऽस्ति। किन्तु कोष एवैकमीदृक्साधनं यत्समस्तप्रकारैरर्थबोधे सहायको भवति।

कोषेषु तावद् व्युत्पत्त्यादिविषयान् अतिरिच्य लिङ्गवचनत्त्वद्वयमाश्रित्यापि प्रमाणवचांस्याप्यन्ते। वस्तुतः पर्यायशब्दादिज्ञानाय तत्तच्छब्दलिङ्गवचनादिज्ञानाय च कोशग्रन्थाध्ययनं

---

[211] "शक्तिग्रहं व्याकरणोपमानकोषाप्तवाक्याद्व्यवहारतश्च।

वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः"॥ - वाचस्पत्यम्

भवत्यनिवार्यम्। महाभाष्यस्योद्योताख्यायां टीकायां नागेशभट्टोऽपि “**बहुषु बहुवचनम्**”[212] “**स्त्रियाम्**”[213] इत्यादिसूत्रव्याख्याऽवसरे “**लिङ्गादिकं तु कोशादितो निर्णेयम्**”[214] एवं व्याहृत्य लिङ्गज्ञानार्थं कोशादीनां प्रामाण्यं प्रख्यापयति।

कोशेष्वेतेषु वेदार्थशब्दकोशः. वैदिककोशः, ऐतरेयब्राह्मणकोशः, उपनिषद्वाक्यमहाकोशः, धर्मकोशः, न्यायकोशः इत्येते वैदिकशब्दकोशाः प्रसिद्धाः।

लौकिकशब्दकोशेषु तावदुपलब्धानुपलब्धभेदात् कोशनामानि पुरस्कर्तुं शक्यन्ते। तत्रादावनुपलब्धलौकिकसंस्कृतकोशेषु कात्यायनविहिता नाममाला, वाचस्पतिप्रणीतः शब्दकोशः, विक्रमादित्यरचितः शब्दकोशः, अपरेण विक्रमादित्येन प्रणीतः संसारार्तवः, व्याडिरचितं च उत्पलिनम् इत्येवं कोशाः परिगणयितुं शक्यन्ते। साम्प्रतं समुपलब्धलौकिकसंस्कृतशब्दकोशा ये सन्ति, तेषु पुरुषोत्तमदेवविहिता हारावली, हलायुधविरचिता अभिधारत्नमाला, यादवप्रकाशकृता वैजयन्ती, धनञ्जयप्रणीता नाममाला, हरिषेणकृतो बृहत्कथाकोशः, प्रभाचन्द्रविहित आराधनाकथाकोशः (गद्यबद्धः), नेमिदत्तप्रणीत आराधनाकथाकोशः (पद्यबद्धः), केशवस्वामिकृतौ नानार्थार्णवसङ्क्षेपः शब्दकल्पद्रुमश्च, महेश्वरविहितो विश्वप्रकाशकोशः, अभयपालप्रणीता नानार्थरत्नमाला, हेमचन्द्ररचितावभिधानचिन्तामणिकोशोऽनेकार्थसङ्ग्रहश्च, मङ्खविहितोऽनेकार्थकोशः, मल्लभट्टप्रणीताऽऽख्यातचन्द्रिका, इरुगपददण्डिनाथप्रणीता नानार्थरत्नमाला, वामनभट्टबाणकृतौ शब्दचन्द्रिका शब्दरत्नाकरश्च, मेदिनीकरकृतोऽनेकार्थशब्दकोशः, श्रुतसागरविहितो व्रतकथाकोशः, पद्मसुन्दरप्रणीतः सुन्दरप्रकाशशब्दार्णवः, केशवदैवज्ञकृतः कल्पद्रुमः, अप्पयदीक्षितरचिता नामसङ्ग्रहमालिका, महिपविहितोऽनेकार्थतिलकः, श्रीमल्लभट्टप्रणीत आख्यातचिन्तामणिः,

---

[212] अष्टाध्यायीसूत्रसङ्ख्या – 1/4/21

[213] अत्रैव 4/1/3

[214] पाणिनीयव्याकरणमहाभाष्यम्, अष्टाध्यायीसूत्रसङ्ख्या – 4/1/3 इत्यत्र उद्योतटीका

महादिदेववेदान्तिविहितोऽनादिकोशः, राघवकविकृतः कोशावतंसः, भोजप्रणीता नाममाला, त्र्यम्बकमिश्रकृतं विशेषामृतम्, हर्षकीर्तिरचितं शारदीयम् इत्येवमिमे कोशाः परिगणयितुं शक्यन्ते।

आधुनिकेषु कोशेषु तावत् तारानाथवाचस्पतिविरचितं वाचस्पत्यम्, राधाकान्तदेवकृतश्शब्दकल्पद्रुमः, विजयराजेन्द्रसूरिकृतोऽभिधानराजेन्द्रकोशः, सुखानन्दनाथकृतश्शब्दार्थचिन्तामणिः इत्येषां प्रसिद्धिरिति।

वस्तुतः कोशेष्वेव लिङ्गानुशासननामग्रन्थानामपि यथाशक्यं नामोल्लेखः शक्यत एव विधातुम्। यतस्तत्र तु साक्षाच्छब्दानां लिङ्गं तत्सम्बद्धाधारादिविषयजातं पुरस्क्रियत इति। तेषु लिङ्गानुशासनेषु तावत् प्रथितिपथावाप्तानां केषाञ्चन लिङ्गानुशासनानां यथाशक्यञ्च तदीयलिङ्गवचनज्ञानोपायरूपाणां वपुःस्वरूपमपि विशदीक्रियतेऽत्र -

तत्रादौ हि लिङ्गानुशासनेषु पाणिनीयं लिङ्गानुशासनं समुल्लिख्यते। तत्रत्या शैली हि सूत्रस्वरूपात्मिका। दशमशताब्द्या बृहत्संहिताटीकाकारो भट्टोत्पलः पञ्चदशशताब्द्याः प्रक्रियाकौमुदीकारः रामचन्द्र एतस्य टीकां व्यरचयताम्। तदनन्तरं तदुपरि भट्टोजिदीक्षित एकां वृत्तिं विहितवान्। इयं वृत्तिः शब्दकौस्तुभान्तर्गता। अष्टादशशताब्द्यां भवदेवमिश्रपुत्रो भैरवमिश्रो वृत्तेश्चास्याष्टीकामेकामपि प्रणीतवान्।

ततश्च व्याडेः लिङ्गानुशासनसूत्रमपि लिङ्गानुशासनेषु परिगण्यते। पतञ्जलिः महाभाष्याद् भर्तृहरिग्रन्थाच्च सिद्धं यद् व्याडिः, दाक्षायणः, दक्षकन्याया दाक्ष्याः पुत्रः पाणिनिः, दक्षसुतस्य दाक्षेः पुत्रो व्याडिर्दाक्षायण इति। व्याडिप्रणीतं ग्रन्थत्रयमाप्यते, तेष्वेव लिङ्गानुशासनसूत्राणां सन्निवेश इत्युच्यते। वररुचिप्रणीतं लिङ्गानुशासनं तावत् सुप्रथितलिङ्गानुशासनमेकम्। लिङ्गविशेषविधिर्वररुचिलिङ्गसूत्रमिदम् अशीतिकारिकासंयुतं वर्तते। एष ग्रन्थः कस्य वररुचेरित्यत्र विदुषामैकमत्यं नास्ति। ततो हर्षवर्द्धनस्य लिङ्गानुशासनं सरण्यामस्मिन् समायाति। अत्र हि सप्तनवतिकारिका वर्तन्ते। तत्र प्रकरणचतुष्टयमाप्यते - (१) स्त्रीलिङ्गप्रकरणम्, (२) पुँल्लिङ्गप्रकरणम्, (३)

नपुंसकलिङ्गप्रकरणम्, (४) मिश्रलिङ्गप्रकरणञ्च। एतस्य ग्रन्थस्योपरि भट्टभारद्वाजपुत्रस्य पृथिवीश्वरस्य टीका वर्तते।

अथ वामनकृतं लिङ्गानुशासनं तावत् त्रिंशत्पद्ययुतं वर्तते। इह ग्रन्थकारस्यैका स्वोपज्ञव्याख्याऽपि वर्तते। यद्यपि जैनमते त्वत्रत्यमङ्गलाचरणमाश्रित्य सिद्धशब्देनादितीर्थङ्करः सिद्धसर्वज्ञः। बौद्धमते च सर्वार्थसिद्धस्तथापि मङ्गलार्थक एव एष शब्दः, यतः स्वोपज्ञव्याख्यारम्भे प्रदत्तपद्येनायं सनातनधर्मावलम्बी सिद्ध्यति। कातन्त्रवृत्तिकारदुर्गसिंहस्य लिङ्गानुशासनमप्येकमाप्यते। कौमारदेवव्याख्यायामुल्लेखो वर्तते यदनेन अस्मिन् ग्रन्थस्य स्वोपज्ञटीकाऽपि लिखिता। काश्मीरग्रन्थे दुर्गोक्तप्रणीतत्वेन लिङ्गानुशासनस्योल्लेखो वर्तते। ग्रन्थश्च नाधुनोपलभ्यते। अभिनवशाकटायनप्रणीतं लिङ्गानुशासनम् आर्यापद्ये निबद्धं सप्ततिकारिकास्वरूपसंयुतमाप्यते। भोजदेवस्य लिङ्गानुशासनं सरस्वतीकण्ठाभरणस्यांशत्वेन प्रोच्यते। अरुणदेवकृतं लिङ्गानुशासनम्- अयं ग्रन्थो नोपलभ्यते; परं सर्वानन्दटीकायामरुणदेवचर्चा विद्यते। वेङ्कटरामदृष्ट्या अयमभिनवशाकटायनपरवर्ती। बुद्धिसागरकृतं लिङ्गानुशासनम् - श्रीबुद्धिसागराख्यव्याकरणान्तर्गतम्। ग्रन्थकारोऽस्य कश्चन जैनः। वेङ्कटराममतेनायं दुर्गसिंहस्य भोजस्य च सामयिकः। जैनहेमचन्द्रप्रणीतं स्वोपज्ञलिङ्गानुशासनम् - हेमचन्द्रो दशमशताब्द्यामेकादशशताब्द्यां वाऽऽसीत्। ग्रन्थोऽधुना प्रायो दुर्लभायते। परमेतस्य प्रसिद्धिर्नानेन परिबाधिता प्रतीयते।

एतद्व्यतिरिक्ता लिङ्गानुशासनस्यानेके ग्रन्थाः सन्ति। एवमेव जयसिंहस्य लिङ्गवार्त्तिकम्, रामनाथविद्यावाचस्पतेः लिङ्गादिसङ्ग्रहटिप्पणी, शान्तनवस्य लिङ्गानुशासनसूत्रम्, चान्द्रसम्प्रदायस्य लिङ्गानुशासनं लिङ्गकारिका वा, जैनेन्द्रलिङ्गानुशासनम्, पद्मनाभदत्तविरचितं लिङ्गानुशासनम्, जयानन्दसूरिविरचितः लिङ्गानुशासनवृत्त्युद्धारः, वामनसुरिपुत्रविरचितलिङ्गनिर्णयभूषणम् इत्येवं नैकानि

लिङ्गानुशासनादिग्रन्था लिङ्गनिर्णयस्य जटिलत्वादेव पण्डितप्रवरैर्बहुधा विरचिताः आप्यन्ते।

लिङ्गानुशासनस्यैव परम्परायां नामलिङ्गानुशासनशब्देनामरसिंहस्य विद्यते प्रसिद्धं लिङ्गानुशासनम्। अस्य ग्रन्थस्य बह्व्यष्टीका सन्ति। अमरसिंहश्चन्द्रगोमेः समसामयिको भवेत्। एकादशशताब्द्यां क्षीरस्वामी, द्वादशशताब्द्यां हेमचन्द्रश्चात्र टीकां व्यरचयताम्। अमरकोशापरपर्यायं नामलिङ्गानुशासनमिदं साम्प्रतं स्वीयसरलशैल्या सर्वत्र प्रथितं स्वीकृतञ्चेति विदितवेदितव्यानां सुविदितमेव। वस्तुतस्त्वत्र तत्तच्छास्त्रलिङ्गानुशासनादीनां वचांसि सारतः सम्प्रस्तोतुं सारल्येन सुगमेन च नयेन श्लोकवपुः सम्पुष्टं विलोक्यते।[215] स्वयमेवामरसिंहो स्पष्टयत्येतत्कारिकागतलिङ्गस्वरूपस्य विशिष्टसमुपस्थानविषये-

**"प्रायशो रूपभेदेन साहचर्याच्च कुत्रचित्।**

**स्त्रीपुन्नपुंसकं ज्ञेयं तद्विशेषविधेः क्वचित्॥**

**भेदाख्यानाय न द्वन्द्वो नैकशेषो न सङ्करः।**

**कृतोऽत्र भिन्नलिङ्गानामनुक्तानां क्रमादृते॥**

**त्रिलिङ्ग्यां त्रिष्विति पदं मिथुने तु द्वयोरिति।**

**निषिद्धलिङ्गं शेषार्थं त्वन्ताथादि न पूर्वभाक्"॥**[216]

वस्तुतो नामलिङ्गानुशासनेनानेन विज्ञाप्यते यल्लिङ्गवचनज्ञानं न केवलं साक्षात् प्रयोगसन्दर्भ एवावश्यकमपितु लिङ्गानुशासनाध्ययनप्रसङ्गेऽपि तस्य लिङ्गवचनसंयुतस्य ज्ञानस्य विशिष्टनयेन सुगुम्फनं सम्प्रदर्शनं वा तत्तच्छब्दानां लिङ्गविनिर्धारणरूपं मतमात्मसात्कर्तुमत्यावश्यकमिति। तद् यथा शब्दानां रूपभेदमाश्रित्य स्वतः सहजं लिङ्गनिर्धारणं कर्तव्यम्। लक्ष्मीः पिनाकः धनुरित्येवम्भूतानां शब्दानां प्रकृतिप्रत्ययज्ञानपूर्वकं स्वयमेव

---

[215] समाहृत्यान्यतन्त्राणि सङ्क्षिप्तैः प्रतिसंस्कृतैः।

सम्पूर्णमुच्यते वर्गैर्नामलिङ्गानुशासनम्॥ - अमरकोशः, 1/2

[216] अत्रैव, 1/3-5

तत्तच्छब्दलिङ्गनिर्धारणं ज्ञातव्यम्। अथ साहचर्यं निभाल्यार्थात् समीपवर्तिशब्दस्य लिङ्गं ज्ञात्वाऽपि शब्दस्य लिङ्गं विज्ञेयमिति। यथा अश्विनीति स्त्रीलिङ्गकशब्दस्य समीपवर्तिनोऽश्वयग् इत्यस्य शब्दस्यापि स्त्रीलिङ्गत्वं साहचर्यवशात् स्वतो विनिर्धार्यमिति। ततश्च लिङ्गानां विशेषविधिमनुसृत्य शब्दानां लिङ्गं विज्ञेयम्। यथा भेरीशब्दस्य तु स्त्रीलिङ्गत्वं दुन्दुभिशब्दस्य च पुंस्त्वं प्रतिपाद्यते। कुत्रचिच्च लिङ्गभेदमाख्यातुं द्वन्द्वाभावः कृत आप्यते यथा कुलिशं भिदुरं पविः इत्यत्र द्वन्द्वो न विहितो यतः कुलिशभिदुररूपौ नपुंसकलिङ्गकौ शब्दौ पविशब्दश्च पुँल्लिङ्गक इति। एवमेवैकशेषाभावोऽपि कृतः। यथा नखः खं श्रावणो नभाः, अत्र हि खश्रावणौ तु नभसीत्येवं न विहितं यतो लिङ्गवैभिन्न्यं प्रतिपदमत्र वर्तते। अथ कुत्रचिच्च भिन्नलिङ्गकानामपि पदानां द्वन्द्वसमासः एकशेषश्चात्र विहित एव, तद्यथा विद्याधराप्सरोयक्षरक्षोगन्धर्वकिन्नराः, इह मध्येऽप्सरश्शब्दस्य स्त्रीलिङ्गकत्वेऽपि लिङ्गनिर्धारणक्रमे प्रयोगः। अथैकशेषोऽप्येवमेव पितरौ इत्यत्र यथा मातृपितृशब्दयोः पृथक् पृथग् लिङ्गविषयत्वादपि। ततश्च ये शब्दाः त्रिलिङ्गिनस्तेषां क्रुते त्रिषु इति पदोपादानेन सारल्येन त्रिलिङ्गित्वमत्र प्रतिपादितम्। यथा स्फुलिङ्गशब्दोऽत्रोदाहरणमात्रम्। ये च शब्दाः विमानशब्दवत् पुन्नपुंसकलिङ्गकाः कीलशब्दवत् स्त्रीपुँल्लिङ्गकाश्च भवन्ति तेषामेकत्रोपस्थापनमपि कदाचिद् विशेषनयपूर्वकमस्ति कृतममरकोशे। ततश्च तु, अथ शब्दाभ्यां पूर्वलिङ्गत्वमपाकृत्य लिङ्गान्तरादितत्त्व-प्रतिपादनरूपत्वमप्यत्र दृष्टिपथमायाति।

अत एव लिङ्गवचनज्ञानोपायसन्दर्भेऽमरसिंहसृष्टा रीतिरेवंविधाऽपि विशेषतो हृद्येति निःसंशयं शक्यते प्रतिपादयितुम्।

वस्तुतस्तु लिङ्गभेदविषयो यथा विविधायते तथैव वचनभेदविषयस्यापि प्रयोगवैलक्षण्यं तत्तत्तत्त्वसम्बद्धान् आधारान् अधिकृत्य सुस्पष्टमवगन्तुं शक्यत एव। नाटकादिषु तावत् स्वविषयं विवेचयद्भिः पात्रविशेषैः स्वीयोपस्थापनं वयम्,[217] अस्माकम् इत्येवं बहुवचनपदत्वमनुश्रित्य विधीयते परं व्याकरणशास्त्रं

[217] "विश्वम्भरा भगवती भवतीमसूत राजा प्रजापतिसमो जनकः पिता ते।

समनुश्रित्य **सविशेषणस्य प्रतिषेधः**[218] इति वार्त्तिकवचःप्रामाण्यानुगुण्येन एवं प्रयोगाः नैव कर्तुं शक्यन्ते इति वचनगतराद्धान्तविशेषः। वस्तुतस्तु आदरार्थेऽपि बहुवचनप्रयोगस्य वर्तते परिपाटी यथा अभिनवगुप्तपादाः, आचार्याः कुमारिलभट्टाः इत्यादयः प्रयोगाः। अतिशयादरान्वितानाम् आचार्यादीनां पात्राणां विवरणप्रसङ्गे लभ्यन्त ईदृशाः प्रयोगाः। यथा –

**गुरोर्गिरः पञ्चदिनान्यधीत्य वेदान्तशास्त्राणि दिनत्रयं च।**

**अमी समाघ्राय च तर्कवादान् समागताः कुक्कुटमिश्रपादाः॥**[219]

अन्यत्रापि वेदार्थदीपिकाऽऽदिष्वेवं निभालयितुं शक्यते – "व्याख्येयार्थबहुत्वेन बहुमानेन चात्मनः। व्याख्यामात्रात्मन्यथाऽऽरोप्य बहुत्वं तु प्रयुज्यते॥

यथा हि निधिमासाद्य प्रयुञ्जानस्तु दृश्यते। एते वयं समृद्ध्यर्था देवोऽस्मासु प्रसीदति॥"

अथ "एकोऽहं बहु स्याम्", "द्वा सुपर्णा सयुजा सखाया" इत्येतद्वचनावलोके एव प्रकृतस्य वचनस्य सङ्ख्यातत्त्वस्य वा सारः शक्यते स्पष्टीकर्तुम्। ब्रह्ममायाजगद्रूपः समग्र एव तत्त्वविशेषो वस्तुतः एतद्वचनपदार्थस्पष्टीकरणाधीनत्वेनैव शक्यते प्रतिपादयितुम्। ततश्च **जात्याख्यायाम् एकस्मिन् बहुवचनमन्यतरस्याम्**[220] जातिव्यक्तिपक्षद्वयं समाश्रित्यैक्यस्य बहुत्वस्य चाधारोऽपि एतद्विशिष्टवचनतत्त्वमेव विशदयति।

"न हि सर्वः सर्वं जानाति" इत्यत्र सत्यपि बहुत्वे बहुत्वयुक्तः सर्वशब्दस्य एकः समूहरूपोऽर्थो भवति प्रधानः, अपरत्र सर्वे इत्यत्र न हि एकः समूहरूपोऽर्थः प्रधानायतेऽपित्वत्रत्ये बहुत्वे व्यस्तत्वमेव प्रधानविषयः भवति। एवमेव उभशब्दः

---

तेषां वधूस्त्वमसि नन्दिनि! पार्थिवानां येषां कुलेषु सविता च गुरुर्वयञ्च"॥ – उत्तररामचरितम्, 1/9

[218] सिद्धान्तकौमुदी, (अस्मदो द्वयोश्च – 1/2/59 अत्रत्यवार्तिकम्), पृष्ठसङ्ख्या - 188

[219] साहित्यदर्पणः, तृतीयः परिच्छेदः, पृष्ठसङ्ख्या - 252

[220] अष्टाध्यायीसूत्रसङ्ख्या – 1/2/58

यस्य प्रयोगः केवलं द्विवचने जायते उभयशब्दस्य च बहुवचन एव। तत्रापि उभशब्दस्य द्वित्वं व्यस्तत्वनिरूपकम् अथ उभयशब्दस्य द्वित्वं समूहरूपं समस्तत्वस्य निरूपणीयतां ब्रूत इति विशेषः।

प्राणाः प्राणः इत्यनयोरेव प्रयोगयोः सन्तिष्ठते साधुतेति **समांसमां विजायते**[221] इत्यस्य "समायां समायां विजायते" इति भाष्यवचःप्रामाण्यमुररीकृत्य बहुवचनान्तोऽपि शब्दविशेषः भजत एव एकवचनान्ततामिति विशेष एव सिद्धान्तः वचनतत्त्वसम्बद्धः।

अथ एकशब्दः प्रसिद्धमेकत्वरूपमर्थं तु ब्रूते परं स एव एकशब्दः अर्थान्तरेऽपि युज्यते स चार्थः न ह्येकत्वस्यापितु बहुत्वस्यैव निरूपकः। यथा इत्येके।

वचनतत्त्वस्वारस्यमपि साहित्यशास्त्रसान्दर्भिकैः विशिष्टप्रयोगैः शक्यत एव परीक्षितुम्। तद्यथा अधरशब्दप्रयोगः। प्रायः शब्दोऽयम् ओष्ठस्य कृते समुपयुज्यते तत्रापि अधरभागायैव एतस्मादेवाधरत्वमपि शब्दस्य सङ्गच्छत इति प्रतिभाति। परं प्रसिद्धेऽर्थ एव बहुधा प्रयुक्ते सति शब्दोऽयम् अधररूपः समग्रस्याप्योष्ठस्य बोधकतां समुपपन्नः इति शक्यते वक्तुम्। तद्यथा-

**निवार्यतामालि! किमप्ययं बटुः पुनर्विवक्षुः स्फुरितोत्तराधरः।**

**न केवलं यो महतोऽपभाषते शृणोति तस्मादपि यः स पापभाक्॥**[222]

कुमारसम्भवस्य श्लोकेऽस्मिन् बिम्बफलाधरोष्ठशब्दप्रयोगः, अपरत्र

**हरस्तु किञ्चित् परिवृत्तधैर्यश्चन्द्रोदयारम्भ इवाम्बुराशिः।**

**उमामुखे बिम्बफलाधरोष्ठे व्यापारयामास विलोचनानि ॥**[223]

---

[221] अष्टाध्यायीसूत्रसङ्ख्या – 5/2/12

[222] कुमारसम्भवम् - 5/82

[223] अत्रैव - 3/67

कुमारसम्भवस्य पञ्चमसर्गस्थे श्लोकेऽस्मिन्नेव स्फुरितोत्तराधरशब्दप्रयोगश्च एतदेव मतं पुष्णाति यद् अधरशब्दार्थस्तु वस्तुतः ओष्ठयोर्निम्नवर्त्योष्ठप्रदेशमेव नूनमधिकं बोधयति अन्यथा पूर्वतः प्रथिते समग्रतः एव ओष्ठरूपेऽर्थे सति कालिदासेन उत्तरोष्ठस्य अधरोष्ठस्य वा प्रयोगो न कृतः स्यादिति। अत्र पण्डितराजीयं वचनमपि शक्यते प्रामाण्येन पुरस्कर्तुम् –

**अरुणमपि विद्रुमद्रुं मृदुलतरं चापि पल्लवं बाले।**

**अधरीकरोति नितरां तवाधरो मधुरिमाऽतिशयात्॥**[224]

एतस्माद् अधरशब्दगतमेकत्वम् अमरकोशादिसम्प्राप्तौष्ठगताद् द्वित्वात् कथञ्चिद् अधिकमेव ध्यानास्पदत्वमावहतीति।

अपरत्र अध्यात्मरामायणेऽपाणिनीयप्रयोगानां विमर्शः एतस्मिन् ग्रन्थेऽपि वचनगतं लिङ्गश्लिष्टं साहित्यशास्त्रसमन्वितं स्वारस्यं विशेषतः शक्यते परीक्षितुम्। तद्यथा रामायणम् इत्यस्य समग्रार्थनिर्धारणप्रसङ्गे रामा सीता रामो रामचन्द्रो रामा च रामश्चेति विग्रहे **पुमान् स्त्रिया**[225] 'स्त्रिया सहोक्तौ पुमाञ्छिष्यते' सिद्धान्तकौमुद्यामेकशेषप्रकरणेपठितेन सूत्रेणानेन स्त्रीवाचकस्य पदस्य लोपे सति 'यः शिष्यते स लुप्यमानार्थाभिधायी' इति नियमाद् रामशब्दस्यैव द्वित्वबोधकतया ततो 'रामौ' इति शब्दः सीतारामबोधको 'हंसी च हंसश्च हंसौ' इतिवत्ततो रामयोः सीतारामयोः अयनमिति विग्रहः। ततः 'इण् गतौ' इत्यस्माद्धातोः 'ईयते' गम्यत इति कर्मव्युत्पत्त्या बाहुलकात्कर्मणि ल्युट्। एवमधिगतः अन्तर्यामित्वेन अधिश्रितः आत्मा मनो बुद्धिरहङ्कारश्चित्तं प्रत्यगात्मा वा याभ्यां तौ अध्यात्मानौ। 'प्रादिभ्यो धातुजस्य वाच्यो वा

224 श्रृङ्गारविलासः - 86, पण्डितराजजगन्नाथग्रन्थावली, पृष्ठसङ्ख्या -39

225 अष्टाध्यायीसूत्रसङ्ख्या - 1/2/67

चोत्तरपदलोपः' चेति वार्त्तिकबलेन **"अनेकमन्यपदार्थे"**[226] सूत्रद्वारा बहुब्रीहिसमासः अथवा आत्मानम् अधिगतौ इति अध्यात्मानौ एवं 'अत्यादयः क्रान्ताद्यर्थे द्वितीयया' इति वार्त्तिकेन तत्पुरुषसमासे पुनः अध्यात्मशब्दस्य द्विवचनान्तरामशब्देन सह अध्यात्मानौ च तौ रामौ चेति विग्रहे सति **"विशेषणं विशेष्येण बहुलम्"**[227] सूत्रविहिते समासे अध्यात्मरामयोरयनम् अध्यात्मरामायणमिति पदसंसिद्धिस्तावत् वचनगतमपेक्षते विवेकम्। लिङ्गप्रकरणेऽपि विचारणीयतां भजेतायं विषयः।

अथ **कृताः शरव्यं हरिणा तवासुराः शरासनं तेषु विकृष्यतामिदम्।**

**प्रसादसौम्यानि सतां सुहृज्जने पतन्ति चक्षूंषि न दारुणाः शराः॥**[228]

इहाभिज्ञानशाकुन्तलेऽस्मिन्नुपरितने पद्ये "असुरास्तव शरव्यं कृताः" इत्ययं योऽर्थोऽस्ति युक्तः स त्वसुराणां बहुत्वरूपां सङ्ख्यां प्रति तत्संहारकशरव्यगतमेकत्वं कथमिव स्यात् पर्याप्तमिति शरव्यगतमेकत्वं विरुद्धमिव प्रतिभाति परमत्र तद्गतेनैकवचनेन राज्ञो वीरतैवाभिव्यङ्ग्या भवति यत् तदीयेनैकेनैव शरव्येणासुराः सर्वे इन्द्रद्वारा लक्ष्यत्वेन निर्दिष्टाः सन्ति। अत्र तावत् शरव्यगतमेवचनम् एको वृक्षः पञ्च नौका भवतीतिवत् कृताः इत्यत्रत्यं बहुत्वं साधयितुं शक्यते। तत्र हि वृक्षरूपायां प्रकृत्यां सत्यामेकतायामपि पञ्चादीनां नौकादीनां विकृतीनां भवत्येवार्थप्रतिपत्तिरिति प्रसिद्धिरपि।[229] वस्तुत एवम्भूतेषूदाहरणेषु **"सुवर्णपिण्डः पुनरपरयाऽऽकृत्या युक्तः खदिराङ्गारसवर्णे कुण्डले भवतः"** इत्येतन्महाभाष्यप्रतिपादितसिद्धान्तं समाश्रित्य वचनं व्यवस्थीयते। अत एव चन्द्र एको द्वौ ज्ञायते ज्ञायेते वा, कुसुमानि मालानि भवन्ति

---

[226] अत्रैव 2/2/24

[227] अत्रैव 2/1/57

[228] अभिज्ञानशाकुन्तलम्, 6/34

[229] प्रकृतेर्विकृतेर्वाऽपि यत्रोक्तत्वं द्वयोरपि। वाचकः प्रकृतेः सङ्ख्यां गृह्णाति विकृतेर्न तु॥

- अत्रैव (किशोरकेलिटीकायाम् उद्धृतम्), पृष्ठसङ्ख्या - 491

माला भवति वा, एवं वस्तुतः प्रकृतिविकृतिभावमाश्रित्य वचनमपि स्वरूपान्तरं प्राप्तुमर्हति, अर्थात् सुवर्णपिण्डः कुण्डले भवति इत्येवमपि प्रयोगः सुशकः एव। अपरत्र उद्देश्यपदानुसारेण अथ विधेयानुसारेण च वचनमाश्रित्य नैषधकारेण श्लोकद्वयं सृष्टम्। उदाहरणे क्रमश एते -

**"अपि तद्वपुषि प्रसर्पतोर्गमिते कान्तिझरैरगाधताम्।**

**स्मरयौवनयोः खलु द्वयोः प्लवकुम्भौ भवतः कुचावुभौ।।**

**कलशो निजहेतुदण्डजः किमु चक्रभ्रमिकारितागुणः**

**स तदुच्चकुचौ भवन् प्रभाझरचक्रभ्रममातनोति यत्"।।**[230]

प्रथमे श्लोके तावत् कुचौ इत्येतत्पदगतं द्विवचनं प्लवकुम्भौ इत्यत्रापि परमग्रिमे श्लोके स उच्चकुचौ भवन् इत्यत्र भवन् इत्येतत् पदगतमेकत्वं स इति पदापेक्षमेव।

अनयैव दिशा

**"विभज्य मेरुर्न यदर्थिसात्कृतो न सिन्धुरुत्सर्गजलव्ययैर्मरुः।**

**अमानि तत्तेन निजायशोयुगं द्विफालबद्धाश्चिकुराः शिरस्थितम्"॥**[231]

वक्तुर्विवक्षानुसारेण वचनप्रयोगः शक्यते कर्तुमिति विवेकः।

एवमेवानयोर्मुखं भद्रं मुखे वा भद्रे, अथ युवयोश्च वपुः पुष्टं वपुंषी पुष्टे इत्येवमपि प्रयोगाः सुशका एव। अपरत्र द्वित्राः जनाः इत्येवम्भूतेषूदाहरणेषु द्वित्वत्रित्वरूपसन्दिग्धायामपि स्थित्यां कथन्न द्वित्वमाश्रित्य वचनव्यवस्थेति भवति प्रश्नोद्भवः परम् "अनिश्चये बहुवचनं प्रयोक्तव्यम्" इत्येवं महाभाष्यसिद्धान्तमाधृत्य द्वित्राः इत्यत्र बहुत्वं सन्देहेऽपि सति सुशकमेवेति निर्णीयते।

अन्यत्र मेघदूतीये प्रसङ्गेऽपि वचनगतवैलक्षण्यविमर्शः शक्यते कर्तुम्। तद्यथा-

---

[230] **नैषधीयचरितम्** 2/31-32

[231] **नैषधीयचरितम्** 1/16

**"कश्चित् कान्ताविरहगुरुणा स्वाधिकारात् प्रमत्तः**

**शापेनास्तङ्गमितमहिमा वर्षभोग्येण भर्तुः।**

**यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु**

**स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु"॥[232]**

"रामगिर्याश्रमेषु" अत्रस्थं बहुत्वं वस्तुतः कविकालिदासोपकल्पितं नूनं यक्षस्य अनवस्थितचित्तविशेषावस्थितिं किं वा तदीययक्षिणीविरहदुःखाग्निमेव विशेषेण विशदयति। तथोक्तमेव - "वने रतिर्विरक्तास्याविरक्तस्य जने रतिः। अनवस्थितचित्तस्य न जने न वने रतिः॥" एवमत्र एकवचनापेक्षया बहुवचनप्रयोगद्वारा वचनविहितं वैलक्षण्यमेव समुपस्थापयितुं शक्यते।

वस्तुतो लिङ्गं न तथा व्युत्पत्तिविधिनियमादिभिरेव नियन्त्रयितुं शक्यते, लिङ्गस्यास्य लोकाश्रयत्वादिति। अत एव आकाशशब्दगतां व्युत्पत्तिं समाश्रित्यापि तदीयपुंस्त्वप्रतिपादनं नपुंसकत्वरूपोपलब्ध्या बाधितमिवैव दृष्टिङ्गतं भवति। तथा हि - **शब्दगुणकम् आकाशम्[233]**

एवं शब्दानां प्रयोगस्तावत् समुचितं लिङ्गवचनस्वरूपज्ञानमपेक्षते। तस्मात् किं भवत्येतयोः प्रसिद्धं परिनिष्ठितञ्च स्वरूपं विविधप्रसिद्धाप्रसिद्धशब्दवैविध्यानुगुणम् इति न केवलं व्याकरणनिरुक्तकोशाद्याधृतत्वमेव समपेक्षतेऽपितु लिङ्गवचनविनिर्णयार्थं तु वाङ्मयानुशीलनमपि तथैव महत्त्वास्पदं सन्तिष्ठते। तद्यथा कतिचिदुदाहरणानि निदर्शनरूपेणेमानि शक्यन्त उपस्थापयितुम् –

---

[232] मेघदूतम् 1/1

[233] तर्कसङ्ग्रहः, पृष्ठसङ्ख्या - 10

**यं सर्वशैलाः परिकल्प्य वत्सं मेरौ स्थिते दोग्धरि दोहदक्षे ।**

**भास्वन्ति रत्नानि महौषधीश्च पृथूपदिष्टां दुदुहुर्धरित्रीम् ॥**[234]

"भास्वन्ति रत्नानि महौषधीश्च'' इत्यत्र तावद् **भास्वन्ति च भास्वत्यश्च भास्वन्ति द्युतिमन्ति। औषधिविशेषणं चैतत्**[235] इति वचनप्रामाण्येन भास्वन्ति पदमिदम् औषधेर्विशेषणं परमौषधिशब्दस्तावत् स्त्रीलिङ्गको रत्नशब्दश्च नपुंसकलिङ्गकस्तस्मादिह **नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम्**[236] एतत्सूत्रसाहाय्येन 'भास्वन्ति' इत्यत्र नपुंसकलिङ्गमेव सन्तिष्ठते। अत्र तावद् "नपुंसकमनपुंसकेनैकवच्चान्यतरस्याम्' "**पुमान् स्त्रिया"**[237] इत्यनयोः सूत्रयोः स्वरूपं तदाधृतं विशिष्टं प्रयोगस्थलादिकं चापि विशेषतो निभालयितुं शक्यते। तद्यथा तेन गीतानि श्लोकाः कारिकाश्च पाठितानि इह पाठितानि इत्यत्रत्यः पाठितानि पाठिताः पाठिताः इत्येवमंशः लिङ्गगतं तथ्यं प्रतिपादयति। तावदेवम्भूतांशविचारः पूर्वत्र विचारित एव परं तेन गीतानि श्लोकाः कारिकाश्च पाठितम् इत्यत्र पाठितानि पाठिताः पाठिताः इत्येषां त्रयाणां पाठितशब्दानाम् एकशेषत्वं सरूपाधाराधृतम् एकत्वं यत् प्रतिपाद्यते तत् तु साम्प्रतिकेऽनुवादक्रमे बह्ववधानतया निभाल्य प्रयोक्तव्यमिति विशेषः। एवमेव श्लोकाः पाठिताः कारिकाश्च पाठिताः इत्यत्रापि पाठितरूपं सरूपत्वं विचार्य अन्ततः पुम्भूतस्य पाठितपदस्यैव प्रयोगः सर्वथा व्याकरणसम्मत इत्यपि सिद्ध्यति विवेकास्पदत्वम्।

"सर्वो लोको यजतां पाण्डवः स्वर्गमवत्विन्द्रस्तपस्विनः। वयं हनाम द्विषतः सर्वः स्वार्थं समीहते"॥ अत्र तु पूर्वप्रतिपादितनयानुसारेण सर्वगतसमूहैक्यरूपमर्थं मनसि निधायैकवचनत्वं शक्यमेवेति न सन्देहः परः "**सर्वेषां भद्राणि सन्तु सर्वे सन्तु निरामयाः। सर्वे भद्राणि पश्यन्तु मा कश्चिद्**

---

[234] कुमारसम्भवम् 1/2

[235] अत्रैव (मल्लिनाथकृतसञ्जीवनीटीकावचः), पृष्ठसङ्ख्या – 2-3

[236] अष्टाध्यायीसूत्रसङ्ख्या - 1/2/69

[237] अत्रैव 1/2/67

**दुःखभाग् भवेत्**"॥ अत्र सर्वे इत्येतत्पदगतं पुँल्लिङ्गत्वं कथमिव सर्वप्रबोधकं भूयादिति प्रश्नोद्भवः, परमत्र साधारणीकृतार्थमाधृत्यैव पुंस्त्वमित्युत्तरयितुं शक्यते।

यथा च प्रकृतिविकृतिरूपार्थं स्वीकृत्य वचनव्यत्ययदर्शनं भवति तथैवानेकत्र प्रकृतिविकृतिभावातिरिक्तमपि सिद्धान्तमूरीकृत्य वाक्ये पदगतमुद्देश्यविधेयाश्रितं लिङ्गं वैविध्यमाप्नोत्येव। तथा हि **"शैत्यं हि यत् सा प्रकृतिर्जलस्य"**[238], अत्र हि सा प्रकृतिः, अन्यथा तत् प्रकृतिर्जलस्येति वक्तव्यमासीत्। परमिह प्रकृतेरुद्देश्यरूपपदत्वं सा इत्यस्मिन् पदे वस्तुत इत्येवं विचार्य साधारणतो लिङ्गगतवैविध्यप्रतीतिरूपस्य प्रयोगस्य साधुता सङ्गच्छत एव। एवमेव "वसु तस्य विभोर्न केवलं गुणवत्ताऽपि परप्रयोजना" एवंविधप्रयोगे परप्रयोजनम् इत्येवं विलेख्यमासीद् यतो वसुशब्दो नपुंसकलिङ्गक इति परं गुणवत्तापदाश्रितं लिङ्गमादाय विशेष्यत्वनिरूपके परप्रयोजनेत्यस्मिन् पदे स्त्रीलिङ्गप्रयोगः सङ्गच्छते। अनयैव दिशा "शक्यं चानेन श्वमांसादिभिरपि क्षुत् प्रतिहन्तुम्" ईदृशेषु प्रयोगेषु शक्लृधातोः कर्मसामान्यविवक्षा यदा तदा नपुंसकलिङ्गविशिष्टं शक्यमिति पदं साधु प्रोच्यत एव परं क्षुत् इति कर्मविशेषे स्वीकृते तु शक्या चानेन एवं वाक्येऽस्मिन् व्यवहारपथं प्राप्तुमर्हत्येव।

ततश्च प्राणाः अक्षाः लाजाः सक्तवः इत्येतेषां शब्दानां बहुवचनत्वं भवत्येव परं द्विवचनसंयुतमपि पदं बहुत्वेन प्रयोक्तुं शक्यत एव। यथा पूर्वमपि प्रदर्शितेषु दम्पती पितरौ इत्येतादृशपदेषु तद्गतबहुत्वं प्रदर्शयितुं बहुवचनसंयुतत्वमपि यथाप्रसङ्गमाप्यत एव। तद्यथा स्तनशब्दस्य बहुवचनप्रयोगोऽत्र –

**"दन्तच्छदैर्दन्तविघातचिह्नैः स्तनैश्च पाण्यग्रकृताभिलेखैः।**

**संसूच्यते निर्दयअङ्गनानां रतोपभोगो नवयौवनानाम्"॥**[239]

बहुधा हि लिङ्गवचनपरिवर्तनमाश्रित्य शब्दस्यार्थान्तरमपि जायते। यथा हि वत्सः इत्यस्य पुँल्लिगार्थः कुमारसम्भवादिषु ग्रन्थेषु प्रसिद्ध एव परं वत्सम्

---

[238] रघुवंशम् 5/54

[239] ऋतुसंहारः

इति नपुंसकलिङ्गशब्दस्यार्थः वक्ष उरो वा।[240] अथ शतपत्रम् इत्येतस्य नपुंसकलिङ्गस्य शब्दस्यार्थः पद्मं पङ्कजं वा महाभारतादिषु सुप्रयुक्तः परं शतपत्रः इत्येवं पुँल्लिङ्गपरे प्रयोगे मयूरः सारसः इत्यर्थो जायते शतपत्रशब्दस्येति तथ्यम्। एवमेव शङ्खशब्दस्य पुँल्लिङ्गेऽर्थः जलजः परं नपुंसकलिङ्गे तु सङ्ख्याऽर्थविशेष इत्यवधातव्यम्।[241]

देशानां नामसु बहुवचनत्वं तु संस्कृते व्याकरणकोशादिषु सुप्रसिद्धमेव परं यथा साम्प्रतं देशनामान्येकवचनत्वेन प्रायो विभाव्यन्ते तथैव कथञ्चित् पुराऽपि देशनामस्वेकत्वं दृश्यत एवेति वचनगततथ्यविशेषः। तद् यथा – **"अङ्गस्याङ्गोऽभवद् देशो वङ्गो वङ्गस्य च स्मृतः। रत्नाकरं समारभ्य ब्रह्मपुत्रान्तर्गतं शिवे। वङ्गदेशो मया प्रोक्तः सर्वसिद्धिप्रदर्शकः"॥**[242]

वाङ्मयावलोकनेन लिङ्गवचनसम्पृक्तस्य विविधशास्त्रीयतत्त्व-परिस्फोटनस्य निदर्शनमात्रमेतान्युदाहरणानीमानि। अनयैव दिशा –

**क्षेमं ते ननु पक्ष्मलाक्षि कृशकं क्षेमं मदङ्गं दृढम्**

**एतादृक्कृशता कुतः? तव पुनः पुष्टं शरीरं यतः ।**

**केनाहं पृथुलः प्रिये! प्रणयिनीदेहस्य सम्मेलनात्,**

**त्वत्तः सुभ्रु! न कापि मे, यदि इदं क्षेमं कुतः पृच्छसि ।।**[243]

**हा पितः क्वासि हे सुभ्रु!,**[244] **विमानना सुभ्रु पितुर्गृहे कुतः**[245] इत्येतादृशैः प्रयोगैः सुभ्रूशब्दस्य स्त्रीलिङ्गत्वेन भवत्यवाप्तिः परं न हि

---

[240] हलायुधकोशः, पृष्ठसङ्ख्या - 385

[241] अत्रैव, पृष्ठसङ्ख्या - 650

[242] अत्रैवोद्धृतम्, पृष्ठसङ्ख्या - 584

[243] साहित्यदर्पणः, तृतीयः परिच्छेदः, पृष्ठसङ्ख्या – 250

[244] सिद्धान्तकौमुदी (ऋन्नेभ्यो ङीप् - 4/1/15 इत्यत्र भट्टोजिदीक्षितवचनम्), पृष्ठसङ्ख्या - 74

[245] अत्रैव (तत्त्वबोधिनीकारेणोद्धृतश्श्लोकांशः), पृष्ठसङ्ख्या - 74

भ्रूशब्दगतङुप्रत्ययस्यास्त्रीप्रत्ययत्वाद् एतस्यान्यल्लिङ्गीयरूपमत्र समर्थ्यते। एवं सति प्रमादादिवशाच्छब्दस्यास्यैवम्भूतं लिङ्गमुररीकृत्येदृशं प्रयोगद्वयं साध्यते।

"अलिङ्गे युष्मदस्मदी" वार्तिकेनैतेन तावद् युष्मदस्मच्छब्दरूपयोर्लिङ्गैक्य-निर्धारणं नेति विधीयते। यथा हि त्वम् असि वयं स्मः इत्यत्र त्वम्पदवाच्यः बालकः बालिका नपुंसकलिङ्गबोध्यपदान्तरं वा युष्मदस्मच्छशब्दस्वरूपं सम्प्राप्य स्वलिङ्गं जहतीति राद्धान्तः।

अन्यत्र च "सखि! दर्शितं खलु मेधाविन्याऽऽत्मनो मेधावित्वम्"[246] इह तावद् मेधाविन्याः भावः मेधावित्वमिति विग्रहो न सम्भवत्यपितु मेधाविशब्दस्य सामान्यनपुंसकत्वमास्थाय गुणप्रख्यापनपरं त्वप्रत्ययं कृत्वा मेधाविनः भावः मेधावित्वमित्येव। इह सत्यपि मेधाविन्याः एव प्रसङ्गे गुणवचनशब्देन समस्तकृदन्ततद्धितान्तसर्वनामजातिसङ्ख्यासञ्ज्ञाशब्दातिरिक्तशब्दो गृह्यते इत्याकडारसूत्रे भाष्यस्वारस्याभिप्रेतेऽर्थे मेधाविशब्दगतसामान्यनपुंसकत्वमेव शरणमिति लिङ्गतत्त्वमेव विशेषः।[247]

सामान्ये नपुंसकम् अथवा साधारणे प्रसङ्गे पुँल्लिङ्गस्य वा भवति व्यवहार इत्यपि नास्त्यप्रच्छन्नं साहित्यशास्त्रसान्दर्भिकेभ्यः। तद्यथा स्वप्नवासवदत्ते कौतुकमालिकायाः सुगुम्फनावसरे वासवदत्ताविहितप्रश्नस्वरूपम् – "**अथ कस्मै किल गुम्फितव्यम्**"[248] साधारणतः स्त्रीत्वरूपमापेक्षिकोत्तर-विरहितस्वरूपमेव स्पष्टयति यतः चेटीप्रदत्तमुत्तरं तु "अस्माकं भर्तृदारिकायै" इत्येवं त्वापेक्षापरत्वमेव समुल्लेखयति।

एवमेव कति कियद् इत्यनयोर्मध्येऽर्थगतसाम्येऽपि प्रतीयमाने को वास्तविको भेदोऽनयोर्मध्य इति वचनतत्त्वविवेकस्य प्रसङ्गेऽन्यतमः कश्चन विचारबिन्दुरूपः। वस्तुतो यदा यत् किञ्चिदित्येवं भवति प्रतिभानं तदा प्रश्नसन्दर्भमाधृत्य परिणामाकाङ्क्षाविरहिभावार्थको हि कति-शब्दः। परं यदा यत् किञ्चिद्

---

[246] रत्नावलीनाटिका, द्वितीयोऽङ्कः, पृष्ठसङ्ख्या - 86

[247] द्रष्टव्यम् "आकडारादेका सञ्ज्ञा" इत्यत्रस्थं महाभाष्यवचनम्

[248] स्वप्नवासवदत्तम्, तृतीयोऽङ्कः

इत्यतोऽधिकभावप्रतिभानं किं वा यत्र हि परिणामरूपार्थश्च न गौणायते तत्र कियच्छब्दप्रयोगः समाश्रयणीय इति विवेकास्पदत्वं भजते।

अथ च द्वित्राः पञ्चषाः एवम्भूतेषु प्रयोगेषु बहुत्वमुररीकृत्यैतद्गतं वचनतत्त्वं तु स्फुटं भवति परं "सार्धैकम्" इत्येतादृशेषु प्रयोगेषु कथमिव स्याद् वचनव्यवस्था यतोऽत्रैकत्वाधिक्याद् द्वित्वापत्तेर्भवति प्रतीतिः परमुभयं बालकद्वयम् इत्येतादृशेषु प्रयोगेषु यथा वचनैकत्वं संसाध्यते तथैव सार्धैकम् इत्यत्रापि।

एवमेव द्वित्वस्वरूपाधृतेषु शब्देषु यथा जाया च पतिश्च इत्येवं विग्रहे दम्भावनिपातनात् परं दम्पती इति द्विवचनान्तमेव पदं लौकिके[249] वैदिके[250] च संस्कृते समुपयुज्यते परं वैदिके संस्कृते तु दम्पतिशब्दगतम् एकवचनत्वमपि वचनगतवैविध्यमालोडयितुं वाङ्मयावलोकनं प्रत्येव प्रेरयति। तद् यथेयम् ऋचा - **विश्वासां त्वा विशाम्पतिं हवामहे सर्वासां समानं दम्पतिं भज।**[251] परं दम्पतीयुगलम् आहोस्विद् दम्पतीपञ्चकम् एवं शब्दस्वरूपं सन्दर्श्य दम्पतीशब्दरूपस्य बहुवचनम् अथ माता च पिता चेत्येवं विग्रहार्थकं पितराविति पदं व्यवहृत्य च तद्गतमपि बहुत्वार्थं मनसिकृत्य यदि प्रयोगेच्छा तदा दम्पतयः दम्पतीनाम् अथैकशेषस्वरूपान्वितस्य पितरावित्यस्य पदस्य च पितरः पितॄणाम् इत्येतादृशानां प्रयोगानां न बाध इति विवेकः।

ईदृशान् एव नैकान् प्रयोगान् विविधग्रन्थादिभ्यः समुपस्थाप्य लिङ्गवचनसम्बन्धिसम्पुष्टं ज्ञानं नूनमेव परिपोषयितुं शक्यते।

---

[249] सा दम्पतीभ्यां परिलाल्यमाना सीता लसन्ती मिथिलानगर्याम्।

दिने दिनेऽवर्धत शुक्लपक्षे चान्द्रीव लेखा नतसर्वलेखा॥ - श्रीभार्गवराघवीयम् 12/77

[250] "यथा च सूर्य्यप्रकाशभूमिच्छायाभ्यां विनैतयोरुत्पत्तिर्भवितुं न शक्या तथा दम्पतीभ्यां विना मैथुनसृष्ट्युत्पत्तिरसम्भवा"॥ - ऋग्वेदः 1/62/11

[251] अत्रैव 1/127/8

अपरतः “पन्थाः” पदमिदम् एकवचने बहुवचनेऽपि शक्यते प्रयोक्तुम्। पथिन् इति प्रातिपादिकात् प्रथमाविभक्त्या एकवचने, अथ पन्थप्रातिपादिकात् प्रथमाविभक्तेर्बहुवचने स्थितत्वाद् अत्र वचनश्लेषो भवितुं शक्नोति। इत्येवं पदपरिचयपूर्वकं नैकत्र वचनश्लेषोऽप्यन्वेष्टुं शक्यते। एवमीदृशस्य वचनस्य स्वरूपं ज्ञातुं नूनं व्याकरणमत्यन्तमुपादेयं सन्तिष्ठत एव।

अत एव सूत्रैर्लिङ्गानुशासनैर्वाङ्मयप्रयोगादिभिश्च यद्यपि लिङ्गवचनज्ञानं सहजमिव प्रतीयते तथाप्यस्य दुरूहत्वप्रतिपादकं किं वा व्याकरणसमाश्रयणमपि नोपायमात्रमिति नैषधकारोऽपि कथाप्रसङ्गे सम्प्रस्तौति -

**“भङ्क्तुं प्रभुर्व्याकरणस्य दर्पं पदप्रयोगाध्वनि लोक एषः ।**

**शशो यदस्यास्ति शशी ततोऽयमेवं मृगोऽस्यास्ति मृगीति नोक्तः”॥**[252]

एवं श्रीहर्षेणोपालम्भं विधाय व्युत्पत्त्यादिसमाश्रितस्य व्याकरणस्यैव सर्वथाऽङ्गीकारत्वमस्त्येव समुपेक्षितम्। तेन तु लोकप्राबल्यरूपनिरूपणं यदस्ति विहितं तत् सर्वथा लिङ्गवचनस्वरूपतत्त्वद्वयविनिर्धारणदुरूहतां स्पष्टीकरोत्यथान्ततो लोकबलीयस्त्वमेव संसाधयतीति दिक्।

एवं लोकप्रसिद्ध्या विविधव्युत्पत्त्या, नैकलिङ्गानुशासनानां सामरस्यपूर्णाध्ययनद्वारा, नामलिङ्गानुशासनरूपेण च प्रसिद्धस्यामरकोशस्य विशिष्टाध्ययनद्वारा, “जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्”, “अस्मदो द्वयोश्च”, “पृषोदरादीनि यथोपदिष्टम्” इत्यादिपाणिनिसूत्रतत्त्वोपस्थापनेन, काण्डः, काण्डम्, सम्बन्धः, सम्बन्धमित्यादिप्रयोगाणां महाभाष्यदिशा तत्त्वविवेचनाधारेण, बहुविधकाव्यवचनानाञ्च लिङ्गवचनसम्पृक्तस्थलानां अध्ययनेन किं वा समग्रतया वाङ्मयावलोकनेन लिङ्गवचनतत्त्वविश्लेषणं सविशेषं सम्भाव्यते।

---

[252] **नैषधीयचरितम्** 22/84

# उपसंहारः

शब्दार्थसमन्वितं हि साहित्यस्वरूपम्। शब्दार्थश्च समुचितः परं विना व्याकरणाभ्युपगमं न कथमपि सम्भवं साहित्यस्वरूपस्य समुचितोपस्थापनमिति तु व्याकरणकोशाप्तव्यवहारादिनैकसाधनानामर्थप्रख्यापने साहाय्यभूतत्वनिरूपकं वचः प्रमाणम्। वस्तुतो व्युत्पत्त्यन्वाख्यानादिसहकृतं व्याकरणं शब्दार्थौ तु स्पष्टयति परं रसस्थितिभावाद्यनुगुणं शब्दार्थसौष्ठवादितत्त्वानां सम्यक् सुगुम्फनम् अलङ्कारशास्त्रस्य किं वा साहित्यशास्त्रस्यैवाधीनत्वं प्रख्यापयति। यद्यपि "प्रथमे हि विद्वांसो वैयाकरणाः", इति प्रथितिः, यया वैयाकरणानां व्याकरणस्य वा प्राबल्यं स्पष्टतो भवति सिद्धं तथाऽपि "शब्दार्थशासनज्ञानमात्रेणैव न वेद्यते। वेद्यते स हि काव्यार्थतत्त्वज्ञैरेव केवलम्"॥ इत्येतद्वचसा तावत् साहित्यशास्त्रमर्मज्ञानामप्यद्वितीयत्वं स्वतो भवति स्पष्टतरम्। वस्तुतश्शब्दार्थविनिर्णयप्रक्रियापूर्वकं विहितसाधारणव्युत्पत्त्यादिषु सत्स्वपि लोकानुगुणमेव शब्दानां लिङ्गविनियमनं शास्त्रकाराणां दृष्टिपथं बहुधाऽऽयातम्, तस्माल्लिङ्गतत्त्वमिदं लोकसम्पृक्तमपि सर्वतः शास्त्रसंयुतमित्ययं सर्वतः स्वीकृतः सिद्धान्तविशेषो व्याकरणसाहित्यशास्त्रयोर्नैकदर्शनसम्प्रदायरीत्यनुगुणं समानतन्त्रत्वं सविशेषं प्रख्यापयत्येतदन्यत्।

वस्तुतो "लिगि गत्यर्थकात्, लिगि चित्रीकरणकाच्च धातुभ्याम्" "इदितो नुम्धातोः" सूत्रेणैतेन नुमि सति लिङ्गशब्दसंसाधनं शक्यते कर्तुम्, परं व्याकरणशास्त्रप्रयुक्तलिङ्गतत्त्वार्थदृष्ट्या त्वाकृत्यर्थवत्त्वाल्लिगि-चित्रीकरणार्थकादेव धातोः लिङ्गशब्दसंसाधनं प्रतिभाति वरम्।

वैयाकरणैस्तावत् सुबन्तप्रयोगेण प्रवृत्तिनिमित्ततदाश्रयलिङ्गसङ्ख्याकारकाणि बोध्यन्त इत्यत्र नैव क्वचन विवादः। किन्तु सुबन्तपदेषु लिङ्गादयः प्रातिपदिकार्थाः प्रत्ययार्था वेत्यत्र विद्यते विवादः। प्रातिपदिकार्थविषये चैवमभिहितम् – "एकं द्विकं त्रिकं चेति चतुष्कं पञ्चकं तथा। नामार्थ इति सर्वेऽमी पक्षाः शास्त्रे निरूपिताः"॥

वस्तुतो लिङ्गशब्दो नैकशास्त्रसम्प्रयुक्ततावशाद् बह्वर्थक इति सुविदिततरम्। सर्वप्रथमं वैदिकसाहित्यत एव तावल्लिङ्गतत्त्वविचारमूलं समवाप्यते। तत्र हि स्वरपदार्थमाधृत्य समानानामपि शब्दानां लिङ्गनिर्धारणं सुनिश्चीयते। तद्यथा

"ब्रह्मन्", "यशस्" इत्यनयोः प्रातिपदिकयोः सममेव पुन्नपुंसकलिङ्गयोः प्रयोगदर्शने सति द्वयोः कः किंलिङ्गक इति तत्त्वं वैदिकस्वरसिद्धान्तेनैव स्पष्टीभवति।[1]

तद्यथा पुराणप्रसिद्धो हि लिङ्गपदार्थः प्रथितलिङ्गानुशासन-विषयासम्पृक्तभगवच्छिवोल्लेखकः – "लीयते हि शिवादन्यदशेषमशिवं शिवे! अतो लिङ्गं द्विजश्रेष्ठा अविनाशी हरः स्वयम्"॥[2] एवमेव शिवमहापुराण[3]-वाल्मीकीयरामायण[4]-पुराणेत्यादिग्रन्थेष्वपि लिङ्गतत्त्वस्यास्य सम्यक्तयोल्लेखः।

विवक्षितार्थविशेषस्य बोधकारणेषु च लिङ्गस्य भवति ग्रहणम्।[5] तच्च लिङ्गम् असाधारणधर्मत्वान्नियामकत्वरूपि। तद्यथा – "कुपितो मकरध्वजः",[6] इह कोपरूपविवक्षितार्थविशेषबोधाच्चिह्नाद् वा कामदेवार्थो मकरध्वजरूपो गृह्यते न हि सागर-राजादिरूपः।

---

[1] ब्रह्मन् (नपुंसकलिङ्गम्) प्रार्थनायामर्थे, ब्रह्मन् (पुंल्लिङ्गम्) प्रार्थनाकर्ता,

यशस् (नपुंसकलिङ्गम्) कीर्तिः, यशस् (पुंल्लिङ्गम्) यशस्वी। - वैदिकस्वरबोध, पृष्ठसङ्ख्या -136

[2] सूतसंहिता, 4/28/35

[3] ततः स्वलिङ्गचिह्नत्वात् स्तम्भतो निष्कलं शिवः। स्वलिङ्गं दर्शयामास जगतां हितकाम्यया॥

- श्रीशिवमहापुराणम्, 1/5/29

[4] यत्र यत्र च याति स्म रावणो राक्षसेश्वरः। जाम्बूनादमयं लिङ्गं तत्र तत्र स्म नीयते॥

बालुकावेदिमध्ये तु तल्लिङ्गं स्थाप्य रावणः।अर्चयामास गन्धैश्च पुष्पैश्चामृतगन्धिभिः॥ -

श्रीमद्वाल्मीकीयरामायणम्, उत्तरकाण्डम् 31/42-43

[5] संयोगो विप्रयोगश्च साहचर्यं विरोधिता। अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः॥

सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः। शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः॥

- काव्यप्रकाशः, द्वितीयोल्लासत उद्धृतम्।

[6] अत्रैव, द्वितीयोल्लासः, पृष्ठसङ्ख्या - 65

दर्शनादिषु च लिङ्गस्वरूपं किञ्चिदन्यदेव भवति। तथा न्यायादिपरम्परायामनुमानसन्दर्भे[7] लिङ्गमर्थगमकत्वेन[8] बुध्यते। तथा हि – "पर्वतो वह्निमान्, धूमवत्त्वात्, यो यो धूमवान् स स वह्निमान् यथा महानसं तथा चायं तस्मात्तथा। अनेन प्रतिपादिताल्लिङ्गात् परोऽप्यग्निं प्रतिपद्यते"।[9] एवं धूमत्वमत्र लिङ्गस्य स्वरूपम्। साङ्ख्यदर्शनमतं प्रकटयित्री कारिका तु सूक्ष्मशरीरार्थभूतलिङ्गस्वरूपत्वाच्[10] चेतनः पुरुषो दुःखं निवृत्तिपर्यन्तं स्वभावेन प्राप्नोतीत्यादिविवेचनद्वारा लिङ्गार्थं सविशेषं प्रतिपादयति। वेदान्तसारे हि साक्षात्कारोपयोगिश्रवणादिसन्दर्भनिरूपणे ब्रह्मात्मनोरेकत्व-निश्चायकैरुपक्रमोपसंहारादिभिः षड्-विधलिङ्गैः सर्वेषां वेदान्तवाक्यानामद्वैते ब्रह्मणि तात्पर्यविधारणं श्रवणमित्यर्थः,[11] इति वचसा लिङ्गस्वरूपं षड्-विधं[12] विवृतञ्ज्ञायते। मीमांसाशास्त्रे तु विनियोगविधेः सहकारिभूतषट्प्रमाणेषु लिङ्गस्य भवत्युल्लेखः। तत्स्वरूपं हि शब्दसामर्थ्यं लिङ्गम्[13] इत्येवंविधम्, यत्र सामर्थ्यं लिङ्गं रूढिर्वा सा च शब्दगताऽर्थगता चेत्यन्यत्।

साधारणतस्तु लिङ्गशब्दार्थश्चिह्नत्वेन बहुधा प्रयुज्यते। तथा हि महाभारत-रघुवंशमुद्राराक्षसादिग्रन्थवचांस्यत्र प्रमाणम्।[14] परं लोके शास्त्रे च प्रसिद्धस्य

---

[7] मितेन लिङ्गेन लिङ्गिनोऽर्थस्य पश्चान्मानमनुमानम्।

- न्यायभाष्यम् (1/1/3 इति सूत्रस्थभाष्यवचः), पृष्ठसङ्ख्या -17-18

[8] व्याप्तिबलेनार्थगमकं लिङ्गम्। यथा धूमोऽग्नेर्लिङ्गम्। - तर्कभाषा, पृष्ठसङ्ख्या - 72

[9] तर्कसङ्ग्रहः, पृष्ठसङ्ख्या - 32

[10] तत्र जरामरणकृतं दुःखम्प्राप्नोति चेतनः पुरुषः। लिङ्गस्याविनिवृत्तेस्तस्माद् दुःखं स्वभावेन॥

- साङ्ख्यकारिका, कारिकासङ्ख्या - 55

[11] वेदान्तसारः (सारबोधिनीटीकावचः), पृष्ठसङ्ख्या - 158

[12] उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम्। अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये॥ - अत्रैव, पृष्ठसङ्ख्या - 158

[13] अर्थसङ्ग्रहः, पृष्ठसङ्ख्या - 78

[14] येन लिङ्गेन यो देशो युक्तमभिलक्ष्यते... – महाभारतम् (आदिपर्व), 1/2/08

लिङ्गैर्मुदः संवृतविक्रियास्ते.... – रघुवंशम्, 07/30

लिङ्गपदार्थस्य मूलबोधकतायुक्तमिदं लिङ्गं प्रायशः पुं-स्त्री-नपुंसकलिङ्गभेदेन त्रिधात्वं भजते इति सुविज्ञायत एव। तत्र च सप्तधा[15] लिङ्गं कीदृक्प्रकारकं किञ्च तेषां स्वरूपमित्यपि पृथक्तया विवेचनीयार्हम्। यद्यपि योनिमत्त्वादिरूपं पुंव्यञ्जनादिरूपञ्च लिङ्गं प्रसिद्धम् – "स्तनकेशवती स्त्री स्याल्लोमशः पुरुषः स्मृतः। उभयोरन्तरं यच्च तदभावे नपुंसकम्"॥[16] इति तथाऽपि खट्वादावेतादृशलौकिकस्त्रीत्वादिलिङ्गस्यासम्भवेन सत्त्वरजस्तमोगुण-परिणामरूपं साङ्ख्यं शास्त्रीयञ्च लिङ्गं वैयाकरणैरङ्गीकृतम्। गुणानां परिणामस्त्रिधा त्रिधा सर्वेषु पदार्थेषु। कस्मिंश्चिदपि पदार्थे कश्चिद् गुण उपचीयते, कश्चिदपचीयते, कश्चिच्च समस्तिष्ठति न तस्योपचयोऽपचयो वा। तत्रोपचयः पुंस्त्वम्, अपचयः स्त्रीत्वम्, समत्वञ्च क्लीबत्वमिति वैयाकरणानां निर्णयः।[17] ब्रह्मणः प्रकृतिपरत्वेन यद्यपि तत्र गुणपरिणामरूपं लिङ्गं न सम्भवति तथाऽपि गुणपरिणामस्य समारोपेण ब्रह्मादिशब्दप्रतिपाद्ये ब्रह्मण्यपि क्लीबत्वस्त्रीत्वपुंस्त्वादिव्यवहारः। एतादृग्गुणपरिणामरूपस्य लिङ्गस्य चर्चाऽत्र प्रामुख्यं भजते।

"तस्माच्छसो नः पुंसि",[18] इत्यादिनैकसूत्रद्वाराऽपि लिङ्गस्वरूपं शास्त्रीयं जायते विशदितमन्यच्च स्तनकेशादिचिह्नाधारेण तु ज्ञायते लौकिकं लिङ्गस्वरूपम्। सन्ति च तादृशाः अपि शब्दाः येषां शास्त्राधारेण तु सम्भवत्यन्यल्लिङ्गं परं लोकाधारेण हि तेषां लिङ्गस्वरूपं ततः पृथग् एवावबुध्यते। सन्ततिः, लोकः, अपत्यम्, पिपीलिका, जनः इत्येते सन्ति तादृशा

---

स मया क्षपणकलिङ्गधारी.... - मुद्राराक्षसम्, प्रथमोऽङ्कः, पृष्ठसङ्ख्या - 41

15 उपादानविकल्पाश्च लिङ्गानां सप्त वर्णिताः। विकल्पसन्नियोगाभ्यां ये शब्देषु व्यवस्थिताः॥

- वाक्यपदीयम् (तृतीयो भागः), लिङ्गसमुद्देशः, कारिकासङ्ख्या - 03

16 पाणिनीयव्याकरणमहाभाष्यम् (चतुर्थं खण्डम्), 4/1/3 अत्रत्यभाष्यवचः

17 साङ्ख्यप्रसिद्धसत्त्वादेर्लिङ्गं परिणतिर्मतम्। शास्त्रतो ज्ञायते यस्मात् ततः शास्त्रीयमुच्यते॥

तत्रोपचयभागो यस्तत्पुंस्त्वमभिधीयते। स्त्रीत्वं त्वपचयो भागः साम्यं क्लीबत्वमुच्यते।

केवलं शास्त्रकार्यार्थमाश्रितं शाब्दिकैर्बुधैः॥ - लिङ्गवचनविचारः, पृष्ठसङ्ख्या - 07

18 अष्टाध्यायीसूत्रसङ्ख्या – 6/1/103

एव शब्दाः। लौकिकलिङ्गवाचकता तु माता, पिता, स्नुषा, क्षत्रिय इत्यादिप्रयोगद्वारा सम्भवत्येव। अन्यदपि तावत् स्वरूपं शास्त्रीयलिङ्गस्य "कुलरत्नं मैथिली रामस्य दाराः" एतादृशेषूदाहरणेषु शक्यते द्रष्टुम्। "तत्र जातः",[19] "तत्र भवः",[20] इत्यादिसूत्रद्वारा लिङ्गस्याविवक्षा शास्त्रे दृश्यत एव "ब्राह्मणो न हन्तव्यः" इत्यादिषु च लौकिकोदाहरणेष्वपि न कस्यचन विशेष-लिङ्गस्याविवक्षेत्यप्यवधेयतथ्यम्। अत्र तावदयं विशेषो यल्लिङ्गवचनमतन्त्रम् इति प्रसिद्धिबलात् सूत्रेष्विदमविवक्षादर्शनं सर्वत्रार्षत्वात् समाधीयते, अथ च लोकोदाहरणैरविवक्षेयमपि सन्तिष्ठते। एवं "व्यक्तिरियं प्रथमा" इत्यादिवचनैः पुंल्लिङ्गार्थोऽपि सङ्गच्छते। "इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम् । इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः"॥[21] कुत्रचिच्चैवं भूतेषु प्रयोगेषु तावत् प्रतिपादनीयविषयकलिङ्गविपर्ययदर्शने सति उद्देश्यविधेययोरैक्यमापादयत् सर्वनामपर्य्यायेण तत्तल्लिङ्गभाग् भवति,[22] इति न्यायेन विधेयगतभिन्नलिङ्गविवक्षाविषयोऽपि दृष्टिपथमायात्येव। अपरत्र काण्डः, काण्डम्, खण्डः, खण्डम् इत्येवं सम्बन्धः[23] सम्बन्धम्[24] इत्यनयोः प्रयोगयोस्तावन्महाभाष्यकृता प्रदत्ता स्वीकृतिस्तावल्लिङ्गवैविध्यविषयमेव

---

[19] तदेव, 4/3/25

[20] तदेव, 4/3/53

[21] वाक्यपदीयम् (ब्रह्मकाण्डम्), कारिकासङ्ख्या –16

[22] अत्रैव प्रत्येकार्थप्रकाशिकाटीकात उद्धृतम्, पृष्ठसङ्ख्या -83

[23] तत्रैवम् **अभिसम्बन्धः** करिष्यते। पाणिनीयव्याकरणमहाभाष्यम् (पञ्चमं खण्डम्) 6.2.143

साधनसम्बन्धस्तमभ्यन्तरीकृत्य धातुः साधनेनोच्यते। अत्रैव (षष्ठं खण्डम्) 8.1.70

(एवमेव 1/4/23, 2/1/1, 3/1/22, 3/1/26, 6/1/72, 6/3/61, 6/4/1

इत्यष्टाध्यायीसूत्रस्थभाष्ये पुंल्लिङ्ग एव सम्बन्धप्रयोगः)

[24] एवं तर्हि ह्रस्वनद्यापो नुट् इत्यत्र "अतो धातोः" इत्यतो लोपः **सम्बन्धम्** अनुवर्तिष्यते।

- अत्रैव (पञ्चमं खण्डम्), अष्टाध्यायीसूत्रसङ्ख्या - 6/1/102 इत्यत्र भाष्यवचः

स्पष्टीकरोति। अनेन प्रकारेणेदृशं लिङ्गं शब्दनिष्ठमर्थनिष्ठञ्चोभयं प्रतीयते। तस्माल्लिङ्गाश्रयो भवति शब्दनिष्ठोऽर्थनिष्ठो वेत्यपि विचारणाविषयत्वम्भजत एव। लिङ्गमिदं प्रातिपदिकवाच्यं टाबादिप्रत्ययाः लिङ्गस्य स्वसमभिव्याहृतपदनिष्ठशक्त्युद्बोधकत्वेन द्योतका एवेति सिद्धान्तः। अत एव वैयाकरणसिद्धान्तकौमुद्यामभिहितम् – "अजादीनामकारान्तस्य च वाच्यं यत्स्त्रीत्वं तत्र द्योत्ये टाप् स्यात्"।[25] तेन "अजा" इत्यत्र स्त्रीत्वविशिष्टोऽज इति बोधः। टाबादिप्रयोग एव स्त्रीत्वादेर्बोधेन टाबादिवाच्यमेव लिङ्गमित्यपरः पक्षः। किन्तु नायं समीचीनो यतष्टाबाद्यभावेऽपि क्षुत् समिदादौ लिङ्गबोधस्य दर्शनम्, तस्माट्टाबादिद्योत्यमेव लिङ्गमिति राद्धान्तः।

वस्तुतः लिङ्गस्य निर्धारणं लोकेनैव सुनिर्धारितपूर्वमित्यस्य सिद्धान्तविशेषस्य दिग्दर्शनं तु "लिङ्गमशिष्यं लोकानुश्रयत्वाद्" अथ "यथा वाचा निशा दिशा" इत्यादिवचनावलोकेऽपि शक्यते कर्तुम्। विना स्त्रीप्रत्यययोगेनापि ऋक् वाक् निश् दिक् इत्येषां पदानां स्त्रीत्वेऽर्थे भवत्येव प्रयोगः। एतदत्त्वन्यद् यद् सति टापि ऋचा वाचा निशा दिशा इत्येषां पदानामपि एतस्मिन्नेव लिङ्गे तथैव प्रयोगः। यद्यपि वैयाकरणैः सर्वापहारिलोपयुक्तं क्विप्प्रत्यययोगपरत्व प्रख्यापकं च सैद्धान्तिकवचः समाधृत्य ऋगाद्यन्योऽन्यशब्देषु शास्त्रीयं स्त्रीत्वरूपं लिङ्गं व्यवहरन्त्येव। "अलिङ्गे युष्मदस्मदी", इत्येतेन वचनप्रामाण्येन युष्मदस्मच्छब्दाभ्यां न हि लिङ्गविशेषस्य प्रकथनं विधीयते इति सिद्धान्तः। अत एव लिङ्गमात्रे सजीवनिर्जीवादिवस्तुष्वपि त्वमित्यादिकम् उद्भावितं वाऽहमादिकं न लिङ्गापेक्षित्वं समाश्रयत इत्यप्यवधेयास्पदत्वं भजते।

वैयाकरणमते तु लिङ्गविषये प्रभूतं व्यचारि किन्तु साहित्यशास्त्रे लिङ्गस्य कीदृक् स्वरूपं ग्राह्यमिति साक्षादस्मिन् शास्त्रे न निरूपितम्,

---

सम्बन्धम् अनुवर्तिष्यते। - अत्रैव (षष्ठं खण्डम्), अष्टाध्यायीसूत्रसङ्ख्या - 8/2/56 इत्यत्र भाष्यवचः (एवमेव 1/4/23, 2/1/1, 3/1/22, 3/1/26, 6/1/72, 6/3/61, 6/4/1 इत्यष्टाध्यायीसूत्रस्थभाष्ये नपुंसकलिङ्ग एव सम्बन्धप्रयोगः)

[25] सिद्धान्तकौमुदी, पृष्ठसङ्ख्या – 109-110

किन्त्वालङ्कारिकाणां निरूपणक्रमस्य दर्शनेन लिङ्गस्य साहित्यशास्त्रसम्मतं स्वरूपं निश्चेतुं शक्यते।

वस्तुतस्तु स्वभावेन सुकुमारैः सौन्दर्यप्रेमिभिश्च कविभिः स्वकृतिष्वपि भावपेशलतामानेतुं प्रायशः स्त्रीलिङ्गाख्या एव शब्दविशेषाः प्रयुज्यन्ते। तथा हि प्रथितिः - "तटी तारं ताम्यति" इत्यत्र तटशब्दस्य पुंस्त्वनपुंसकत्वेऽनादृत्य स्त्रीत्वमेवाश्रितं सहृदयैः "स्त्रीति नामापि मधुरम्" इति कृत्वा।[26]

लिङ्गं रसाभिव्यञ्जकत्वेन ध्वनिवादिभिराचार्यैः स्वीकृतम्। साहित्ये रसस्य प्राधान्येन लिङ्गस्य रसानुगुणत्वमवश्यमेव वाच्यम्। तेन रसद्योतकं लिङ्गमिति स्वीकरणीयम्। अन्यत्र रत्याद्याख्यानां भावानामप्यभिव्यञ्जकं लिङ्गं भवत्येव। तद्यथा – "बन्दीकृत्य नृप द्विषां मृगदृशस्ताः पश्यतां प्रेयसां, श्लिष्यन्ति प्रणमन्ति लान्ति परितश्चुम्बन्ति ते सैनिकाः"।[27] इह मृगदृशः पदान्तर्हितमृगशब्दघटकपुंस्त्वेन पराजितप्रियाणाम् अपराक्रमत्व-विषयोऽभिव्यङ्ग्यः। अपरतस्तावत् कुन्तकेन लिङ्गवक्रता स्वीकृता। तथा हि भिन्नलिङ्गानामपि शब्दानां वैचित्र्यरूपवक्रताया निदर्शनम् – "मैथिली तस्य दाराः",[28] अन्यदपि लिङ्गवैचित्र्यवक्रत्वोदाहरणं वैदग्ध्यभङ्गीभणितिरूपम् – "एतां पश्य पुरस्तटीम्"[29] इति। एतादृग्लिङ्गवक्रतायां तु पदसङ्घटनरूपवैशिष्ट्यमेवेति तत्त्वम्। श्लेषे च लिङ्गश्लेषोऽङ्गीक्रियते।[30] तथा हि प्रसिद्धमुदाहरणमिदम् –

"भक्तिप्रह्वविलोकनप्रणयिनी नीलोत्पलस्पर्धिनी,

ध्यानालम्बनतां समाधिनिरतैर्नीते हितप्राप्तये।

[26] ध्वन्यालोकः, तृतीय उद्योतः (लोचनटीकावचः), पृष्ठसङ्ख्या- 393

[27] काव्यप्रकाशः, पञ्चम उल्लासः, पृष्ठसङ्ख्या - 197

[28] वक्रोक्तिजीवितम्, प्रथमोन्मेषः, पृष्ठसङ्ख्या - 81

[29] अत्रैव, पृष्ठसङ्ख्या - 81

[30] स च वर्णपदलिङ्गभाषाप्रकृतिप्रत्ययविभक्तिवचनानां भेदादष्टधा। - काव्यप्रकाशः, नवम उल्लासः, पृष्ठसङ्ख्या -511

लावण्यस्य महानिधी रसिकतां लक्ष्मीदृशोस्तन्वती,

युष्माकं कुरुतां भवार्तिशमनं नेत्रे तनुर्वा हरेः"॥[31]

उपमाऽलङ्कारे भिन्नलिङ्गत्वम्, प्रसङ्गादनतिदूरं भिन्नवचनत्वञ्च दोषत्वेन प्रख्याप्येते। तथोक्तम् - "यत्रोपमा भिन्नलिङ्गा भिन्नलिङ्गं तदुच्यते। भवेत्तद्भिन्नवचनं यद्भिन्नवचनोपमम्"॥[32] साधारणधर्मवाचकादेर्लिङ्गभेदो दोषभाङ्न वेति विवादः। "सुधेव विमलश्चन्द्रः",[33] इह तु साधारणधर्मस्यान्यथाभावत्वाद् दोषः, परं "मुखञ्चन्द्र इवाभाति",[34] अत्र न साधारणधर्मस्यान्यथाभावस्तत्र न दोषः,[35] इति वचनप्रामाण्येन दोषरहितत्वम् उपमाया दोषनिराकरणाय प्रोच्यते। अन्यत्रापि काव्यादर्शादिषु नैकैरुदाहरणैः[36] विषयोऽयं चर्चाङ्गतः। अतः परं दुष्टपदनिरूपणक्रमेऽप्रयुक्तदोषो लिङ्गाधारितोऽपि वर्णितो जातः – "यथाऽयं दारुणाचारः सर्वदैव विभाव्यते। तथा मन्ये दैवतोऽस्य पिशाचो राक्षसोऽथ वा"॥ अत्र दैवतशब्दो "दैवतानि पुंसि वा" इति पुंस्याम्नातोऽपि न केनचित् प्रयुज्यते।[37] इह दैवतशब्दस्याल्पीयःप्रयोगविषयत्वाद् दोष एव। एवं साहित्ये नैकत्र लिङ्गं चर्चितम्। तदाधारेण लिङ्गतत्त्वविवृतिर्विशेषेण विचारणीयताम्भजते। परं प्रश्नोऽयं समुदेति यत् साहित्ये शास्त्रीयं लिङ्गं स्वीकर्तव्यमाहोस्वित् लौकिकम्? तत्र साहित्ये लोकस्य प्राधान्येन रसाभिव्यञ्जकत्वानुगुण्येन च लौकिकं लिङ्गं प्रधानतया समाश्रयणीयम्। किन्तु व्याकरणशास्त्रीयमपि लिङ्गं साहित्ये सर्वथा न

---

[31] अत्रैव, पृष्ठसङ्ख्या - 513

[32] सरस्वतीकण्ठाभरणम्, प्रथमः परिच्छेदः, पृष्ठसङ्ख्या - 24

[33] साहित्यदर्पणः, सप्तमः परिच्छेदः, पृष्ठसङ्ख्या - 618

[34] अत्रैव, पृष्ठसङ्ख्या - 618

[35] अत्रैव, पृष्ठसङ्ख्या - 618

[36] स्त्रीव गच्छति षण्डोऽयम्, वक्त्येषा स्त्री पुमानिव, विद्या धनमिवार्जिता

- काव्यादर्शः, द्वितीयः परिच्छेदः, पृष्ठसङ्ख्या - 46-47

[37] काव्यप्रकाशः, सप्तम उल्लासः, पृष्ठसङ्ख्या – 270-271

परित्यक्तुं शक्यम्। यतो जडचन्द्रादौ वर्ण्यमाने शास्त्रीयमेवोपचयादिरूपं लिङ्गं स्वीकर्तुं शक्यते। अतः साहित्यशास्त्रे व्याकरणशास्त्रीयलिङ्गाभिन्नं लौकिकं लिङ्गं रसाभिव्यञ्जकत्वेन प्रधानतया स्वीकर्तुं शक्यते। यथा ह्यत्र निदर्शनमेतस्य – "उपोढरागेण विलोलतारकं तथा गृहीतं शशिना निशामुखम्। यथा समस्तं तिमिरांशुकं तया पुरोऽपि रागाद् गलितं न लक्षितम्"॥ अत्र समासोक्तिः। वर्ण्यमाने प्रकृते चन्द्रे निशायाञ्च लौकिकं लिङ्गवत्त्वरूपं पुंस्त्वं योनिमत्त्वरूपं स्त्रीत्वञ्च नाङ्गीकर्तुं शक्यते। एवमत्र निशाशशिनोः केवलं व्याकरणशास्त्रीयमेव लिङ्गं नाश्रयितुं शक्यं तथा सति निशाशशिनोर्नायिकानायकव्यवहारो न सङ्गच्छेत। निशायां शशिनि च नायकत्वस्य नायिकात्वस्य च सिद्धये लौकिकमपि पुंस्त्वं स्त्रीत्वञ्चावश्यमेवाश्रयणीयम्। तेनात्र शास्त्रीयलौकिकलिङ्गयोरभेद एव सिध्यति। अतः साहित्यशास्त्रदृशा शास्त्रीयगुणपरिणामाभिन्नलौकिकपुंस्त्वादिरूपमेव लिङ्गमिति फलितम्भवति।

काव्यप्रकाश-ध्वन्यालोक-साहित्यदर्पणातिरिक्तं तावच्छृङ्गार-प्रकाशादिग्रन्थेषु विशेषेणैतत्सम्बद्धसङ्कलनं कुत्रचिच्च नूतनतरमप्युपस्थापनं समग्रविवेचनार्थं समुपयुक्तम्। यथा दोषहानगुणोपादानाख्ये नवमे प्रकाशे "अक्ताः शर्कराः उपदधाति, तेजो वै घृतम्",[38] इति वचनमुपन्यस्य शर्कराणां घृताक्तत्वरूपमर्थावगमनं लिङ्गादर्थात् सङ्केताद् भिद्यत इति प्रतिपादनम्। ततश्च गुणानामपचयोपचयरूपलिङ्गस्य विविधं विभाजनं[39] तत्रत्यं विशेषेण चर्चाऽऽस्पदम्।

अथ "यं सर्वशैलाः परिकल्प्य वत्सं मेरौ स्थिते दोग्धरि दोहदक्षे ।

भास्वन्ति रत्नानि महौषधीश्च पृथूपदिष्टां दुदुहुर्धरित्रीम्" ॥[40]

---

[38] श्रृङ्गारप्रकाशः, नवमः प्रकाशः, पृष्ठसङ्ख्या - 478

[39] तदेतच्छुद्धमिश्रभेदात् षोढा विप्रथते – शुद्धम्, मिश्रम्, सङ्कीर्णम्, उपसर्जनम्, आविष्टम् अव्यक्तञ्च।

- अत्रैव, पञ्चमः प्रकाशः, पृष्ठसङ्ख्या – 277-278

[40] कुमारसम्भवम्, 1/2

"भास्वन्ति रत्नानि महौषधीश्च" इत्यत्र तावद् भास्वन्ति च भास्वत्यश्च भास्वन्ति द्युतिमन्ति। औषधिविशेषणं चैतत्[41] इति वचनप्रामाण्येन भास्वन्ति पदमिदम् औषधेर्विशेषणं परमौषधिशब्दस्तावत् स्त्रीलिङ्गको रत्नशब्दश्च नपुंसकलिङ्गकस्तस्मादिह नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम्[42] एतत्सूत्रसाहाय्येन 'भास्वन्ति' इत्यत्र नपुंसकलिङ्गमेव सन्तिष्ठते। वाङ्मयावलोकनेन लिङ्गवचनसम्पृक्तस्य विविधशास्त्रीयतत्त्वपरिस्फोटनस्य निदर्शनमात्रमेतत्। अनयैव दिशा हा पितः क्वासि हे सुभ्रु!,[43] विमानना सुभ्रु पितुर्गृहे कुतः[44] इत्येतौ प्रयोगौ सुभ्रूशब्दं स्त्रीलिङ्गत्वेन निर्दिशतो न परं भ्रूशब्दगत-ङुप्रत्ययस्यास्त्रीप्रत्ययत्वाद् एतस्यान्यल्लिङ्गीयरूपं समर्थयेते। कविकृते प्रमादेऽथवा रामगतविरहाधिक्यप्रदर्शनरूपाभीष्टलक्ष्यनिरूपणे सति एवं लिङ्गमुररीकृत्येदृशं प्रयोगद्वयं साध्यते। अथ अनेकमन्यपदार्थे[45] एतत्सूत्रगतम् अनेकमिति पदम्, अनेके इत्यस्य प्रयोगस्याशुद्धिविषयं स्वयं पाणिनिसम्मतानुसारं साधयतीति लिङ्गवचनपर एव विशिष्टः पदप्रयोगोऽयमवधानार्थम्।

अथ सत्यपि प्रथिते त्रिलिङ्गस्वरूपे समवाप्ते नैकेषां शब्दानां हि लिङ्गविकल्पा अप्याप्यन्त एव। तद्यथा ध्वजः ध्वजम्, पद्मः पद्ममित्येतादृशाः पुन्नपुंसकलिङ्गमात्रविषयाः शब्दाः। केचित् स्त्रीनपुंसकमात्रविषयाः, यथा – औचित्यम् औचिती, चातुर्यं चातुरीत्यादयः। केचनान्ये तु स्त्रीपुंससाधारणाः, यथा – सूनुः, इषुः, तनयः, तनया, घटः, घटी, कुम्भः, कुम्भीत्यादयः। अन्ये त्रिलिङ्गाः, यथा – तटः, तटी, तटम्, दरः, दरी, दरमित्यादयः। एवं लिङ्गस्य सप्तप्रकारकाः उपादानविकल्पाः सम्भवन्ति। अनेनाधारेण लिङ्गस्वारस्यानुगुणं

---

41 अत्रैव (मल्लिनाथकृतसञ्जीवनीटीकावचः), पृष्ठसङ्ख्या – 2-3

42 अष्टाध्यायीसूत्रसङ्ख्या - 1/2/69

43 सिद्धान्तकौमुदी (ऋन्नेभ्यो ङीप् - 4/1/15 इत्यत्र भट्टोजिदीक्षितवचनम्), पृष्ठसङ्ख्या - 74

44 अत्रैव (तत्त्वबोधिनीकारेणोद्धृतश्श्लोकांशः), पृष्ठसङ्ख्या - 74

45 अष्टाध्यायीसूत्रसङ्ख्या – 2/2/24

साहित्यशास्त्रसमवाप्तानामुदाहरणानां विश्लेषणं सम्भवति। वस्तुतः एकस्यैव शब्दस्य लिङ्गपरिवर्तनद्वाराऽर्थभेदोऽपि बहुधा जायते। तद्यथा पुंल्लिङ्गोऽन्धशब्दः दृष्टिरहितमनुष्यार्थकः, परं नपुंसकलिङ्गकम् अन्धम् इति पदं तु ओदनाद्यर्थकमेव। एवमेव भक्तः भक्तं, वस्तु वस्तुः इत्यादिनैकशब्दानां लिङ्गाधारेणैव जायतेऽर्थपरिवर्तनमित्यपि विशिष्टमेव समग्रसाहित्याध्ययनपरं लिङ्गतत्त्वतथ्यम्।

पिपीलिका, पाञ्चालिका इत्येवंविधाः शब्दाः अपि तावल्लिङ्गतत्त्वस्वारस्ये भजन्ति महत्त्वपूर्णं स्थानं यतः शाब्दिकेन लिङ्गाधारेण स्त्रीत्वमेव प्रस्तूयते यद्यप्येभिरिति साक्षात् प्रतीयते परं व्यक्तिरित्यादिभाववाचकैः शब्दैर्यथा पुंस्त्वं स्त्रीत्वादिकञ्च पृथक् पृथगेव व्यज्यते तद्वदेव पिपीलिका-पाञ्चालिकाऽऽदिस्त्रीत्वव्यतिरिक्तरूपमप्यर्थं बोधयन्तीमे शब्दाः इति तथ्यमिदं सन्तिष्ठत एव विचारास्पदम्। ईदृशान् एव नैकान् प्रयोगान् विविधग्रन्थादिभ्यः समुपस्थाप्य लिङ्गवचनसम्बन्धिसम्पुष्टं ज्ञानं नूनमेव परिपोषयितुं शक्यते।

एवं लोकप्रसिद्ध्या विविधव्युत्पत्त्या, नैकलिङ्गानुशासनानां सामरस्यपूर्णाध्ययनद्वारा, नामलिङ्गानुशासनरूपेण च प्रसिद्धस्यामरकोशस्य विशिष्टाध्ययनद्वारा, “जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्”, “अस्मदो द्वयोश्च” इत्यादिपाणिनिसूत्रतत्त्वोपस्थापनेन, काण्डः, काण्डम्, सम्बन्धः, सम्बन्धमित्यादिप्रयोगाणां महाभाष्यदिशा तत्त्वविवेचनाधारेण, बहुविधकाव्यवचनानाञ्च लिङ्गवचनतत्त्वसम्पृक्तस्थलानाम् अध्ययनेन किं वा समग्रतया वाङ्मयावलोकनपुरस्सरं लिङ्गवचनतत्त्ववैलक्षण्यप्रतिपादनमिह।

अथ “वच परिभाषणे” इत्यर्थकाद् धातोर्ल्युटि सति वचनशब्दसिद्धिः। एवं वचनस्यार्थः उच्चारणम्, कथनमात्रं सङ्ख्या च। यद्यपि साङ्ख्यम्, परिसङ्ख्या चेति पदद्वयं साङ्ख्यमीमांसाशास्त्रानुसारेण कथञ्चिद् निवृत्त्यर्थवत्त्वाद् बुद्धिरूपमर्थमेव प्रकटयति तथाऽपि न्यायादिग्रन्थानुसारेण गुणाख्यपदार्थान्तःपरिगणिता सङ्ख्यैकत्वादिव्यवहारहेतुरूपैवोक्ता।[46]

---

[46] तर्कसङ्ग्रहः, पृष्ठसङ्ख्या - 15

व्याकरणानुसारेण तु "प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा"[47] इत्यादिसूत्रवपुषा वचनं सङ्ख्या च समानार्थत्वमेव धत्तः। तस्मादेव बहुत्वसङ्ख्या वाच्यत्वेन विधीयते,[48] प्रोच्यते वचनं सङ्ख्या तथैकवचनादिकम्,[49] इत्यादिकं बहुधा व्याख्यायितञ्जातम्। "चक्षिङ् व्यक्तायां वाचि"[50] इत्यर्थकाद् धातोः "चक्षिङः ख्याञ्"[51] सूत्रेणैतेन ख्याञित्यादेशे सति समुपसर्गपूर्वकस्य सङ्ख्याशब्दस्यार्थोऽपि वचनमात्रत्वेनैव साधितो दृश्यते। तत एवैकत्वद्वित्वबहुत्वबोधकत्वेन स्वौजसादीनामेकवचनद्विवचनबहुवचनरूपाः सञ्ज्ञाः। एतादृशवचनभेदस्थितौ नमः, भूयः इत्याद्यव्ययपदानाम् अव्ययत्वात् सर्वदा समत्वकारणात् स्वादीनां च लुक्त्वादपि बहुवचने भूयांसि, नमांसि इत्येतादृशाः प्रयोगाः कथम्? किमेते साधवोऽसाधवो वा ? अथ "पृषोदरादीनि यथोपदिष्टम्",[52] वेदाः प्रमाणम्, भूयः प्रयोजनानि, भवन्तः पुरस्कारभाजनानि, भवान्नेतस्य पात्रम्, अन्यत्र त्वादरार्थेऽपि मम गुरुचरणाः, अभिनवगुप्तपादाः इत्येवं विधाः नैके प्रयोगास्तावद् व्याकरणशास्त्रीयविचारपुरस्सरं समीक्षणमपेक्षन्ते। एवमेव सङ्ख्या प्रातिपदिकेनैव वाच्या विभक्तयश्च वचनरूपसङ्ख्याया द्योतिका वा? सङ्ख्याया विभक्तिवाच्यत्वे हि प्रत्ययार्थप्राधान्यात् प्रातिपदिकार्थव्यक्तौ गुणीभावो न भवेत्। किञ्च मधु, वचः, वारि, इत्यादौ विभक्तेरभावेऽप्येकत्वादिसङ्ख्यायाः प्रत्ययेन व्यभिचारात् सङ्ख्याया न विभक्तिवाच्यता। विभक्त्या सङ्ख्या वाच्येति पक्षान्तरम्। तथैवोक्तम् – "द्योतिका वाचिका वा स्युर्द्वित्वादीनां विभक्तयः"[53] इत्यादिवचनपुरस्सरं समुल्लसन्ति शाब्दिकानां विमतयः। केचिद्धि साम्प्रतिकाः भाषासारल्यमुद्दिश्य द्विवचनं निषेधन्त इव दृश्यन्ते। ते हि बालकौ,

---

[47] अष्टाध्यायीसूत्रसङ्ख्या – 2/3/46

[48] काशिकावृत्तिः, 1/4/21

[49] लिङ्गवचनविचारः, पृष्ठसङ्ख्या - 78

[50] धातुसङ्ख्या – 1087 - सिद्धान्तकौमुदी, पृष्ठसङ्ख्या - 391

[51] अष्टाध्यायीसूत्रसङ्ख्या – 2/4/54

[52] अत्रैव 6/3/109

[53] लिङ्गवचनविचार इत उद्धृतम्, पृष्ठसङ्ख्या - 78

इत्यादिद्विवचनस्य स्थाने बालकद्वयमिति प्रयुज्य द्विवचनस्यानुपादेयत्वं प्रतिपादयन्ति किन्त्वर्थभेदादिदं न समीचीनम्। बालकावित्युक्ते द्वित्वविशिष्टौ बालकाविति बोधः। बालकद्वयमित्यत्र तु द्वयवयवकः समुदाय इति बोधः। ततश्च द्विवचनाभावे बालकयोर्द्वित्वस्य प्रकारतया भानं क्वचिदपि न भवेत्। द्वयवयवारब्धसमुदायस्यैव शाब्दबोधे विशेष्यता स्यात्। किञ्च द्विवचनाभावेऽश्वि-विशाखा-पुनर्वसुप्रभृतीनां शब्दानाम् अश्विनावित्यादिप्रयोगो लुप्येत। अतो व्याकरणसम्मतं द्वित्वस्य बोधकं द्विवचनं स्वीकार्यमिति विषयोऽयमपि विमर्शनीयः सन्तिष्ठते।

अत्र तावदिदमवगन्तव्यं यद् यथा हि लिङ्गस्वरूपं साहित्यशास्त्रीयं न तावत् पृथग्भूतं प्रसिद्धव्याकरणशास्त्रीयस्वरूपतस्तथैव वचनस्वरूपमपि तत्प्रसिद्धस्वरूपमेव भजते परं साहित्यशास्त्रे वचनगतकाव्यतत्त्वाधृतं विशिष्टं स्वरूपमवश्यं पृथक्तयैतस्य विवेचनावसरमुपकल्पयति। तथा हि साहित्ये सङ्ख्यातत्त्वमाहात्म्यं भूयो दरीदृश्यते। नैकाः कृतयः विशिष्टसङ्ख्यया भवन्ति युताः। तद्यथा स्तोत्रसाहित्यगतसङ्ख्यावैविध्याधारस्य सुदीर्घा परम्परा।[54] अपरत्र शतककाव्यानामपि महती शृङ्खला। यत्र नीतिवैराग्यशृङ्गारदेवीचण्डीशिवादीन्यन्यानि[55] च बहुधा प्रथितानि। अथ को न जानीयाद् यत् संस्कृते शतकसाहित्यस्य वर्तते सुदीर्घा परम्परेति। शतकमस्य पदस्य बीजम्महत्त्वञ्च वैदिकसाहित्येऽपि लभ्यते। यत्र मानवस्य पूर्णमायुश्शतम् इति स्वीकृतम् – "*जीवेम शरदश्शतम्*",[56] "*जिजीविषेच्छतं समाः*",[57] इत्यादयो

---

[54] *शिवपञ्चाक्षरस्तोत्रम्, षट्पदीस्तोत्रम्, त्रिपुरसुन्दर्यष्टकम्, कृष्णाष्टकम्, शिवाष्टकम्, गौरीदशकम्, द्वादशलिङ्गस्तोत्रम्, वीरविंशतिकाख्यं श्रीहनुमत्स्तोत्रम्, दुर्गाद्वात्रिंशन्नाममाला, श्रीहनुमच्चत्वारिंशिका, विष्णुसहस्रनामस्तोत्रम्, लक्ष्मीसहस्रम्, शिवसहस्रनामस्तोत्रम्, अष्टोत्तरसहस्रनामस्तोत्रादिकञ्च।*

- गोकुलनाथकृतशिवशतकस्थशास्त्रतत्त्वमीमांसा (लघुशोधप्रबन्धः), पृष्ठसङ्ख्या - 06

[55] द्रष्टव्या गोकुलनाथकृतशिवशतकस्थशास्त्रतत्त्वमीमांसा (शोधप्रबन्धः), पृष्ठसङ्ख्या – 09-13

[56] *तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् । पश्येम शरदः शतं जीवेम शरदः शतं श्रृणुयाम शरदः शतम्॥*

शुक्लयजुर्वेदकाण्वसंहिता , 36/24, पृष्ठसङ्ख्या - 335

[57] *ईशावास्योपनिषद्* 2, ईशादिविंशोत्तरशतोपनिषदः, पृष्ठसङ्ख्या – 01

वेदमन्त्राः "शतायुर्वै पुरुषः" इति सिद्धान्तं समर्थयन्ते। वस्तुतस्तु जीवनस्य सर्वकर्मस्वेव शतसङ्ख्याया योगाकाङ्क्षा वेदेऽवाप्यते।[58] भगवता पतञ्जलिनाऽपि महाभाष्ये श्रुतिसिद्धान्त एवानूदितः।[59] किमधिकम्, लोके तु खिन्नतायामपि शत्रुजनेभ्यश्शतायुरभिलाषस्य वर्णनमवाप्यते।[60] पुराणादिषु देवानां शतन्नामानि प्रथितानि। आगमादिषु च प्रायशोऽनायासमवाप्तानि दुर्गाकालीशिवविष्णुप्रभृतीनां शतं सहस्रं वा नामान्यपि प्रसिद्धान्येव। शतसाहस्रीसंहितेत्यभिधया च वेदव्यासप्रणीतस्य महाभारतस्यापि नितराम्प्रथितिः। किङ्कर्तव्यविमूढार्जुनकृत-दिव्यस्वरूपदर्शनानुरोधानुसारेण भगवता श्रीकृष्णेन हि स्वदिव्यस्वरूपप्रदर्शनमपि शतशः सहस्रशश्च[61] सङ्ख्यान्विततयैवासीत् कारितम्। पूजनादिक्रमेष्वपि शतम् अष्टोत्तरशतमित्यस्य सम्पृक्तत्वमीदृश्याः परिमाणात्मिकायाः सङ्ख्याया एव महत्त्वं विशदयति। शतकशब्दस्य व्युत्पत्तिदृष्ट्या हि शतम्परिमाणमस्य शतसङ्ख्याविशिष्टो वेत्यर्थलाभः "*सङ्ख्याया अतिशदन्तायाः कन्*",[62] इति सूत्रसाधनेन जायते। एवं विद्यते संस्कृतसाहित्ये भारतीयसंस्कृतौ च शतकस्य शतसङ्ख्याया वा महत्त्वन्नाविदितम्।

---

[58] *पश्येम शरदः शतम् जीवेम शरदः शतम्। बुध्येम शरदः शतम्, रोहेम शरदः शतम्।*
*पूषेम शरदः शतम्, भवेम शरदः शतम्। भूयेम शरदः शतम्, भूयसीः शरदः शतात्॥* (*अथर्ववेदः* 19/67)
संस्कृत वाङ्मय का बृहद् इतिहास (प्रथमखण्ड, वेद),भूमिकात उद्धृतम्,पृष्ठसङ्ख्या-06

[59] *" बृहस्पतिश्च प्रवक्ता, इन्द्रश्चाध्येता, दिव्यं वर्षसहस्रमध्ययनकालो न चान्तं जगाम, किम्पुनरद्यत्वे ? यः सर्वथा चिरञ्जीवति वर्षशतञ्जीवति" ।*
- पाणिनीयव्याकरणमहाभाष्यम् (प्रथमं खण्डम्), पस्पशाह्निकम्, पृष्ठसङ्ख्या – 54

[60] *" उपकृतं बहु तत्र किमुच्यते सुजनता प्रथिता भवता परम्। विदधदीदृशमेव सदा सखे! सुखितमास्व शरदां शतम्"॥* - साहित्यदर्पणः, द्वितीयः परिच्छेदः, पृष्ठसङ्ख्या- 55

[61] *" पश्य मे पार्थ! रूपाणि शतशोऽथ सहस्रशः । नानाविधानि दिव्यानि नानावर्णाकृतीनि च ॥*
श्रीमद्भगवद्गीता (द्वितीयखण्डः), 11/5, पृष्ठसङ्ख्या- 253

[62] *अष्टाध्यायीसूत्रसङ्ख्या* - 5/1/22, - सिद्धान्तकौमुदी, पृष्ठसङ्ख्या - 281

यद्यपि शतककाव्ये शतादप्यधिकाः कतिचन श्लोका भवन्ति तथाऽपि प्राधान्येन शतकमिति व्यपदेशः प्रसिद्धः। शतककाव्ये श्लोकानां सङ्ख्या शतादधिकाऽपि दृश्यते परङ्कदाचिदपि ततो न्यूना नह्येवावाप्यते। सम्भवतश्शताधिकश्लोकप्रणयने *भूयसीः शरदः शतात्,*[63] इति श्रुतिर्मूलत्वेन स्वीक्रियते। मानवस्य सहजस्वभावानुगुणश्शताधिकायुरभिलाषश्शताधिक-पद्यगुम्फने मूलमिति मन्तुं शक्यते। सर्वेष्वेषु शतककाव्येषु तावल्लौकिकमलौकिकम्माङ्गल्यप्राप्तिरूपञ्च लक्ष्यमन्वेष्टुं शक्यते। तद्यथा नीतिशृङ्गारादीनि लौकिकमाङ्गल्ययुतानि सूर्य-देव्यादीन्यलौकिकमाङ्गल्ययुतानि च तावन्त्यस्य प्रमाणानि। वस्तुतः शतककाव्यानां विकासक्रममभिलक्ष्य तादृशानामपि रचनानामुल्लेखनं भवितुमर्हम्, येषामाख्याः सन्ति शतकोल्लेखवियुक्ताः, परं तेषां वपुः शतकसङ्ख्ययैव भवति युतम्। पञ्चशतसङ्ख्यासंयुतममेरिकावर्णनन्नाम संस्मरणात्मकं मिथिलाप्रसादत्रिपाठिनः काव्यमथ सप्तशतसङ्ख्यासंयुतं गिरिधरशर्मनवरत्नकृता गिरिधरसप्तशत्याख्यं काव्यम्, शिवदत्तशर्मचतुर्वेदिकृतं स्फूर्त्तिसप्तशतीकाव्यम्, राजेन्द्रमिश्रकृतमभिराजसप्तशतीकाव्यञ्च[64] तावच्छतक-काव्यानां विकासक्रमत्वविवेचनायां तादृशानां शतककाव्यानां प्रातिनिध्यमावहतीति तथ्यं वर्त्तते सुस्पष्टम्। तस्मात् तादृशेष्वपि काव्येषु रचनानामुल्लेखश्शतककाव्येष्वेव विधातुं शक्यते, यत्र न भवति प्राथम्येन शतकनामावाप्तिः परं तत्र शतसङ्ख्याया भवत्येव योगः।

प्रसिद्धेषु शतकेषु तादृशानि शतककाव्यानि बहूनि सन्ति यत्रैकेनैव नाम्ना कविभिः स्वस्वशतककाव्यानि विरचितानि। तद्यथा - शृङ्गारशतकनाम्नैव भर्तृहरि-व्रजलाल-जनार्दन-व्रजराज-नरहरि-इत्याख्यानाम्पञ्चकवीनाम्,[65] वैराग्य-शतकनाम्नैव च भर्तृहरि-जनार्दन-नीलकण्ठ-अप्पयदीक्षित-

---

[63] (*अथर्ववेदः* 19/67), संस्कृत वाङ्मय का बृहद् इतिहास (प्रथमखण्ड, वेद), भूमिकात उद्धृतम्, पृष्ठसङ्ख्या-06

[64] संस्कृत वाङ्मय का बृहद् इतिहास (सप्तम-खण्ड), पृष्ठसङ्ख्या - 130

[65] History of Classical Sanskrit Literature, पृष्ठसङ्ख्या – 1089-90

शङ्कराचार्य्याणाम्पञ्चानाम्,[66] नीतिशतकनाम्ना वेङ्कटाचार्य-श्रीनिवासाचार्य-सुन्दराचार्य्याज्ञाताभिधानयुतानां चतुर्णाम्,[67] अन्योक्तिशतकनाम्ना च सोमनाथ-भट्टवीर-दर्शनविजयगणि-इत्याख्यानां त्रयाणाम्, सूर्य्यशतकनाम्ना तु मयूर-गोपालशर्म्म-श्रीश्वरविद्यालङ्कार-राघवेन्द्रसरस्वती-रखिलदास-लिङ्गकवि-कोदण्डरामाख्यानां[68] सप्त यावत् सङ्ख्याकानां कवीनां शतककाव्यान्यवाप्यन्ते।

एवं शतसङ्ख्याऽवलोके एतादृश्याश्शतकरचनाया रहस्यं तु वस्तुतः सम्पूर्णजीवनसमयलाभः कविकर्मणि पूर्णतायाः प्राप्तिश्चेति स्वीकर्तुं शक्यते।

यद्यपि नहि केवलं शतसङ्ख्याऽन्वितमेव काव्यादिविरचनम्प्रसिद्धिमतिशेतेऽपित्वष्ट-दश-द्वादश-पञ्चदश-द्वात्रिंशद्-अष्टोत्तरशत-सहस्र-अष्टोत्तरसहस्रादिसङ्ख्या अपि तथैव काव्यनाम तद्वपुश्च सीमाङ्कयन्ति। पञ्चापगेशाशास्त्रि(पैङ्गनाडु)-प्रणीतानीमानि काव्यनामानि तावदिह प्रमाणत्वेनोद्धर्तुं शक्यानि। तद्यथा - त्रिपुरसुन्दर्यष्टकोमामहेश्वराष्टक-प्रसन्नवेङ्कटेशाष्टक-सारस्वताष्टक-श्रीसुब्रह्मण्याष्टक- दक्षिणगोकर्णेश्वराष्टक-मरतकातलेश्वराष्टक-लोकमातृद्वादशश्लोकी -सरस्वतीद्वादशश्लोकी-परमशिवपञ्चदशी-गौरीचरणसप्तति-जगद्गुर्वष्टोत्तरशतकादीनीति।[69] ततः सहस्रसङ्ख्यायुतत्वमपि स्तोत्राणान्नैकशो द्रष्टुं शक्यते, वस्तुतस्सहस्रशब्दोऽयमनन्तवाची,[70] तस्मादेव स्तोत्रादिषु भगवन्नामानि सहस्रसङ्ख्यया भवन्ति युतानि, विष्णुसहस्रनाम-शिवसहस्रनामश्रीगोसहस्रनामस्तोत्रादीन्यत्र प्रमाणभूतानि। तत्रापि शतमित्यस्य प्रभावोऽवगन्तुं शक्यत एव। नैकस्तोत्राणामेव प्रणयनं वस्तुतः शतकान्वितानां स्तोत्राणामन्येषाञ्च काव्यानाम्मूलत्वेनानुसन्धातुं शक्यते।

---

[66] अत्रैव, पृष्ठसङ्ख्या – 1081

[67] अत्रैव, पृष्ठसङ्ख्या – 319

[68] अत्रैव, पृष्ठसङ्ख्या – 1107

[69] अत्रैव, पृष्ठसङ्ख्या- 1009 -10

[70] श्रीमद्भगवद्गीता (द्वितीयखण्डः), 7/3 इत्यस्य संस्कृतव्याख्यायाश्चर्चितः, पृष्ठसङ्ख्या - 06

वस्तुतः स्तोत्रादिग्रन्थप्रणयनस्य विशिष्टसङ्ख्यासमाश्रयणमप्येतदेव वचनस्य गूढं वैलक्षण्यपरत्वं विशेषतः प्रतिपादयति। एवं सूक्ष्मेक्षिकया शतककाव्यानां तदीयविकासरणेश्च प्रणयनाधारमपि वचनस्य सङ्ख्यायाः वा माहात्म्यमाधृत्यैव समालोचयितुं शक्यते।

अथ साहित्यशास्त्रानुगुणसिद्धान्तसमन्वितेषु श्लेषवक्रोक्त्युपमा-रसाद्यभिव्यक्त्यादिषु च शक्यते वचनस्य सङ्ख्याया वा स्वरूपवैशिष्ट्यं विशेषेणान्वेष्टुम्। तद्यथा - अष्टविधश्लेषेषु वचनश्लेषस्वरूपं तावल्लिङ्गश्लेषोदाहरणभूतश्लोक एव शक्यते द्रष्टुमयं काव्यप्रकाशादुद्धृतः –

“भक्तिप्रह्वविलोकनप्रणयिनी नीलोत्पलस्पर्धिनी,

ध्यानालम्बनतां समाधिनिरतैर्नीते हितप्राप्तये।

लावण्यस्य महानिधी रसिकतां लक्ष्मीदृशोस्तन्वती,

युष्माकं कुरुतां भवार्तिशमनं नेत्रे तनुर्वा हरेः”॥[71]

अत्र स्त्रीप्रत्ययान्तत्वमथ च तदभावे नपुंस्त्वमालक्ष्य विहितप्रयोगद्वयमेकवचनद्विवचनगतश्लेषेण वर्त्तते संयुतम्। एवमेव “मैथिली तस्य दाराः”, फुल्लेन्दीवरकाननानि नयने पाणी सरोजाकाराः,[72] वक्रे भ्रुवावतितराम्[73] इत्याद्युहारणेषु वचनवक्रतासौन्दर्यं शोभतेतराम्। उपमाऽलङ्कारे च वचनभेदरूपो भवति दोषः, यथा – “ज्योत्स्ना इव सिता कीर्त्तिः”,[74] इत्यत्रोपमानोपमेययोर्वचनभेदः, एवमन्यत्रापि बहुधेदृशाः प्रयोगा एतत्तत्त्वविचारायोपयुक्ताः।[75] वचनस्य च

[71] काव्यप्रकाशः, नवम उल्लासः, पृष्ठसङ्ख्या - 513

[72] वक्रोक्तिजीवितम्, प्रथमोन्मेषः, पृष्ठसङ्ख्या - 86

[73] साहित्यदर्पणः, तृतीयः परिच्छेदः, पृष्ठसङ्ख्या - 160

[74] अत्रैव, सप्तमः परिच्छेदः, पृष्ठसङ्ख्या -618

[75] *प्राणा इव प्रियोऽयं मे* – काव्यादर्श, द्वितीय परिच्छेद, पृष्ठसङ्ख्या - 47

रसाभिव्यञ्जकत्वस्वरूपविषयेऽभिहितमेवम् – "सुप्तिङ्वचनसम्बन्धैस्तथा कारकशक्तिभिः। कृत्तद्धितसमासैश्च द्योत्योऽलक्ष्यक्रमः क्वचित्"॥[76] एतेन वचनपदार्थमनुसृत्यालक्ष्यक्रमरूपो ध्वन्यर्थो रसाभिव्यञ्जको वा विचारणीयताङ्गतो दृश्यते। तद्यथा –

"न्यक्कारो ह्ययमेव मे यदरयस्तत्राप्यसौ तापसः,

सोऽप्यत्रैव  निहन्ति राक्षसकुलं जीवत्यहो रावणः।

धिग्धिक्छक्रजितं प्रबोधितवता किं कुम्भकर्णेन वा

स्वर्गग्रामटिकाविलुण्ठनवृथोच्छूनैः किमेभिर्भुजैः"॥[77]

अत्र "अरयः" इति बहुवचनप्रयोगद्वारा रावणस्य शत्रोरभावत्वे सत्यरीणां कथमुद्भव इति क्रोधरूपविभाववत्त्वाद्[78] वीररसाभिव्यञ्जनम् अथ च "तापसः" इत्यत्रैकवचनद्वारा च प्रकृतनिर्वेदातिशयो द्योत्यते।

अन्यत्र च दोषप्रकरणेऽपि वचनस्वरूपं साहित्यशास्त्रीयं शक्यते निभालयितुम्। तद्यथा –

"आदावञ्जनपुञ्जलिप्तवपुषां श्वासानिलोल्लासित-

प्रोत्सर्पद्विरहानलेन च ततः सन्तापितानां दृशाम्।

---

*अविगाह्योऽसि नारीणामनन्यवचसामपि। विषमोपलभिन्नोर्मिरापगेवोत्तितीर्षतः॥*

- सरस्वतीकण्ठाभरणम्, प्रथमः परिच्छेदः, पृष्ठसङ्ख्या - 24

[76] ध्वन्यालोकः, तृतीयोद्योतः, कारिकासङ्ख्या- 16

[77] काव्यप्रकाशः, सप्तम उल्लासः, पृष्ठसङ्ख्या – 304

[78] द्रष्टव्यो ध्वन्यालोकः, तृतीयोद्योतः (लोचनटीका), पृष्ठसङ्ख्या - 153

सम्प्रत्येव निषेकमश्रुपयसा देवस्य चेतो भुवो

भल्लीनामिव पानकर्म कुरुते कामं कुरङ्गेक्षणा"॥[79]

अत्र तावद् दृशां वपुषां चेत्यनयोर्बहुवचनप्रयोगो वृत्तपूरणायैवोपात्तञ्जातम्, तस्माच्च वचनगतदोषरूपोऽयं कविकर्म्मणि। न चात्र *जात्याख्यामेकस्मिन् बहुवचनमन्यतरस्याम्*[80] इत्यस्य कथमपि प्रसङ्गः, श्लोकस्थात् साक्षात् "कुरङ्गेक्षणा" इत्येतत्पदाद् एकस्या एव स्त्रियो वर्णनात्। अनयैव दिशा प्रक्रमभङ्गान्तर्हितवचनदोषस्वरूपमप्यनुशीलयितुं शक्यते।[81]

इतोऽपि नाटकादिषु स्वविषयं विवेचयद्भिः पात्रविशेषैः स्वीयोपस्थापनं वयम्,[82] अस्माकम् इति रूपेण बहुवचनपरं विधीयते परं व्याकरणशास्त्रं समनुश्रित्य "सविशेषणस्य प्रतिषेधः"[83] इति वार्त्तिकवचःप्रामाण्यानुगुण्येन एवं प्रयोगाः नैव कर्तुं शक्यन्ते इति वचनगतराद्धान्तविशेषः। वस्तुतस्तु आदरार्थेऽपि बहुवचनप्रयोगस्य वर्तते परिपाटी यथा अभिनवगुप्तपादाः, आचार्याः कुमारिलभट्टाः इत्यादयः प्रयोगाः। अतिशयादरान्वितानाम् आचार्यादीनां पात्राणां विवरणप्रसङ्गे लभ्यन्त ईदृशाः प्रयोगाः, येषामाधारो वेदार्थदीपिकायां षड्गुरुशिष्यवचनालोके निभालयितुं शक्यते –

"व्याख्येयार्थबहुत्वेन बहुमानेन चात्मनः।

व्याख्यामात्रात्मन्यथाऽऽरोप्य बहुत्वं तु प्रयुज्यते॥

---

[79] काव्यप्रकाशः, सप्तम उल्लासः, पृष्ठसङ्ख्या - 321

[80] अष्टाध्यायीसूत्रसङ्ख्या – 1/2/58

[81] *"काचित् कीर्णा रजोभिर्दिवमनुविदधौ मन्दवक्रेन्दुलक्ष्मीरश्रीकाः काश्चिदन्तर्दिश इव दधिरे दाहमुद्भ्रान्तसत्त्वाः। भ्रेमुर्वात्या इवान्याः प्रतिपदमपरा भूमिवत् कम्पमानाः प्रस्थाने पार्थिवानामशिवमिति पुरो भावि नार्यः शशंसुः"॥*

- काव्यप्रकाशः, सप्तम उल्लासः, पृष्ठसङ्ख्या - 373

[82] येषां कुलेषु सविता च गुरुर्वयञ्च – उत्तररामचरितम्, प्रथमाङ्कस्थनवमश्लोकांशः

[83] सिद्धान्तकौमुदी, (अस्मदो द्वयोश्च – 1/2/59 अत्रत्यवार्तिकम्), पृष्ठसङ्ख्या 188

यथा हि निधिमासाद्य प्रयुञ्जानस्तु दृश्यते।

एते वयं समृद्ध्यर्था देवोऽस्मासु प्रसीदति"॥

अथ च "एकोऽहं बहु स्याम्..." , "द्वा सुपर्णा सयुजा सखाया..." इत्येतद्वचनावलोके एव प्रकृतस्य वचनस्य सङ्ख्यातत्त्वस्य वा सारः शक्यते स्पष्टीकर्तुम्। ब्रह्ममायाजगद्रूपं समग्रमेव तत्त्वविशेषं वस्तुतः एतद्वचनपदार्थस्पष्टीकरणाधीनत्वेनैव शक्यते प्रतिपादयितुम्। ततश्च "जात्याख्यायाम् एकस्मिन् बहुवचनमन्यतरस्याम्" जातिव्यक्तिपक्षद्वयं समाश्रित्य च ऐक्यस्य बहुत्वस्य चाधारोऽपि एतद्विशिष्टवचनतत्त्वमेव विशदयति।

"न हि सर्वः सर्वं जानाति" इत्यत्र सत्यपि बहुत्वे बहुत्वयुक्तः सर्वशब्दस्य एकः समूहरूपोऽर्थो भवति प्रधानः, अपरत्र सर्वे इत्यत्र न हि एकः समूहरूपोऽर्थः प्रधानायतेऽपित्वत्रत्ये बहुत्वे व्यस्तत्वमेव प्रधानविषयः भवति। एवमेव उभशब्दः यस्य प्रयोगः केवलं द्विवचने जायते उभयशब्दस्य च बहुवचन एव। तत्रापि उभशब्दस्य द्वित्वं व्यस्तत्वनिरूपकम् अथ उभयशब्दस्य द्वित्वं समूहरूपं समस्तत्वस्य निरूपणीयतां ब्रूत इति विशेषः।

प्राणाः प्राणः इत्यनयोरेव प्रयोगयोः सन्तिष्ठते साधुतेति समां समां विजायते (५/२/१२) इत्यस्य "समायां समायां विजायते" इति भाष्यवचःप्रामाण्यमुररीकृत्य बहुवचनान्तोऽपि शब्दविशेषः भजत एव एकवचनान्ततामिति विशेष एव सिद्धान्तः वचनतत्त्वसम्बद्धः।

अथ एकशब्दः प्रसिद्धमेकत्वरूपमर्थं तु ब्रूते परं स एव एकशब्दः अर्थान्तरेऽपि युज्यते स चार्थः न ह्येकत्वस्यापितु बहुत्वस्यैव निरूपकः। यथा शास्त्रसिद्धान्तान्तरे बहुधा शास्त्रकारैः प्रयुज्यते – इत्येके, इति।

एवमेव वचनभेदविषयस्य प्रयोगवैलक्षण्यं सुस्पष्टमवगन्तुं शक्यत एव तत्तत्तत्त्वसम्बद्धान् आधारान् अधिकृत्य। तद्यथा शृङ्गारप्रकाशे सङ्ख्यायाः वचनस्य भेदविषयश्चर्चितः। तत्र हि सङ्ख्यायाः षड् भेदाः सन्ति प्रोक्ताः। ते

सोदाहरणं यथाक्रमञ्चेमे - सा षोढा – आभिधानिकी, वैवक्षिकी, नैमित्तिकी, पारिभाषिकी, वैभाषिकी, पारिशेषिकी च।[84]

सङ्ख्यायाः वचनस्य वा निर्धारणं येषां शब्दानां जातमस्ति तेषां शक्यते परिगणनम् आभिधानिक्याः सङ्ख्यायाः वर्गे। तद्यथा – आपः, दाराः, लाजाः, द्वयम्, नियुतम् इत्यादयः नैकेऽन्ये शब्दाः।

यत्र च विवक्षाधीना भवति सङ्ख्या सा वैवक्षिकी इत्युच्यते। तद्यथा – रोदसी, रोदस्यौ, कबरी, कबर्यः, स्तनौ, स्तनाः, दृक्, दृशौ, दृशः, विशाखा, विशाखे, विशाखाः, जगत्, जगती, जगन्ति।

यत्र च वस्तुनो निमित्तस्य सद्भावो भवति सा सङ्ख्या नैमित्तिकीत्युच्यते। तद्यथा – वृक्षः, शोभनः, दम्पती, पितरौ, अक्षाः, गभस्तयः।

यत्र द्वित्वबहुत्वादिषु एकत्वादिपरिभाषणं विधीयते शास्त्रानुसारं सा हि सङ्ख्या पारिभाषिकीति निगद्यते। तद्यथा – पञ्चाला जनपदः (काशिका १/२/५२), मार्दङ्गिकपाणविकं पुरुषौ (काशिका २/४/२), खलतिकं वनानि (काशिका २/४/१२), गोदौ ग्रामः (काशिका १/२/५१), तिष्यपुनर्वसू तारकाः (काशिका १/२/६३), स चाहं पचाव इत्यादिप्रयोगाः।

यत्र भवन्ति विभाषयैकत्वद्वित्वबहुत्वानि सा हि सङ्ख्या वैभाषिकीत्युच्यते। तद्यथा – लक्ष्न्यग्रोधं प्लक्षन्यग्रोधाः (काशिका २/४/१२), अश्ववडवम् अश्ववडवौ (काशिका २/४/१२), पूर्वे फल्गुन्यौ पूर्वाः फल्गुन्यः (काशिका १/२/६०) इत्यादयः नैके प्रयोगाः।

एकाद्युक्तसङ्ख्यापरिशेषे स्वादयः जायन्ते सा हि सङ्ख्या पारिशेषिकीति कथ्यते। तद्यथा – एकः, द्वौ, बहवः, उभौ, द्वित्राः, अर्धतृतीया इति। वाक्यपदीये तावदुक्तम्-

---

[84] श्रृङ्गारप्रकाशः, षष्ठः प्रकाशः, पृष्ठसङ्ख्या - 289

"निमित्तमेकमित्यत्र विभक्त्या नाभिधीयते।

तद्वतस्तु यदेकत्वं विभक्तिस्तत्र वर्तते"॥[85]

अत्रैव शृङ्गारप्रकाशे साधर्म्यादिभिरथान्तरेऽनुवृत्तः पदार्थधर्मो वचनने निवर्त्यते सा भवति वचननैषेधिकी[86]-नाम्नी व्यपेक्षा, तस्याः एव विशिष्टः कश्चन प्रसङ्गोऽस्ति समुपन्यस्तः। प्रतीयमाननिमित्ता निवृत्तिनिमित्ता च भवतीयं वचननैषेधिकी। प्रतीयमाननिमित्ता यथा –

"मूले कण्टकसन्ततिरुपरि च विकचानि रक्तकुसुमानि।

एतावतैव शाल्मलिरनुहरति न पङ्कजवनस्य"॥[87]

इह शाल्मलिसादृश्यं कण्टककुसुमसाधर्म्यात् पङ्कजवनेऽनुवृत्तं प्रतीयमानसौगन्ध्यादिगुणाभावसूचकेन वचनेन निवर्त्यते। निवृत्तिनिमित्ता यथा –

"कार्यज्ञः प्रष्टव्यो न पुनर्मान्यो मम प्रियो वेति।

गुरुरत्रासनसेव्यः प्रियानितम्बः कदा मन्त्री"॥[88]

अत्र यो यस्य मान्यः प्रियो वा स तस्य मन्त्रीति सामान्येन मान्यत्वप्रियत्वाभ्यां मान्यप्रियानुवृत्ता प्रष्टव्यता प्रियानितम्बदृष्टान्तावष्टम्भशोभिनाभिधीयमानकार्यज्ञत्वाभावसूचकेन वचनेन निवर्त्यते। एवं वचनगतं साहित्यशास्त्रीयं गूढं स्वरूपमप्यस्य वैलक्षण्यं सुस्पष्टयत्येव।

---

[85] वाक्यपदीयम् 3/11/27

[86] अत्रैव, अष्टमः प्रकाशः, पृष्ठसङ्ख्या - 403

[87] अत्रैव समुद्धृतः

[88] अत्रैव समुद्धृतः

इतोऽप्यधिकविशिष्टप्रयोगैस्तावद् वचनतत्त्वस्वारस्यं साहित्यशास्त्रसन्दर्भ-समन्वितैः शक्यत एव परीक्षितुम्। तद्यथा अधरशब्दप्रयोगः। प्रायः शब्दोऽयम् ओष्ठस्य कृते समुपयुज्यते तत्रापि अधरभागायैव एतस्मादेवाधरत्वमपि शब्दस्य सङ्गच्छत इति प्रतिभाति। परं प्रसिद्धेऽर्थ एव बहुधा प्रयुक्ते सति शब्दोऽयम् अधररूपः समग्रस्याप्योष्ठस्य बोधकतां समुपपन्नः इति शक्यते वक्तुम्। तद्यथा-

"निवार्यतामालि! किमप्ययं बटुः पुनर्विवक्षुः स्फुरितोत्तराधरः।

न केवलं यो महतोऽपभाषते शृणोति तस्मादपि यः स पापभाक्"॥[89]

कुमारसम्भवस्य श्लोकेऽस्मिन् बिम्बफलाधरोष्ठशब्दप्रयोगः, अपरत्र

"हरस्तु किञ्चित् परिप्लुतधैर्यश्चन्द्रोदयारम्भ इवाम्बुराशिः।

उमामुखे बिम्बफलाधरोष्ठे व्यापारयामास विलोचनानि"॥[90]

कुमारसम्भवस्य पञ्चमसर्गस्थे श्लोकेऽस्मिन्नेव स्फुरितोत्तराधरशब्दप्रयोगश्च एतदेव मतं पुष्णाति यद् अधरशब्दार्थस्तु वस्तुतः ओष्ठयोर्निम्नवर्त्योष्ठप्रदेशमेव नूनमधिकं बोधयति अन्यथा पूर्वतः प्रथिते समग्रतः एव ओष्ठरूपेऽर्थे सति कालिदासेन उत्तरोष्ठस्य अधरोष्ठस्य वा प्रयोगो न कृतः स्यादिति। एतस्माद् अधरशब्दगतमेकत्वम् अमरकोशादिसम्प्राप्तौष्ठगताद् द्वित्वात् कथञ्चिद् अधिकमेव ध्यानास्पदत्वमावहतीति।

अपरत्र अध्यात्मरामायणेऽपाणिनीयप्रयोगानां विमर्शः एतस्मिन् ग्रन्थेऽपि लिङ्गवचनगतं साहित्यशास्त्रसमन्वितं स्वारस्यं विशेषतः शक्यते परीक्षितुम्। तद्यथा रामायणम् इत्यस्य समग्रार्थनिर्धारणप्रसङ्गे रामा सीता रामो रामचन्द्रो रामा च रामश्चेति विग्रहे 'पुमान् स्त्रिया' इत्येतत्सूत्रवृत्तेः 'स्त्रिया सहोक्तौ पुमाञ्छिष्यते' इत्यस्याः अनुसारेण स्त्रीवाचके शब्दे लोपे सति 'यः शिष्यते स लुप्यमानार्थाभिधायी' इति नियमनाद् रामशब्दस्यैव द्वित्वबोधकता सन्तिष्ठते।

---

[89] कुमारसम्भवम् 5/82

[90] अत्रैव 3/67

ततो 'रामौ' इति शब्दः सीतारामबोधको 'हंसी च हंसश्च हंसौ' इतिवच्च ततो रामयोः सीतारामयोः अयनमिति विग्रहेण भाव्यते।

अन्यत्र मेघदूतीये प्रसङ्गेऽपि वचनगतस्य वैलक्षण्यस्य विमर्शः शक्यते कर्तुम्। तद्यथा –

"कश्चित् कान्ताविरहगुरुणा स्वाधिकारात् प्रमत्तः
शापेनास्तङ्गमितमहिमा वर्षभोग्येण भर्तुः।
यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु"॥

अत्र "रामगिर्याश्रमेषु" इत्येतत्पदगतं बहुत्वं वस्तुतः कविकालिदासोपकल्पितं नूनं यक्षस्य अनवस्थितचित्तविशेषावस्थितिं किं वा तदीययक्षिणीविरहदुःखाग्निमेव विशेषेण विशदयति। तथोक्तमेव - "वने रतिर्विरक्तास्याविरक्तस्य जने रतिः। अनवस्थितचित्तस्य न जने न वने रतिः॥" एवमत्र एकवचनापेक्षया बहुवचनप्रयोगद्वारा वचनगतं वैलक्षण्यमेव समुपास्थापयितुं सुशकम्।

एवं व्याकरणसाहित्यशास्त्रदृशा पूर्वत्र प्रतिपादितवचनाधारेण तदीयवैशद्यकारकेण च वचोविन्यासेन लिङ्गवचनविमर्शः पञ्चस्वध्यायेषु विहितः।

# परिशिष्टम्

## ॥ पाणिनीयं लिङ्गानुशासनम् ॥

**लिङ्गम्॥१॥**

**स्त्री॥२॥**

अधिकारसूत्रे एते।

**ऋकारान्ता मातृदुहितृस्वसृपोतृननान्दरः॥३॥**

ऋकारान्ता एते पञ्चैव स्त्रीलिङ्गाः। स्वस्रादिपञ्चकस्यैव डीन्निषेधेन कर्त्रीत्यादेर्ङीपा इकारान्तत्वात्। तिसृचतस्रोस्तु स्त्रियामादेशतया विधानेऽपि प्रकृत्योस्त्रिचतुरोर्ऋदन्तत्वाभावात्।।

**अन्यूप्रत्ययान्तो धातुः॥४॥**

अनिप्रत्ययान्त ऊप्रत्ययान्तश्च धातुः स्त्रियां स्यात्। अवनिः। चमूः। प्रत्ययग्रहणं किम्? देवयतेः क्विप्। द्यूः। विशेष्यलिङ्गः।

**अशनिभरण्यरणयः पुंसि च॥५॥**

इयमयं वा अशनिः।

**मिन्यन्तः॥६॥**

मिप्रत्ययान्तो निप्रत्ययान्तश्च धातुः स्त्रियां स्यात्। भूतिः। ग्लानि।

**वह्निवृष्ण्यग्नयः पुंसि॥ ७॥**

पूर्वस्यापवादः।

**श्रोणियोन्यूर्मयः पुंसि च॥ ८॥**

इयमयं वा श्रोणिः।

**क्तिन्नन्तः॥९॥**

स्पष्टम्। कृतिरित्यादि।

**ईकारान्तश्च॥१०॥**

ईप्रत्ययान्तः स्त्री स्यात्। लक्ष्मीः।

**ऊङाबन्तश्च॥११॥**

कुरूः। विद्या।

**य्वन्तमेकाक्षरम्॥१२॥**

श्रीः। भूः। एकाक्षरं किम्? पृथुश्रीः।

**विंशत्यादिरानवतेः॥१३॥**

इयं विंशतिः। त्रिंशत्। चत्वारिंशत्। पञ्चाशत्। षष्टिः। सप्ततिः। अशीतिः। नवतिः।

**दुन्दुभिरक्षेषु॥१४॥**

इयं दुन्दुभिः। अक्षेषु किम् ? अयं दुन्दुभिर्वाद्यविशेषोऽसुरो वेत्यर्थः।

**नाभिरक्षत्रिये॥१५॥**

इयं नाभिः।

**उभावप्यन्यत्र पुंसि॥१६॥**

दुन्दुभिर्नाभिश्चोक्तविषयादन्यत्र पुंसि स्तः। नाभिः क्षत्रियः। कथं तर्हि,

"समुल्लसत्पङ्कजपत्रकोमलैरुपाहितश्रीण्युपनीविनाभिभिः।" इति भारविः? उच्यते- दृढभक्तिरित्यादाविव कोमलैरिति सामान्ये नपुंसक इति बोध्यम्। वस्तुतस्तु "लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य' इति भाष्यात्पुंस्त्वमपीह साधु। अत एव,

"नाभिर्मुख्यनृपे चक्रमध्यक्षत्रिययोः पुमान्।

द्वयोः प्राणिप्रतीके स्यात् स्त्रियां कस्तूरिकामदे" ॥

इति मेदिनी। रभसोऽप्याह -

"मुख्यराट् क्षत्रिये नाभिः पुंसि प्राण्यङ्गके द्वयोः।

चक्रमध्ये प्रधाने च स्त्रिया कस्तूरिकामदे" ॥

इति। एवमेवंविधेऽन्यत्रापि बोध्यम्।

**तलन्तः॥१७॥**

अयं स्त्रियां स्यात्। शुक्लस्य भावः शुक्लता। ब्राह्मणस्य कर्म ब्राह्मणता। ग्रामस्य समूहो ग्रामता। देव एव देवता।

**भूमिविद्युत्सरिल्लतावनिताभिधानानि॥१८॥**

भूमिः। विद्युत्सौदामिनी। सरिन्निम्नगा। लता वल्ली। वनिता योषित्।

**यादो नपुंसकम्॥१९॥**

यादश्शब्दः सरिद्वाचकोऽपि क्लीबं स्यात्।।

**भाःस्रुक्स्रग्दिगुष्णिगुपानहः॥२०॥**

एते स्त्रियां स्युः। इयं भा इत्यादि।

**स्थूणोर्णे नपुंसके च॥२१॥**

एते स्त्रियां क्लीबे च स्तः। स्थूणा, स्थूणम्। ऊर्णा, ऊर्णम्। तत्र स्थूणा काष्ठमयी द्विकर्णिका। ऊर्णा तु मेषादिलोम।।

**गृहशशाभ्यां क्लीबे॥२२॥**

नियमार्थमिदम्। गृहशशपूर्वे स्थूणोर्णे यथासङ्ख्यं नपुंसके स्तः।। गृहस्थूणम्। "शशोर्णं शशलोमनि" इत्यमरः।

**प्रावृट्-विप्रुट्-रुट-विट्-त्विषः॥२३॥**

एते स्त्रियां स्युः।

**दर्विविदिवेदिखनिशाण्यश्रिवेणिकृष्योषधिकट्यङ्गुलयः॥२४॥**

एते स्त्रियां स्युः। पक्षे ङीप्। दर्वी, दर्विः इत्यादि।

**तिथिनाडिरुचिवीचिनालिधूलिकिकिकेलिछविराज्यादयः॥२५॥**

एते प्राग्वत्। इयं तिथिरित्यादि। अमरस्त्वाह– "तिथयो द्वयोः" इति। तथा च भारविः- "तस्य भुवि बहुतिथास्तिथयः" इति। स्त्रीत्वे हि बहुतिथ्य इति स्यात्। श्रीहर्षश्च– "निखिलान्निशि पौर्णिमातिथीन्" इति।

**शष्कुलिराजिकुट्यशनिवर्तिभ्रुकुटित्रुटिवलिपङ्क्तयः॥२६॥**

एतेऽपि स्त्रियां स्युः। इयं शष्कुलिः।

**प्रतिपदापद्विपत्सम्पच्छरत्संसत्परिषदुषः संवित्क्षुत्पुन्मुत्समिधः॥२७॥**

इयं प्रतिपदित्यादि। उषाः उच्छन्ती। उषाः प्रातरधिष्ठात्री देवता।

**आशीर्धूःपूर्गीर्द्वारः॥२८॥**

इयमाशीरित्यादि।

**अप्सुमनस्समासिकतावर्षाणां बहुत्वं च॥२९॥**

अबादीनां पञ्चानां स्त्रीत्वं स्याद् बहुत्वं च। आप इमाः। स्त्रियः सुमनसः पुष्पम्। सुमना मालती जातिः। देववाची तु पुंस्येव। सुपर्वाणः सुमनसः। बहुत्वं प्रायिकम्। "एका च सिकता तैलदाने असमर्था" इति अर्थवत्सूत्रे (पा० १.२.४५) भाष्यप्रयोगात्।

समासमां विजायत इत्यत्र समाया समायामिति भाष्याच्च। "विभाषा घ्राधेट्०" (पा० २.४.७८) इति सूत्रे "आघ्रासातां सुमनसौ" इति वृत्तिव्याख्यायां हरदत्तोऽप्येवम्।

**सक्त्वग्ज्योग्वाग्यवागूनौ स्फिजः॥३०॥**

इयं स्रक्, त्वक्, ज्योक्, वाक्, यवागूः, नौः, स्फिक्।

**तृटिसीमासम्बध्याः॥३१॥**

इयं तृटिः। सीमा। सम्बध्या।

**चुल्लिवेणिखार्यश्च॥३२॥**

स्पष्टम्।

**ताराधाराज्योत्स्नादयश्च॥३३॥**

**शलाका स्त्रियां नित्यम्॥३४॥**

नित्यग्रहणमन्येषां क्वचिद्व्यभिचारं ज्ञापयति।

**॥ इति स्त्र्यधिकारः ॥**

**॥ अथ पुँल्लिङ्गाधिकारः ॥**

**पुमान्॥१॥**

अधिकारोऽयम्।

**घञबन्तः॥२॥**

पाकः। त्यागः। करः। गरः। भावार्थ एवेदम्। नंपुसकत्वविशिष्टे भावे क्तल्युड्भ्यां स्त्रीत्वाविशिष्टे तु क्तिन्नादिभिर्बाधेन परिशेषात्। कर्मादौ तु घञाद्यन्तमपि विशेष्यलिङ्गम्। तथा च भाष्यम्-'सम्बन्धमनुवर्तिष्यते" इति।

**घाजन्तश्च॥३॥**

विस्तरः। गोचरः। चयः। जयः इत्यादि।

**भयलिङ्गभगपदानि नंपुसके॥४॥**

एतानि नपुंसके स्युः। भयम्। लिङ्गम्। भगम्। पदम्।

**नङन्तः॥५॥**

नङ्प्रत्ययान्तः पुंसि स्यात्। यज्ञः। यत्नः।

**याच्ञा स्त्रियाम्॥६॥**

पूर्वस्यापवादः।

**क्यन्तो घुः॥७॥**

किप्रत्ययान्तो घुः पुंसि स्यात्। आधिः, निधिः, उदधिः। क्यन्तः किम्? दानम्। घुः किम् ? जज्ञिर्बीजम्।

**इषुधिः स्त्री च॥८॥**

इषुधिशब्दः स्त्रियां पुंसि च। पूर्वस्यापवादः।

**देवासुरात्मस्वर्गगिरिसमुद्रनखकेशदन्तस्तनभुजकण्ठखड्गशरपङ्काभिधानानि॥९॥**

एतानि पुंसि स्युः। देवाः सुराः, असुराः दैत्याः, आत्मा क्षेत्रज्ञः, स्वर्गो नाकः, गिरिः पर्वतः, समुद्रोऽब्धिः, नखः कररुहः, केशः शिरोरुहः, दन्तो दशनः, स्तनः कुचः, भुजो दोः, कण्ठो गलः, खड्गः करवालः, शरो मार्गणः, पङ्कः कर्दम इत्यादि।

**त्रिविष्टपत्रिभुवने नपुंसके॥१०॥**

स्पष्टम्। तृतीयं विष्टपं त्रिविष्टपम्। स्वर्गाभिधानतया पुंस्त्वे प्राप्ते अयमारम्भः।

**द्यौः स्त्रियाम्॥११॥**

द्योदिवोस्तन्त्रेणोपादानमिदम्।

**इषुबाहू स्त्रियां च॥१२॥**

चात्पुंसि।

**बाणकाण्डौ नपुंसके च॥१३॥**

चात्पुंसि। त्रिविष्टपेत्यादिचतुस्सूत्री देवासुरेत्यस्यापवादः।

**नान्तः॥१४॥**

अयं पुंसि। राजा, तक्षा। न च चर्मवर्मादिष्वतिव्याप्तिः "मन्द्व्यच्कोऽकर्तरि" इति नपुंसकप्रकरणे वक्ष्यमाणत्वात्।

**क्रतुपुरुषकपोलगुल्ममेघाभिधानानि॥१५॥**

क्रतुरध्वरः। पुरुषो नरः। कपोलो गण्डः। गुल्फः प्रपदः। मेघो नीरदः।

**अभ्रं नपुंसकम्॥१६॥**

पूर्वस्यापवादः।

**उकारान्तः॥ १७॥**

अयं पुंसि स्यात्। प्रभुः, इक्षुः। “हनुर्हट्टविलासिन्यां नृत्यारम्भे गदे स्त्रियाम्। द्वयोः कपोलावयवे" इति मेदिनी। “करेणुरिभ्यां स्त्री नेभे” इत्यमरः। एवंजातीयकविशेषवचनानाक्रान्तस्तु प्रकृतसूत्रस्य विषयः। उक्तं च-

“लिङ्गशेषविधिर्व्यापी विशेषैर्यद्यबाधितः” । इति। एवमन्यत्रापि।

**धेनुरज्जुकुहूसरयुतनुरेणुप्रियङ्गवः स्त्रियाम्॥१८॥**

**समासे रज्जुः पुंसि च॥१९॥**

कर्कटरज्ज्वा, कर्कटरज्जुना।

**श्मश्रुजानुवसुस्वाद्वश्रुजतुत्रपुतालूनि नपुंसके॥२०॥**

**वसु चार्थवाचि॥२१॥**

अर्थवाचीति किम्? वसुर्मयूखाग्निधनाधिपेषु।

**मद्गुमधुसीधुशीधुसानुकमण्डलूनि नपुंसके च॥ २२॥**

चात्पुंसि। अयं मद्गुः। इदं मद्गु।

**रुत्वन्तः॥२३॥**

मेरुः, सेतुः।

**दारुकसेरुजतुवस्तुमस्तूनि नपुंसके॥२४॥**

रुत्वन्त इति पुंस्त्वस्यापवादः। इदं दारु।

**सक्तुर्नपुंसके च॥२५॥**

चात्पुंसि। सक्तुः, सक्तु।

**प्राग्रश्मेरकारान्तः॥२६॥**

रश्मिदिवसाभिधानमिति वक्ष्यति। प्रागेतस्मादकारान्त इत्यधिक्रियते।

**कोपधः॥२७॥**

कोपधोऽकारान्तः पुंसि स्यात्। स्तबकः। कल्कः।

**चिबुकशालूकप्रातिपदिकांशुकोल्मुकानि नपुंसके।।२८॥**

पूर्वसूत्रापवादः।

**कण्टकानीकसरकमोदकचषकमस्तकपुस्तकतडाकनिष्कशुष्कवर्चस्कपिनाकभाण्डकपिण्डककटकशण्डकपिटकतालकफलकपुलाकानि नपुंसके च॥२९॥**

चात्पुंसि। अयं कण्टकः, इदं कण्टकमित्यादि।

**टोपधः॥३०॥**

टोपधोऽकारान्तः पुंसि स्यात्। घटः, पटः।

**किरीटमुकुटललाटवटवीटशृङ्गाटकराटलोष्टानि नपुंसके॥३१॥**

किरीटमित्यादि।

**कुटकूटकपटकवाटकर्पटनटनिकटकीटकटानि नपुंसके च॥३२॥**

चात्पुंसि। कुटः, कुटमित्यादि।

**णोपधः॥३३॥**

णोपधोऽकारान्तः पुंसि स्यात्। गुणः। गणः। पाषाणः।

**ऋणलवणपर्णतोरणरणोष्णानि नपुंसके॥३४॥**

पूर्वसूत्रापवादः।

**कार्षापणस्वर्णसुवर्णव्रणचरणवृषणविषाणचूर्णतृणानि नपुंसके च॥३५॥**

चात्पुंसि।

**थोपधः॥३६॥**

रथः।

**काष्ठपृष्ठसिक्थोक्थानि नपुंसके॥३७॥**

इदं काष्ठमित्यादि।

**काष्ठा दिगर्था स्त्रियाम्॥३८॥**

इमाः काष्ठाः।।

**तीर्थप्रोथयूथगाथानि नपुंसके च॥३९॥**

चात्पुंसि। अयं तीर्थः, इदं तीर्थम्।

**नोपधः॥ ४०॥**

अदन्तः पुंसि। इनः। फेनः।

**जघनाजिनतुहिनकाननवनवृजिनविपिनवेतनशासनसोपानमिथुनश्मशानरत्ननिम्न-चिह्नानि नपुंसके॥४१॥**

पूर्वस्यापवादः।।

**मानयानाभिधाननलिनपुलिनोद्यानशयनासनस्थानचन्दनालानसमानभवनवसन-सम्भावनविभावनविमानानि नपुंसके च॥४२॥**

चात्पुंसि। अयं मानः, इदं मानम्।

**पोपधः॥४३॥**

अदन्तः पुंसि। यूपः। दीपः।

**पापरूपोडुपतल्पशिल्पपुष्पशष्पसमीपान्तरीपाणि नपुंसके॥४४॥**

इदं पापमित्यादि।

**शूर्पकूतपकुणपद्वीपविटपानि नपुंसके च॥४५॥**

अयं शूर्पः, इदं शूर्पमित्यादि।

**भोपधः॥४६॥**

स्तम्भः। कुम्भः।

**तलभं नपुंसकम्॥४७॥**

पूर्वस्यापवादः।

**जृम्भं नपुंसके च॥४८॥**

जृम्भम्, जृम्भः।

**मोपधः॥४९॥**

सोमः। भीमः।

**रुक्मसिध्मयुध्मेध्मगुल्माध्यात्मकुङ्कुमानि नपुंसके॥५०॥**

इदं रुक्ममित्यादि।

**सङ्ग्रामदाडिमकुसुमाश्रमक्षेमक्षौमहोमोद्दामानि नपुंसके च।।५१॥**

चात्पुंसि। अयं सङ्ग्रामः, इदं सङ्ग्रामम्।

**योपधः॥५२॥**

समयः। हयः।

**किसलयहृदयेन्द्रियोत्तरीयाणि नपुंसके॥५३॥**

स्पष्टम्।

**गोमयकषायमलयान्वयाव्ययानि नपुंसके च॥५४॥**

गोमयः, गोमयम्।

**रोपधः॥५५॥**

क्षुरः। अङ्कुरः।।

**द्वाराग्रस्फारतक्रवक्रवप्रक्षिप्रक्षुद्रनारतीरदूरकृच्छ्ररन्ध्राश्रश्वभ्रभीरगभीरक्रूरविचित्रकेयूरकेदारोदराजस्रशरीरकन्दरमन्दारपञ्जराजरजठराजिरवैरचामरपुष्करगह्वरकुहरकुटीरकुलीरचत्वरकाश्मीरनीराम्बरशिशिरतन्त्रयन्त्रक्षत्रक्षेत्रमित्रकलत्रचित्रमूत्रसूत्रवक्त्रनेत्रगोत्राङ्गुलित्रभलत्रशस्त्रशास्त्रवस्त्रपत्रपात्रछत्राणि नपुंसके॥५६॥**

इदं द्वारमित्यादि।

**शुक्रमदेवतायाम्॥५७॥**

इदं शुक्र रेतः।

**चक्रवज्रान्धकारसारावारपारक्षीरतोमरशृङ्गारभृङ्गारमन्दारोशीरतिमिर-**
**शिशिराणि नपुंसके च॥५८॥**

चात्पुंसि। चक्रः, चक्रमित्यादि।

**षोपधः॥५९॥**

वृषः। वृक्षः।

**शिरीषर्जीषाम्बरीषपीयूषपुरीषकिल्बिषकल्माषाणि नपुंसके।।६०॥**

**यूषकरीषमिषविषवर्षाणि नपुंसके च॥६१॥**

चात्पुंसि। अयं यूषः, इदं यूषमित्यादि।

**सोपधः॥६२॥**

वत्सः। वायसः। महानसः।

**पनसबिसबुससाहसानि नपुंसके।।६३॥**

**चमसांसरसनिर्यासोपवासकार्पासवासमासकासकांसमांसानि नपुंसके च॥६४॥**

इदं चमसम्, अयं चमस इत्यादि।

**कंस चाप्राणिनि॥६५॥**

कंसोऽस्त्री पानभाजनम्। प्राणिनि तु कंसो नाम कश्चिद्राजा।

**रश्मिदिवसाभिधानानि॥६६॥**

तानि पुंसि स्युः। रश्मिर्मयूखः। दिवसो घस्रः।

**दीधितिः स्त्रियाम्॥६७॥**

पूर्वस्यापवादः।।

**दिनाह्नी नपुंसके॥६८॥**

अयमप्यपवादः।

**मानाभिधानानि॥६९॥**

एतानि पुंसि स्युः। कुडवः। प्रस्थः।

**द्रोणाढकौ नपुंसके च॥७०॥**

इदं द्रोणम्, अयं द्रोणः।

**खारीमानिके स्त्रियाम्॥७१॥**

इयं खारी, इयं मानिका।

**दाराक्षतलाजासूनां बहुत्वं च॥७२॥**

इमे दाराः।

**नाड्यपजनोपपदानि व्रणाङ्गपदानि॥७३॥**

यथासङ्ख्यं नाड्याद्युपपदानि व्रणादीनि पुंसि स्युः। अयं नाडीव्रणः अपाङ्गः। जनपदः। व्रणादीनामुभयलिङ्गत्वेऽपि क्लीबत्वनिवृत्त्यर्थं सूत्रम्।

**मरुद्गरुत्तरदृत्विजाः॥७४॥**

अयं मरुत्।

**ऋषिराशिदृतिग्रन्थिक्रिमिध्वनिबलिकौलिमौलिरविकविकपिमुनयः॥७५॥**

एते पुंसि स्युः। अयमृषिः।

**ध्वजगजमुञ्जपुञ्जाः॥७६॥**

एते पुंसि।

**हस्तकुन्तान्तव्रातवातदूतधूर्तसूतचूतमुहूर्ताः॥७७॥**

एते पुंसि। अमरस्तु मुहूर्त्तोऽस्त्रियामित्याह।

**षण्डमण्डकरण्डभरण्डवरण्डतुण्डगण्डमुण्डपाषण्डशिखण्डाः॥७८॥**

अयं षण्डः।।

**वंशांशपुरोडाशाः॥७९॥**

अयं वंशः। पुरो दाश्यते पुरोडाशः। कर्मणि घन्। भवव्याख्यानयोः प्रकरणे पौरोडाशपुरोडाशात् ष्ठन्निति, विकारप्रकरणे व्रीहेः पुरोडाश इति च निपातनात्प्रकृतसूत्र एव निपातनाद्वा दस्य डत्वम्। "पुरोडाशभुजामिष्टम्" इति माघः।

**ह्लदकन्दकुन्दबुद्बुदशब्दाः॥८०॥**

अयं ह्रदः।

**अर्घपथिमथ्यृभुक्षिस्तम्बनितम्बपूगाः॥८१॥**

अयमर्घः।

**पल्लवपल्वलकफरेफकटाहनिर्व्यूहमठमणितरङ्गतुरङ्गगन्धमृदङ्गसङ्गसमुद्रपुङ्खाः ॥८२॥**

अयं पल्लव इत्यादि।

**सारथ्यतिथिकुक्षिबस्तिपाण्यञ्जलयः॥८३॥**

एते पुंसि। अयं सारथिः।

**॥ इति पुँल्लिङ्गाधिकारः ॥**

**॥ अथ नपुंसकाधिकारः ॥**

**नपुंसकम्॥१॥**

अधिकारोऽयम्।

**भावे ल्युडन्तः॥२॥**

हसनम्। भावे किम्? पचनोऽग्निः। इध्मप्रव्रश्चनः कुठारः।

**निष्ठा च॥३॥**

भावे या निष्ठा तदन्तं क्लीबं स्यात्। हसितम्। गीतम्।

**त्वष्यञौ तद्धितौ॥४॥**

शुक्लत्वम्, शौक्ल्यम्। ष्यञः षित्वसामर्थ्यात्पक्षे स्त्रीत्वम्। चातुर्यम्, चातुरी। सामग्र्यम्, सामग्री। औचित्यम् , औचिती।

**कर्मणि च ब्राह्मणादिगुणवचनेभ्यः॥ ५॥**

ब्राह्मणस्य कर्म ब्राह्मण्यम्।

**यद्यढय्यगञण्वुञ्छाश्च भावकर्मणि॥ ६।।**

एतदन्तानि क्लीबानि। स्तेनाद्यन्नलोपश्च। स्तेयम्। सख्युर्यः। सख्यम्। कपिज्ञात्योर्ढक्। कापेयम्। पत्यन्तपुरोहितादिभ्यो यक्। आधिपत्यम्। प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञ्। औष्ट्रम्। हायनान्तयुवादिभ्योऽण्। द्वैहायनम्। द्वन्द्वमनोज्ञादिभ्यो वुञ्। पितापुत्रकम्। होत्राभ्यश्छः। अच्छावाकीयम्। अव्ययीभावः। अधिस्त्रि।

**द्वन्द्वैकत्वम्॥७॥**

पाणिपादम्।

**अभाषायां हेमन्तशिशिरावहोरात्रे च॥८॥**

स्पष्टम्।

**अनञ्कर्मधारयस्तत्पुरुषः॥९॥**

अधिकारोऽयम्।

**अनल्पे छाया॥१०॥**

शरच्छायम्।

**राजाऽमनुष्यपूर्वा सभा॥११॥**

इनसभमित्यादि।

**सुरासेनाच्छायाशालानिशास्त्रियां च॥१२॥**

**परवत्॥१३॥**

अन्यस्तत्पुरुषः परवल्लिङ्गः स्यात्। रात्राह्नाहाः पुंसि।

**अपथपुण्याहे नपुंसके॥१४॥**

**सङ्ख्यापूर्वा रात्रिः॥१५॥**

त्रिरात्रम्। सङ्ख्यापूर्वेति किम्? सर्वरात्रः।

**द्विगुः स्त्रियां च॥१६॥**

व्यवस्थया। पञ्चमूली। त्रिभुवनम्।

**इसुसन्तः॥१७॥**

हविः। धनुः।

**अर्चिः स्त्रियां च॥१८॥**

इसन्तत्वेऽपि अर्चिः स्त्रियां नपुंसके च स्यात्। इयमिदं वा अर्चिः।

**छदिः स्त्रियामेव॥१९॥**

इयं छदिः। छद्यतेऽनेनेति छदेश्चुरादिण्यन्तादर्चिशुचीत्यादिना इस्। इस्मन्नित्यादिना ह्रस्वः। "पटलं छदिः" इत्यमरः। तत्र पटलसाहचर्याच्छदिषः क्लीबतां वदन्तोऽमरव्याख्यातार उपेक्ष्याः।

**मुखनयनलोहवनमांसरुधिरकार्मुकविवरजलहलधनान्नाभिधानानि॥२०॥**

एतेषामभिधायकानि क्लीबे स्युः। मुखमाननम्। नयनं लोचनम्। लोहं कालम्। वनं गहनम्। मांसमामिषम्। रुधिरं रक्तम्। कार्मुकं शरासनम्। विवरं बिलम्। जलं वारि। हलं लाङ्गलम्। धनं द्रविणम्। अन्नमशनम्। अस्यापवादानाह त्रिसूत्र्या-

**सीरार्थौदनाः पुंसि॥२१॥**

**वक्त्रनेत्रारण्यगाण्डीवानि पुंसि च॥२२॥**

वक्त्रो वक्त्रम्। नेत्रो नेत्रम्। अरण्योऽरण्यम्। गाण्डीवो गाण्डीवम्।

**अटवी स्त्रियाम्॥२३॥**

**लोपधः॥२४॥**

कुलम्। कूलम्। स्थलम्।

**तूलोपलतालकुसूलतरलकम्बलदेवलवृषलाः पुंसि॥२५॥**

अयं तूलः।

**शीलमूलमङ्गलसालकमलतलमुसलकुण्डलपललमृणालवालनिगलपलालबिडालखिलशूलाः पुंसि च॥ २६॥**

चात् क्लीबे। शीलम्, शीलः इत्यादि।

**शतादिः सङ्ख्या॥२७॥**

शतम्। सहस्रम्। शतादिरिति किम्? एको द्वौ बहवः। सङ्ख्येति किम्? शतशृङ्गो नाम पर्वतः।

**शतायुतप्रयुताः पुंसि च॥२८॥**

अयं शतः, इदं शतमित्यादि।

**लक्षाकोटी स्त्रियाम्॥२९॥**

इयं लक्षा। इयं कोटिः। “वा लक्षा नियुतं च तत्" इत्यमरात्। क्लीबेऽपि लक्षम्।

**शङ्कुः पुंसि ? सहस्रः क्वचित् ॥३०॥**

सहस्रः क्वचित्। अयं सहस्रः, इदं सहस्रम्।

**मन्द्व्यच्कोऽकर्तरि॥३१।।**

मन्प्रत्ययान्तो द्व्यच्कः क्लीबः स्यान्न तु कर्तरि। वर्म। चर्म। द्व्यच्कः किम्? अणिमा। महिमा। अकर्त्तरि किम्? ददाति इति दामा।

**ब्रह्मन् पुंसि च॥३२॥**

अयं ब्रह्मा, इदं ब्रह्म।

**नामरोमणी नपुंसके॥३३॥**

मन्द्व्यच्क इत्यस्यायं प्रपञ्चः।

**असन्तो द्व्यच्कः॥३४॥**

यशः। मनः। तपः। द्व्यच्कः किम्? चन्द्रमाः।

**अप्सराः स्त्रियाम्॥३५॥**

एता अप्सरसः। प्रायेणायं बहुवचनान्तः।

**त्रान्तः॥३६॥**

पत्रम्। छत्रम्।

**यात्रामात्राभस्त्रादंष्ट्रावरत्राः स्त्रियामेव॥३७॥**

**भृत्रामित्रछात्रपुत्रमन्त्रवृत्रमेढ्रोष्ट्राः पुंसि॥३८॥**

अयं भृत्रः। न मित्रममित्रः। “तस्य मित्राण्यमित्रास्ते” इति माघः। “स्यातामममित्रौ मित्रे च” इति च। यत्तु “द्विषोऽमित्रे (पा० ३.२.१३१) इति सूत्रे हरदत्तेनोक्तम्। “अमेर्द्विषत्०” (उ०सू० ६२३) इत्यौणादिक इत्रच्। अमेरमित्रम्। “मित्रस्य व्यथयेत्” इत्यादौ मध्योदात्तस्तु चिन्त्यः। नञ्समासेऽप्येवम्। परवल्लिङ्गतापि स्यादिति तु तत्र

दोषान्तरमिति तत्प्रकृतसूत्रापर्यालोचनमूलकम्। स्वरदोषोद्भावनमपि नञो जरमरमित्रमृता इति षाष्ठसूत्रास्मरणमूलकमिति दिक्।

**पत्रपात्रपवित्रसूत्रच्छत्राः पुंसि च॥३९॥**

**बलकुसुमशुल्बपत्तनरणाभिधानानि॥४०॥**

बलं वीर्यम्।

**पद्मकमलोत्पलानि पुंसि च॥४१॥**

पद्मादयः शब्दाः कुसुमाभिधायित्वेऽपि द्विलिङ्गाः स्युः। अमरोऽप्याह - “वा पुंसि पद्मं नलिनम्” इति। एवं चार्धर्चादिसूत्रे (पा० २.४.३१) तु “जलजे पद्मं नपुंसकमेव” इति वृत्तिग्रन्थो मतान्तरेण नेयः।

**आहवसङ्ग्रामौ पुंसि॥४२॥**

**आजिः स्त्रियामेव॥४३॥**

**फलजातिः।।४४॥**

फलजातिवाची शब्दो नपुंसकं स्यात्। आमलकम्। आम्रम्।

**वृक्षजातिः स्त्रियामेव॥४५॥**

क्वचिदेवेदम्। हरीतकी।

**वियज्जगत्सकृत्शकन्पृषत्शकृद्यदुदश्वितः॥४६॥**

एते क्लीबाः स्युः।

**नवनीतावतानानृतामृतनिमित्तवित्तचित्तपित्तव्रतरजतवृत्तपलितानि॥४७॥**

**श्राद्धकुलिशदैवपीठकुण्डाङ्काङ्गदधिसक्थ्यक्ष्यास्यास्पदाकाशकण्वबीजानि।।४८॥**

एतानि क्लीबे स्युः।

**दैवं पुंसि च॥४९॥**

दैवम्, दैवः।

**धान्याज्यसस्यरूप्यपण्यवर्ण्यधृष्यहव्यकव्यकाव्यसत्यापत्यमूल्यशिक्यकुड्यमद्यहर्म्यतूर्यसैन्यानि॥५०॥**

इदं धान्यमित्यादि।

**द्वन्द्वबर्हदुःखबडिशपिच्छबिम्बकुटुम्बकवचवरशरवृन्दारकाणि॥५१॥**

**अक्षमिन्द्रिये॥५२॥**

इन्द्रिये किम्? रथाङ्गादौ मा भूत्।

**॥ इति नपुंसकाधिकारः॥**

**॥ अथ स्त्रीपुंसाधिकारः॥**

**स्त्रीपुंसयोः॥१॥**

अधिकारोऽयम्।

**गोमणियष्टिमुष्टिपाटलिवस्तिशाल्मलित्रुटिमसिमरीचयः॥२॥**

इयमयं वा गौः।

**मृत्युसीधुकर्कन्धुकिष्कुकण्डुरेणवः॥३॥**

इयमयं वा मृत्युः।

**गुणवचनमुकारान्तं नपुंसकं च॥४॥**

त्रिलिङ्गमित्यर्थः। पटु, पटुः, पट्वी।

**अपत्यार्थस्तद्धिते॥५॥**

औपगवः, औपगवी।

**॥ इति स्त्रीपुंसाधिकारः ॥**

**॥ अथ पुन्नपुंसकाधिकारः ॥**

**पुन्नपुंसकयोः॥१॥**

अधिकारोऽयम्।

**घृतभूतमुस्तक्ष्वेलितैरावतपुस्तकबुस्तलोहिताः॥२॥**

अयं घृतः, इदं घृतम्।

**शृङ्गार्घनिदाघोद्यमशल्यदृढाः॥३॥**

अयं शृङ्गः, इदं शृङ्गम्।

**व्रजकुञ्जकुथकूर्चप्रस्थदर्पाभार्धर्चदर्भपुच्छाः॥४॥**

अयं व्रजः, इदं व्रजम्।

**कबन्धौषधायुधान्ताः॥५॥**

स्पष्टम्।

**दण्डमण्डखण्डशवसैन्धवपार्श्वाकाशकुशकाशाङ्कुशकुलिशाः॥६॥**

एते पुन्नपुंसकयोः स्युः। "कुशो रामसुते दर्भे योक्त्रे द्वीपे कुशं जले" इति विश्वः। शलाकावाची तु स्त्रियाम्। तथा च जानपदादिसूत्रेण (पा० ४.१.४२) अयोविकारे ङीषि कुशी। दारुणि तु टाप्। "कुशा वानस्पत्याः स्थ ता मा पात" इति श्रुतिः। "अतः कृकमि" इति सूत्रे (पा० ८.३.१६) कुशाकर्णीष्वति प्रयोगश्च। व्याससूत्रे च- "हानौ तूपायनशब्दे शेषत्वात्कुशाच्छन्दः" इति। तत्र शारीरकभाष्येऽप्येवम्। एवं च श्रुतिसूत्रभाष्याणामेकवाक्यत्वे स्थिते आच्छन्द इत्याङ्प्रश्लेषादिपरो भामतीग्रन्थः प्रौढिवादमात्रपर इति विभावनीयं बहुश्रुतैः।

**गृहमेहदेहपट्टपटहाष्टापदाम्बुदककुदाश्च॥७॥**

**॥ इति पुन्नपुंसकाधिकारः ॥**

**अविशिष्टलिङ्गम्॥१॥**

**अव्ययं कतियुष्मदः॥२॥**

**ष्णान्ता सङ्ख्या॥३॥**

शिष्टा परवत्। एकः पुरुषः, एका स्त्री, एकं कुलम्।

**गुणवचनं च॥४॥**

शुक्लः पटः, शुक्ला पटी, शुक्लं वस्त्रम्।

**कृत्याश्च॥५॥**

**करणाधिकरणयोर्ल्युट् च॥६॥**

**सर्वादीनि सर्वनामानि॥ ७॥**

स्पष्टार्थेयं त्रिसूत्री।

**॥ पाणिनीयं लिङ्गानुशासनं वृत्तिसहितं समाप्तम् ॥**

## ॥ दुर्गसिंहकृतं स्वोपज्ञवृत्तिसमेतं लिङ्गानुशासनम् ॥

**॥ श्रीः॥**

**ॐ नमः श्रीगणेशाय। नमः सरस्वत्यै।**

**स्त्रीपुंनपुंसकत्वेन भिन्नं येन चराचरम्।**

**लिङ्गं जयति तन्नित्यमशेषागमकारणम्।। १।।**

इयमयमिदमिति येषु बुद्धिरुत्पद्यते स्त्री च पुमांश्च नपुंसकं च, तानि स्त्रीपुन्नपुंसकानि, तेषां भावः स्त्रीपुन्नपुंसकत्वम्। करणे तृतीया। येनेति कर्तरि। भिन्नमिति कर्मणि। चरा मानुषादयोऽचरा वृक्षादयः। चराश्चाचराश्च चराचरम्। अत्र समाहारो द्वन्द्वः। अशेषाणामागमानां कारणं हेतुः। लिङ्गेन विना न सर्वे आगमाः सम्भवन्तीति। नित्यं प्रवाहरूपतया जगदुत्पत्तिलक्षणं तत्कारणवत्तया नित्यमिति श्लेषोऽयमलङ्कारः ॥ १॥

ननु कात्यायनादिकृतानि लिङ्गानुशासनानि सन्ति किमनेनेत्युच्यते -

**स्त्रीपुन्नपुंसकानि स्वार्थैः सिद्धानि लोकतो यानि।**

**तानि त्यक्त्वार्याभिः क्रमशो वक्ष्येऽवशिष्टानि॥२॥**

**सिद्धशब्दोऽत्र प्रसिद्धवचनः॥ २॥**

### [१. स्त्रीलिङ्गप्रकरणम्]

**नवमालिका बलाका गवेधुकोल्का कृकाटिका यूका।**

**शेफालिका शलाका हसन्तिका हसनिका केका॥३॥**

एते शब्दाः स्त्रीलिङ्गा भवन्ति। नवमालिका पुष्पविशेषः। बलाका पक्षिविशेषः। गवेधुका तृणविशेषः। उल्का ज्वाला। कृकाटिका शिरोधरैकदेशः। युका क्षुद्रजन्तुविशेषः। शेफालिका लतासमुदायविशेषः, तत्पुष्पं च। शलाका चित्रकूर्चिका। हसन्तिका हसनिका च द्वे अप्यङ्गारशकट्यौ। केका मयूरध्वनिः॥ ३॥

**झिरुका लङ्का स्पृक्का करुणेषीका च वालुकेष्टकया।**

**त्विट् पुत्तिका पताकाऽथ मालिका मानिकी नाडिः॥४॥**

एते इष्टकया सह स्त्रीलिङ्गा भवन्ति। झिरुका मृद्विकारविशेषः। लङ्का राक्षसपुरी। स्पृक्का गन्धद्रव्यविशेषः। करुणा कृपा। इषीका वीरणशलाका। वालुका सिकता। इष्टका मृद्विकारविशेषः। त्विड् दीप्तिः। पुत्तिका मधुमक्षिकाविशेषः। पताका

वैजयन्ती। अथानन्तरम्। मालिका पङ्क्तिः। मानिका द्रोणचतुष्टयम्। नाडिः कन्दली धमनिः व्रणविशेषश्च॥४॥

**शाखा शिखा विशाखा परिखा रेखा सुरङ्गया जङ्घा।**

**चञ्चा वचा च चञ्चुः प्रियङ्गुसरघास्फुलिङ्गा गौः॥५॥**

एते सुरङ्गया सह स्त्रीलिङ्गा भवन्ति। शाखा वृक्षाणाम् अवयवः। शिखा चूलिका अग्रभागश्च। विशाखा नक्षत्रविशेषः। परिखा सर्वतः खेयम्। रेखा आलिः। सुरङ्गा विवरविशेषः। जङ्घा अङ्गविशेषः। चञ्चा तृणमयः पुरुषः। वचा ओषधिविशेषः। चञ्चुः पक्षिमुखाग्रम्। प्रियङ्गुः फलिनी शालिविशेषश्च। सरघा। मधुमक्षिका। स्फुलिङ्गा अग्न्युद्भूतकणिका। इयं गौः दिगादिः। पशुवाचिनस्तु गोशब्दस्य चतुष्पदजातित्वात्परपरिभाषया स्त्रीपुंस्त्वम्। इयं गौः स्त्रीगवी। अयं गौः बलीवर्दः। व्याडिस्तु दिगादीनामविशेषेण स्त्रीपुंस्त्वम् इच्छति।। ५।।

**पिच्छारज्जुयदृच्छा गुञ्जा राजिप्रजाजयो याच्ञा।**

**घाटाकोटिजटात्रोटिभ्रुकुटिसटास्त्रुटिः कोटी॥६॥**

**घाटा च कोटिश्च जटा च त्रोटिश्च भुकुटिश्च सटा च, इतरेतरयोगाद् द्वन्द्वः। एते शब्दाः स्त्रीलिङ्गा भवन्ति। पिच्छा ओदनमण्डः"। रज्जः गुणमयी। यदृच्छा स्वच्छन्दः। गुञ्जा रक्तिका। राजिः रेखा"। प्रजा लोकः। आजियुद्धम्। याच्या प्रार्थना। घाटा ग्रीवावयवविशेषः। कोटिरग्रभागः। जटा केशबन्धविशेषः। त्रोटिश्चञ्चुः भुकुटिभ्रूभङ्गः। सटा केसरिस्कन्धजाः केशाः। त्रुटिः कालविशेषः। कोटी लक्षाणां शतम्।। ६।।

**विष्ठा माञ्जिष्ठा काष्ठा सधनिष्ठाश्रविष्ठया घण्टा।**

**पाठा शुण्डी क्रोडा चूडा माढिर्वितण्डोडुः॥७॥**

एते स्त्रीलिङ्गा भवन्ति। विष्ठा पुरीषम्। मञ्जिष्ठा रागद्रव्यविशेषः। काष्ठा दिक्। सह धनिष्ठया वर्तत इति सधनिष्ठा। धनिष्ठा श्रविष्ठा च नक्षत्रविशेषः। घण्टा ध्वनिजननी। पाठा ओषधिविशेषः। शुण्डा हाला पानागारम्। क्रोडा उत्सङ्गः'। चूडा शिखा। माढिः पत्राणां शिरा। वितण्डा अप्रतिष्ठापितस्याभ्युपगमो जल्पः। उडुस्तारका॥ ७॥

**वीणा धिषणा तूणा स्थूणा श्राणा द्रुणी घृणा घोणा।।**

**ऊणाषाढा तृष्णा किङ्किण्या काकिणी विपणिः॥८॥**

एते स्त्रीलिङ्गा भवन्ति। वीणा वाद्यविशेषः। धिषणा बुद्धिः। तूणा शरधिः। स्थूणा गृहादीनामुत्तम्भनकाष्ठम्। श्राणा यवागूः। द्रुणी कच्छपी। घृणा दया। घोणा नासा। ऊर्णा मेषरोम। आषाढा नक्षत्रविशेषः। तृष्णा अभिलाषः। किङ्किण्या सहेति। किङ्किणी क्षुद्रघण्टिका। काकिणी पणचतुर्थभागः। विपणिः पण्यवीथिका॥ ८॥

**सिकता मुक्ता त्रेता त्रिवृताथ लता च दीधितिर्वर्तिः।।**

**वीथी गाथा कन्था कुथा च गीता गदा वेदिः॥९॥**

एते स्त्रीलिङ्गा भवन्ति। सिकता वालुका। मुक्ता मौक्तिकम्। त्रेता युगविशेषः। त्रिवृता ओषधिविशेषः। अथ लता व्रततिः। दीधितिरंशुः। वर्तिः दीपादिसम्बन्धिवर्तितं द्रव्यम्। वीथी पङ्क्तिः मार्गश्च। गाथा आर्या। कन्था जीर्णवस्त्रसङ्घातः। कुथा वर्णकम्बलः। त्रिषु लिङ्गेष्वित्येके। "कुथेन नागेन्द्रमिवेन्द्रवाहनम्"। गीता योगशास्त्रविशेषः। गदा आयुधविशेषः। वेदिर्यागोपकरणी॥ ९॥

**अजमोदा द्वाः पोटा गोधा मेधा सुधानुराधा च।**

**राधा दृगोषधिर्ज्योत्स्ना नौः पृतना खनिः खानिः॥१०॥**

एते स्त्रीलिङ्गा भवन्ति। अजमोदा ब्रह्मकुशा। द्वाः द्वारम्। पोटा दासी नपुंसकं च। गोधा प्राणिविशेषः। मेधा प्रज्ञा। सुधा अमृतं तथा लेपविशेषः। अनुराधा नक्षत्रविशेषः। राधा विशाखा विष्णुपत्नी च। दृक् चक्षुः। ओषधिः फलपाकान्ता। ज्योत्स्ना चन्द्रप्रभा। नौः जलतरणकाष्ठसञ्चयविशेषः। पृतना सेना। खनिः द्रव्याकरविशेषः। खानिः सैव॥ १०॥

**रशना रसना रास्ना सास्ना धाना च रोचना धेनुः।**

**तनुनिःश्रेणिवपावापिकृपासशिफा वणिज्याज्याः॥११॥**

एते स्त्रीलिङ्गा भवन्ति। रशना काञ्ची। रसना जिह्वा। रास्ना ओषधिविशेषः। सास्ना गोगलचर्म। धाना भृष्टयवाः। रोचना गोपित्तम्। धेनुः प्रत्यग्रप्रसवा। तनुः शरीरम्। निःश्रेणिः आरोहणी। वपा विवरं मेदश्च। वापिः उदकाधारविशेषः। कृपा करुणा। सह शिफया वर्तत इति सशिफा। शिफा तरुजटा। [वणिज्या] वणिग्भावः। ज्या धनुर्गुणः॥ ११॥

**हम्भाभम्भारम्भा अम्बाकम्ब्यक्षदुन्दुभिः सन्ध्या।**

**स्नायुः सरयुरुमा मा शमी च सीमा छटा प्रतिमा॥१२॥**

हम्भा च भम्भा च रम्भा च इतरेतरयोगो द्वन्द्वः। अम्बाकम्बि समाहारो द्वन्द्वः। एते स्त्रीलिङ्गा भवन्ति। हम्भा गोध्वनिः। भम्भा भेरी। रम्भा मोचा। कदलीति यावत्। अम्बा माता। कम्बिः वंशादीनां भागविशेषः। अक्षाः पाशकास्तैरुपलक्षितः दुन्दुभिः अक्षदुन्दुभिः। अक्षविषयो दुन्दुभिशब्दः स्त्रीलिङ्ग इत्यर्थः। इयं दुन्दुभिः पाशकषडङ्किता। "दुन्दुभ्या किल तत्कृतं पतितया यद् द्रौपदी हारिते"ति। अक्षग्रहणं वाद्यविशेषार्थस्य दुन्दुभिशब्दस्य निवृत्त्यर्थम्। तस्य पुंस्त्वमेव। "केनास्मिन्सिंहनादप्रतिरसितसखो दुन्दुभिस्ताडितोऽयम्।" [वेणी० १.२२] सन्ध्या रात्रिदिवसयोर्मध्यम्। स्नायुः अस्थिबन्धनम्। सरयुः नदीविशेषः। उमा क्षुमा भगवती च। मा लक्ष्मीः। "उ मेति मात्रा तपसो निषिद्धा पश्चादुमाख्यां सुमुखी जगामे" ति [कुमार० १. २६]। यद्यपि "स्त्रियामादा" [कातन्त्र० २.४.५०] [इति] नास्ति तथापि "आश्रद्धा" [कातन्त्र० २.१.१०] इति वचनात् श्रद्धासञ्ज्ञा। ततः सेर्लोपः। शमी शिम्बा वृक्षविशेषश्च। सीमा अवधिः। छटा सङ्घातविशेषः। प्रतिमा प्रतिकृतिः॥ १२॥

**छाया माया रथ्या तारा च दया शिरोधरा धारा।**

**प्रतिसीरा च शिरार्द्रा मथुरा कृसरा सुरा हारा॥ १३॥**

एते स्त्रीलिङ्गा भवन्ति। छाया प्रतिबिम्बम्। माया वञ्चना। रथ्या मार्गविशेषः रथसमूहश्च। तारा नक्षत्रम्। दया कृपा। शिरोधरा ग्रीवा। धारा जलादिप्रपातः। प्रतिसीरा वस्त्रमयी। शिरा रुधिरादिवाहिनी। आर्द्रा नक्षत्रविशेषः। मथुरा नगरीविशेषः। कृसरा तिलौदनः। सुरा मदिरा। हारा मुक्तामाला॥ १३॥

**यात्रा मात्रा भस्त्रा दंष्ट्रा निद्रा वरत्रया गोत्रा।**

**वागुरया कन्धरया शर्करया मन्दुरा मदिरा॥१४॥**

एते स्त्रीलिङ्गा भवन्ति। वरत्रादिभिः सह। यात्रा यानम्। मात्रा परिच्छदादिः। भस्त्रा कंसादिधमनी। दंष्ट्रा दन्तविशेषः। निद्रा स्वप्नः। वरत्रा चर्मरज्जुः। गोत्रा गोसमूहः पृथ्वी च। वागुरा मृगबन्धनी। कन्धरा ग्रीवा। शर्करा इक्षुरसविकारः। मन्दुरा अश्वशाला। मदिरा सुरा॥ १४॥

**एला लाला लीला हेला दोला मनःशिला माला।**

**शाला शिला च वेला कलावलितुलाश्च मेखलया॥१५॥**

एते स्त्रीलिङ्गा भवन्ति। मेखलया सह। एला सूक्ष्मैला। लाला श्लेष्मादिस्रवः। लीला विदग्धचेष्टा। हेला अनादरः। दोला प्रेङ्खा। मनःशिला धातुद्रव्यविशेषः। माला

स्रक्। शाला गृहविशेषः। शिला दृषद्। वेला कालः जलधिविकृतिश्च। कला शिल्पम्। आवलिः पङ्क्तिः। तुला ऊर्ध्वमानम्। मेखला रशना।। १५।।

**ज्वालालिबलाफेला वलिरिल्वलया सुवर्चला धूलिः।।**

**शष्कुलिपालिस्थाली प्रवेणिवेण्यश्रितडिताडि॥१६॥**

ज्वालालिबलाफेला इतरेतरयोगो द्वन्द्वः। शष्कुलीत्यादि समाहारो द्वन्द्वः। एते इल्वलया सह स्त्रीलिङ्गा भवन्ति। ज्वाला अग्न्यर्चिविशेषः। आलिः रेखा सखी च। बला ओषधिविशेषः। फेला भोजनोज्झितम्। वलिः त्वग्मांससङ्कोचः। इल्वला तारका। सुवर्चला शाकविशेषः। धूलिः पांशुः। शष्कुलिः कर्णदेशः अपूपविशेषश्च। पालिः कर्णलतिका सेतुश्च। स्थाली पिठरः। प्रवेणिः गीतप्रस्तारः। वेणिः केशबन्धनविशेषः। अश्रिः कोटिः। तडिराघातस्थानम्। ताडिः आभरणविशेषः वृक्षविशेषश्च॥ १६॥

**कृष्यटवीछविनीवीग्रीवामूर्वा मुषुण्ढि शम्यार्वाक्।**

**वासादशाकशापेशिशा रिवाः पथ्यया च कथा॥१७॥**

पथ्यया सह एते स्त्रीलिङ्गा भवन्ति। कृषिः कर्षणम्। अटवी अरण्यम्। छविः त्वक्। नीवी मूलधनं युवतिजघनवस्त्रबन्धश्च। ग्रीवा कन्धरा। मूर्वा ज्याहेतुस्तृणविशेषः। मुषुण्डिः दण्डविशेषः आयुधविशेषश्च। शम्या तालविशेषः युगकीलिका च। अर्वाक् अवान्तरम्। वासा आटरूषकः। दशा अवस्था वस्त्रान्तविशेषश्च। कशा अश्वादिताडनी। पेशिः मांसाद्येकदेशः। शारिवा ओषधिविशेषः शालिविशेषश्च। पथ्या हरीतकी। कथा कथनम्॥१७॥

**मञ्जूषा गण्डूषा मूषा रुट् तृट् स्वधा मषिर्मांसी।**

**अतसी वृसी वसा नासा स्नुषयोरुर्गुहा च कुहूः॥१८॥**

स्नुषया सहैते स्त्रीलिङ्गा भवन्ति। मञ्जूषा दारुमयी पेटा। गण्डूषा करजलादिमुखपूरणम्। मूषा सुवर्णादिविलयनभाण्डम्। रुट् रोषः। तृट् तृष्णा। स्वधा पितृदानार्थो मन्त्रविशेषः। मषिः लेखद्रव्यविशेषः। मांसी गन्धद्रव्यविशेषः। अतसी क्षुमा। वृसी आसनविशेषः। वृषीति केचित् पठन्ति। वृषादौ वर्तमानस्य वृषशब्दस्य नदादित्वात्सिद्धम्। वसा मेदः। नासा नासिका। स्नुषा पुत्रादिवधूः। उरुर्जङ्घा। गुहा गिरिविवरम्। कुहूः नष्टचन्द्रकला अमावास्या॥ १८॥

**द्राक्षा लक्षा लाक्षा लिक्षा कक्षा च काङ्क्ष्या स्वाहा।**

**काञ्चिर्वीचिः सूचिर्मारिर्भेरी हरिद्रारा॥१९॥**

काङ्क्ष्या सह एते स्त्रीलिङ्गा भवन्ति। द्राक्षा मृद्वीका। लक्षा सहस्राणां शतम्। लाक्षा रागद्रव्यविशेषः। लिक्षा क्षुद्रजन्तुविशेषः। कक्षा कायैकदेशः प्रकोष्ठः करिमध्यरज्जुश्च। काङ्क्ष्या वाञ्छा। स्वाहा अग्निपत्नी। काञ्चिः रशना। वीचिः कल्लोलः। सूचिर्भेदिनी। मारिः मरकम्। भेरी वाद्यविशेषः। हरिद्रा रागद्रव्यविशेषः। आरा चर्मवेधिनी॥ १९॥

**द्युतिपल्लितूलिलिपिलिविरुचिकृपिकिखिकीलिनालिभिश्चूर्णिः।**

**सरणिर्ग्रहणिरितीदूदन्तं चावीचमूप्रभृति॥२०॥**

द्युत्यादिभिः सह एते शब्दाः स्त्रीलिङ्गा भवन्ति। द्युतिर्दीप्तिः। पल्लिः भिल्लादिनिवासविशेषः। तूलिः शय्याविशेषः चित्रकूर्चिका च। लिपिर्लिविश्च अक्षरपद्धतिः। रुचिर्दीप्तिः अभिलाषश्च। कृपिः छेदोपकरणविशेषः। किखिः कालगोत्रविशेषः। कीलिः कीलिका। नालिः कन्दली तृणविशेषश्च। चूर्णिः ग्रन्थविशेषः। सरणिः मार्गः। ग्रहणिः रोगविशेषः। इतिशब्दः अत्र आकृतिगणार्थः। तेन विटिः हलिः मूलिः कूलिः सृणिः सूणिः। अवीचमूप्रभृति। ईत् ईकारान्तं अव्यादि यत् [ऊत्] ऊकारान्तं चम्वादि यत्। अवीः तरीः तन्त्रीः लक्ष्मीः इत्यादयः। चमूः वधूः जम्बूः दम्भूः दिधिषूः कर्कन्धूः अलाबूः कसेरूः कच्छूः इत्यादयः। आकृतिगणश्चायम्॥ २०॥

**एकस्वरमीदूदन्तं शाटिर्भाविसूचितः ताश्च।**

**स्रक् स्रुक् स्फिक् त्वक् वाक् संविदुपानद्गीर्दृषद्धूः पूः॥२१॥**

एकः स्वरः यस्य तदेकस्वरम् ईदूदन्तम् ईकारान्तमूकारान्तं च शाट्यादयश्च स्त्रीलिङ्गा भवन्ति। एकस्वरं [ईकारान्तं] यथा। श्रीः धीः भीः ह्रीः इत्यादयः। ऊकारान्तं यथा भ्रूः स्रूः द्रूः जूः इत्यादयः। शाटिः प्रावरणविशेषः। भावसूचितः ताश्चेति। “तत्त्वौ भावे” [कातन्त्र० २.६.१३] भावेन सूचितः उपलक्षितः यः ताप्रत्ययः इति। पुरुषस्य भावः पुरुषता। जडस्य भावः कर्म वा जडता। ग्रामाणां समूहो ग्रामता। एवं जनता राजता बन्धुता सहायता। देव एव देवता। स्रक् माला। स्रुक् यज्ञभाण्डविशेषः। स्फिक् पुन्दः। त्वक् शरीरच्छविः। वाक् वाणी। संवित् संवेदनम्। उपानत् चर्मपादुका। गीः वाक्। दृषत् शिला। धूः धुरा। पूः पुरी॥ २१॥

**प्राण्यङ्गमिदन्तं विप्रुट्छर्दिशरत्समिद्युसुमनर्चः।।**

**स्युर्भूर्विद्युद्वल्लीनिशाङ्गनादिग्नदीनाम॥२२॥**

प्राणिनामङ्गं प्राण्यङ्गम्। इत् अन्ते यस्य तदिदन्तं प्राण्यङ्गम्। विप्रुट् च छर्दिश्च शरच्च समिच्च द्यौश्च सुमनाश्च ऋक् चेति। एते स्त्रीलिङ्गाः स्युः भवन्ति। विप्रुडादयश्च भूश्च विद्युच्च वल्ली च निशा च अङ्गना च दिक् च नदी च आसां नाम

सञ्ज्ञाः च स्त्रीलिङ्गाः स्युः। प्राण्यङ्गमिदन्तं यथा। नाभिः श्रोणिः अङ्गलिः अरत्निः पार्ष्णिरित्येवमादयः। पाणिशब्दस्य तु भुजपर्यायत्वात्परा पुँल्लिङ्गसञ्ज्ञा। तथा अङ्घ्रिशब्दस्यापि इति। विप्रुट् बिन्दुः। छर्दिर्वान्तिः। शरद् ऋतुविशेषः। समित् याज्ञिकप्रसिद्धं प्रादेशमात्रं काष्ठम्। द्यौः स्वर्गः आकाशं च। सुमनाः पुष्पम्। शोभनं मनो यस्येति बहुव्रीहिणा तु वाच्यलिङ्गता। ऋक् वेदमन्त्रविशेषः। भूनाम- भूः भूमिः क्षितिरित्यादयः। विद्युन्नाम- विद्युत् तडित् अचिराभेत्यादि। वल्लीनाम- वल्ली लता व्रततिरित्यादि। निशानाम-निशा क्षपा रात्रिरित्यादि। अङ्गनानाम- अङ्गना योषित् वनितेत्यादि। दिग्-नाम– दिक् ककुप् काष्ठेत्यादि। नदीनाम- नदी सरित् धुनीत्यादि। अत्र कस्यचिद् अम्भः- शब्दादेः नद्यादिनाम्नोऽपि असन्तत्वात् नपुंसकत्वं एवं परत्वेन। क्वचित् "पूर्वपरयोः परो विधिः बलीयान्" इति। परस्येष्टवाचित्वात्। यथा कोः उषसश्च उदन्तस्य असन्तस्य च भूनाम्नो अङ्गनानाम्नश्च स्त्रीत्वं सिद्धम्॥ २२॥

**सम्पत् प्रतिपद् विपदापत् संसत् समिदपि क्षुधा परिषत्।**

**गायत्र्याद्याः क्यब्भावे प्रावृड्दर्विमुद्भासः॥२३॥**

क्षुधा सह एते स्त्रीलिङ्गा भवन्ति। सम्पत् सम्पत्तिः। प्रतिपत् तिथिविशेषः। विपद् विपत्तिः। आपद् आपत्तिः। संसत् सभा। समित् सङ्ग्रामः। क्षुत् बुभुक्षा। परिषत् सभा। गायत्री आद्या यासामिति गायत्र्याद्याः। गायत्री उष्णिग् अनुष्टुप् बृहती पङ्क्तिः त्रिष्टुप् जगती अतिजगती शक्वरी अतिशक्वरी अष्टिः अत्यष्टिः धृतिः अतिधृतिः- एताश्छन्दोजातयः। भाव एव यः क्यप् तस्य ग्रहणम्। यस्तु "भावकर्मणोः कृत्यक्तखलर्थाः" [कातन्त्र० ४.६.४७] इत्यनेन विहितो न तस्य ग्रहणम्। यथा "नाम्नि वदः क्यप् च" [कातन्त्र० ४.२.२०] इति। नापि "भावे भुवः" [कातन्त्र० ४.२.२१] इत्यस्य अव्यभिचारात्। तस्मात् "हनस्त च" [कातन्त्र० ४.२.२२= पा०३.१.१०८] ब्रह्मणो हननं ब्रह्महत्या। एवमश्वहत्या। "समजा०" [कातन्त्र० ४.५ ७६] इत्यादिना विहितस्य स्त्रियामेव विधानात्स्त्रीत्वं सिद्धम्। धाराहारागुहेत्यादीनां त्वदन्तानां बालावबोधनार्थः पाठः। प्रावृड् वर्षासमयः। दर्विः पाकोपकरणम्। मुद हर्षः। भाः दीप्तिः॥ २३॥

**वासोदशा मघा आपोऽप्सरसः कृत्तिकाः समा वर्षाः।**

**बह्वर्था विंशतयस्त्वेकार्थाः स्युर्नवत्यन्ताः॥२४॥**

वाससो दशा वासोदशाः। बहवोऽर्था आसामिति बह्वर्थाः। ताश्च स्वभावात् व्यक्तिभेदे एव वर्तन्ते, न जातावित्यर्थः। विंशतयस्त्विति बहुवचनं गणं सूचयति।

तुशब्दो वाक्यभेदे। नवतिरेवान्तोऽवयवः आसामिति नवत्यन्ताः। एक एवार्थः आसामिति एकार्थाः। स्वभावात्समुदाये वर्तन्ते नावयवभेदे इत्यर्थः। वासोदशादयः स्त्रीलिङ्गाः स्युः बह्वर्थाश्चेति। विंशत्यादयः स्त्रीलिङ्गाः स्युः | एकार्थाश्चेति। वस्त्रस्य दशाः। अवस्थावाचिकायास्तु बहुर्थतायाम् अनियमः। इयं दशा अवस्था इति। मघाः नक्षत्रविशेषः। आपो जलम्। अप्सरसो देवकन्याः। कृत्तिकाः नक्षत्रविशेषः। समाः संवत्सरः। केचित्समेति पाठं मन्यन्ते। तेषां इयं समा इत्यपि भवति। "निर्गतत्वं समायाः" इति भाष्यादौ वाक्यदर्शनात्। वर्षाः ऋतुविशेषः। इयं विंशतिः त्रिंशत् चत्वारिंशत् पञ्चाशत् षष्टिः सप्ततिः अशीतिः नवतिः च॥२४॥

**शुक्तिः पामा सीमा जिह्वा कारेलयाशिषा संयत्।।**

**ईषा नेमिसभाः खारी स्त्रीलिङ्गा इति समाप्ताः॥२५॥**

एते इलया आशिषा च सह स्त्रीलिङ्गा भवन्ति। शुक्तिः जलादिपानोपकरणविशेषः। पामा कण्डूः। सीमा अवधिः। जिह्वा रसना। कारा बन्धनगृहम्। इला पृथ्वी। आशीः आशंसनम्। संयत् सङ्ग्रामः। ईषा लाङ्गलावयवविशेषः। नेमिः चक्रावयवविशेषः। सभा परिषद्। खारी मानविशेषः। क्तिवर्जितादिकारान्तात् स्त्रियां विभाषया ईप्रत्यय उदाहर्तव्यः। पाशादेः समूहे यः। पाशानां समूहः पाश्या। एवं तृण्या वात्या धूम्या इत्यादयः। खलादेः च समूहे इन्। खलानां समूहः खलिनी। एवं उलूकिनी इत्यादयः। द्वन्द्वसमासाद् [अ] देवासुरादेः वैरे अकः। बाभ्रवाश्च शालङ्कायनाश्च तेषां वैरं बाभ्रवशालङ्कायनिका। एवं काकश्च उलूकश्च तयोर्वैरं काकोलूकिकेत्यादयः। द्वन्द्वाद् विवाहे अकः। अत्रिश्च भरद्वाजश्च तयोर्विवाहोऽत्रिभरद्वाजिका। एवं शकुशकिका कुत्सकुशिकिका इत्यादयः। सङ्ख्यादेर्वीप्सायामकः। द्वौ द्वौ पादौ ददाति द्विपादिकां ददातीत्यादयः। दण्डदानयोः च सङ्ख्यादेरकः। द्विशतं दण्डितो ददाति द्विशतिकां [ददाति] चेत्यादयः। रूढिशब्दा हि तद्धिता लोकतः सिद्धाः॥ २५॥

इति लिङ्गवृत्तौ स्त्रीलिङ्गव्याख्यानं समाप्तम्।।

अथातः पुँल्लिङ्गवाचकशब्दान् व्याख्यास्यामः।।

## [२. पुँल्लिङ्गप्रकरणम्]

**कफपुङ्खनगश्लोकाः शङ्खमृदङ्गौ च शङ्कुनापाङ्गः।**

**यानयुगपतङ्गकटाहैः सह मञ्चोटजतरङ्गाः॥२६॥**

एते पुँल्लिङ्गा भवन्ति यानयुगादिभिः सह। कफः श्लेष्मा। पुङ्खः शरस्य पिच्छम्। नगो वृक्षः पर्वतश्च। श्लोकः एकाक्षरादिपादच्छन्दः। कोपधत्वात्पुंस्त्वं

सिद्धम्। वृत्ताख्यत्वात्स्त्रीनपुंसकनिवृत्यर्थम् इह वचनम्। यशोवचनस्तु श्लोकशब्दः पुँल्लिङ्गः कोपधत्वादेव । शङ्खः निधिविशेषः। मृदङ्गः मुरजः स्मृतः। शङ्कुः सङ्ख्याविशेषः। शतादिकत्वाद् अस्य नपुंसकत्वं प्राप्तम्। कीलार्थस्य उदन्तत्वात् पुंस्त्वं सिद्धम्। अपाङ्गः चक्षुरन्तः। यात्यनेन इति यानम्। शकटं रथश्च। तस्य युगो यानयुगः। अन्यत्र “युगं युग्मम्” कृतयुगं चत्वारि पुरुषयुगानि " इति नपुंसकमेव। पतङ्गः शलभः सूर्यश्च। कटाहः भाण्डविशेषः। मञ्चः काष्ठमयाधारविशेषः। उटजः तापसपर्णकुटी। तरङ्गः कल्लोलः॥ २६॥

**वर्गः पूगलवङ्गौ गच्छः कच्छौघपथिमथि च वृषलः।**

**ध्वनिमुरजौ वजिमुञ्जावङ्कोठकुठौ हठाङ्गुष्ठौ॥२७॥**

कच्छश्च ओघश्च पन्थाश्च मन्थाश्च इति समाहारो द्वन्द्वः। एते पुँल्लिङ्गा भवन्ति। वर्गः समूहः। पूगः सङ्घातः। लवङ्गः ओषधिविशेषः। गच्छः अभिमतसङ्ख्यापर्यवसानम्। कच्छः पार्श्वम्। ओघः समूहः। पन्थाः मार्गः। मन्थाः खजकः। वृषलः शूद्रः। लोपधत्वान्नपुंसकत्वं प्राप्तम् । ध्वनिः शब्दः। मुरजो मृदङ्गः। वृजयो जनपदविशेषः। एष बहुवचनान्तश्च। मुञ्जः शरेषीका। अङ्कोठश्च कुठश्च स्वरादेः अदन्तस्य प्रायेण पूर्वो निपातो दृश्यते। अङ्कोठो वृक्षविशेषः। कुठो वृक्षः। प्रपञ्चार्थौ एतौ। बिल्वादित्वात्पुंस्त्वं सिद्धम्। हठो बलात्कारः। अङ्गुष्ठः अङ्गुलिविशेषः॥ २७॥

**कोष्ठपुरोडाशकमठगुडलगुडव्रातगण्डगोण्डार्घाः।।**

**पिण्डशिखण्डपिचण्डाः वण्डकरण्डौ वरण्डश्च॥२८॥**

एते पुँल्लिङ्गा भवन्ति। कोष्ठः आश्रयः। पुरोडाशः पिष्टपण्डविशेषः। कमठः भिक्षाभाजनम्। कूर्माभिधायिनः तु स्त्रीपुंस्त्वं चतुष्पदनामत्वात्। गुडः इक्षुविकारः। लगुडः लोहमयप्रहरणम्। व्रातः समूहः। गण्डो रोगविशेषः। प्राणिवचनस्य तु स्त्रीपुंस्त्वं चतुष्पदनामत्वात्। गोण्डः भारवाहविशेषः। अर्घो मूल्यं पूजाविशेषश्च। पिण्डः कायः। लोहे तु नपुंसकत्वं लोहपर्यायत्वात्। सक्त्वादिसम्बन्धिनः तु स्त्रीत्वमपि दृश्यते। नदादेः आकृतिगणत्वात्। शिखण्डः चूडा। पिचण्डः जठरम्। वण्डः दुश्चर्म। करण्डः भाण्डविशेषः। वरण्डः शरादिसङ्घातविशेषः मुखरोगश्च॥ २८॥

**वष्णिः षण्डः षण्ढो मुहूर्तविट्पुञ्जरैहरिद्रुरुतः।।**

**प्लुतदृतिगञ्जकृतान्ता वमत्यतिथिसारथिग्रन्थि॥२९॥**

वमतिश्च अतिथिश्च सारथिश्च ग्रन्थिश्चेति समाहारो द्वन्द्वः। एते पुँल्लिङ्गा भवन्ति। वृष्णिः कुलविशेषः। मेषवाचिनस्तु परत्वात स्त्रीपुंस्त्वम्। षण्डः सङ्घातः। षण्ढः नपुंसकम्। मुहूर्तः घटिकाद्वयम्। विड् वैश्यो नरश्च। विष्ठावाचिनस्तु

स्त्रीलिङ्गत्वं प्रयोगतः भाषायां दृश्यते। पुञ्जो वृन्दम्। रा द्रव्यम्। हरिद् वर्णविशेषः। गरुत् सुवर्णं पक्षश्च। प्लुतः स्वरविशेषः। यस्तु प्लवनक्रियानिमित्तः प्लुतशब्दस्तस्य वाच्यलिङ्गता। दृतिः चर्म। गञ्जो भाण्डागारः। कृतान्तो यमः। वमतिः वान्तिः। अतिथिः अभ्यागतः। सारथिः रथवाहः। ग्रन्थिः रज्ज्वादिवेष्टितगाढबन्धः॥२९॥

**कुन्तान्तबलीवर्दाः शब्दार्थौ ह्रदजनपदमगधाश्च।**

**मकरन्दकुन्दकन्दाः सबुद्बुदाः कासमर्देन॥३०॥**

कासमर्देन सहैते पुँल्लिङ्गा भवन्ति। कुन्त आयुधविशेषः। अन्तोऽवसानम्। बलीवर्दः अनड्वान्। शब्दः ध्वनिः। अर्थः धनादिः। ह्रदः जलाधारविशेषः। जनपदो जनसमूहः। मगधाः जनपदविशेषः। रूढितश्च बहुवचनान्तोऽयम्। मकरन्दः पुष्परसः। कुन्दः पुष्पविशेषः। कन्दः मूलविशेषश्च। बुद्बुदः जलादिसंस्थानविशेषः। कासमर्दः ओषधिविशेषः॥३०॥

**कपिकविकितवदवकलहदावा वंशांशराशिसत्त्वाश्च।**

**अर्दन्यहीनरेफाः कृमितिमिपृष्ठ्यास्तथा सीरः॥३१॥**

एते पुँल्लिङ्गा भवन्ति। कपिर्मर्कटः। कविः काव्यकृत् शुक्रश्च। कितवो द्यूतकारः। दवः वनं वनाग्निश्च। कलहः कलिः। दावः दवार्थः एव। वंशोऽन्वयः वेणुश्च। अंशो भागः। राशिः निचयः। सत्त्वः प्राणी। द्रव्यवचनस्य गुणवचनस्य च नपुंसकत्वमेव दृश्यते। सत्त्वं द्रव्यम्। सत्त्वं रजस्तम इति। अर्दनिः अग्निः। अश्ववृत्तेस्तु स्त्रीपुंस्त्वं चतुष्पदनामत्वात्। अहीनः ऋतुविशेषः। रेफः अक्षरविशेषः पापं च। कृमिः जन्तुविशेषः। तिमिः मत्स्यविशेषः। पृष्ठ्यः क्रतुविशेषः। सीरः हलम्॥ ३१॥

**अम्बस्तम्बौ पुत्रच्छात्रामित्राश्च वृत्रमन्त्रौ च।**

**पञ्चालपीलुपिप्पलगुग्गुलुहिङ्गुलकुलालाश्च॥३२॥**

एते पुँल्लिङ्गा भवन्ति। अम्बः सरकादीनाम्। स्तम्बः व्रीह्यादीनां प्रकाण्डविशेषः। पुत्रः सुतः। पुत्रीति नदादित्वात्। छात्रः शिष्यः। अमित्रः शत्रुः। वृत्रः असुरविशेषः। मन्त्रः ऋगादिलक्षणः। पञ्चालाः जनपदविशेषः। बहुवचनान्तोऽयं रूढितः। पालुः हस्ती वृक्षविशेषश्च। फलवचनस्य तु नपुंसकत्वं परत्वात्। पिप्पलः वस्त्रच्छेदनविशेषः। वृक्षवाचिनस्तु स्त्रीत्वमपि। पिप्पलीति नदादित्वात्। फले स्त्रीत्वमेव– अर्धपिप्पलीति। गुग्गुलुः वृक्षविशेषः। हिङ्गुलः रागद्रव्यविशेषः। कुलालः कुम्भकारः तद्भाण्डं च॥ ३२॥

**तण्डुलमञ्जुलकाला मौलितरलपाशपुद्गलकुशूलाः।।**

**रालिरनिलकीलपटोलकेलितूलानलैस्तालः॥३३॥**

एते पुँल्लिङ्गा भवन्ति। तण्डुलो धान्यसारः। मञ्जुलः लताविशेषः। कालः समयो देवश्च। मौलिः मुकुटम्। तरलः हारमध्यगतो मणिः। पाशः बन्धनम्। पुद्गलः आत्मा। कुशूलः धान्याधारविशेषः। रालिः युद्धम्। अनिलो वातः। कीलः शङ्कुः। पटोलः ओषधिविशेषः। केलिः परिहासः। तूलः उन्मानम्। अनलः अग्निः। तालः वृक्षविशेषः॥ ३३॥

**अञ्जलिशैवलकम्बलपल्लववातूलसमर कलिबलयः।।**

**बिल्वादयोऽपि तरवः स्त्रियां मताः शिंशपाद्यास्तु॥ ३४॥**

एते पुँल्लिङ्गा भवन्ति। बिल्वादयोऽपि तरवः पुँल्लिङ्गा इत्यर्थः। शिंशपाद्यास्तु वृक्षविशेषाः स्त्रियां मताः स्त्रीलिङ्गा इत्यर्थः। अञ्जलिः करसम्पुटः। शैवलः जलतृणविशेषः। कम्बलः गोगलचर्म। प्रावरणविशेषस्य तु स्त्रीत्वमपि कम्बलीति। नदादित्वादी। पल्लवः किशलयम्। नपुंसकमपि केचित्। वातूलो वातसमूहः। समरः अवयवपर्यायः। कलिर्युद्धं युगविशेषः च। बलिः करः असुरविशेषः। बिल्वः धवः अशोकः पुन्नागः अर्जुनः मातुलिङ्गः लकुचः पारिजातकः इत्यादयः। शिशपाद्याः- शिंशपा पाटला शमी इत्यादयः। प्रयोगतः अङ्कोठस्य कुठस्य च वृक्षत्वात् पुँल्लिङ्गत्वे सिद्धम्। फलार्थः पाठः प्रपञ्चार्थः इत्येके॥ ३४॥

**पाप्माश्मा श्लेष्मात्मा वणिगूष्मा स्कन्धगन्धगर्मुच्च।**

**अनन्तमसन्तमुदन्तं शम्बनितम्बौ च कुक्ष्यंह्री॥ ३५॥**

उभयत्रापि समाहारो द्वन्द्वः। एते पुँल्लिङ्गा भवन्ति। पाप्मा पापम्। अश्मा शिला। श्लेष्मा कफः। आत्मा शरीरम्। वणिग् वाणिजः। ऊष्मा सन्तापः। स्कन्धः अंसदेशः। गन्धः गुणविशेषः। गर्मुत्। सुवर्णम्। अनन्तं यथा- वृषा इन्द्रः, उक्षा प्लीहा मज्जा | असन्तं यथा- चन्द्रमाः अङ्गिराः। उशनाः पुरुदंशाः अनेहाः। उदन्तं यथा- वायुः जायुः मेरुः जन्तुः पीलुः। गुग्गुलुहिङ्गुलूनां लोपधत्वान्नपुंसकत्वं प्राप्तम्। शम्बः पविः। नितम्बः कटिप्रदेशः कुक्षिः जठरम्। अंह्रिः पादः॥ ३५॥

**स्वर्गदिनमानसंवत्सरनरयज्ञकुचकेशमासर्तुम्।**

**अरिगिरिजलदजलधिविषसुरासुरास्यात्मभुजभुजङ्गाः॥ ३६॥**

**शरनखरकपोलकदन्तपङ्कगुल्फौष्ठकण्ठरश्म्यनिलाः।**

**एषां सञ्ज्ञा धान्यान्युक्तो नाडीव्रणः पण्डः॥ ३७॥**

कपोल एव कपोलकः। स्वार्थे कः। एषां स्वर्गादीनां सञ्ज्ञा धान्यानि व्रीहयश्च पुँल्लिङ्गा भवन्ति। नाडीव्रणः पण्डः च पुँल्लिङ्ग उक्तः। तत्र स्वर्गः नाकः त्रिदिव इत्यादयः। दिनो दिवसः वासरः घस्रः इत्यादयः। मानः प्रस्थः कुडवः इत्यादयः। संवत्सरः संवत् अब्दः इत्यादयः। नरो मर्त्य इत्यादयः। यज्ञः क्रतुः मख इत्यादयः। कुचः स्तन इत्यादयः। केशः कचः मूर्द्धज इत्यादयः। मासाख्याः कार्तिकमार्गशीर्षपौषादयः। ऋतुः हेमन्तशिशिरवसन्तादयः। अरिः शत्रुः रिपुः इत्यादयः। गिरिः अद्रिः शैल इत्यादयः। जलदः मेघ इत्यादयः। जलधिः अर्णवः समुद्र इत्यादयः। विषाख्याः विषः गरः हालाहलः कालकूटः ब्रह्मसुतः इत्यादयः। सुरो देवः विबुध इत्यादयः। असुरो दानवो दैत्य इत्यादयः। असिः निस्त्रिंशः खड्गः इत्यादयः। आत्मा जीवः अन्तर्भोक्ता इत्यादयः श्लेष्मात्मेतिग्रहणम् अन्नन्तत्वात्परं नपुंसकत्वं स्यादिति। भुजः करः पाणिः दोः इत्यादयः। भुजङ्गः पन्नगः फणी इत्यादयः॥ ३६॥

शरः काण्डः शिलीमुख इत्यादयः। नखराः नखाः करजाः इत्यादयः। कपोलकः गण्डः करट इत्यादयः। दन्ताः दशनाः रदना इत्यादयः। पङ्कः कर्दमः निषद्वरः इत्यादयः। गुल्फः [नि-] स्तोदः घुटः इत्यादयः। ओष्ठः दन्तच्छदः अधर इत्यादयः। कण्ठः गल इति। लोपधत्वात् नपुंसकम् अपि न स्यात्। “पूर्वपरयोः परो विधिः बलीयान्” इति परस्येष्टवाचिकत्वात्। रश्मिः किरणः अंशुः इत्यादयः। अनिलः वातः पवनः इत्यादयः। धान्याख्याः- शालिः कलमः सुगन्धिकः षष्टिकः नीवारः तिलः माषः श्यामाकः मुद्गः मसूरः इत्यादयः। नाडीव्रणः, पुन्नपुंसकत्वात् व्रणस्य वचनम्। पण्डः नपुंसकम्॥ ३७॥

**असवो दारा लाजा बह्वर्था बल्वजाः किना दाश्च॥**

**भावे को णोऽथुरला घघञावुक्तौ सहेम्ना नञ्॥३८॥**

असुप्रभृतयः पुँल्लिङ्गा बहुवचनान्ता नित्यं भवन्ति। किना युक्तो घुसञ्ज्ञकः [च] भावेऽर्थे कप्रत्ययः [च] णप्रत्ययश्च अथुप्रत्ययश्च अल्प्रत्ययेन सह पुँल्लिङ्गाः स्युः। घप्रत्ययघञ्प्रत्ययौ च इमन्प्रत्ययेन सह नञ्प्रत्ययश्च पुँल्लिङ्गा इत्यर्थः। असवः प्राणाः। दाराः भार्या। लाजाः भृष्टधान्यविशेषः। बल्वजाः तृणविशेषः। अङ्गाः वङ्गा इत्यादयस्तु लोकत एव सिद्धाः। “उपसर्गे दः किः" [कातन्त्र० ४.५.७०]- आदिः आधिः। “कर्मण्यधिकरणे च” [कातन्त्र० १९ ४.५.७१= पा० ३.३.९३]- जलधिः शरधिः। कान्तो यथा- “स्थास्नापा व्यधिहनियुधिभ्यः क इष्यते" [?] - आखूनामुत्थानम् आखूत्थः। शलभोत्थः इत्यादयः। णान्तो यथा- “नौ ण च" [कातन्त्र०

४.५.४३= पा० ३.३.६०] न्यादः इत्यादयः। अथ्वन्तो यथा- "ट्वनुबन्धादथुः" [कातन्त्र० ४.५.६७] वेपथुः वेपनम् इत्यादयः। अलन्तो यथा- "स्वरवृदृगमिग्रहामल" [कातन्त्र० ४.५.४१] - चयनं चयः जयः इत्यादयः इति। अकर्तृकारकविषयाणां तु वाच्यलिङ्गता भवति। घप्रत्ययान्तो यथा- "पुंसि सञ्ज्ञायां घः" [कातन्त्र० ४.५.९६] उरश्छदः निगमः। घञन्तो यथा- पादः रोगः लोभः प्रस्तारः प्रासादः इत्यादयः। इमन्प्रत्ययान्तो यथा—पृथोर्भावः प्रथिमा, मृदोः भावः म्रदिमा यस्तु औणादिकः कर्तरि व्युत्पाद्यतेऽभियुक्तैस्तस्य वाच्यलिङ्गतैव- भरिमा पृथ्वी, वरिमा तपस्वी, इत्यादयः। नञन्तो यथा- "याचिविछिप्रछियजिस्वपिरक्षियतां नङ्" [कातन्त्र० ४.५.६९]- विश्नः प्रश्नः॥ ३८॥

**प्राग्वंश-कषणभमरपथसटनयोपधक-वोपधमदन्तम्।**

**क्षत्रियवचनो नाभिश्चेत्पुंलिङ्गा इति समाप्ताः॥ ३९॥**

कश्च षश्च णश्च भश्च मश्च रश्च पश्च थश्च सश्च टश्च नश्च यश्च, ते उपधा यस्येति शेषाद् बहुव्रीहौ कः। व उपधा यस्य स वोपधः। प्राग्वंशश्च कषणभमरपथसटनयोपधकश्च वोपधश्चेति समाहारो द्वन्द्वः। अत् अन्तो यस्य तद् अदन्तम्। प्राग्वंशशब्दः [च] ककारादिवर्णोपधं च शब्दरूपं क्षत्रियवचनो नाभिश्च यदि भवति तदैते पुँल्लिङ्गा भवन्ति। प्राग्वंशः यज्ञगृहम्। ककारोपधमदन्तं यथा- अर्कः शुल्कः। षकारोपधं यथा- शिरीषः जिनाक्षः यानाक्षः। णकारोपधं यथा- काणः शाणः। भकारोपधं यथा- स्तम्भः कुम्भः। मकारोपधं यथा- धूमः सोमः। रकारोपधं यथा- अङ्कुरः श्वशुरः। पकारोपधं यथा- सर्पः शूर्पः। थकारोपधं यथा- रथः सार्थः। सकारोपधं यथा– कुत्स : सर्जरसः। टकारोपधं यथा- कुटः घटः। नकारोपधं यथा- फेनः ब्रध्नः। यकारोपधं यथा- व्ययः सङ्ख्यः। वकारोपधं यथा- उद्यावः आसवः। नाभिः क्षत्रियः। प्राण्यङ्गं तु नाभिरियम् इदन्तत्वात्॥ ३९॥

इति लिङ्गवृत्तौ पुँल्लिङ्गव्याख्याने समाप्तम्।।

अथातो नपुंसकलिङ्गवाचकान् शब्दान् व्याख्यास्यामः।

## [३. नपुंसकलिङ्गप्रकरणम्।]

**शालूककारकोल्मुकचेतकचिबुकांशुकभगलिङ्गाङ्गम्।**

**चोचं पिच्छं बीजं भेषजमाज्यं मुकुटमुडुपम्॥ ४०॥**

एते नपुंसकलिङ्गा भवन्ति। शालूकम् उत्पलादिमूलम्। कारकं क्रियानिमित्तमात्रम्। अन्यस्तु कारयतीति कारिका स्त्री, कारकः पुमान्, कारकं कुलम्। उल्मुकम् अर्धदग्धं काष्ठम्। चेतकं हरीतकीफलम्। चिबुकं वदनैकदेशः। अंशुकं वस्त्रम्। भगं ज्ञानम्। लिङ्गं चिह्नम्। अङ्गम् अवयवः। चोचम् उपभुक्तफलावशेषः। फलवाचिनस्तु नपुंसकत्वं सिद्धम् "फललोपध..." [कारिका ५४] इत्यनेन। पिच्छं मयूरकलापः। बीजम् उत्पत्तिहेतु। भेषजम् औषधम्। आज्यं घृतम्। मुकुटं मौलिः। उडुपं जलतरणोचितघटितकाष्ठानां सञ्चयविशेषः॥ ४०॥

**शृङ्गाटललाटतिरीटपिटानि खपीठलोष्टकाष्ठानि।**

**पृष्ठं तुण्डं कण्ठालीढे भाण्डाण्डकुण्डानि॥ ४१॥**

एते नपुंसकलिङ्गा भवन्ति। शृङ्गाटं नड्वलोद्भवं प्रसिद्धमेव। ललाटं प्राण्यङ्गविशेषः। तिरीटं वेष्टनम्। पिटं छर्दिः। खम् इन्द्रियम् आकाशश्च। पीठम् आसनविशेषः। लोष्ठं मृत्संस्थानविशेषः। काष्ठं दारु। पृष्ठं प्राण्यङ्गविशेषः। तुण्डं मुखाग्रम्। कण्ठं शरकाण्डम्। आलीढं स्थानविशेषः। भाण्डं परिस्कारः। अण्डं पक्ष्यादिप्रसवः। कुण्डं भाण्डविशेषः॥ ४१॥

**प्रत्यालीढं शरणं च शणमृणं कारणममृतमलातम्।**

**पलितं शुक्तं नवनीतं लोकायतमरकते च॥ ४२॥**

एते नपुंसकलिङ्गा भवन्ति। प्रत्यालीढं स्थानविशेषः। शरणं त्राता। शणं धान्यविशेषः। ऋणं यदुत्तमर्णाय देयम्। कारणं हेतुः। अमृतं सुरभोज्यं जलं वा। अलातम् उल्मुकम्। पलितं पक्वकेशः। शुक्तम् अम्लं परुषश्च। नवनीतं घृतकारणम्। लोकायतं शास्त्रविशेषः। मरकतं रत्नविशेषः॥ ४२॥

**जतु वस्तु मस्तु चित्तं पित्तं तोके निमित्तशवबडिशम्।।**

**अस्थ्युक्थसक्थि सनिरुक्तमङ्गदेङ्गुदगुदपदमृधम्॥ ४३॥**

एते नपुंसकलिङ्गा भवन्ति। सह निरुक्तेन सनिरुक्तम्। जतु लाक्षानिर्यासः। वस्तु पदार्थः। मस्तु दधिविकारः। चित्तं मनः। पित्तं मायुः। तोकं सुतः। निमित्तं कारणम्। शवं मृतशरीरम्। बडिशं मत्स्यबन्धनम्। अस्थि कुल्यम्। उक्थं साम। सक्थि शरीरावयवविशेषः। निरुक्तं ग्रन्थविशेषः। अङ्गदं केयूरम्। इङ्गुदं वृक्षविशेषः। गुदम् अपानम्। पदं स्थानं लक्षणं च पादश्च। मृधं युद्धम्।। ४३॥

**काकुदमास्पदबाह्लवदधिकिण्वश्राद्धवाजपेयानि।**

**जानुजघनतुहिनाजिनवृजिनपनसमिथुनसोपानैः॥ ४४॥**

एते नपुंसकलिङ्गा भवन्ति जान्वादिभिः सह। काकुदं तालु। आस्पदं प्रतिष्ठा। बाह्लवं परिष्कारजातम्। दधि क्षीरविकारविशेषः। किण्वं सुराबीजम्। श्राद्धं पितृक्रिया। यस्तु श्राद्धशब्दः अणन्तः व्युत्पाद्यते श्रद्धा अस्यास्तीति स वाच्यलिङ्ग एव– श्रद्धा स्त्री, श्राद्धो नरः, श्राद्धं कुलम्। वाजपेयं यज्ञविशेषः। जानु अष्ठीवान्। जघनम् अवयवविशेषः। तुहिनं हिमम्। अजिनं चर्म। वृजिनं पापम्। पनसं वृक्षविशेषः। मिथुनं युग्मम्। सोपानम् आरोहणविशेषः॥ ४४॥

**द्वन्द्वश्मशानवेतनससैन्यचिह्नप्रधानधान्यानि।**

**हर्म्यं शष्पं पापं त्रिविष्टपं त्रपुसमीपाभ्रम्॥ ४५॥**

सह सैन्येन वर्तत इति ससैन्यम्। ससैन्यं च तच्चिह्नं चेति। एते नपुंसकलिङ्गा भवन्ति। द्वन्दं युगलम्। श्मशानं शवशयनम्। वेतनं भृतिमूल्यम्। सैन्यं सेना। चिह्नं लिङ्गम्। प्रधानं श्रेष्ठम्। धान्यं व्रीहिः। हर्म्यं प्रासादः। शष्पं बालतृणम्। पापम् अशुभम्। त्रिविष्टपं स्वर्गः। त्रपु सीसम्। समीपं निकटम्। अभ्रं मेघः॥ ४५॥

**शिल्पं तल्पं रूपं तथान्तरीपं शफं च कुप्यं च।**

**कुङ्कुमकुटुम्बकलभेध्मसिध्मयुग्मेन्द्रियैः सस्यम्॥ ४६॥**

शिल्पादयः नपुंसकलिङ्गा भवन्ति कुङ्कुमादिभिः सह, सस्यं च। शिल्पं क्रियाकौशलम्। तल्पं शयनम् अट्टः दाराश्च। रूपं चक्षुर्विषयः। अन्तरीपं मध्यजलो देशः। शफं खुरः। कुप्यम् असारद्रव्यम्। कुङ्कुमं सुगन्धिद्रव्यविशेषः। कुटुम्बं पुत्रादि। कलभं करिपोतः। इध्मं काष्ठम्। सिध्मं कुष्ठविकारः। युग्मं युगलम्। इन्द्रियं चक्षुरादि। सस्यं धान्यादि॥ ४६॥

**शिक्यं हृदयं मद्यं भयसत्यापत्यराजसूयानि।**

**धिष्ण्यं पण्यं मूल्यं कार्यं वीर्यं किसलयं दम्॥ ४७॥**

एते नपुंसकलिङ्गा भवन्ति। शिक्यम् उद्वहणं भारयष्टिर्वा। हृदयं मनः। मद्यं मदिरा। भयं त्रासः। सत्यं तथ्यम्। अपत्यं पुत्रादि। राजसूयं यज्ञविशेषः। धिष्ण्यं गेहस्थानोडुवह्नयः। पण्यं विक्रेयम्। मूल्यं वसुपरिमाणम्। कार्यं कृत्यम्। वीर्यं शक्तिः। किसलयं पल्लवः। दं कलत्रम्॥४७॥

**शिशिराम्बरीषपुष्करगह्वरकेयूरमुदरदुःखाग्रम्॥**

**चामरमक्षरमन्तरमश्रु द्वारं तथाऽगारम्॥ ४८॥**

एते नपुंसकलिङ्गा भवन्ति। शिशिरम् ऋतुविशेषः। अम्बरीषं भ्राष्ट्रम्। पुष्करं पद्मं तूर्यमुखं करिकराग्रं द्यौः असिफलं च। गह्वरं गहनम्। केयूरं बाहुभूषणविशेषः। उदरं जठरम्। दुःखं पीडा। अग्रं प्रान्तम्। श्रेष्ठवृत्तेस्तु वाच्यलिङ्गता- इयमग्रा,

अयमग्रः, इदमग्रम्। चामरं चमरीवालव्यजनम्। अक्षरं वर्णः। अन्तरं मध्यम्। यस्तु अन्तरशब्दः बहिर्योगादौ तस्य सर्वनामत्वात् वाच्यलिङ्गता- अन्तरा शाटी, अन्तरः पटः अन्तरं वस्त्रम्। अश्रु वाष्पम्। द्वारं गृहमुखम्। अगारं गृहम्॥ १८॥

**कुड्यं स्फारं तक्रं क्षिप्रं क्षुद्रसकुकुन्दरकुटीरम्।**

**पञ्जरकरीरचीवरचीरं पीयूषतीरे च॥ ४९॥**

सह कुकुन्दरेण वर्तत इति सकुकुन्दरम्। सकुकुन्दरं च तत् कुटीरं चेति कर्मधारयः। क्षुद्रं च सकुकुन्दरकुटीरं चेति समाहारो द्वन्द्वः। एते नपुंसकलिङ्गा भवन्ति।। कुड्यं भित्तिः। स्फारं विपुलम्। तक्रं मथितम्। क्षिप्रं द्रुतम्। क्षुद्रम् अल्पम्। अधमादौ वाच्यलिङ्गतैव। क्षुद्रः अधमः क्रूरश्च। क्षुद्रा नटी वेश्या मधुमक्षिका च। कुकुन्दरं कटिकूपम्। कुटीरं ह्रस्वकुटी जघनं च। पञ्जरं काष्ठादिरचनाविशेषः। करीरं वंशाङ्कुरः वृक्षविशेषः घटश्च। चीवरं वस्त्रविशेषः चीरं वासो विशेषः। पीयूषम् अमृतम्। तीरं तटम्॥ ९॥

**अस्राश्रु स्मश्रु कसेरु जत्रु तुम्बरु च शुक्रमभृगुसुते।**

**अघमुत्तरीयमृक्षमुडावक्षं चेन्द्रिये यवसम्॥ ५०॥**

एते नपुंसकलिङ्गा भवन्ति। अस्रम् असृक्। अश्रु वाष्पम्। स्मश्रु मुखरोमाणि। कसेरु तृणविशेषः। जत्रु ग्रीवासन्धिः। तुम्बरु औषधविशेषः। शुक्रं रेतः ज्येष्ठमासः अग्निश्च। अभृगुसुते इति किम्? शुक्रो भार्गवः। अघं पापम्। उत्तरीयम् उपरिवासः। ऋक्षं नक्षत्रम्। भल्लूकवचनस्य स्त्रीपुंस्त्वं चतुष्पदजातित्वात्। ऋक्षी, ऋक्षः। अक्षम् इन्द्रियं लोचनादि। यस्तु अक्षशब्दः बिभीतकादिवचनः स पुँल्लिङ्गः षकारोपधत्वात्। यवसं घासः॥ ५०॥

**बिससाहसबर्हाहः किल्बिषकल्मषं पुरीषतूर्याणि।**

**शकृता यकृता पृषता जगता चोदश्विता शीर्षम्॥ ५१॥**

एते नपुंसकलिङ्गा भवन्ति। शकृतादिभिः सह, शीर्षशब्दः [च]। बिसं पद्ममूलम्। साहसम् अनालोचितकरणम्। बर्हं मयूरकलापः। अहः दिनम्। किल्विषम् अपराधः पापं च। कल्मषं पापम्। पुरीषं विष्ठा। तूर्यं वाद्यविशेषः। शकृद् विष्ठा। यकृत् कालखण्डम्। पृषद् बिन्दुः। जगत् त्रैलोक्यम्। उदश्वित् तक्रम्। शीर्षं मस्तकम्॥ ५१॥

**द्विस्वरमसन्तमिसुसन्तं त्रान्तं यच्छतादिका सङ्ख्या।**

**द्विस्वरमन्नन्तमनान्तमकर्तरि कव्यकाव्ये च।। ५२॥**

द्वौ स्वरौ यस्य तद् द्विस्वरम्। अस अन्ते यस्य तद् असन्तम्। इस् च उस् च इसुसौ। तौ अन्ते यस्य तद् इसुसन्तम्। त्रोऽन्ते यस्य तत् त्रान्तम्। शतमादिर्यस्याः सा शतादिका सङ्ख्या। द्वौ स्वरौ यस्य तद् द्विस्वरम्। मन् अन्ते यस्य तद् मन्नन्तम्। द्विस्वरं च तद् मन्नन्तं चेति कर्मधारयः। "ङणना ह्रस्वोपधाः स्वरे द्विः" इति तस्य द्वित्वम् | अनोऽन्ते यस्य तद् अनान्तम्। अकर्तरीति कर्तुरन्यस्मिन्कारके कर्मादौ यः अनः विहित इत्यर्थः। भाववाचनस्तु "कृद्भाव" इति वक्ष्यति। प्रसज्यप्रतिषेधेऽप्यदोष एव। कव्यं च काव्यं च कव्यकाव्ये। एते नपुंसकलिङ्गा भवन्ति। द्विस्वरमसन्तं यथा- पयः, वयः, यशः, इति। इसन्तं यथा- सर्पिः, हविः ज्योतिः, इति। उसन्तं यथा- अरुः, यजुः, वपुः, इति। त्रान्तं यथा- पत्त्रं, मित्रं, सत्त्रम् इति। शतादिका सङ्ख्या यथा- शतम्, सहस्रम्, अयुतम्, नियुतम्, अर्बुदम्, न्यर्बुदम् इति। द्विस्वरमनन्तं यथा- भस्म, जन्म, शर्म, इति। अनान्तं यथा- दीयते इति दानम् , पीयते इति पानम्, भक्ष्यते इति भक्षणम् यात्यनेन इति यानम्, सम्यक् प्रदीयते यस्मै तत्सम्प्रदानम्, अपादीयते यस्मात्तद् अपादानम्, नीयतेऽस्मिन् इति नयनम्। "कथं राज्ञा भुज्यते इति राजभोजनी शाला, राजभोजनः शालिः, इध्मं वृश्च्यतेऽनया अनेन वा इध्मव्रश्चनी स्त्री, इध्मव्रश्चनः पुमान् ; पलाशानि शात्यन्ते अनया अनेन वा पलाशशातनी यष्टिः, पलाशशातनो दण्डः, पूर्यतेऽनया अनेन वा पूरणी घटी, पूरणो घटः, गावो दुह्यन्तेऽस्यां अस्मिन् वा गोदोहनी घटी, गोदोहनो घटः?" इति। टानुबन्धलिङ्गात् सर्वविषयत्वमस्य प्रयोगानुसारेण। अकर्तरीति कर्तृविषयस्य वाच्यलिङ्गतैव- शृणोतीति शर्मी स्त्री, शर्मा पुमान् , शर्म नपुंसकम्, नन्दयतीति नन्दना स्त्री, नन्दनः पुमान् , नन्दनं कुलम्। कव्यं पितृतर्पणम्। काव्यं गद्यं पद्यं च॥ ५२॥

**धनवदनधनूरक्तान्नरणविवरनयनमांसनामानि।**

**जलहलजलकुसुमवियत्पत्तनवनलोहपर्णाख्यैः॥ ५३॥**

धनादिनामानि जलादिनामभिः सह नपुंसकलिङ्गानि भवन्ति। धननाम- धनं द्रविणं वित्तम्। वदनं लपनम्। धनुः शरासनं चापम्। रक्तं शोणितं क्षतजम्। अन्नम् अशनं भक्ष्यम्। रणं मृधं सङ्ख्यं समरं समीकम्। विवरं रन्ध्रं श्वभ्रम्। नयनं नेत्रम् अक्षि। मांसं पिशितं क्रव्यं पलम्। जलं पानीयं तोयम्। हलं लाङ्गलं गोदारकम्। जलकुसुमनाम यथा– कमलम् उत्पलं कुवलयं सौगन्धिकम्। वियद् गगनम् आकाशम् अन्तरिक्षम्। पत्तनं नगरम् अधिष्ठानम्। वनं विपिनं गहनं काननम्। लोहशब्देन सर्वं

कंसादि गृह्यते। लोहं कालायसम् अयः कंसं कनकं चामीकरं रूप्यं रुक्मं कलधौतं ताम्रं शुल्वं सीसम्। पर्णं पलाशं दलम्। सङ्ग्रामः आहवः, अलन्तत्वात् पुँल्लिङ्गता पूर्वविधिप्रतिषेधो न॥५३॥।

**फललोपधकृद् भावे समूहभावक्रयासु यश्चान्यः।**

**प्रातिपदिकाजिरसुखवटकरोटभवृन्दकृच्छ्राणि॥५४॥**

फलमित्यर्थस्य ग्रहणम्। फलशब्दस्य नपुंसकत्वात्। ल उपधा यस्य स लोपधः। फलं च लोपधश्च कृच्चेति समाहारो द्वन्द्वः। भावे यः कृदिति भावशब्दः कृतैव सम्बध्यते। फललोपधाभ्याम् अर्थस्य अघटनात्। स च तव्यादिर्युपर्यन्तः। "आभ्यो य्व दरिद्रातेः" "शासुयुधिदृशिधृषिमृषां वा " [कातन्त्र० ४.५.१०४, १०५] इति स कृदव्ययो भाववत् प्रकाशते इति अस्य ग्रहण न। समूहश्च भावश्च क्रिया च तासु यो विहितोऽन्यस्तद्धित इत्यर्थः। एते, प्रातिपदिकादयश्च नपुंसकालङ्गा भवन्ति। फलवाचिनो यथा- बदर्याः फलं बदरम्। एवं नालिकेरं खजूरम् इत्यादयः। लोपधं यथा--कुलं बलं तालु। भावे कृद् यथा- समन्तात् कटो वर्तते, समन्ताद् राव वर्तते, साङ्कोटिनं सांराविणम्। "अभिविधौ भावे इनुण" [कातन्त्र० ४.५.३९] । योऽप्यण् तदन्तात् विहितः सोपि स्वार्थिकतया तल्लिङ्गं न जहाति। समूहविषयं यथा-- चाषाणां समूहः चाषम्। एवं काकम्, वानस्पत्यं भैक्षम् इत्यादीनां स्वभावात् समूहवृत्तिः नपुंसकत्वं च। भावक्रियाविषयं यथा- वृक्षस्य भावः वृक्ष्यम्, जडस्य भावः जाड्यम्। एवं पौरोहित्यं गार्हपत्यं सैनापत्यं नाप्यं नारपत्य पाशुपत्यम् इत्यादि यण् च प्रकीर्तितः। अश्वस्य भावः क्रिया वा आश्वम्, उद्गातुर्भावः क्रिया वा औद्गात्रमेवमादिरिति। "प्राणभृज्जातिवयोवचनाद् गोत्रादेः भावे क्रियायां वाण च। [?]" यः- सख्युर्भावः क्रिया वा सख्यम्। एवं ज्ञातेयम्, रमणीयस्य भावः रामणीयकम् इत्यादीनाम् अभिधानादेव नपुंसकत्वं सिद्धम्। प्रातिपदिकं शब्दविशेषसञ्ज्ञा। अजिरं प्राङ्गणम्। सुख शर्म। वटम् अपूपविशेषः। करोटं भाजनम्। भं नक्षत्रम्। वृन्दं समूहः। कृच्छ्रं कष्टम्॥ ५४॥

**षष्ठ्यन्तात्संज्ञायां कन्था चोशीनरेषु तत्पुरुषे।**

**आदावुपक्रमोपज्ञे स्वाम्यर्थात्सभाऽराज्ञः॥ ५५॥**

षष्ठ्यन्तात्परा कन्था तत्पुरुषे समासे उशीनरदेशे सञ्ज्ञायां विषये नपुंसकलिङ्गा भवन्ति। उपक्रमश्च उपज्ञा च उपक्रमोपज्ञे। गमकत्वाद् अल्पस्वरस्य परनिपातः। षष्ठ्यन्तात् परम् उपक्रम उपज्ञा च तयोरादित्वे गम्यमाने तत्पुरुषे

नपुंसकलिङ्गे भवतः। स्वाम्यर्थात् षष्ठयन्तात् राजवर्जितात् परा सभा तत्पुरुषे नपुंसकलिङ्गेति। सौसमेः कन्था सौसमिकन्थम्। नन्दोपक्रमाणि मानानि। कातन्त्रोपक्रमं कालापकं व्याकरणम्। चन्द्रोपज्ञम् असञ्ज्ञकं व्याकरणम्। स्वामिसभम् ईश्वरसभम् इनसभम्। अराज्ञ इति किम्? राजसभा। कथं नृपतिसभामगमद् इति। नृपतौ सभा नृपतिसभा। सप्तम्यन्तात् सभा॥ ५५॥

**अमनुष्यात् सभाऽशाला सेनाशालासुरानिशा वा स्युः।**

**छाया च तथा नित्यं बाहुल्येऽप्यव्ययात्पन्थाः॥५६॥**

मनुष्यादन्यस्मात् षष्ठयन्तात्परा सभा अशालारूपा नपुंसकलिङ्गा भवति। षष्ठ्यन्तात्पराः सेनादयश्च तत्पुरुषे विभाषया नपुंसकलिङ्गा भवेयुः। छाया च विभाषया भवेत्। बाहुल्येऽपि छाया नित्यं नपुंसकलिङ्गा भवति। अव्ययात्परः पन्थाः तत्पुरुषे नपुंसकलिङ्ग इति। यथाक्रममुदाहरणम्। पिशाचसभम्, राक्षससभम्। मनुष्यसदृशग्रहणात् काष्ठसभा। स्त्रीलिङ्गमेव। गोपालसभा गोपालानां समूहः इत्यर्थः। इह न भवति- अनाथसभा अनाथकुटीत्यर्थः। ब्राह्मणसेनं ब्राह्मणसेना। गोशालं गोशाला। यवसुरं यवसुरा। श्वनिशं श्वनिशा। कुड्यच्छायं कुड्यच्छाया। इषुच्छायम्, शलभच्छायम्। पूर्वपदस्यात्र बहुलत्वं गम्यते। अपथम्, उत्पथम्। तत्पुरुष इति किम्? सुपथा नगरी, उत्पथो देशः॥ ५६॥

**सुदिनात्पुण्यादेकाच्चाहः सङ्ख्यापरोऽपि रात्रिश्च।**

**गृहशशपूर्वे स्थूणोर्णे च नपुंसकमिति समाप्तम्॥ ५७॥**

सुदिनशब्दात्पुण्यशब्दादेकशब्दाच्च परोऽह्नशब्दः अत्प्रत्ययान्तः, सङ्ख्यापरोऽपि रात्रिशब्दः अत्प्रत्ययान्तः नपुंसकलिङ्गः भवति। गृहं च शशश्च तौ पूर्वौ ययोः स्थूणोर्णयोः इति गृहपूर्वा स्थूणा शशपूर्वा ऊर्णा च नपुंसकलिङ्गे भवतः। सुदिनं च तदहश्च सुदिनाहम्। सुदिनमिह पुण्यम् उच्यते। एवं पुण्याहम्, एकाहम्। एका चासौ रात्रिश्च एकरात्रम्। द्वयोः रात्र्योः समाहारः द्विरात्रम्। एवं पञ्चरात्रम्। गृहस्य स्थूणा गृहस्थूणं गृहधारणम्। शशस्योर्णा शशोर्णं शशलोम॥ १७॥

इति लिङ्गवृत्तौ नपुंसकलिङ्गव्याख्यानं समाप्तम्।।

अथोभयलिङ्गवाचकाः शब्दा व्याख्यायन्ते।

[४. पुन्नपुंसकलिङ्गप्रकरणम्।]

**मालकसरकानीकाः पुस्तकमस्तकचरकचषकनिष्काः।**

**पिण्याकशूकमोदकमञ्चकनटपङ्ककल्कानि॥ ५८॥**

एते शब्दाः पुन्नपुंसकलिङ्गा भवन्ति। वक्ष्यते "उभयलिङ्गा इति समाप्ताः।" इति, तेनायं सम्बन्धः सिद्धो भवति। तथा स्त्रीनपुंसकेष्वपि बोद्धव्यम्॥ मालकः मालकं ग्रामान्तरालाटवी। सरकः सरकं मद्यादिपानम्। अनीकः अनीकं युद्धम्। पुस्तकः पुस्तकं लिखितपत्रसञ्चयः*। मस्तकः मस्तकं शिरः। चरकः चरक शास्त्रविशेषः। चषकः चषकं मद्यभाण्डविशेषः। निष्कः निष्कं सुवर्णाष्टशतं पलम् उरोभूषणं च। पिण्याकः पिण्याकं श्च्युततैलकल्कविशेषः। शूकः शूकं धान्यादेः सूची। मोदकः मोदकं भक्ष्यविशेषः। मञ्चकः मञ्चकं शयनविशेषः। नटः नटं नर्तकविशेषः। पङ्कः पङ्कं कर्दमः। कल्कः कल्कं तिलादेः उद्धृततैलादिकठिनविशेषः॥ ५८॥

**वल्मीकशाकशाटकपिनाकमूषिककरण्डकं शुल्कम्।**

**करकनखतण्डकशकटकर्पटपातककिरीटपटाः॥ ५९॥**

वल्मीकादौ समाहारो द्वन्द्वः। अपरार्धे इतरेतरयोगः। एते शब्दाः पुन्नपुंसकलिङ्गा भवन्ति। वल्मीकः वल्मीकं पिपीलिकाकृतो मृत्सञ्चयविशेषः। शाकः शाकं भक्ष्यविशेषः। शाटकः शाटकम् वस्त्रविशेषः। पिनाकः पिनाकं रुद्रायुधविशेषः। मूषिकः* मूषिकम् आखुः। करण्डकः करण्डकं पुष्पादीनामाधारविशेषः। शुल्कः शुल्कं मार्गादिदण्डमानम्। करकः करकं कमण्डलुः। नखः नखं कररुहम्। तण्डकः तण्डकं छान्दोग्यब्राह्मणग्रन्थविशेषः। शकटः शकटं बलीवर्दावाह्योद्वहनविशेषः। कर्पटः कर्पटं वस्त्रविशेषः। पातकः पातकं ब्रह्महत्यादि। किरीटः किरीटं मुकुटम्। पटः पटं वस्त्रम्॥ ५९॥

**निकटकटकपटकूटा भूषणकुटकुञ्जकुष्ठनडमुष्काः।**

**द्रोणक्ष्वेडिततीर्थप्रोथाष्टापदकबन्धानि॥ ६०॥**

एते पुन्नपुंसकलिङ्गा भवन्ति। निकटः निकटं समीपम्। कटः कटम् आसनविशेषः। कटी श्रोणी, नदादित्वात् ई, विशिष्ट एवार्थे। कपटः कपटं व्याजः। कूटः कूटं राशिः। भूषणः भूषणम् अलङ्कारः। कुटः कुटं घटः हलाङ्गविशेषश्च। कुञ्जः कुञ्जं गह्वरम्। कुष्ठः कुष्ठं गन्धद्रव्यविशेषः। नडः नडं नड्वलजस्तृणः। मुष्कः मुष्कम् अश्वादीनां परिमाणविशेषः वृषणश्च। द्रोणः द्रोणं परिमाणविशेषः। द्रोणी तु नदादित्वात् ई, जलक्षेपणी। क्ष्वेडितः क्ष्वेडितं सिंहनादविशेषः। तीर्थः तीर्थं पुण्यस्थानम्। प्रोथः प्रोथम् अश्वादेः घोणान्तरम्। अष्टापदः अष्टापदं सुवर्णं चतुरङ्गादिद्यूतफलकं च। कबन्धः कबन्धं शिरोरहितकायः॥ ६०॥

**शृङ्गोद्योगतडागक्रकचध्वजपुच्छकूर्चकवचानि।**

**अर्बुदयौवनभुवनं सौधं सीधु व्रतं सक्तुः॥ ६१॥**

एते पुन्नपुंसकलिङ्गा भवन्ति। शृङ्गः शृङ्गं विषाणम्। उद्योगः उद्योगं पराक्रमः। तडागः तडागं जलाधारविशेषः। क्रकचः क्रकचं करपत्रम्। ध्वजः ध्वजं चिह्नविशेषः। पुच्छः पुच्छं लाङ्गूलः। कूर्चः कूर्चं दीर्घश्मश्रु। कवचः कवचं तनुत्रम्। अर्बुदः अर्बुदं दशकोट्यः। यौवनः यौवनं द्वितीयं वयः। भुवनः भुवनं लोकः। सौधः सौधं धवलगृहम्। सीधुः सीधु मद्यम्। व्रतः व्रतं ब्रह्मचर्यादिनियमः। सक्तुः सक्तु यवादिविकारः॥ ६१॥

**द्यूतप्रयुतैरावतवसन्तककुदौषधमधुमहिमानि।**

**पुस्तं बुस्तं हस्तं वास्तु च मुस्तं व्रजं रजतम्॥ ६२॥**

एते पुन्नपुंसकलिङ्गा भवन्ति। द्यूतः द्यूतं दुरोदरम्। प्रयुतः प्रयुतं दशलक्षाणि। ऐरावतः ऐरावतं महेन्द्रवाहनो गजः। वसन्तः वसन्तम् ऋतुविशेषः देवपुत्रविशेषश्च। ककुदः ककुदं प्राधान्यं राजलिङ्गं च। औषधः औषधं भेषजम्। मधुः मधु मृद्वीकादिमद्यम्। महिमा महिम महत्त्वम्। पुस्तः पुस्तं लेप्यादिकर्मविशेषः। बुस्तः बुस्तं पक्वमांसविशेषः। हस्तः हस्तं करः। वास्तुः वास्तु गृहम्। मुस्तः मुस्तम् ओषाधिविशेषः। व्रजः व्रजं पन्थाः गोष्ठं निवहः च। रजतः रजतं रूप्यं श्वेतं च॥ ६२॥

**कार्षापणव्रणस्थाणुबाणतृणचरणतोरणरणानि।**

**शतलोहितघृतवृत्तानि गृथयूथायुतं मण्डम्॥ ६३॥**

एते पुन्नपुंसकलिङ्गा भवन्ति। कार्षापणः कार्षापणं हिरण्यप्रमाणं पुराणम्। व्रणः प्रणं क्षतम्। स्थाणुः स्थाणु छिन्नद्रुमशिर ऊर्ध्वकाष्ठमेव। बाणः बाणं शरः पुष्पविशेषश्च। तृणः तृणं शष्पम्। चरणः चरणं पादः। तोरणः तोरणं निर्यूहः। रणः रणं युद्धम्। शतः शतं सङ्ख्याविशेषः। लोहितः लोहित शोणितम्। गुणवचनस्य तु वाच्यलिङ्गता। लोहिता शाटी, लोहितो गौः, लोहितं वस्त्रम्। घृतः घृतम् आज्यम्। वृत्तः वृत्तं शीलं निस्तलं च। गूथः गूथं विष्ठा। यूथः यूथं पशुसमूहः। अयुतः अयुतं दशसहस्राणि। मण्डः मण्डं भक्तादेर्निर्यासः॥ ६३॥

**खण्डं मुण्डं कुण्डं काण्डं दण्डं सुवर्णवर्णे च।**

**चन्दनमोदनमसनं विमानधनभवनमुद्यानम्॥ ६४॥**

एते पुन्नपुंसकलिङ्गा भवन्ति। खण्डः खण्डम् इक्षुविकारविशेषः शकलं च। खण्डनक्रियावाचिनस्तु वाच्यलिङ्गता। खण्डा घटी, खण्डो घटः, खण्डं कुण्डम्।। मुण्डः मुण्डं शिरः। गुणवचनस्य तु द्रव्ये वर्तमानस्य वाच्यलिङ्गतैव। यथा- मुण्डनगुणयोगात् मुण्डा स्त्री, मुण्डः पुमान्, मुण्डं कुलम्। कुण्डः कुण्डं जीवति भर्तरि परजातः अग्निहवनाधारविशेषः च। काण्डः काण्डं शरः। दण्डः दण्डं दमनार्थो

निग्रहः। सुवर्णः सुवर्णं कनकम्। वर्णः वर्णं नीलादि। अर्चितत्वात् द्वन्द्वे सुवर्णस्य पूर्वनिपातः। चन्दनः चन्दनं मलयजः। ओदनः ओदनं भक्ष्यविशेषः। असनः असनं वृक्षविशेषः। विमानः विमानं रथविशेषः। धनः धनं द्रव्यम्। भवनः भवनं गृहम्। उद्यानः उद्यानमारामः॥६४॥

**निधनं पिधानमभिधानं मानं दिनखलीननालानि।**

**पुलिनं मलिनं स्तेनं शयनासनयाननिगडानि॥ ६५॥**

एते पुन्नपुंसकलिङ्गा भवन्ति। निधनः निधनं विनाशः कुलं च। पिधानः पिधानं संवरणम्। अभिधानः अभिधानं नाम शब्दश्च। मानः मानं दर्पः। दिनः दिनं दिवसः। खलीनः खलीनं कविका। नालः नालं पद्मादीनां दण्डः। पुलिनः पुलिनं सैकतम्। नलिनः नलिनं पद्मम्। स्तेनः स्तेनं चौर्यं चौरश्च। शयनः शयनं शय्या। आसनः आसनम् उपवेशनम्। यानः यानं वाहनम्। निगडः निगडे बन्धनविशेषः॥ ६५॥

**मण्डपकुतपद्वीपा दीपविटपशूर्पजम्बुबिम्बानि।**

**आश्रमसङ्क्रमसङ्गमहिमकर्मब्रह्मलोमानि।। ६६।।**

एते पुन्नपुंसकलिङ्गा भवन्ति। मण्डपः मण्डपं गृहादेः विन्यासविशेषः। कुतपः कुतपं छागरोममयो वस्तुविशेषः। द्वीपः द्वीपं द्विधा गता आपो यत्र। दीपः दीपं प्रकाशविशेषः। विटपः विटपं लतासमुदायविशेषः। शूर्पः शूर्पं मानविशेषः। जम्बुः जम्बु वृक्षविशेषः। बिम्बः बिम्ब आकृतिः। आश्रमः आश्रम स्थानम्। सङ्क्रमः सङ्क्रमं जलतरणविशेषः। सङ्गमः सङ्गमं सङ्गतिः। हिमः हिमं तुहिनम्। अयं कर्मा इदं कर्म। ब्रह्मा ब्रह्म प्रजापतिः। लोमा लोम तनूरुहम्॥ ६६॥

**गुल्मोऽर्मोद्यमकुट्टिमदाडिममध्यमलयाम्बुजक्षेमाः।**

**चक्रमरण्यं कुल्यं शल्यं गोमयकषायौ च॥६७॥**

एते पुन्नपुंसकलिङ्गा भवन्ति। गुल्मः गुल्मं प्रकाण्डम् उपस्करणं रोगः च। अर्मः अर्मं चक्षुरोगविशेषः। उद्यमः उद्यमम् उत्साहः। कुट्टिमः कुट्टिमं संस्कृतभूमिविशेषः। दाडिमः दाडिमं फलविशेषः। मध्यः मध्यम् अन्तरम्। मलयः मलयं पर्वतविशेषः। अम्बुजः अम्बुजं कमलम्। क्षेमः क्षेमं कुशलम्। चक्रः चक्रं रथाङ्गं राष्ट्रं च। अरण्यः अरण्यं वनम्। कुल्यः कुल्यम् अस्थि जलपथं च। शल्यः शल्यं वंशादीनां शलाकाविशेषः। गोमयः गोमयं गोशकृत्। कषायः कषायं रसविशेषः॥ ६७॥

**समयकवियवलयाव्ययदारुप्रतिसरयुगन्धरक्षीरम्।**

**सूत्रं छत्रं वक्त्रं वस्त्रं पत्रं पवित्रं च॥ ६८॥**

एते पुन्नपुंसकलिङ्गा भवन्ति। समयः समयं कालः। कवियः कवियम् अश्वमुखबन्धनम्। वलयः वलयं हस्ताभरणविशेषः। अव्ययः अव्ययम् असङ्ख्यशब्दविशेषः। दारुः दारु काष्ठम्। प्रतिसरः प्रतिसरं सूत्रं वाहिनीजघनं च। युगन्धरः युगन्धरं कूबरः। क्षीरः क्षीरं दुग्धम्। सूत्रः सूत्रं तन्तुः सूत्रणं च। छत्रः छत्रम् आतपत्रम्। वक्त्रः वक्त्रं मुखम्। वस्त्रः वस्त्रं वसनम्। पत्र: पत्रं पर्ण वाहनं च। पवित्रः पवित्रं पावनम्॥ ६८॥

**नेत्रं वज्रं वप्रं राष्ट्रं वासरशरीरतिमिराणि।**

**कुञ्जरसमरोशीरा विहारवारान्धकाराणि॥ ६९॥**

एते पुन्नपुंसकलिङ्गा भवन्ति। नेत्रः नेत्रं नयनं परिधानविशेषश्च। वज्रः वज्रं कुलिशम्। वप्रः वप्रं क्षेत्रम्। राष्ट्रः राष्ट्रं जनपदः। वासरः वासरं दिनम्। शरीरः शरीरं देहः। तिमिरः तिमिरं तमः। कुञ्जरः कुञ्जरं गजः। समरः समरं रणः। उशीरः उशीरं वीरणीमूलं नलदम्। विहारः विहारं भिक्षुस्थानम्। वारः वारं परिपाटिः। अन्धकारः अन्धकारं तमः॥ ६९॥

**अङ्गारशिखरतोमरसहस्रपार्श्वं शरावगाण्डीवौ।**

**काशाकाशकुशाङ्कुशकोशप्रग्रीवपात्रीवाः॥ ७०॥**

एते पुन्नपुंसकलिङ्गा भवन्ति। अङ्गारः अङ्गारं वह्निदग्धशकलम्। शिखरः शिखरम् अग्रम्। तोमरः तोमरम् आयुधविशेषः। सहस्रः सहस्रं दशशतानि। पार्श्वः पार्श्वं शरीरैकदेशः। शरावः शरावं वर्धमानाख्यम्। गाण्डीवः गाण्डीवं चापविशेषः। काशः काशं तृणविशेषः। आकाशः आकाशं नभः। कुशः कुशं बर्हिः। अङ्कुशः अङ्कुशं गजवारणम्। कोशः कोशं धनम्। प्रग्रीवः प्रग्रीवं वास्तुनिमित्तकारणम्। पात्रीवः पात्रीवं यज्ञोपकरणम्॥ ७०॥

**भावं दैवं ताण्डवमथ वल्कलमूलमुसलकललानि।**

**शीलफलकमलमङ्गलकमण्डलुबलोपलपलालम्॥ ७१॥**

एते पुन्नपुंसकलिङ्गा भवन्ति। भावः भावं स्वभावः शब्दविषयेऽभिप्रायः आत्मा योनिश्च। दैवः दैवं विधिः। ताण्डवः ताण्डवं नृत्यं तृणविशेषश्च। वल्कलः वल्कलं वृक्षादीनां त्वक्। मूलः मूलं प्रतिष्ठा। मुसलः मुसलम् आयुधविशेषः क्षोदनविशेषश्च। कललः कललं शुक्रशोणितादेरीषद् घनपरिणामः। शीलः शीलं चरितम्। फलः फलं प्रयोजनं कुसुमादिसम्भवश्च। कमलः कमलं पद्मम्। मङ्गलः मङ्गलं प्रशस्तम्। कमण्डलुः कमण्डलु करकम्। बलः बलं प्राणः। उपलः उपलं शिला। पलालः पलालं धान्यादेः शुष्कनालम्॥ ७१॥

**कुण्डलतमालतैलं शकलमृणालतलमलचषालानि।**

**शूलप्रवालशम्बलशालनिगडयूषमेषाणि॥७२॥**

एते पुन्नपुंसकलिङ्गा भवन्ति। कुण्डलः कुण्डलं कर्णाभरणविशेषः। तमालः तमालं वृक्षविशेषः। तैलः तैलं तिलादीनां विकारः स्नेहः। शकलः शकलं खण्डम्। मृणालः मृणालं बिसम्, तदङ्कुर इत्येके। तलः तलं मूलम् अधोरूपं च। मलः मलं कलङ्कः पुरीषं च। चषालः चषालं यज्ञपात्रम्। शूलः शूलं प्रहरणविशेषः रोगविशेषश्च। प्रवालः प्रवालं नवकिसलयविशेषः। शम्बलः शम्बलं पाथेयम्। शालः शालं वृक्षविशेषः। निगडः निगडं बन्धनविशेषः। यूषः यूषं मांसादिरसविशेषः। मेषः मेषं मेण्ढकः॥ ७२॥

**कर्षकरीषामिषविषवर्षैर्माषं च मासमांसं च।**

**कर्पासदिवसचिक्कसकंसांसरसचमसैर्जृम्भः॥ ७३।।**

एभिः सहैते पुन्नपुंसकलिङ्गा भवन्ति। कर्षः कर्षं पलचतुर्थो भागः। करीषः करीषं गोमयाग्निः। शुष्कगोमयसङ्घात इत्येके। आमिषः आमिषं मांसम्। विषः विषं शृङ्गादिद्रव्यविशेषः। वर्षः वर्षं संवत्सरः। माषः माषं परिमाणविशेषः व्रीहिविशेषः च। मासः मासं कालपरिमाणविशेषः। मांसः मांसं पिशितम्। कर्पासः कर्पासं तूलकारणम्। दिवसः दिवसं दिनम्। चिक्कसः चिक्कसं यवान्नविशेषः। कंसः कंसं लोहविशेषः परिमाणविशेषश्च। अंसः अंसं स्कन्धः। रसः रस मधुरादिः शृङ्गारादिः विषं वीर्यं रागश्च। चमसः चमसं यज्ञपात्रविशेषः। जृम्भः जृम्भं जृम्भणम्॥ ७३।।

**अवतंससानुनिर्यासान्युपवासापराह्णगृहगेहाः।।**

**दैवतकुमुदार्धर्चाः शतमानं वारबाणं च॥ ७४।।**

एते पुन्नपुंसकलिङ्गा भवन्ति। अवतंसः अवतंसं शेखरम्। सानुः सानु पर्वतैकदेशः। निर्यासः निर्यासं वृक्षादेर्निस्यन्दः। उपवासः उपवासं भोजनादेर्विच्छेदः। अपराह्णः अपराह्णं दिवसापरार्धभागः। गृहः गृहं वासः। गेहः गेहं मन्दिरम्। “कालागरुप्रततधूपवहाश्च गेहाः”। दैवतः दैवतं देवता। कुमुदः कुमुदं कैरवम्। अर्धं चासौ ऋक् च, अर्धर्चः अर्धर्चम्, समासान्तोऽत्। शतं मानानि अस्य, शतमानः शतमानं भूभागविशेषः। वारबाणः वारबाणं कञ्चुकम्।। ७४।।

**जलजौ च शङ्खपद्मा भूतः प्रेते च सैन्धवो लवणे।**

**उत्कर्षे सारोऽयं नैतत्सारं त्विदं न्याय्ये।। ७५॥**

जले जातौ शङ्खपद्मौ उभयलिङ्गौ भवतः। शङ्खः शङ्खम्, पद्मः पद्मम्। निधिवचनोऽत्र पुँल्लिङ्ग एव। शङ्खः पद्मः। भूतशब्दः पिशाचे उभयलिङ्गः। भूतः

भूतम्। अन्यत्र नपुंसकलिङ्गः। भूतम् उपचितम्। भूतानि प्राणिनः। उपमा वचनः क्रियावचनश्च अभिधेयलिङ्गः। पितृभूतोऽयम्, पितृभूतमिदम्, मातृभूतोऽयं मातृभूतमिदम्। पितेव मातेव इत्यर्थः। भूतः भूतं भूता इति अतीतार्थः। भूतः भूतं भूता इति जातार्थः। लवणे सैन्धवशब्दः उभयलिङ्गः। सैन्धवः सैन्धवम्। यौगिकस्तु अभिधेयलिङ्गः। सैन्धवोऽश्वः, सैन्धवं वस्त्रं, सैन्धवी नारी। उत्कर्षे सारशब्दः पुँल्लिङ्गः। न्यायादनपेते नपुंसकलिङ्ग एव॥ ७५।।

**धर्मोऽयमित्यपूर्वे भवति च तत्साधनेऽपि धर्ममिदम्।**

**अर्धमिदं समभागेऽसमभागेऽर्धोऽपि च प्रेम।। ७६॥**

अपूर्वे, अनुमेये पुण्ये, धर्मशब्दः पुँल्लिङ्गः। तस्य साधने दानादौ नपुंसकलिङ्ग इत्यर्थः। समभागे अर्धशब्दः नपुंसकलिङ्गः। यथा- खार्यर्धम्। असमभागे पुँल्लिङ्ग एव। यथा- अर्धः पटी, अर्धो नगरः, ग्रामार्धः वस्त्रार्धः। अन्यत्र अभिधेयलिङ्गः। अर्धः पटः, अर्धा नगरी, अर्धं कुण्डम्। प्रेमा प्रेम प्रियत्वम्॥ ७६॥

**लोहपटहदेहद्वीपिनदृढमातङ्ककण्टकविटङ्कम्।**

**कान्तारजठरकन्दरशेखरकेदारवरपारम्॥ ७७॥**

एते पुन्नपुंसकलिङ्गा भवन्ति। लोहः लोहम् अय:प्रभृतिद्रव्यविशेषः। पटहः पटहं वाद्यविशेषः। देहः देहं शरीरम्। द्वीपिनः द्वीपिनं व्याघ्रः। दृढः दृढम् अविनष्टः। आतङ्कः आतङ्कम् इष्टवियोगजस्तापः। कण्टकः कण्टकं बिल्वादीनाम् अवयवविशेषः। विटङ्कः विटङ्क कपोतपाल्यादिन्यासविशेषः। कान्तारः कान्तारं वनम्। जठरः जठरम् उदरम्। कन्दरः कन्दरं गुहा। शेखरः शेखरं शिरोभूषणम्। केदारः केदारं क्षेत्रविशेषः। वरः वरं श्रेष्ठः। पारः पारं परतीरम्॥ ७७॥

**खण्डलमण्डलमुकुलाः कपालखलकुलिशवालपूलाश्च।**

**स्थानफलकोत्पलनिदाघमेचकवितानकुसुमाश्च॥ ७८॥**

एते पुन्नपुंसकलिङ्गा भवन्ति। खण्डलः खण्डलं खण्डवत्। मण्डलः मण्डलं भूभागविशेषः। मुकुलः मुकुलं कुड्मलः। कपालः कपालं घटादीनाम् अवयवविशेषः। खलः खलं दुर्जनः। कुलिशः कुलिशं शम्बः। व्याडिस्तु नपुंसकलिङ्गमाचष्टे। भट्टिकाव्ये पुंस्त्वमपि दृश्यते-

“निरस्ताग्रधाराग्रः कुलिशो मम वक्षसि।

अभिन्नं शतधात्मानं मन्यते बलिनं बली॥" इति।

बालः बालं शिशुः केशश्च। पूलः पूलं बद्धतृणसञ्चयविशेषः। स्थानः स्थानम् आश्रयः। फलकः फलकं चर्मावरणम्। उत्पलः उत्पलं जलसम्भवविशेषः। निदाघः निदाघं ग्रीष्मः। मेचकः मेचकं श्यामः। वितानः वितानं विस्तार: उल्लोचः शून्यं यज्ञश्च। कुसुमः कुसुमं पुष्पम्॥ ७८॥

**स्नेहमुखमूलकपटलवर्चस्ककुणपविडङ्गनीडाश्च।।**

**पिष्टपलितकुक्कुटमरकमुभयलिङ्गा इति समाप्ताः॥ ७९॥**

एते पुन्नपुंसकलिङ्गा भवन्ति। स्नेहः स्नेहं सौहृदम्। मुखः मुखं वदनम्। मूलकः मूलकं भूमिजो द्रव्यविशेषः। पटलः पटलं गृहोपरिभागः नेत्ररोगविशेषश्च। वर्चस्कः वर्चस्कं शकृत्। कुणपः कुणपं शवम्। विडङ्गः विडङ्गं कृमिहा। नाडः नीडं पक्षिवासविशेषः। पिष्टः पिष्टम् अपूपः। पलितः पलितं पक्ककेशः। कुक्कुटः कुक्कुटं ताम्रचूडः। मरकः मरकं घनप्राणिमरणम्।। ७९॥

इति। लिङ्गवृत्तौ उभयलिङ्गव्याख्यानं समाप्तम्॥

[अथ स्त्रीनरलिङ्गवाचकाः शब्दा व्याख्यायन्ते।]

[५. स्त्रीनरलिङ्गप्रकरणम्।]

**सल्लकवृश्चिकपिटककुटिवराटकमल्लककटयष्टिघटाः।**

**शाटकिटसृपाटमरीचिमुष्टिकिष्कुमणितरणितिथि॥८०।।**

एते स्त्रीनरलिङ्गा भवन्ति। वक्ष्यति "स्त्रीनरलिङ्गा इति समाप्ताः"। इति, तेनायं सम्बन्धः सिद्धो भवति। सल्लकी सल्लकः सुरभिवृक्षविशेषः। वृश्चिकी वृश्चिकः क्षुद्रजन्तुविशेषः। पिटका पिटकः कण्डोलम्। कश्चित्पुन्नपुंसकलिङ्गमाह। इयं कुटिः अयं कुटि: स्वल्पावासः। वराटिका वराटकः कपर्दकः। मल्लिका मल्लकः तैलाद्याधारविशेषः। कटी कटः ओषधिविशेषः। इयं यष्टिः अयं यष्टिः दण्डः। घटी घटः कुम्भः। शाटी शाटः वस्त्रविशेषः। किटी किटः वंशादिपुत्तलिका। सृपाटी सृपाटः परिमाणविशेषः। इयं मरीचिः अयं मरीचिः किरणः। इयं मुष्टि: अयं मुष्टिः अङ्गुलीनां सङ्कोचः। इयं किष्कुः अयं किष्कुः वितस्तिः हस्तश्च। इयं मणिः अयं मणिः रत्नम्। इयं तरणिः अयं तरणिः आदित्यः समुद्रश्च। इयं तिथिः अयं तिथिः दिनम्॥ ८०॥

**अण्यरणिश्रेणिस्वातिबस्तिरेणुमुनियोनिकर्कन्धु।**

**सिन्धिवषुधिमन्वशनिमृत्युकन्दरकलम्बशाल्मलयः॥ ८१॥**

एते स्त्रीनरलिङ्गा भवन्ति। इयं अणिः अयं अणिः अक्षाग्रकीलिका। इयं अरणिः अयं अरणिः अग्न्युत्पत्तिकारणं काष्ठविशेषः। इयं श्रेणिः अयं श्रेणिः पङ्क्तिः तुल्यशिल्पिसमुदायश्च। इयं स्वातिः अयं स्वातिः नक्षत्रविशेषः। इयं बस्तिः अयं बस्तिः गुदम्। इयं रेणुः अयं रेणुः धूलिः। इयं मुनिः तपस्विनी, अयं मुनिः तपस्वी। इयं योनिः अयं योनिः उत्पत्तिस्थानम्। इयं कर्कन्धुः अयं कर्कन्धुः बदरी। इयं सिन्धुः अयं सिन्धुः सरित्। इयमिषुधिः अयमिषुधिः शराणां स्थानम्। इयं मनुः अयं मनुः प्रजापतिः। इयमशनिः अयमशनिः वज्रम्। इयं मृत्युः अयं मृत्युः प्राणवियोगः। कन्दरा कन्दरः पर्वतैकदेशः। कन्दरी दरी इति नित्यं स्त्रियाम्। कलम्बा कलम्बः शालिविशेषः। इयं शाल्मलिः अयं शाल्मलिः वृक्षविशेषः॥ ८१॥

**द्विचतुष्पदभ्रमरवरटनाम मूषेषुबाह्वहि सदंशम्।।**

**पाटलिजाटल्यूर्मि स्त्रीनरलिङ्गा इति समाप्ताः।। ८२॥**

द्वे चत्वारि च पदानि येषां ते द्विचतुष्पदाः। द्विचतुष्पदाश्च भ्रमरश्च वरटश्च तेषां नाम सञ्ज्ञा। मूषश्च इषुश्च बाहुश्च अहिश्चेति समाहारो द्वन्द्वः। सह दंशेन वर्तते इति सदंशम्। पाटलिश्च जाटलिश्च ऊर्मिश्चेति समाहारो द्वन्द्वः। एते स्त्रीनरलिङ्गा भवन्ति। द्विपदनाम- ब्राह्मणी ब्राह्मणः क्षत्रिया क्षत्रियः वैश्या वैश्यः शूद्रा शूद्रः मयूरी मयूरः कोकिला कोकिलः। चतुष्पदनाम- हस्तिनी हस्ती कूर्मी कूर्मः। जातिवचनत्वात् नित्यं स्त्रीत्वं प्राप्तम्। भ्रमरनाम- भ्रमरी भ्रमरः मधुकरी मधुकरः। वरटनाम-वरटी वरटः। शिल्पिनी शिल्पी सुवर्णकारी सुवर्णकारः कलादी कलादः नापिती नापितः इति द्विपदजातित्वात्। मूषी मूषः प्राणिविशेषः। इयमिषुः अयमिषुः शरः। इयं बाहुः अयं बाहुः भुजः। इयमहिः अयमहिः सर्पः। दंशी दंशः क्षुद्रजन्तुविशेषः। इयं पाटलिः अयं पाटलिः वृक्षविशेषः। इयं जाटलिः अयं जाटलिः वृक्षविशेषः। इयमूर्मिः अयमूर्मिः तरङ्गः॥ ८२॥

इति लिङ्गवृत्तौ स्त्रीनरलिङ्गव्याख्यानं समाप्तम्॥

[अथ स्त्रीनपुंसकलिङ्गवाचकाः शब्दा व्याख्यायन्ते।]

[६. स्त्रीनपुंसकलिङ्गप्रकरणम्।]

**अर्चिर्नगरं वृत्ताख्या बहुलं भावकर्मणोरकणा।**

**यण् स्त्रीनपुंसकाख्या हरीतकबिभीतकतटपुटम्॥ ८३॥**

वृत्तानामक्षरविन्यासानामाख्या नाम। अर्चिः नगरं वृत्ताख्या पुनर्बहुलमेते स्त्रीलिङ्गाख्या नपुंसकलिङ्गाख्या भवन्ति। यणन्ते च भावकर्मणोर्विहितेन अकणा अकणन्तेन सह बहुलं स्त्रीनपुंसकलिङ्गं भवति। हरीतकादि तु सर्वलिङ्गं भवति। वक्ष्यति "एते च सर्वलिङ्गाः" इति, तेन सहास्य सम्बन्ध इष्यते। इयमर्चिः इदमर्चिः ज्वाला। इयं नगरी इदं नगरे पत्तनम्। वृत्ताख्या यणन्तं च द्विलिङ्गमुक्तम्। तथापि केचित् स्त्रियां केचिन्नपुंसके केचित् पुंसि केचित् स्त्रीनपुंसकयोः बहुलग्रहणात्प्रयोगतः इति। वृत्तनाम यथा- समानी प्रमाणी कलिका इत्येवमादि स्त्रियाम्, वक्त्रं पथ्यावक्त्रम् इत्यादि नपुंसके, पुटः पणवः आपीडः इत्यादि पुंसि। "यण् च प्रकीर्तितः"। [कातन्त्रसूत्रम्] उचितस्य भावः औचिती औचित्यम्। सामग्री सामग्न्यम्। एवं यथाकामी यथाकाम्यम्, मैत्री मैत्र्यम् इत्यादयः स्त्रीनपुंसकाः। "यस्याऽऽपत्यस्य" [?] इत्यादिसूत्रे "यस्य" इति योगविभागात् यस्य स्त्रियां लोपः। शौक्ल्यम्, दैर्घ्यम्, दार्ढ्यम्, जडस्य भावः कर्म वा जाड्यम्। एवं ब्राह्मण्यं माणव्यं वाडव्यम् इत्यादयो नपुंसके। अणन्तं यथा। "योपधाद्गुरूपोत्तमाद् वुञ्" [पा०५.१.१३२] इत्यादेस्तु प्रख्यादकण् दृश्यते। शिष्यश्चोपाध्यायश्च शिष्योपाध्यायौ, तयोर्भावः कर्म वा शैष्योपाध्यायिका। एवं कुत्सकुशिकिका। गार्ग्यस्य भावः कर्म वा गार्गिका। एवं काठिका इत्येवमादयः स्त्रियाम्। रमणीयस्य भावः कर्म वा रामणीयकम्। एवं साहाय्यकं मानोज्ञकम् इत्यादयो नपुंसके।

इति स्त्रीनपुंसकलिङ्गव्याख्यानं समाप्तम्।।

[७. सर्वलिङ्गप्रकरणम्।]

सर्वलिङ्गं यथा- हरीतकी हरीतकः हरीतकम्, बिभीतकी बिभीतकः बिभीतकम्, तटी तटः तटम्, पुटी पुटः पुटम्॥ ८३।।।

**पेटकवाटवटमठं दरभल्लातकविषाणवल्लूरम्।**

**शृङ्खलपुरामलकवाटमण्डलकलशकुवलपत्रम्॥ ८४॥**

एते सर्वलिङ्गा भवन्ति। पेटी पेटः पेटं सङ्घातः। कवाटी कवाटः कवाटं द्वारपिधानम्। वटी वटः वटं वृक्षविशेषः। तस्य फलं वटम्। मठी मठः मठम् आश्रमविशेषः। दरी दरः दरं रन्ध्रविशेषः। भल्लातकी भल्लातकः भल्लातकं वृक्षविशेषः। विषाणी विषाणः विषाणं शृङ्गं करिदन्तश्च। वल्लूरा वल्लूरः वल्लूरं

शुष्कमांसम्। शृङ्खला शृङ्खलः शृङ्खलं बन्धनम्। पुरी पुरः पुरं नगरम्। आमलकी आमलकः आमलकं वृक्षविशेषः। तस्य फलं आमलकमित्येके। वाटी वाटः वाटम् आवरणम्। मण्डली मण्डलः मण्डलं देशः चतुरस्रता च। कलशी कलश: कलशं जलाधारविशेषः। कुवली कुवलः कुवलं वृक्षविशेषः। तस्य फलं कुवलम् इदम्। पात्री पात्रः पात्रं भाजनम्॥ ८४॥

**एते च सर्वलिङ्गा गुणादयो वाच्यलिङ्गकाः शेषाः।**

**ष्णान्ता सङ्ख्याऽलिङ्गा कत्यव्यययुष्मदस्मच्च॥८५॥**

एते पूर्वोक्ताः स्त्रीपुंनपुंसकलिङ्गा भवन्ति। गुणादयो गुणवचनादयो वाच्यमभिधेयं तस्यैव लिङ्गं येषामिति। “शेषाद् वा बहुव्रीहौ कः” [?] इति कप्रत्ययः। शेषाः परिशिष्टा गुणादयो वाच्यलिङ्गका भवन्ति। आदिग्रहणात् सङ्ख्या सर्वनामसञ्ज्ञाकृताश्चेत्यर्थः। षकारनकारान्ता सङ्ख्या पुनरलिङ्गा। कतिश्च अव्ययश्च युष्मच्च अस्मच्चेति समाहारो द्वन्द्वः। एतदपि अलिङ्गम् इत्यर्थः। गुणवचनं यथा- शुक्ला शाटी, शुक्लः पटः, शुक्लं वस्त्रम्। तिस्रः स्त्रियः, त्रयः पुरुषाः, त्रीणि कुलानि, एवं चतस्रः स्त्रियः, चत्वारो नराः, चत्वारि मित्राणि। एकद्विशब्दयोः सर्वनामत्वात् च तथा सिद्धिः। सर्वाः स्त्रियः, सर्वे पुरुषाः, सर्वाणि कुलानि। देवदत्ता नाम काचित् , देवदत्तो नाम कश्चित् , देवदत्तं नाम किञ्चित्। एवं अन्येऽपि ये यस्मिन्नभिधेये अभिधीयन्ते ते तद्वाच्यलिङ्गा एव सिद्धाः। ष्णान्ता सङ्ख्या सर्वेषु लिङ्गेषु तुल्यरूपा। यथा षट् स्त्रियः, षट् पुरुषाः, षट् कुलानि, पञ्च स्त्रियः, पञ्च पुरुषाः, पञ्च कुलानि। एवं कति स्त्रियः, कति पुरुषाः, कति कुलानि। कतिशब्दः स्वभावात् बहुवचनवाची। एवं उच्चैः स्त्री, उच्चैः तरुः, उच्चैः कुलम्, तत्र शालायाम्, तत्र ग्रामे, तत्र नगरे। एवं त्वं स्त्री, त्वं नरः, त्वं कुलम्; अहं स्त्री, अहं नरः अहं कुलम्। तथाऽत्याद्यन्तस्यापि गुणभूतसाधनवाक्यापेक्षया वाच्यलिङ्गेन योगो नाभिधीयते॥ ८५॥

इति सर्वलिङ्गव्याख्यानं समाप्तम्॥

**आनन्त्यादिह शब्दानां लिङ्गानामप्यनन्तता।**

**सुवर्णैर्घटितं किञ्चिद्बालानां मुखमण्डनम् ॥८६॥**

इह शब्दानामानन्त्यादनन्तत्वात् लिङ्गानामप्यनन्तता सिद्धा। यथा सुवर्णैः अक्षरैः वा सुवर्णेन धातुना [वा] घटितं किञ्चिद् बालानां छात्राणां वा स्त्रीणां [वा] मुखमण्डनं भवति। एतावता अनन्तत्वमुक्तम्॥ ८६॥ एवमार्याः॥८६॥

**दुर्गसिंहोऽथ दुर्गात्मा दुर्गो दुर्गप इत्यपि।**

**यस्य नामानि तेनैव लिङ्गवृत्तिरियं कृता॥ ८७॥**

इति श्रीदुर्गसिंहविरचिता लिङ्गकारिकावृत्तिः समाप्ता॥

इति दुर्गात्मकृतं लिङ्गानुशासनं समाप्तम्॥

शुभं भवतु॥ श्रीरस्तु।।

॥ हर्षवर्द्धनकृतं लिङ्गानुशासनम् ॥

॥ पृथिवीश्वरकृतया सर्वलक्षणाख्यया टीकया सहितम् ॥

॥ श्रीगणपतये नमः ॥

नमामि नारायणपादपङ्कजं करोमि नारायणपूजनं सदा।
वदामि नारायणनाम निर्मलं स्मरामि नारायणतत्त्वमव्ययम्॥१॥

भूयाद्भूतपतिर्विभुर्दिविभवो वो भोगभृद्भूषणो
भालाभीलदृगुद्भवोग्रहुतभुग्भारास्तभारो हरः।
शम्भुः सम्भृतभूतभूरिविभवो भीमः स्वयम्भूद्भवो
भूभृद्भूप्रभुरात्मभक्तभयभिद्भर्गो भृशं भूतये॥२॥

श्रीमद्भूषणभोगिभोगभवनैर्भूमिप्रभैर्भास्वरै-
र्भ्राजिष्णुद्युतिमत्तदिन्दुवदनं वन्दे सतुन्दं वपुः।
हैरम्बं [वरसार] दानमुखरै रत्नैरुदारैरलं(?)
दिव्यैश्चारणराक्षसैः सुरगणैर्विघ्नोपशान्त्यै नुतम्॥३॥

अरूपं विश्वरूपाख्यमनाद्यन्तमकारकम्।
प्रपद्ये प्रणवात्मानमलिङ्गासङ्ख्यमव्ययम्॥४॥

नमस्यामि जगद्वन्द्यां कृत्स्नभद्राय मातृकाम्।
स्थूलां सूक्ष्मां शिवां घोरां सत्त्वाकारां सरस्वतीम्॥५॥

दिश्यात् सुखानि भवतां कमलपलाशेन भूषिता सुरवरदा।
लक्ष्मीरिवाद्रितनया कमलपलाशेन भूषितासुरवरदा॥६॥

स्मरामि सर्वसाहित्यपारगाणां महात्मनाम्।
गुरूणां यत्प्रसादेन प्राप्यते वैबुधं पदम्॥७॥

सारः सर्वस्य विद्वत्ता विदुषां कवय. पराः।
कवीनां लिङ्गविज्ञानी न [सन्ति] स नियो[प्य]तः॥८॥

प्रार्थितः शास्त्रकारेण पादग्रहणपूर्वकम्।

**लिङ्गानुशासनव्याख्यां करोति पृथिवीश्वरः॥ ९॥**

इह शास्त्राणि विशिष्टेष्टदेवतानमस्कारपूर्वकाणि समारभ्यन्त इति हि शिष्टाचारः। तदर्थमेव हि कविर्भगवन्तं नारायणं सर्वभूतावासं वासुदेवं विष्णुं विश्वव्यापिनं च कृष्णं नमस्कुर्वन् प्रथममेकं श्लोकं चकार

**नमो मथितदुर्वारदैत्यचक्राय चक्रिणे।**

**सभूधरधरागारस्तम्भीभूतैकबाहवे॥१॥**

नम इति। भगवते चक्रिणे नमः। कीदृशाय? मथितदुर्वारदैत्यचक्राय। तथा सह भूधेरैर्वर्तते यासौ भूमिस्तदेवागारं गृहम्, तत्र स्तम्भीभूत एको बाहुर्यस्य, सशैलवनकानना भूमिरेकबाहुस्तम्भाश्रिता भगवत इत्यर्थः।।

एवं देवतानमस्कारक्रियामभिधाय प्रयोजनकथनायाह-

**मनोहरतमैर्वृत्तैः सज्जनानन्दवर्धनम्।**

**लिङ्गानुशासनं स्पष्टं यथाबुद्धि विधीयते॥ २॥**

लिङ्गानुशासनं विधीयत इति। लिङ्गानां स्त्रीपुन्नपुंसका+++[र्वपदाविष्टपरिभाषा) द्वित्रि लिङ्गरूपाणामनुशासनं स्पष्टीकरणं क्रियते। अथ किमिदं लिङ्गं नाम? येषामनुशासनं करिष्यते। ज्ञायते स्त्रीपुन्नपुंसकभावो यैस्तानि लिङ्गानि स्तनमेहनादीनि (चेदिमान्यपि स्त्र्यादीनि। सर्वे गत्यर्था ज्ञानार्था लिङ्गेन गत्यर्थस्य ज्ञानार्थत्वात्?)। लिङ्गज्ञानस्य च प्रयोजनम्- सम्यक् शब्दप्रयोगावगमः; धर्मार्थकाममोक्षशास्त्राधिगमे तदनुष्ठाने च चतुर्वर्गलाभः ; महाकवित्वे च विद्वद्गोष्ठीषु नरेन्द्रसभासु च सत्कारगुणबहुमानलाभः; देवतास्तोत्रेणाचिरादेवाभीष्टफलप्राप्तिः; एवं सर्वपुरुषार्थत्वमस्य लिङ्गानुशासनस्य। ननु सन्ति व्याडि-वररुचि-चन्द्रगोमिप्रभृतिमहापुरुषविरचितानि लिङ्गानुशासनानि; तत्किमस्य करणस्य प्रयोजनमित्याह- मनोहरतमैरित्यादि। मनोहरतमैः सर्वजनहृदयहारिभिर्वृत्तैरिदं कृतम्। अत एव सज्जनानन्दवर्द्धनम्, यथा चान्येषु सत्सु एतत्सज्जनानन्दवर्द्धनम्, तथा पृथक्प्रकरणादिदर्शनेनाग्रेऽस्य विशेषवत्त्वं व्यापिता च दर्शयिष्यते। यथाबुद्धि बुद्ध्यानुरूप्येण। तथाचोक्तं शास्त्रकारेण-

**बह्वाचार्यमतैर्व्यापि श्रव्यं लालित्ययोगतः।**

**स्पष्टं स्पष्टीकृतैरर्थैरिदं लिङ्गानुशासनम्॥३॥**

इति।

## स्त्रीलिङ्गप्रकरणम्।

इदानीं स्त्रीप्रकरणमाकारान्तादिक्रमेण दर्शयन्नाह

**आदीदूतः स्त्रियां प्रायो गङ्गा लक्ष्मीश्चमूर्यथा।**

**पर्यायसहिता भूमिवल्लिविद्युन्नदीदिशः॥४॥**

आच्च ईच्च ऊच्च आदीदूतः। तेन आकारान्ता ईकारान्ता ऊकारान्ताश्च शब्दाः स्त्रियां भवन्ति। प्रायशो बाहुल्येन। यतोऽन्यत्रापि दृश्यन्ते ते यथावसरं वक्ष्यन्ते। दिङ्मात्रप्रदर्शनार्थं गङ्गादय उक्ताः। तेनाकारान्ता यथा गङ्गा तथा खट्वामालादयो ज्ञातव्याः। ईकारान्ता द्विविधाः- ङ्यन्ताः कृदन्ताश्च। तत्र ङ्यन्ता यथा- इयं गौरी किशोरीत्येवमादयः। कृदन्ता यथा- इयं लक्ष्मीः, इयं श्रीः, इत्येवमादयः। ऊकारान्ता यथा- इयं चमूः इयं कण्डूः कुहूः जुहूः यवागूः कच्छूः तनूः अण्डूः अलाबूः कदूः दर्दूः इत्येवमादयः। एवमादिबहुत्वात् प्रातिपद्येन नोक्ताः। प्रायोग्रहणमतिव्याप्तिनिवृत्तये। तेन इयं कीलालपा स्त्री, अयं कीलालपाः पुरुषः, तथा इयं ग्रामणी स्त्री, अयं ग्रामणीः पुरुषः। एवं यवलूप्रभृतयो ये आदीदूतः सन्ति ते यथावसरमर्थवल्लिङ्गेषूदाहरिष्यन्ते। पर्यायसहिता भूमीति। भूमिश्च वल्ली च विद्युच्च नदी च दिक् च, ता एता भूमि-वल्ली-विद्यु-न्नदी-दिशः पर्यायसहिताः स्त्रियां भवन्ति। भूमिः- जगती पृथ्वी क्षोणीत्येवमादयः; वल्ली- लता व्रततिप्रभृतयः; विद्युत्- सौदामिनी तटित् चञ्चला चपलेत्येवमादयः; नदीनिम्नगा– पगादयः; दिशः- काष्ठाः हरितः ककुभः आशा इत्येवमादयः। अकारान्तानाम् “अजाद्यतष्टाप्” (पासू० ४-१-४) इति टापा भवितव्यम्।।

इदानीमिकारान्तान् प्रदर्शयन्नाह-

**सक्थ्यस्थिदधिसृक्व्यक्षि विहायाप्राणिवाचकम्।**

**उक्तानुक्तमिकारान्तं विद्याज्ज्ञात्यादितोऽपरम्॥५॥**

इकारान्तं शब्दं स्त्रियां विद्यादित्येतावदुक्तावतिप्रसङ्गः प्राप्नोतीत्यत आह- सक्थ्यस्थिदधिसृक्व्यक्षि विहायेति। सक्थि-अस्थि-दधि-सृक्कि-अक्षि इत्यत्र समाहारैकवद्भावे नपुंसकत्वम्। एतदिकारान्तं शब्दपञ्चकं वर्जयित्वा, अप्राणिवाचकम् असत्त्वाभिधायकम्, ज्ञात्यादितोऽपरम्- यतो ज्ञात्यतिथिप्रभृतयः

पुंसि वक्ष्यन्ते तेभ्यो यदन्यदिकारान्तमुक्तमनुक्तं वा शब्दरूपम्, स्त्रियां विद्यात्। ज्ञात्यादिमध्ये सक्थ्यादीनामपाठात् तेषां निराकरणात् स्त्रीपुन्नपुंसकता बोद्धव्या। यथा- इदं सक्थि ऊरुः, इदमस्थि कीकसम्, इदं दधि क्षीरविकारः, इदं सृक्कि ओष्ठपर्यन्तः, इदमक्षि नेत्रम्। अप्राणिवाचकं ज्ञात्यादितोऽपरम् इत्युक्तेऽन्यदुक्तानुक्तं शब्दरूपं सर्वं स्त्रियामापद्यते। तत् किमुक्तानुक्तमुच्यते? सत्यम्; किन्तु मन्दबुद्धिप्रबोधाय दिङ्मात्रं प्रदर्शयतोक्तम्॥

इदानीमिकारान्ताः प्रदर्श्यन्ते -

**ओषधिपद्धतिपक्षतिपङ्क्ती-**

**र्वर्त्तनिवाशिवितर्दिपुरन्ध्रीः।**

**अङ्गुलिकाकलिशारिशरारि-**

**स्तुन्दितुरीषुधिदीधितिवर्तीः॥६॥**

एतान् शब्दान् स्त्रियां विद्यादित्यर्थः। इयमोषधिः फलपाकान्ता। अन्ये त्वेवंविधाः किप्रत्ययान्ताः सन्ध्यादयः। इयं पद्धतिर्मार्गः। इयं पक्षतिः पक्षमूलम्। इयं पङ्क्तिर्लेखा। वर्त्तनिः प्रवाहः। वाशिः तक्षणभाण्डम्। वितर्दिः चेदि। पुरन्ध्रीः पुरन्ध्रिश्च वराङ्गना। अङ्गुलिः करशाखा। काकलिः स्वरविशेषः। यदुक्तम्- "निषादः काकलीसञ्ज्ञो द्विश्रुत्युत्कर्षणाद्भवेत्" इति। शारिः पक्षिविशेषः पर्याणं वा। शरारिः आतिर्क्किः। तुन्दिः नाभिः। तुरिः वायकभाण्डम्। इषुधिः तूणः। अस्य किप्रत्ययान्तत्वात् पुंस्त्वे स्त्रियां वचनम्। दीधितिः रश्मिः। अन्ये रश्मिवाचकाः पुंसि कथिताः। यदुक्तम्- "दीधितिमेकां मुक्त्वा रश्म्याभिधानं पुंस्येव"। वर्तिः दीपाङ्गमिति॥

**भ्रुकुटिकुटिकटीतित्रोटिकोट्याजिराज-**

**छविकृषिरुचिवीचिश्रेणिनिःश्रेणिवेणीः।**

**वटितुटिखनिहानिग्लानिनेम्यश्रिनीवी-**

**र्ग्रहणिविपणिपेशीः पाळिधूळ्याळिनाळीः॥ ७॥**

एतान् स्त्रियां विद्यात्। इयं भ्रुकुटिः भ्रूभङ्गविशेषः, असौम्या दृष्टिः। कुटिः वासविशेषः। कटिः श्रोणिः। ईतिरुपद्रवः। त्रोटिश्चञ्चुः। कोटि: सङ्ख्या प्रान्तभूमिश्च अग्रभागश्च। आजिर्युद्धं भूमिभागश्च। राजिः रेखा। छविः कान्तिः। कृषिः कर्षणम्।

रुचिर्दीप्तिः अभिलाषश्च इच्छा च। वीचिः कल्लोलः। श्रेणिः पङ्क्तिः श्मशानशिल्पानां संहतिश्च। निःश्रेणिरधिरोहणी। वेणिः शिरसि परा कचरचना। वटिः मुद्गादिरचिता मण्डिकाकारा। तुटिः कालपरिमाणो वाद्यविशेषश्च। खनिः आकरः। हानिः अपचयः। ग्लानिः चित्तपीडा। नेमिश्चक्रावयवः। अश्रिः कोणः। नीविः मूलधनं युवतिवदनं च वस्त्रभूषणं च। ग्रहणिः कोष्ठस्थानम्, रोगविशेषः। विपणिः वणिक्पथम्। पेशिः मांसादिखण्डः। पाळिः सेतुः, पङ्क्तिश्च कर्णैकदेशः प्रशंसोपलक्षणं च। धूळः रजः। आळिः सखी पङ्क्तिश्च। नाळिः नाडिः कन्दली च प्रणवविशेषश्च सिरा [असिरा] वायकभाण्डं च॥

**अरणिकरणिपार्ष्णिच्छर्दिशुक्त्यातिशक्तीः।**

**समितिवसतिहेतीर्गृष्टिविष्ट्याभ्रियष्टीः।**

**रजनिधमनिनाभीरावलिश्रोणिभङ्गीः**

**खलिलिपिलिबिदर्वीः शष्कुली वेदिनान्दीः॥८॥**

सर्वमेतत् स्त्रियां विद्यात्। इयमरणिः यज्ञाङ्गम्। करणिः आकृतिः। पार्ष्णिः पादपश्चिमभागः। छर्दिः वमनम्। शुक्तिः शिम्बुका। आतिः शरारिः। शक्तिरायुधविशेषः सामर्थ्यं च। समितिः सङ्केतस्थानं सभा च। वसतिः निवासः। हेतिः ज्वाला प्रहरणं च। गृष्टिः सकृत्प्रसूता गौः मानविशेषश्च। विष्टिः विष्टीकरणम्। अभ्रिः खनित्रम्। यष्टिः दण्ड। रजनिः निशा। धमनिः मुखैकदेशः सिरा च। नाभिः तुन्दिः मध्यं च। आवलिः पङ्क्तिः। श्रोणिः कटिः। भङ्गिः विच्छित्तिः। खलिः पिण्याकः। लिपिरक्षरविन्यासः। लिबिरक्षरविन्यास एव। दर्विः पाकोपकरणं सृग्दारुभाण्डम्। शष्कुलिः कर्णदेशः अपूपविशेषश्च। वेदिः वितर्दिः। नान्दिः पूर्वरङ्गः।।

अथ परिभाषालिङ्गान्युच्यन्ते-

**अबुधे कृष्टिमश्वाङ्गे दुन्दुभिं सुरभिं गवि।**

**गजादानावनौ वारि दन्त्योष्ठ्यादिं बलिं तथा॥९॥**

कृष्टिशब्दो बुधे पण्डिते वर्तमानः पुंसि, अबुधे कर्षणे तु कृष्टिः स्त्रियाम्। दुन्दुभिशब्दश्चाश्वैकदेशे वर्तमानः स्त्रियाम्, भेर्यां तु पुंस्येव। सुरभिशब्दश्च गवि वर्तमानः स्त्रियाम्। इयं सुरभिर्गन्धः, सुरभीदं पुष्पमिति। वारिशब्दो गजग्रहणस्थाने वर्तमानः स्त्रियाम्। इयं वारिर्गजग्रहणस्थानम्। अन्यत्रेदं वारि जलमिति। तथा दन्त्योष्ठ्यादिर्वलिशब्दः स्त्रियाम्। इयं वलिस्त्वक्सङ्कोचः। अन्यत्रायं बलिरुपहारः

असुरो वा। इतीकारान्तं शब्दरूपं यदुक्तमनुक्तं च स्त्रियां विद्यात्। तद्यथा इयं चर्षणिः, भृतिः, कृत्तिः, सातिः, वसतिः, प्रीतिः, ज्यानिः, वामिः, भूमिः, नियतिः, सूतिः, जामिः, शल्मलिः, किखिः, श्रीः, इत्येवमादयः। यदनुक्तं तल्लक्ष्यतोऽवधार्यम्।।

**इतीदन्ताः**

इदानीमुकारान्ता उच्यन्ते-

**स्नायुप्रियङ्गुदनुकाकुकङ्कु**

**रज्वाखुपर्शूस्तनुकच्छुचञ्चूः।**

एते स्नाय्वादयः स्त्रियां स्युः। तद्यथा- इयं स्नायुः सिरा। प्रियङ्गुः श्यामा धान्यविशेषश्च। दनुः दानवमाता। काकुः भिन्नकण्ठो ध्वनिः। कङ्कुः प्रियः क्रमुकं च। रज्जुः मुञ्जादिकृतं दाम। आखुः मूषकः। पर्शुः प्राण्यङ्गम्। तनुः शरीरम्। कच्छुः पामा।। चञ्चुस्त्रोटिः॥

**इत्युदन्ताः।**

**मात्रादयोऽत्र प्रथिता ऋदन्ता**

**रा द्यौः सनौः स्यादपरस्वरेषु॥ १०॥**

एते शब्दाः स्त्रियां भवन्तीति सम्बन्धः। मात्रादयो यथा- इयं स्त्री माता स्वसा दुहिता ननान्दा इत्यादयः। पिता भ्राता नप्त्रेत्यादयः पुंसि प्रथिताः। एवम् ऋकारान्ता उक्ता अपरस्वरेषु ऋदादिषु। रा द्यौ सनौः नौशब्देन सह स्त्रियां भवति। यथा- इयं राः धनम्; इयं द्यौः स्वर्गः; इयं नौः प्लवः। इत्येतावन्त एवापरस्वरेषु स्त्रियां भवन्ति। गोशब्दस्य उभयलिङ्गता वक्ष्यते॥

**इत्यजन्ताः।**

अथ हलन्ता उच्यन्ते-

**स्रक्सीमपामदृषदः समिदापदापः**

**प्रावृट्च्छरद्दरदुपानदृचो द्युभासौ।**

**त्विड्विप्रुषावुपनिषत्परिषत्क्षुदाशीः**

**सम्पद्विपत्प्रतिपदो विडमानवे तु॥११॥**

एते स्रगादयः स्त्रियां भवन्ति। यथा इयं स्रक् माला। सीमा मर्यादा। पामा व्याधिः। दृषत् शिला। समित् अग्नीन्धना काष्ठा युद्धं च। आपद् व्यसनम्। आपः

जलानि। प्रावृट् वर्षाः। शरत् ऋतुविशेषः। दरत् म्लेच्छजातिविशेषः। उपानत् चर्मपादुके। ऋक् पादबद्धो वेदैकदेशः। द्यौः वियत्। भाः दीप्तिः। विप्रुट् सूक्ष्मजलकणः। उपनिषत् रहस्यशास्त्रम्। परिषत् सभा। क्षुत् बुभुक्षा। आशीः आशा। सम्पत् सम्पत्तिः। विपत् विपत्तिः। प्रतिपत् पक्षस्याद्यतिथिः। विडमानवे तु। एतदुक्तं भवति– विट्शब्द अमानवे मनुष्यवर्जिते विष्ठायां वर्तमानः स्त्रियाम्, मानवे तु पुंसि पुँल्लिङ्ग एव। यथा- अयं विट् वैश्यः।।

**स्रुक्त्वङ्निर्णङ्निशावेहद्वीरुत् संसच्च मुन्मृदौ।**

**द्वाः पूर्योषित्तृषत्स्फिग्धूर्वाग्गीरुड्क्दृपरिस्रुतः॥१२॥**

एतेऽपि स्त्रियामेव। यथा- इयं स्रुक् होमभाण्डम्। त्वक् चर्म। निर्णिङ् बुद्धिः। निशा वेहत् गौः। वीरुत् तृणविशेषः। संसत् सभा। मुत् हर्षः। मृत् मृत्तिका। द्वाः द्वारम्। पूः पुरी। योषित् स्त्री। तृट् तृषा। स्फिग् ऊरुसन्धिः वराङ्गं च। धूः उच्चैःस्थानम्। वाग्वाणी। गीर्वाक्। रुट् रोषः। दृक् दृष्टिः। परिस्रुत् सुरा।

**विंशत्याद्या नवत्यन्ता अन्यन्तोऽभवनिर्यथा।**

**तल्प्रत्ययो यथा गोता छन्दस्यूर्ध्वं च मध्यमात्॥१३॥**

विंशतिप्रभृतयः- विंशतिः, त्रिंशत्, चत्वारिंशत्, पञ्चाशत्, षष्टिः, सप्ततिः, अशीतिः, नवतिः। आदिग्रहणात् त्रिंशदादयो गृह्यन्ते यावच्छतम्। शतात्प्रभृति नपुंसकम्। इदानीं प्रत्ययद्वारेण दर्शयन्नाह- अन्यन्तः "आक्रोशे नञ्यनिः" (पा०सू० ३-३-११२) इत्यनिप्रत्ययान्तश्च स्त्रियां भवति। अभवनिः, प्रायणिः इत्येवमादयः। तल्प्रत्ययो भावार्थे "तस्य भावस्त्वतलौ" (पा०सू० ५-१-११९) इति। यथा- इयं पटुता, मृदुता, गोता इत्यादयः। समूहार्थे "ग्रामजनबन्धुसहायेभ्यस्तल्" (पा०सू० ४-२-४३)। यथा- इयं ग्रामता, जनता, बन्धुता, सहायता। "स्वार्थिको देवात्तल्" (पा०सू० ५-४-२७)। देव एव देवता। छन्दसि च गायत्र्यादीनां छन्दस्त्वान्नपुंसकता प्राप्ता बाध्यते। गायत्री-बृहती-शक्करीणामीकारान्तत्वादेव स्त्रीलिङ्गता प्रसिद्धा। ऊर्ध्वनामष्ट्यादीनां तथा मध्यानामुष्णिगनुष्टुप्प्रभृतीनां वचनाद्विधीयते। गायत्री उष्णिगनुष्टुप् बृहती पङ्क्तिः त्रिष्टुप् जगती अतिजगती शक्करी अतिशक्करी अष्टिः अत्यष्टिः धृतिः अतिधृतिः कृतिः प्रकृतिराकृतिः विकृतिः उत्कृतिः एताः छन्दोजातयः॥

**इति भट्टभरद्वाजसूनोः पृथिवीश्वरस्य कृतौ हर्षवर्धनकृतलिङ्गानुशासनटीकायां स्त्रीप्रकरणम्॥**

## ॥ अथ पुँल्लिङ्गप्रकरणम् ॥

**बहुस्वरः पुंसि भवेदसन्तस्त्वन्योऽसमस्तः सुमनोऽप्सरस्तः।**

**द्व्यच्कं तु वेधोजरसौ विहाय विहायसा साकमसन्तमन्ये॥ १४॥**

स्वरा अचः बहवो यस्यासन्तस्य स बहुस्वरोऽसन्तः पुंसि भवति। एवं सति सुमनोऽप्सरश्शब्दयोः पुंस्त्वं प्राप्नोतीत्याह– अन्यः सुमनोऽप्सरश्शब्दाभ्याम्। सुमनोऽप्सरश्शब्दौ बह्वच्कावपि असन्तावपि स्त्रियां भवतः। असमस्तोऽकृतसमासः। समस्तयोरभिधेयवल्लिङ्गता वक्ष्यते। शोभनानि मनांसि येषां ते सुमनसः पण्डिताः। सहाप्सरोभिर्वर्तन्त इति साप्सरसः सिद्धचारणा इति। सुमनोऽप्सरोभ्यामन्ये बहुस्वरा असन्ताः पुंसि। यथा- सुयशाः, सुवर्चाः, उशनाः, बिडौजाः, अनेहाः इत्येवमादयः। बिडौजाः, अनेहाः, उशनाः शक्र-शुक्र-कालवाचकाः। एवमन्येऽपि। अप्सरस्सुमनश्शब्दयोः पुंस्त्वे प्राप्ते प्रतिषेधः। नपुंसके बहुस्वरत्वादप्राप्तिः। पारिशेष्यात् स्त्रियाम्। इमा अप्सरसः देववनिताः, इमाः सुमनसः पुष्पाणि। यस्तु जरसोऽन्य इति तुशब्दो विशेषद्योतनाय।

यः द्व्यच् द्विस्वरः जरसोऽन्यः वेधाः। वेधसो द्व्यच्कत्वात् नपुंसकता प्राप्ता, अत आह– वेधःशब्दं विहाय सम्मुक्त्वा द्व्यच्कमन्त्ये नपुंसके स्यात्। विहायसा साकं सार्द्धम् असन्तं नपुंसके स्यात्। विहायश्शब्दस्य बह्वच्कत्वात् पुंस्त्वे प्राप्ते प्रतिषेधः। द्विस्वरो नपुंसके। तद्यथा- इदं तेजः, यशः, चेतः, रेतः, ओजः, शिरः, सरः, ऊधः, वक्षः, रक्षः, तपः, पयः। एवमन्येऽपि [विहायः संरीप्सितलिङ्गत्व] ईयसन्तोऽर्थवत्। श्रेयान् पुमान्, श्रेयसी स्त्री, श्रेयः कुलम् इति। वेधोजरसोरिह प्रतिषेधः। वेधसो धातृवाचकत्वात् पुंस्त्वम्- अयं वेधाः धाता। जराशब्दस्य जरसा स्त्रीत्वम्- इमां जरसं पश्य इति। पुंसीत्यधिकारात् पुँल्लिङ्गमिति यावत्, प्रासङ्गिकत्वादन्तिमलिङ्गस्य॥

इदानीं यथाक्रममकारान्तान् दर्शयितुमाह--

**शाटककीटवराटकवण्टा निष्कुटवाटकवाटकिटाट्टाः।**

**जूटकटाहकटावटपट्टाः कण्टककङ्कटकोष्ठकुटाङ्काः॥१५॥**

एते शाटकादयः पुंसीत्यधिकृतमाप्रकरणसमाप्तेः। अयं शाटकः पटः। कीटः कृमिः। वराटकः कपर्दकः। वण्टः भागः। निष्कुटः गृहारामः। वाटः प्रदेशः वरण्टः

यवविकारः। कवाटः अटीत्तिः। किटः काण्डपटः। अट्टः क्षौममन्नं च। जूटः कचरचना समूहश्च। कटाहः पाकभाण्डम्। कटः करिकपोलः भाण्डपटश्च। अवटः अन्तरम्। पट्टः कौशेयम्। कण्टकः बदर्याद्यङ्गर्हः। कङ्कट: सन्नाहः। कोष्ठ: जठरान्तः अन्तगृहं च। कुटः घटः हलाग्रं च। अङ्कः चिह्नमुत्सङ्गं च।।।

**मण्डपमण्डवरण्डकगण्डा दण्डकदण्डगुडानकषण्डाः।**

**खण्डशिखण्डकपर्दकपिण्डा वर्गसमुद्गमृदङ्गतरङ्गाः॥१६॥**

एते पुंसि। अयं मण्डपः आवासविशेषः। मण्डः सर्वस्याग्रम्, पक्वान्नरसविशेषश्च। वरण्डकः परिवारः। गण्डः कपोलः। दण्डकः वृत्तविशेषः । दण्डः लकुटः दुष्टदमनं च। गुडः इक्षुविकारः गुळकश्च। आनकः पटहः। षण्डः वृक्षादिसङ्घः। खण्डः शकलम् इक्षुविकारश्च। शिखण्डः कलापः। कपर्दकः वराटकः। पिण्डः देहः मृदादिवर्त्तितो देशश्च। वर्गः यवादिसङ्घः। समुद्गः करण्डविशेषः। मृदङ्गः मुरजः। तरङ्गः कल्लोलः॥

**गर्त्तमुहूर्त्तवतंसककोशाः कर्णपणौ कणकङ्कणकोणाः।**

**वङ्क्षणदर्पणबाणकिणांशाः शाणगणौदनशोणयवाद्याः॥१७॥**

एते शब्दाः पुंसि। अयं गर्तः श्वभ्रः। मुहूर्तः क्षणम्। वतंसकः अवतंसकोऽपि, कर्णपूरः शेखरश्च। अत्र,

"वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः।

हलन्तादपि टापं वा यथा वाचा दिशा क्षुधा'॥

इति पक्ष अकारलोपः। कोशः धननिचयः निधानं दिव्यविशेषश्च। कर्णः अरित्रं श्रवणं च। पणः [श्लाहाप? ग्रहः] परिमाणार्थश्च। कणः लेशः। कङ्कणः मङ्गलसूत्रम् आभरणविशेषः। कोणः अश्रिः वादनदण्डश्च। वङ्क्षणः ऊरुसन्धिः। दर्पणः आदर्शः। बाणः शरः। किणः निघर्षजः पिटकः। अंशः भागः। शाणः शस्त्रमार्जनपाषाणः। गणः पूगः। ओदनः भक्तः। शोणः नदः। यवाद्याः- इमे यवाः, व्रीहिविशेषः। आदिग्रहणात् गोधूमाः, माषाः, मसूराः, तिलाः, मुद्गाः, श्यामाकाः, नीवाराः, इत्येवमादयः।।

**सार्थवरूथनिशीथरथार्थप्रोथलवाः शपथावसथान्ताः।**

**सङ्घनिदाघघुणार्घनिघौघा विघ्नघटाङ्कुशगुल्मगुणोद्घाः॥१८॥**

एते शब्दाः पुंसि। अयं सार्थः पथिकसङ्घातः गणश्च। वरूथः रथगुप्तिः। निशीथः सुप्तजनता मध्यमरात्रिश्च। रथः स्यन्दनः। अर्थः काव्यशरीरम्, वार्तानिमित्तं

च धनम्, प्रयोजनम्, निवृत्तिश्च, अभिधेयं च। प्रोथः अश्वस्य घोणा, मध्यम्, वराहमुखं च। लवः लेशः। शपथः समयः। आवसथः गृहम्। अन्तः अवसानम्, मध्यं च। सङ्घः समूहः। निदाघः उष्णकालः। घुणः कृमिजातिविशेषः। अर्घः पण्यमूल्यम्, पूजाजलं च। निघः निमित्तम्। ओघः जलपूरः, समूहश्च। विघ्नः अन्तरायः। घटः कुम्भः। अङ्कुशः सृणिः गजतोत्रम्। गुल्मः रोगविशेषः जनसङ्घश्च। गुणः बहुप्रकारः-शीतोष्णादिद्रव्याश्रयः आयुर्वेदे तत्र तत्र प्रसिद्धः, सत्त्वादिः, शुक्लादिः, क्षान्त्यादिः, श्रुतादिश्च। उद्धः प्रशंसावचनम्॥

**झर्झरनूपुरबुद्बुदवप्राः कूबरमुद्गरदर्दुरहाराः।**

**तोमरशेखरशीकरसीरा मेढ्रतुषारखुराङ्कुरचुक्राः॥१९॥**

एते पुंसि। अयं झर्झरः वाद्यविशेषः। नूपुरः तुलाकोटिकम्, [काकोटिः?] भूषणविशेषश्च। बुद्बुदः जलविकारः। वप्रः क्षेत्रम्, प्राकाराग्रचयश्च। कूबरः युगः रथप्रदेशश्च। मुद्गरः अयोधनः। दर्दुरः वाद्यविशेषः। हारः कण्ठाभरणविशेषः। तोमरः शरविशेषः। शेखरः किरीटम्। शीकरः वातास्तं वारि। सीरः हलम्। अस्यान्ये पर्याया नपुंसके वक्ष्यन्ते। मेढ्रः लिङ्गम्। तुषारः प्रालेयम्। खुरः गवादिपदः। अङ्कुरः बीजप्रादुर्भावः। चुक्रः शुक्तम्। क्वाथपूर्वको हव्यसंस्कृतो योगविशेषः आयुर्वेदसिद्धः। शुक्रमित्यन्ये॥

**कक्षगवाक्षकटाक्षकषायाः पक्षखटक्षुपविद्रुमशष्पाः।**
**फेनजनक्षुरबाष्पतुषोषा भेषनिमेषकरीषनिपाताः॥२०॥**

एते पुंसि। अयं कक्षः तृणम्, काननमित्यन्ये। गवाक्षः वातायनम्। कटाक्षः अपाङ्गदृष्टिः स्त्रियाः। कषायः रसविशेषः। पक्षः मासार्धः खगाङ्गरुहश्च सहायश्च। खटः तृणम्। क्षुपः ह्रस्वशिरा विटपी। विद्रुमः प्रवालः। शष्पः बालतृणम्। फेनः जलमलम्। जनः लोकः। क्षुरः नापितभाण्डम्। बाष्पः ऊष्मा अश्रु च। तुषः धान्यकणः। ऊष ऊषरः। भेषः अन्तः रुक् नाशश्च। निमेषः कालपरिमाणम्। करीषः गोमयनिचयः। निपातः अव्ययम्।।

**स्यन्दनमस्तकपुस्तकपुस्ता धर्मरयोपलघर्मबुसार्माः।**

**तण्डुलतूलकुसूलचषालाः कम्बलसालकलापकपोलाः॥२१॥**

एते पुंसि। अयं स्यन्दनः रथः। मस्तकः शिरः। पुस्तकः ग्रन्थाधारः। पुस्तकः लेख्यः लेप्यश्च। धर्मः पुण्यम्। रयः वेगः। उपलः पाषाणः। घर्मः ऊष्मा निदाघश्च। बुसः यवादिनाळचूर्णः। अर्मः नेत्ररोगविशेषः। इदं नपुंसकमित्यन्ये। तण्डुलः धान्यसारः।

तूलः कार्पासः शल्मलिश्च। कुसूलः मृद्भाण्डम्। चषालः यज्ञयूपकटकम्। कम्बलः अविमयप्रावरणम्, वल्लकः, सास्ना च। सालः प्राकारः वृक्षविशेषश्च। कलापः समूहः शिखण्डश्च। कपोलः गण्डः॥

**रेफकफज्वरसंयुगसङ्ख्याः**

**स्तम्बनितम्बमदच्छदपुङ्खाः।**

**वस्त्रदशा विटपः पटहार्भ**

**व्रातपटा पिटकः करटश्च॥२२॥**

एते पुंसि। अयं रेफः रथः अनवद्यं च। कफः श्लेष्मा। ज्वरः रोगः। संयुगः रणम्। सङ्खः रणमेव। स्तम्बः वृक्षादिकाण्डः, आळानं च। नितम्बः कटिपश्चाद्भागः। मदः धन-विद्या-स्वजनादिकृतो दर्पः, रोगविशेषश्च। छदः छादनम्। पुङ्खः शरवृन्तः। वस्त्रदशाः वस्तयः। अस्य नित्यबहुत्वमग्रे वक्ष्यति। चन्द्रस्यायं त्रिलिङ्गेऽपि। अन्यो दशाशब्दः स्त्रियाम्- इयं दशा आयुषो भागः। अस्याकारान्तत्वात् स्त्रीत्वम्। विटपः लता गुल्मः। पटहः आनकः। अर्भः शिशुः। व्रातः सङ्घः। पटः प्रावरणम्। पिटकः स्फोटः भाण्डविशेषश्च। करटः करिकपोलः काकश्च॥

**पिण्याककूपव्रजयूपसूपप्राग्वंशवंशह्लदशोकशूकाः।**

**सीमन्तकुन्तध्वजकुन्दकूर्चलौहित्यकल्पा जवदर्भगर्भाः॥२३॥**

एते पुंसि। अयं पिण्याकः खलिः। कूपः निपानम्। व्रजः गणः गोकुलं च। यूपः यज्ञाङ्गम्, हलोपकरणं च। सूपः मुद्गादिव्यञ्जनम्। प्राग्वंशः प्राश्यविग्रहः। वंशः कुलं वेणुश्च। ह्लदः जलाशयः। शोकः विषादः। शूकः किशारुः। सीमन्तः शिरसि परा कचरचना। कुन्तः प्रासः। ध्वजः चिह्नम्। कुन्दः पुष्पविशेषः। कूर्चः श्मश्रु, कुविन्दभाण्डं च। लौहित्यं तटविशेषः। कल्पः विधिः, ब्रह्मणोऽहोरात्रं च। जवः वेगः। दर्भः बर्हिः। गर्भः भ्रूणः।।

**पाषाणपूगावितरोऽक्षशब्दः**

**खार्थादपूपः कुणपः सपूयः।**

**स्कन्धः पुरोडाश उपघ्नशूर्प**

**मञ्चाळका बल्बजलाजभावाः॥२४॥**

एते पुंसि। अयं पाषाणः अश्मा। पूगः गणः। खार्थादिन्द्रियार्थादितरः अन्यः अक्षशब्दः पुंसि। यथा- अयं यानाक्षः शकटाक्षः। अक्षाः प्रासकाः। खार्थादिति किम्?

इमान्यक्षाणीन्द्रियाणि। अपूपः पिष्टकृतः। कुणपः शवः सपूयः सह पूयशब्देन। स्कन्धः अंसः प्रकाण्डं च। पुरोडाशः अग्निहोत्रे पिष्टपिण्डः। उपघ्नः आश्रयः। शूर्पः मानम्, प्रस्फोटनम्, धूपनभाण्डं च। मञ्चः खट्वा, राजासनं च। अळकाः स्त्रीललाटसङ्गिनः केशाः। बल्बजास्तृणजातयः। लाजा भ्रष्टा व्रीहयः। भावः भागः स्तम्बकः स्त्रीशृङ्गारचेष्टा च॥

**नाडीव्रणो जनपदाभिजनावपाङ्ग-**

**निर्यूहयानयुगमोदकतर्ककल्काः।**

**केदारवेगदिवसाश्चमसप्रवाळौ**

**वल्मीकताळकललास्तरलः सकीलः॥२५॥**

एते पुंसि। नाडीपूर्वो व्रणशब्दः पुंसि। यथा- नाडीव्रणः सरोगाङ्गे सुषिरम्। केवलस्तूभयलिङ्गे वक्ष्यते। जनपदः देशः। अत्र जनपूर्वः पदशब्दः पुंसि। केवलस्तु नपुंसके। यथा-पदम् इति। अभिजनः कुलं जन्मभूश्च। जनशब्दस्य यद्यपि पुंस्त्वं तथापि अभिपूर्वस्यासन्देहार्थं वचनम्। अपाङ्गस्तिलकः नेत्रान्तश्च। अत्रापि अपपूर्वोऽङ्गशब्दः, केवलाङ्गशब्दस्तु नपुंसके। यथा- अङ्गम् इति। निर्यूहः द्वारमापीडम्, गृहदारु, घनश्च द्रव्यनिर्यासः। यानयुगः पुंसि, यानपूर्वः युगशब्दः पुंसि। केवलस्तु नपुंसके अन्यपूर्वश्च। यथा- युगम् युग्मम्, कृतयुगं च तुर्युगमित्यादि। मोदकः तिलगुडादिसंयोगः। तर्कः ऊहः। कल्कः पापम्, द्रव्यक्षोदश्च। केदारः तीर्थविशेषः, क्षेत्रं च। वेगः रयः। दिवसः दिनम्। चमसः द्रव्यभाण्डम्। प्रवाळः विद्रुमः, रत्नविशेषश्च। वल्मीकः मलूरः। तालः तरुविशेषः। दक्षिणापथे प्रसिद्धः, प्रमाणम्, गीतवाद्यविशेषश्च। कललः शुक्रशोणितमिश्रः। तरलः हारमध्यमणिः। सकीलः सह कीलेन वर्त्तत इति। कीलः शङ्कुः॥

**शृङ्गाराङ्गारकायाः कुतपकणरयोद्गीथ-**

**भृङ्गारकुम्भाः सङ्ग्रामग्रामयामाः।**

**पुटककळकळस्वप्रकापार्पासधूम्राः।**

**होमस्तोमान्तरायाः प्रहरककलशालक्तकाः**

**कुञ्जपुञ्जप्रस्थोपस्थोपसर्गस्तबक-**

**नरककस्तूपजम्भाम्बरीषाः॥२६॥**

एते पुंसि। यथा- अयं शृङ्गारः रसविशेषः। अङ्गारः दग्धदारु। कायः देहः। कुतपः छागलोमप्रावरणम्। कणरयः शरविशेषः। उद्गीथः प्रणवः सामध्वनिश्च। भृङ्गारः कनकाळका। कुम्भः घटः। सङ्ग्रामः रणः। ग्रामः जननिवासः समूहश्च। यामः प्रहारः। पुटकः भूर्जाद्यवयवः। कळकळः कोलाहलः। स्वप्नः सुप्तिः। कापसः तूलः। धूमोऽग्निचिह्नम्। होमः हवनम्। स्तोमः पुञ्जः समूहः क्रतुश्च। अन्तरायो विघ्नः। प्रहरकः यामः। कलशः कुम्भः। अलक्तकः यावकः। कुञ्जः वनगहनम्। पुञ्जः समूहः। प्रस्थः मानविशेषः सानुवाचकश्च। उपस्थः कर्मेन्द्रियविशेषः। उपसर्गः उपद्रवः प्रादिश्च। स्तबकः गुच्छः। नरकः निरयः। स्तूपः मृदादिसञ्चयः। जम्भः अशनम्, दैत्यविशेषश्च। अम्बरीषः भ्राष्टम्, ऋषिश्च।।

**इत्यदन्ताः परिसमाप्ताः।**

**ज्ञातिदृत्यतिथिसारथिवस्तिग्रन्थिपाणिमणयः क्रिमिकुक्षी।।**
**शालिकेळिकलयो बलिमौली ऊर्मिरञ्जलिपविध्वनिराशि॥२७॥**

एते पुंसि। अयं ज्ञातिः स्वजनः। दृतिः भस्त्रावाचकः शब्दः, एक एवायं पुंसि। अतिथिः अपूर्वकालाभ्यागतः। सारथिः सूतः। वस्तिः नाभेरधः। अस्या बहुत्वे वस्त्रदशावाचकत्वम्। ग्रन्थिः ++ग्रन्थलक्षणो का+विशेषः, पर्व, बन्धश्च। पाणिः करः। मणिः रत्नम्। केचिदस्य स्त्रीत्वमपीच्छन्ति– इयं मणिरिति। क्रिमिः कीटः। कुक्षिः उदरपार्श्वम्। शालिः धान्यजातिः। केळिः परिहासः। कलिः कलहः अन्त्ययुगं च। बलिरुपहारः, असुरश्च। मौलिः केशः किरीटं च। ऊर्मिस्तरङ्गः। चन्द्रस्यायं स्त्रियामपि। अञ्जलिपविध्वनिराशीति समाहारैकवद्भावः। अञ्जलिः करद्वयसम्पुटः। पविः वज्रम्। ध्वनिः शब्दः। राशि कूटः॥

**इतीदन्ताः।**

**त्सरुर्मरूर्वारुचरूरुमृत्यवः पुरुः पशुः शङ्कुहनू ययुर्गडुः।**
**कमण्डलुस्थाणुपलाण्डुलवः सतर्कुरिक्षुर्ऋतुसक्तवोऽसवः॥२८॥**

एते पुंसि। त्सरुर्मुष्टिः खड्गादेः। मरुर्गन्धः। उर्वारुः चिङ्गिढफलम्। चरुः भाण्डविशेषः, हविष्यं च। ऊरुः जानुवङ्क्षरणान्तरम्, सक्थि। मृत्युः अन्तकः। एष स्त्रीपुंसयोर्व्याडेः। पुरुः यज्ञः, लोपः। पशुः गवादिः। शङ्कुः कीलकः। हनुः मुखैकदेशः। स्त्रीपुंसयोरयं चन्द्रस्य। ययुरश्वः। गडुः मुखरोगः। कमण्डलुः मुनिकुण्डिका। स्थाणुः छिन्नशाखो वृक्षः, शम्भुश्च। पलाण्डुः लशुनप्रकारः। पीलुः कालकम्, हव्यविशेषश्च। सतर्कुः सह तर्केण वर्त्तत इति सतर्कुः सूत्रवेष्टनम्, अग्न्याधानभाण्डम्। इक्षुः

गुडादिप्रकृतिः। ऋतुः वसन्तादिः। सक्तवः यवपिष्टविशेषः। असवः प्राणाः। एतयोर्नित्यबहुत्वं वक्ष्यते॥

**रेणुवेणुबिन्दुकन्दुकम्बुकन्तुजन्तुतन्तु।**

**पांसुपीलुसेतुधातुमन्युमायुपायुजायु॥२९॥**

[उदात्ता एते पुंसि।] एषां समाहारैकवद्भावः। अयं रेणुः रजः। वेणुः वंशः। बिन्दुः जललवः। कन्दुः पाकस्थानम्। कम्बुः शङ्खः। कन्तुः कोष्ठकम्। जन्तुः प्राणी। तन्तुः सूत्रगुणः। पांसुः धूळिः। पीलुः श्लेष्मातकः। सेतुः जलसङ्क्रामः। धातुः रसादिः, गैरिकादिः, भूवादिश्च। मन्युः सङ्ग्रामः, कोपश्च। मायुः पित्तम्। पायुः गुदम्। जायुः औषधम्॥

इत्युदन्तान् दिङ्मात्रं प्रदर्श्याधुना अतिव्याप्तिं प्रदर्शयितुमाह-

**स्नायुश्मश्र्वादितोऽन्येऽपि समासेऽह्नो यथा द्व्यहः।**

**रात्रिश्चायमहोरात्रः पन्था मन्था वणिक् तथा॥३०॥**

स्नायुश्मश्र्वादयः नपुंसके। एभ्यो येऽन्ये उकारान्ताः तेऽपि पुंसि। यथा- अयं नाकुः वलीकम्। अयं पिचुः कार्पासः। अयं वसुः नदं देशश्च तत्सामीप्यात्। किंशारुः धान्यशूकः। जायुः उल्बम्। मयुः लोष्टमर्दनकाष्ठः, आकूतश्चेत्येवमादयः। समासे ह्नो यथा द्व्यहः। अहन्शब्दो नान्तत्वात् नपुंसके उक्तः समासे पुंसि भवति। यथा- अयं द्व्यहः, त्र्यहः, पूर्वाह्नः, मध्याह्नः, अपराह्नः। रात्रिश्चेत्यादि। रात्रिशब्दः स्त्रीलिङ्ग उक्तः; समासे तु पुंसि भवति। यथा- अयमतिरात्रः, अहोरात्रः, मध्यरात्रः, गणरात्रः, इत्यादि। "रात्राह्नाहाः पुंसि" (पा०सू० २–४–२९) इति पुंस्त्वम्। पन्था मन्था वणिक्तथा। अयं पन्थाः मार्गः। "अपथं नपुंसकम्" (पा०सू० २-४-३०) इति। मन्था मथनदण्डः। वणिक्किराटः। तथेत्यनेन एवम्प्रकारा उपात्ताः। भिषक् परिव्राट् इत्येवमादयः पुंसि स्पष्टत्वान्न दर्शिताः।।

**श्रीचेष्टाद्याश्च निर्यासा इमनन्तो यथाणिमा।**

**घञ्प्रत्ययो यथा योग एरज्जयनयौ यथा॥ ३१॥**

श्रीचेष्टा आदिः येषां ते श्रीचेष्टाद्याः निर्यासा निःस्रवाः गन्धद्रव्याणि पुंसि। यथा- अयं श्रीचेष्टः निर्यासविशेषः, कपूरः सर्जरसः। हिङ्गुगुग्गुल्वोरुकारान्तत्वात् सिद्धम्। इदानीं प्रत्ययद्वारेण दर्शयन्नाह– इमनन्तो यथाणिमा। इमन् अन्तो यस्य सः

इमनन्तः पुंसि। यथा- अयं अणिमा, महिमा, गरिमा, लघिमा, प्रथिमा, शोणिमा, शुक्तिमा चेत्यादि। "पृथ्वादिभ्य इमनिज्वा" (पा०सू० ५-१-१२२) इति इमनिच्प्रत्ययः। घञ्प्रत्ययो यथा योगः। घञ्प्रत्ययः पुंसि भवेत्। यथा- अयं रोगः, यागः, पाकः, भेदः, छेदः, प्राकारः, प्रासादः, प्रसादः, विहारः, इत्येवमादयः। वाकादयोऽप्येवमेव। अनुवाकः सूक्तम्, पाकः इत्यादि। एवं एरज्जयनयौ यथा। एरच् "इवर्णान्ताद्धातोरच्प्रत्ययः"। यथा-जि जये, अयं जयः, नयः, वयः, पयः, नवः, सुश्रयः, प्रणयः, क्षयः, लयः, प्रलयः, आशयः, प्रशयः, अतिशय इत्येवमादयः॥

**अप्प्रत्ययः करो यद्वदथ्वन्तो नन्दथुर्यथा।**

**नङ्प्रत्ययो यथा प्रश्नः क्यन्तः सन्धिर्निधिर्यथा॥३२॥**

अप्प्रत्ययः करो यद्वदिति। "ऋदोरप्" (पा०सू० ३-३-५७) ऋवर्णान्तादुवर्णान्ताच्च धातोरप्प्रत्ययो भवति। यथा- अयं करः, कृ विक्षेपे, भरः, जरः, हरः, तरः, गरः, चरः। उवर्णान्तात्- अयं लवः, लू छेदने, भवः, प्रसवः, स्तवः, प्लवः, पवः। "ग्रहवृदृनिश्चिगमश्च" (पा०सू० ३-३-५८) इत्येतेभ्योऽप्प्रत्ययः। यथा- अयं ग्रहः, दरः, वरः, निश्चयः, गमः। "उपसर्गेऽदः" (पा०सू० ३–३–५९)। प्रधसः, विघसः। एवमन्येऽप्यप्प्रत्ययान्ताः। अथ्वन्तो नन्दथुर्यथा। अथुच् अन्तो यस्य सः अथ्वन्तः पुंसि। "ट्वितोऽथुच्" (पा०सू० ३-३-८९) ट्व्यनुबन्धत्वात् अथुच्प्रत्ययः। नन्दथुः। आनन्दः। टुणदि समृद्धौ। वेपथुः, वेपृ कम्पने। श्वयथुः टुओश्वि गतिवृद्ध्योः। क्षवथुः टुक्षु शब्दे। एवमादयोऽथुच्प्रत्ययान्ताः। नङ्प्रत्ययो यथा प्रश्नः। नङ्प्रत्ययः पुंसि। यथा- अयं प्रश्नः, प्रज्ञः, विघ्नः, यत्नः, इति। "यजयाचयत०" (पा०सू० ३–३-९०) इत्यादिना नङ्प्रत्ययः। याच्ञाशब्दस्य स्त्रीत्वमिष्यते। क्यन्तः सन्धिर्निधिर्यथा। किप्रत्ययान्तः शब्दः। "उपसर्गे घोः किः" (पा०सू० ३-३-९२) इति किप्रत्ययः। यथा- अयं सन्धिः सन्धानम्, जलधिः, अब्धिः, अम्बुधिः, वालधिः पुच्छम्, अन्तर्धिः कोष्ठागारम्, आदिः प्रथम इत्यादयः।।

**कुटयादे रो डुपच् कुत्वा ह्रस्वे स्वार्थेऽपि पुंस्यम्।**

**कुटीरोऽयं शमीरोऽयं शुण्डारः कुडुपो यथा॥३३॥**

कुट्यादे रप्रत्ययः, कुत्वाड्डुपच्प्रत्ययः। अमू एतौ ह्रस्वे द्योत्ये स्वार्थेऽपि विहितौ पुंसि भवतः। यथा- अयं कुटीरः, शमीरः, शुण्डारः। अयं कुडुप इति। “कुटी-शमी-शुण्डाभ्यो रः” (पा० सू० ५-३-८८) इति रप्रत्ययः। “कुत्वा डुपच्” (पा०सू० ५-३ ८९) इति डुपच्प्रत्ययः। ह्रस्वा कुटी कुटीरः। एवमन्ये ह्रस्वाः। [कृत्स्नः प्रस्थः।] कुतुपः चर्ममयस्नेहभाजनम्। कुटीरादिवचने स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्ते इति स्वार्थिकत्वेऽपि पुँल्लिङ्गता। एवं देव एव देवता, ओषधिरेवाषधम्, कर्म एवं कर्म इत्यादि। पुंसीत्यनुवर्तमाने पुनः पुंसीति वचनात् उरच्छदः, दन्तच्छदः, आकारः, गोचरः, वहः, निगमः, इत्येवमादयः घप्रत्ययान्ताः पुंसि। “पुंसि सञ्ज्ञायां घः प्रायेण” (पा०सू० ३-१-११८) इति पुंस्येवोक्तत्वात् इह पुनर्नोक्ता॥

**नखमखगळगुल्फस्वर्गदेवासुराणां**
**कचकुचपरशूनामब्दपङ्कासिमासाम्।**
**ऋतुघननगदन्तद्विट्कराङ्घ्र्यब्धिदोषां**
**विषविषयशरोष्ठप्रग्रहाणां तथाख्याः॥ ३४॥**

एषां नखादीनां शब्दानामाख्यानामान्यपि पुंसि भवन्ति। तत्र यथा नखाः- करजाः, कररुहाः, इत्यादयः। नखशब्दः पुन्नपुंसकयोरेकेषाम्। मखश्च– अयं मखः, अध्वरः, सवः, इत्यादयः। क्रतुः सप्ततन्तुश्च उदन्तत्वात् सिद्धम्। यज्ञशब्दस्य वचनं नङ्प्रत्ययान्तत्वात्। वाजपेय-राजसूययोर्नपुंसकता वक्ष्यते। गळस्य– अयं गळः, कण्ठः। ग्रीवाशब्दस्याकारान्तत्वात् स्त्रीत्वम्। गुल्फस्य- अयं गुल्फः पादसन्धिः। स्वर्गस्य- अयं स्वर्गः, त्रिदिवः। स्वरित्यव्ययम्। त्रिविष्टपस्य नपुंसकतेष्यते। देवानाम्- अमराः, सुराः, गीर्वाणाः, मरुतः, इत्यादयः। असुराणाम्- इमे असुराः, पूर्वदेवाः, दितिजाः, दैत्याः, शुक्रशिष्याः, पातालनिलयाः, दनुजा इत्येवमादयः। कचानाम्- इमे कचाः, केशाः, वालाः, अस्राः, इत्येवमादयः। अस्यास्रवाचकस्य नपुंसकता वक्ष्यते। कुचयोः- कुचौ, स्तनौ, उरोजौ, वक्षोजौ इत्येवमादयः। परशोरुकारान्तत्वात् स्त्रीत्वं सिद्धम्। तन्नाम्नोऽत्र- अयं कुठारः, स्वाधतिः इत्यादयः। अब्दस्य– अब्दः, वत्सरः इत्यादि। वर्षसमाप्रावृट्छरदामपि पुंस्त्वे प्राप्ते, वर्षशब्दस्य नपुंसकत्वम्।

समाशब्दस्याबन्तत्वात् स्त्रीत्वम्। प्रावृट्छरदोः स्त्रीत्वम्, शिशिरशब्दस्य नपुंसके वचनम्। पङ्कस्य- अयं पङ्कः, कर्दमः, इत्यादयः। असेः- अयमसिः, खड्गः, कृपाणः, इत्यादयः। मासानाम्- अयं कार्तिकः, मार्गशीर्षः, पुष्यः, माघः, इत्येवमादयः। ऋतूनाम्-अयं वसन्तः, ग्रीष्मः, हेमन्तः। (वर्षाशब्दस्याकारान्तत्वात् स्त्रीत्वम्। प्रावृट्छरदोः स्त्रीप्रकरणपाठात्। शिशिरशब्दस्य नपुंसके वचनम्)। घनस्य– अयं घनः, वलाहकः, जलदः, इत्यादयः। अभ्रशब्दस्य नपुंसकत्वं वचनात्। नगस्य- अयं नगः, गिरिः, [स्तम्भश्च द्वयोरेव ग्रहणम्।] शैलः, पर्वतः इत्यादयः। गन्धमादनस्य नपुंसकता वक्ष्यते। दन्तस्य- अयं दन्तः, द्विजः, रदः, इत्यादयः। द्विषः- अयं द्विट्, अरिः, शत्रुः, इत्यादयः। करस्य– अयं करः, पाणिः, हस्तः, इत्यादयः। अब्धेः- अयमब्धिः, समुद्रः, अर्णवः, उदन्वान् इत्यादयः। जलध्यादीनां किप्रत्ययान्तत्वात् सिद्धम्। दोषः- अयं दोः, बाहुः, प्रचेष्टम्, भुजः। भुजबाह्वोरुभयलिङ्गता वक्ष्यते। विषस्य- अयं विषः, क्ष्वेळः, गरः, मधुरकः, काळकूटः, विष्फुलिङ्गः, इत्यादयः। साक्षाद्विषस्य तु नपुंसकलिङ्गे पाठः विषमिति। विषयशब्दः सामान्यवचनः विषयाणाम्- अयं स्पर्शः, शब्दः, रसः, गन्धः इति। रूपशब्दस्य नपुंसके पाठः। अयं विषयः गोचरः। विषयशब्दो देशवाच्यपि पुंस्येव। इमे पाञ्चालाः, मागधाः, मत्स्याः, चेदिकाः, सुह्माः। कुन्त्यावन्तिवृष्ण्यादयोऽपि विषयवाचिनः। शराणाम्- इमे शराः, पृषत्काः, बाणाः, शिलीमुखाः, विशिखाः, इत्येवमादयः। इषुशब्दस्योभयलिङ्गता वक्ष्यते। काण्डशब्दस्य नपुंसके पाठः। ओष्ठस्य- अयमोष्ठः, दन्तच्छदः, इत्यादयः। प्रग्रहाणाम्- इमे प्रग्रहाः, रश्मयः, मयूखाः, घृणयः। अंशुभान्वोरुदन्तत्वात् सिद्धम्। दीधितेस्तु स्त्रियां पाठः। तथाग्रहणादन्येऽपि ये नपुंसके न वक्ष्यन्ते ते पुंसि वेदितव्याः।।

**॥इति भट्टभरद्वाजसूनोः पृथिवीश्वरस्य कृतौ**

**हर्षवर्धनकृतलिङ्गानुशासनटीकायां पुँल्लिङ्गप्रकरणम्।**

## ॥ अथ नपुंसकलिङ्गप्रकरणम् ॥

अथ नपुंसकलिङ्गा उच्यन्ते-

**त्रान्ता नपुंसके पुत्रवृत्राभित्रौपवस्त्रतः।**

**छात्राच्चान्ये तथा मन्त्रान्मित्रमन्यत्र भास्करात्॥३५॥**

त्रः अन्तो येषां ते त्रान्ताः, नपुंसके भवन्ति यत्र नान्य(कृता? क्रिया) तत्र भवत्यस्त्रीति योजयेत्। किं सर्व इत्याह- पुत्रवृत्रामित्रौपवस्त्रतः, छात्राच्चान्ये तथा मन्त्रादिति, पुत्रादिभ्यो येऽन्ये त्रान्तास्ते सर्वे नपुंसके। तद्यथा- इदं शास्त्रम्, छत्रम्, दात्रम्, पवित्रम्, लवित्रम्, गात्रम्, गोत्रम्, पत्रम्, पात्रम्, क्षेत्रम्, नक्षत्रम्, लोत्रम्, आतपत्रम्, खनित्रम्, तोत्रम्, वादित्रम्; पौत्रम्, पतत्रम्, वक्त्रम्, अस्त्रम्, नेत्रम्, स्त्रोत्रम्, तस्त्रम्, सूत्रम्, श्रोत्रम्, चित्रम्, चरित्रम्, कळत्रम्, अमितम् इत्यादि। पुत्रादीनां शब्दार्थयोर्भेदादतिव्याप्तिः प्राप्ता नपुंसकता प्रतिषिद्ध्यते। अयं पुत्रः अपत्यम्, वृत्रः अरिः दैत्यविशेषश्च। अमित्रः शत्रुः। उपवस्त्रः उपवासः। छात्रः शिष्यः। मन्त्रः षाड्गुण्यसम+नां+++++श्च। च शब्दस्यानुक्तसमुच्चयार्थत्वात् क्वचित् सपत्रनिष्पत्रौ च। तथा च वररुचिः– "ज्ञेयौ सपत्रनिष्पत्रौ' इति। विषयविभागेन परिभावयन्नाह- मित्रमन्यत्र भास्करादिति। मित्रशब्दो नपुंसके भास्करादन्यत्र यदि भास्करवाची न भवति। इदं मित्रं सुहृत्। अयं मित्रः भास्करः॥

**न्याय्ये सारमृतं सत्ये पुण्यं धर्मे कृतं युगे।**

**कर्मादौ कारकं कूटमराशौ ब्राह्मणं श्रुतौ॥३६॥**

न्याय्ये सारमिति। न्यायादनपेतं न्याय्यम्। तस्मिन् सारशब्दो नपुंसके। [जये धरित्र्याः पुरमेव सारं सारङ्गलोचना]। अन्यत्र चन्दनसारः। ऋतं सत्ये- सत्ये वर्तमानम् ऋतं नपुंसके। अन्यत्र ऋतः गतः अर्थवत्, ऋ गतौ। पुण्यं धर्मे– धर्मे वर्तमानः पुण्यशब्दो नपुंसके। पुण्यं धर्मः, अन्यत्र पुण्यो देशः। कृतं युगे- युगे कृतं नपुंसके। इदं कृतमादियुगम्। अन्यत्र तु कृतः। कर्मादौ कारकम्- कर्म-करणसम्प्रदानादिषु वर्तमानं कारकं नपुंसके। कर्म, करणम्, सम्प्रदानं वा। आदिशब्दस्य प्रकारवाचित्वादेतान्यपि कारकाणि कर्तृवर्जितानि नपुंसके ज्ञेयानि। इदं सम्प्रदानं कारकमधिकरणं चेति करणं वक्ष्यते। कर्मणो नान्यत्र तत्सिद्धम्। एतान्यपि सञ्ज्ञाद्युत्पत्तये कथ्यन्ते। कूटमराशौ- कूटं नपुंसके। अराशौ इति अराशिविषये वर्तमानः। इदं कूटमसत्यं दम्भो माया निश्चलं शृङ्गं च। अराशाविति किम् १ अयं कूटः राशिः धान्यकूटः, यवकूटः। ब्राह्मणं श्रुतौ श्रुतिविषये नपुंसकम्। इदं ब्राह्मणं कुलं श्रुत्यैकदेशश्च। अन्यत्र ब्राह्मणो द्विजः॥

**वीर्ये शुक्रं क्रतौ धर्मं वस्वसत्त्वे खलं तथा।**

**कुशं केऽनुमतौ काममकेशेऽस्त्रं परे परम्॥३७॥**

यथा- इदं शतम्, सहस्रम्, अयुतम्, लक्षम्, इत्यादयः। कोटिः स्त्रियामुक्तैव। रात्रिः सङ्ख्यादिका– रात्रिशब्दो सङ्ख्यापूर्वो नपुंसके। इदमेकरात्रम्, द्विरात्रम्, त्रिरात्रम्, चतूरात्रम्, पञ्चरात्रम्, षड्रात्रम्, इत्यादयः। सङ्ख्येति किम्? अन्यत्र- अयमहोरात्रः। स्थूणा गृहादूर्णा च नपुंसके; इदं गृहस्थूणम्, इदं शशोर्णम्। अन्यत्रेयं स्थूणा शालादिस्तम्भः। इयमूर्णा अविरोमा।।

इदानीं प्रत्ययद्वारेण दर्शयन्नाह-

**ष्यञ्प्रत्ययो यथा शौक्ल्यं जाड्यं ब्राह्मण्यमेव च।**

**अञ् यथाश्वं च कौमारं वुञ्यथा रामणीयकम्॥३९॥**

ष्यञ्प्रत्ययो यस्य सः ष्यञ्प्रत्ययः। ष्यञ्प्रत्ययसिद्धः शब्दो नपुंसके। यथा- इदं शौक्ल्यं शुक्लता। जाड्यं जडता। ब्राह्मण्यं ब्राह्मणता। एवं काष्र्ण्यम्, दार्ढ्यम्, मौढ्यम्, मौर्ख्यम्, कार्त्स्न्यमित्यादयः। “वर्णदृढादिभ्यः ष्यञ्च” (पा०सू० ५-१-१२३) उपरिष्टादत्रानुवर्तत एव। अञ् यथाश्वं च कौमारमिति। अञ्प्रत्ययान्तो नपुंसके। “प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञ्” (पा०सू० ५–१-१२९)। यथा- इदमाश्वम्, शाशम्, औष्ट्रम्, कौमारम्, केदारम्, औद्गात्रम्, प्रातिहतमित्यादि। वुञ् यथा- रामणीयकम्, साहायकम्। “द्वन्द्वमनोज्ञादिभ्यश्च" (पा०सू० ५-१-१३३) इति वुञ्। इदमाहिनकुलकम्, मानोज्ञकम्। सहायनटाभ्यां वा” (वार्त्तिकम्) इति वुञ्। साहायकम्, नाटकम्, इत्यादि॥

**ढग्यथा चारुकापेयमणन्तो यौवनं यथा।**

**छान्तो यथाच्छावाकीयं यान्तः सख्यं यथोदितम्॥४०॥**

ढक्प्रत्ययो नपुंसके। यथा- चारुकापेयम् रम्यं चापमस्य कपेः। एवं ज्ञातावपि। “कपिज्ञात्योर्ढक्” (पा०सू० ५-१-१२७)। अणन्तो यौवनं यथा- अण्प्रत्ययान्तो नपुंसके। यथा- इदं यौवनम्। “हायनान्तयुवादिभ्योऽण्” (पा०सू० ५-१-१३०) द्विहायनस्य भावः कर्म वा द्वैहायनम्, यौवनम्, स्थाविरम्। इगन्तः- मार्दवम्,

लाघवम्, पाटवमित्यादि। छान्तो यथा– अच्छावाकीयम्, मैत्रावरुणीयम्। यान्तः सख्यं यथोदितम्। यप्रत्ययान्तो नपुंसके। सङ्ख्यम्। यथोदितं यथोक्तम्। "दूतवणिग्भ्यां च" (का०वृ० ५-१-१२६) इति यः। इदं सख्यम्, दूत्यम्, वाणिज्यम्। वणिज्याशब्दस्याकारान्तत्वात् स्त्रीत्वं सिद्धम्॥

**यग्यथा साधुनार्पत्यं सर्वेऽमी भावकर्मजाः।**

**समूहार्थाश्च भैक्षाद्याः त्वान्तो गोत्वमिदं यथा॥४१॥**

यक्प्रत्ययो नपुंसके। यथा- साधुनार्पत्यम्। "पत्यन्तपुरोहितादिभ्यो यक्" (पा०सू० ५-१-१२८) । नार्पत्यम्, प्राजापत्यम्, सेनापत्यम्, पौरोहित्यम्, इत्यादि। सर्वेऽमी भावकर्मजाः– अमी ष्यञादयो यप्रत्ययाः प्रागुक्ता भावे कर्मणि च भवन्ति। यथा- शुक्लस्य भावः कर्म वा शौक्ल्यम्। जडस्य भावः कर्म वा जाड्यम्। ब्राह्मणस्य भावः कर्म वा ब्राह्मण्यम्। अश्वस्य भावः कर्म वा आश्व्यम्। कवेर्भावः कर्म वा काव्यम्। इत्येवमाद्यन्यत्रापि वाक्यं विचेयमिति। समूहार्थाश्च भैक्षाद्याः- "तस्य समूहः" इत्येतस्मिन्नर्थे ये भैक्षाद्याः शब्दाः ते नपुंसके भवन्ति। "तस्य समूहः" (पा०सू० ४–२-३७), "भिक्षादिभ्योऽण्" (पा०सं० ४–२–३८)। भिक्षाणां समूहो भैक्षम् इत्यादि। "गोत्रोक्षोष्ट्रोरभ्रराजराजन्यराजपुत्रवत्समनुष्याद्वुञ्" (पा०सू०४–२–३९)। गोत्रात्तावदौपगव-मित्यादि। औष्ट्रकम्, औरभ्रकम्, राजकम्, राजन्यकम्, राजपुत्रकम्, वात्सकम्, मानुष्यकम्, आजकम्। "केदाराद्यं च" (पा०सू० ४–२–४०)। कैदारिकम्। कैदार्यम्। गाणिक्यं गणिकानां समूहः। "ढञ् कवचिनश्च" (पा०सू० ४-२-४१)। कावचिकम्। "ब्राह्मणमाणववाडवाद्यत् (पा०सू० ४-२-४२)। ब्राह्मण्यम्, माणव्यम्, कापोतम्, मायूरम्, वाडव्यम्। "चरणेभ्यो धर्मवत्" (पा०सू० ४-२-४६)। कठानां धर्मः समूहो वा काठकम्, कालापम्, छान्दोग्यम्। "अचित्तहस्तिधेनोष्ठक्" (पा०सू० ४–२–४७)। आपूपिकम्, हास्तिकम्, धैनुकम्। "केशाश्वाभ्यां यञ्छावन्यतरस्याम्" (पा०सू० ४–२–४८)। केशीयम्, कैश्यम्, कैशिकम्, आश्वम्, अश्वीयमिति। त्वान्तो गोत्वमिदं यथा। त्वप्रत्ययान्तो नपुंसके। "तस्य भावस्त्वतलौ" (पा०सू० ५–१-११९) इति त्वप्रत्ययः। यथा- इदं गोत्वम्, पशुत्वम्, ब्राह्मणत्वमित्यादि॥

**भावे नपुंसकत्वं चेत्येष पाणिनिचोदितः।**

**प्रियेणेह स्थितं भुक्त मासितं शयितं तथा॥ ४२॥**

क्तान्ता नपुंसके भवन्ति, पाणिनिनैवमुक्तम्। प्रियेण स्थितमित्यादि॥

**अकर्तरि तथानन्ताः शासनं शयनं यथा।**

**उसन्ता धनुराद्याः स्युरिसन्ताः सर्पिरादयः॥ ४३॥**

अनप्रत्ययान्ता अकर्तरि नपुंसके। "करणाधिकरणयोश्च (पा०सू० ३-३-११७) इति ल्युट्। "युवोरनाकौ" (पा०सू० ७-१-१) इत्यनादेशः। यथा- इदं शासनम्, शयनम्। एवं यानम्, दानम्, आदानम्, करणम् इत्यादयः। अन्यत्र कर्तर्यनन्ताः पुंसि- दहतीति दहनः, ज्वलनः, पवनः, मधुसूदनः, आनन्दवर्धनः, इत्यादयः। तथाग्रहणात् पुण्यसुदिनाभ्यामह्नो नपुंसकत्वम्- पुण्याहम्, सुदिनाहम्। क्रियाविशेषणानां च– पटु पचति, शोभनं पचति, साधु गच्छति। उसन्ता धनुराद्याः स्युः- उस् अन्तो येषां ते उसन्ताः, धनुराद्यो येषां ते धनुराद्याः नपुंसके स्युः। (गभे पेयुः जाने तसि?)। "अर्तिपृवपियजितनिधनितपिभ्यो नित्" (उ०सू०), अरुः, परुः, वपुः, यजुः, तनुः, धनुः, तपुः, इत्येवमादयः। इसन्ताः सर्पिरादयः- इस्प्रत्ययान्ता नपुंसके। "अर्चिशुचिहुसृपिछादिछर्दिभ्य इसिः" (उ० सू०)। इदं सर्पिः, शोचिः, छदिः, छर्दिः। अर्चिश्शब्दस्योभयलिङ्गता वक्ष्यते॥

**इति प्रत्ययान्ता उक्ताः।**

इदानीमकारान्तान् दर्शयितुमाह-

**कौतुकचूचुकचित्रकशाकं रूपकदीपकवार्तिकतोकम्।**

**उल्मुकशुल्कसमीकमनीकं क्षारककोरकमौक्तिकवल्कम्॥ ४४॥**

कौतुकं च चूचुकं च एतयोः समाहारैकवद्भावः। एवमन्यत्रापि समासो विधेयः। एते शब्दा नपुंसके। इदं कौतुकं कुतूहलम्, मङ्गलसूत्रं च। चूचुकं स्तनमुखम्। चित्रकं तिलकम्, द्रव्यविशेषश्च। शाकं वास्तुकादि, वृक्षवाचिनस्तु शाकस्य पुंस्त्वमुक्तम्। रूपकं काव्यालङ्कारविशेषः, हिरण्यमुद्रा च। दीपकं काव्यालङ्कारादिविशेषः। वार्त्तिकं भाष्यव्याख्यानकम्। तोकम् अपत्यम्। उल्मुकम् (अ ?म) ला(क?त)म्। शुल्कं राजग्राह्यो भागः। समीकं रणः। अनीकं सैन्यम्। क्षारकं मुकुळम्, भाण्डविशेषश्च। कोरकं मुकुळम्। मौक्तिकं मुक्ताफलम्। वल्कं तरुत्वक्॥

**दुःखसुखाङ्गदलिङ्गयुगाङ्गं घ्राणत्रिणेरिणपक्कणशृङ्गम्।**

**काकुदकन्दपदास्पदतुन्दं वृन्दमृधायुधयुद्धकुसीदम्॥ ४५॥**

एते शब्दा नपुंसके। इदं दुःखं कृच्छ्रम्। सुखम् आनन्दः। अङ्गदं केयूरम्। लिङ्गं चिह्नम्, शिश्नं च। युगं युग्मम्। अङ्गम् अवयवः, शरीरम्, कायश्च। घ्राणं नासा। त्रिणं (घटः?)। इरिणं ऊषरम्। पक्कणं चण्डालगृहम्। शृङ्गं विषाणम्, शिखरं च। काकुदं तालु। कन्दं मूलं सूरणादि। पदं स्थानम्, सुप्तिङन्तं च। आस्पदं प्रतिष्ठा। तुन्दम् उदरम्। वृन्दं निकरम्। मृधं रणः। आयुधं प्रहरणम्। युद्धं सङ्ग्रामः। कुसीदं हिरण्यादिप्रयोगवृद्धिजीवनम्॥

**पौतवदैवशरावशवोल्बं भेषजबीजविषांशुकसान्त्वम्।**

**किल्बिषकल्मषवर्षपुरीषं साध्वससाहसकीकसकिण्वम्॥४६॥**

एते शब्दा नपुंसके। इदं पौतवं द्रव्यम्, +++ (इत्यर्थः)। दैवं प्राकृतं कर्म। शरावं वर्धमानकम्। शवं मृतशरीरम्। उल्बं जरायुः। भेषजमौषधम्। बीजं वप्तिद्रव्यम्, मन्त्राद्यक्षरविशेषश्च। विषं मधुरकम्। अस्यान्ये पर्यायाः पुंस्युक्ताः। अंशुकं प्रावरणम्। सान्त्वं प्रियवाक्यम्। किल्बिषं पापम्। कल्मषं पापमेव। वर्षं संवत्सरः, भारतादिवर्षं च। पुरीषं विट्। साध्वसं भयम्। साहसं दुष्करं कर्म। कीकसमस्थि। किण्वं दुन्दु(हम्), सुराद्रव्यं च, द्रव्यविशेषश्च॥

**अग्रकलेबरपारमपारं चत्वरचामरचीवरचीरम्।**

**तीरकरीरशरीरमुशीरं क्षीरककुन्दरजीरमगारम्॥४७॥**

एते शब्दा नपुंसके वर्तन्ते। अग्रे प्रान्तः। कलेबरं शरीरम्। पारं नद्यादेः समाप्तिः। अपारम् अएवाक्तीरम्। चत्वरं चतुष्पथः। चामर व्यजनम्। चीवरं भिक्षुवसनम्। चीरं मुनिवासः। तीरं कूलम्। करीरं घटः, वंशाङ्कुरं च। अस्य तरुवाचिनः पुंस्त्वमेव। शरीरं देहः। उशीरं गन्धद्रव्यम्। क्षीरं पयः। ककुन्दरं नितम्बकूपकः। जीरमजा(जी?दि)। अगारं गृहम्।।

**द्वापरकेसरगोपुरवैरं पञ्जरमन्तरमम्बरराष्ट्रम्।**

**पुष्करमक्षरमूषरमभ्रं श्वभ्रमुपह्वरगह्वरचक्रम्॥४८॥**

एते नपुंसके। इदं द्वापर युगविशेषः। केसरं सिंहसटा। गोपुरं पुरद्वारम्। वैरं द्वेषः। पञ्जरं + + स्थानम्। अन्तरं मध्यम्, छिद्रं च। अम्बरं वासः। नभोऽभिधायिनोऽस्य नपुंसकता सिद्धैव। राष्ट्रं जनपदः। पुष्करं तीर्थविशेषः।

पद्मवाचिनोऽस्य नपुंसकता सिद्धैव। अक्षरं वर्णः। ऊषरम् इरिणः। अभ्रं मेघः। अस्यान्ये पर्यायाः पुंस्युक्ताः। श्वभ्रं प्रपातः। उपह्वरं रहः। गह्वरं प्रत्यन्तदेशः। चक्रम् आयुधविशेषः, कुलालचक्रम्, समूहः॥

**अङ्गणदंसनवेतनवस्त्रं गृञ्जनयोजनरत्नवितानम्।**

**चिह्नदिनाजिनमन्नमपानं सञ्जवनायनशिश्नखलीनम् ॥४९॥**

एते नपुंसके। इदमङ्गणं प्राङ्गणः। दंसनं सन्नाहः। वेतनं भृतिः। वस्त्रं वासः। गृञ्जनं पलाण्डुविशेषः। योजनमध्वप्रमाणविशेषः। रत्नं जातावुत्कृष्टम्, मणिश्च। वितानं चन्द्रोदयः, करञ्जकं शून्यं च। अस्य मुख्यस्य पुंस्त्वम्। चिह्नं लिङ्गम्। दिनं दिवसः। अजिनं मृगचर्म। अन्नं शाल्यादि यवादि। अपानं गुदः। सञ्जवनं चतुश्शालम्। अयनम् उत्तरदक्षिणदिगभिगमनं सूर्यादीनाम्। शिश्नं मेढ्रः। खलीनं खलिता॥

**जघनाञ्जनभाजनसारसनं सुहिनं सवनं भवनं भुवनम्।**

**व्यसनं व्यजनं वृजिनं मिथुनं पुळिनं लशुनं निधनं प्रधनम्॥५०॥**

एते नपुंसके। जघनं कट्याः पूर्वो भागः स्त्रियाः। अञ्जनं धातुद्रव्यं नेत्रप्रियम्। भाजनं भाण्डम्। सारसनं मेखला, अधोवसनग्रन्थनं च। तुहिनं तुषारः। सवनं कालः। भवनं गृहम्। भुवनं जगत्। व्यसनं मृगयादिव्यसनम्। व्यजनं चामरादि। वृजिनं पापम्। (कषायिनं खर्म्मख? चर्म च)। मिथुनं स्त्रीपुंसौ। पुलिनं द्वीपः। लशुनं पलाण्डुजातिः। निधनं मरणम्। प्रधनं रणः गवादिधनं च।।

**अजिरं पिठरं शिबिरं शिशिरं शिखरं बळिशं कुलकं कबकम्।**

**निकुरुम्बकुडुम्बकदम्बकभं चिबुकं बुकगैरिकबिम्बमघम्॥५१॥**

एते नपुंसके। इदमजिरं अङ्गणम्। पिठरं स्थाली। शिबिरं स्कन्धावार विशेषः। शिशिरं माघफाल्गुनौ। ऋतुवाचिनोऽन्ये पुंस्युक्ताः। शिखरं शृङ्गं गिरेः। बळिशं मत्स्यवेधनम्। कुळकं वृत्तपञ्चकादिविरचितं काव्यम्। कबकम् उद्भिदो द्रव्यविशेषः। निकुरुम्बः समूहः। कदम्बकं समूहः। कुडुम्बकं समूहः। भं नक्षत्रम्। चिबुकम् अधरस्याधः। बुकं पुष्पविशेषः। गैरिकं धातुविशेषद्रव्यम्। बिम्बं सूर्यादिमण्डलम्, द्रव्यानुकृतिश्च। अघं पापम्॥

**कुलकूलकुकूलदुकूलदलं हरितालपलालकपालपलम्।**

**छलकज्जलकुड्मललोलबलं शलशाड्वलशैवलशीलशिलम्॥ ५२।।**

एते नपुंसके। इदं कुलं वंशः समूहश्च। कूलं तीरम्। कुकूलं श्वभ्रम्, तुषाग्निश्च। दुकूलं वासोविशेषः। दलमर्धम्। वर्णवाचिनोऽस्य नपुंसकता सिद्धैव। हरितालं

धातुद्रव्यम्। पलालं धान्यनाळम्। कपालं शिरोऽस्थि। पलं कर्षचतुष्टयम्। मांसवाचिनोऽस्य नपुंसकता सिद्धैव। पलं मानविशेषश्च। छलं छद्म। कज्जलमञ्जनम्। कुड्मळं मुकुलम्। लोलं शिरःप्रावरणम्। बलं सहः, साधनं च। शलं श्वाविडङ्गरुहः। शाड्वलं नवतृणानि। शैवलं जलतृणम्। शीलं चारित्रम्। शिलं मणिः॥

**वललं गवलं शलले कबलं शकलं पटलं मुकुळं कमलम्।**

**स्थलजङ्गलमङ्गलमूलफलं सकुतूहलशल्मलनाळनळम्॥५३॥**

एते नपुंसके। इदं वललं तिलकल्कम्। गवलं महिषशृङ्गम्। कबलं ग्रासः। शललं श्वाविडङ्गरुहः। शकलं खण्डः। पटलं छदिः, समूहश्च। मुकुळं कोरकम्। कमलं पङ्कजम्। स्थलं निर्जलं स्थानम्। जङ्गलम् अरण्यम्। मङ्गलं प्रशस्तम्। मूलं कन्दम्। फलं शुभाशुभकर्मविपाकः, आम्रादि च। कुतूहलं कौतुकम्। सकुतूहलं सह कुतूहलेन वर्तत इति। शल्मलं होमः। नाळं पद्माद्याधानम्। सुषिरं काष्ठादिघटितं च। नळे नळम्॥

**स्थण्डिलमण्डलकुण्डलकुण्डं शम्बलमञ्चलवल्कलवल्कम्।**

**जापकयावकयुग्मतटाकं जालमहानसमङ्गुलचेलम्॥ ५४॥**

एते नपुंसके। इदं स्थण्डिलं भूः। मण्डलं देशः मर्यादाकृतं च। कुण्डलं (सप्ता? कर्णा)भरणविशेषः। कुण्डं वह्न्याधानस्थानविशेषः। शम्बलं पाथेयम्। अञ्चलं वस्त्रैकदेशः। वल्कलं दारुत्वक्। वल्कं दारुत्वगेव। जापकं कालेयकम्। यावकम् अलक्तकम्। युग्मं युगं पटादेः। तटाकं खनिः। जालम् आनायः समूहश्च। महानसं पाकस्थानम्। अङ्गुलं प्रमाणविशेषः। चेलं वस्त्रं गर्हितं च।।

**पातालशैवालहिमालवालकङ्कालसौवर्चलचक्रवाळम्।**

**लाङ्गूलमाभीलमुलूखलालं कोलाहलोद्दालतलान्तराळम्॥५५॥**

एते नपुंसके। इदं पातालं रसातलम्, बडवामुखं च। शैवालं शैवलम्। हिमं तुहिनम्। आलवालं आवार्यम्। द्रवतोऽम्भसो निवारणं वृक्षादेः। कङ्काळं कायास्थि, मृतशरीरं च। सौवर्चलं कृष्णलवणम्। चक्रवालं समूहः। लागूलं पुच्छम्। आभीलम् आभीरम् रलयोरविशेषात्। उलूखलं धान्यखण्डनभाण्डम्। अलं वृश्चिकपुच्छम्। कोलाहलं कळकळः। उद्दालं नदीपङ्कः। तलं स्थलम् ऊर्ध्वमधश्च। अन्तराल मध्यम्॥

**मालालजम्बालशिलावचूडमालीढहालाहलवाजपेयम्।**

**अष्टापदं कोटरराजसूयपीयूषवीतंसकवर्धमानम्॥ ५६॥**

एते नपुंसके। इदं मालं कपटः। अलम् अनर्थः। जम्बालं पङ्कः। अन्ये पङ्कवाचिनः पुंस्युक्ताः। शिलं कणिशम्। अवचूडं शेखरः। आलीढं प्रत्यालीढं च स्थानविशेषौ। हालाहलं विषम्। विषवाचिनोऽन्ये पुंस्युक्ताः। वाजपेयं यज्ञविशेषः। अन्ये यज्ञवाचिनः पुंस्युक्ताः। अष्टापदं चतुरङ्गफलकम्। कोटरं वृक्षादेः सुषिरम्, अभ्यन्तरं च। राजसूयं यज्ञविशेषः। एतावेव वाजपेय-राजसूयशब्दाविह। पीयूषममृतम्। वीतंसकं पञ्जरः। अत्र स्वार्थे कः छन्दोवशात्। वर्धमानं शरावः॥

**लोष्ठं मधूच्छिष्टकचीनपिष्टं शृङ्गाटकं संवननोदपाने।**

**त्रिविष्टपं वर्णकगन्धमादनं हैयङ्गवीनं मधुपर्ककार्म्णम्॥ ५७॥**

एते नपुंसके। इदं लोष्ठं मृत्पिण्डः। मधूच्छिष्टकं सिक्तम्। अत्रापि स्वार्थ एव कः। चीनपिष्टं सिन्दूरम्। शृङ्गाटकं चतुष्पथम्, जलजो द्रव्यविशेषश्च। संवननं (कार्म्णम् ) । उदपानं खनिः (?)। त्रिविष्टपं स्वर्गः। स्वर्गवाचिनोऽन्ये पुंस्युक्ताः। वर्णकं चन्दनम्। गन्धमादनं गिरिविशेषस्य नाम। गिरिवाचिनोऽन्ये पुंसि। हैयङ्गवीनं नवनीतम्। मधुपर्कं मध्वादि देवानामर्घ्यम्। कार्म्णं वशीकरणम्॥

**आतोद्यवाद्येन्द्रियगद्यपद्यनैपथ्यतथ्यं भयमूल्यमाल्यम्।**

**आश्चर्यतूर्याव्ययजन्यसैन्यसान्नाय्यपार्यालिकलास्यसस्यम्॥ ५८॥**

एते नपुंसके। इदमातोद्यं वाद्यसमुदायः। वाद्यं वादित्रम्। इन्द्रियं श्रोत्रादि। गद्यं वृत्तबन्धहीनम्। पद्यं वृत्तबद्धम्। नैपथ्यं वेषकल्पना। तथ्यं सत्यम्। भयं भीः। मूल्यं निदानम्। माल्यं स्रक्। आश्चर्यमद्भुतम्। तूर्यं वाद्यसमुदायः। अव्ययं चादि। जन्यं रणः। सैन्यं सेना। सान्नाय्यं हविः। (पा?वा)र्यं मानभाण्डम्। अळिकं ललाटम्। लास्यं कैशिकीवृत्तं नृत्तम्। सस्यं यवाद्यङ्कुरः॥

**अपत्यसत्योदरकाल्यकुल्यप्रालेयवीर्याररहव्यकव्यम्।**
**भाष्याज्यधिष्ण्यार्मुकशुष्मवाक्यधान्यांसशल्यं वलयोत्तरीयम्॥ ५९॥**

एते नपुंसके। इदमपत्यं सुतः । सत्यम् ऋतम्। उदरं जठरम्। काल्यं प्रातः। कुल्यमस्थि। प्रालेयं तुषारः। वीर्यं बलं शुक्रं च। अररं रणः। हव्यमन्नं देवविधौ। कव्यं पितृविधानमन्त्रमेव। भाष्यं व्याख्यानविशेषः। आज्यं घृतम्। धिष्ण्यं गृहम्, नक्षत्रं च, अग्निस्थानं च। अमुकं गजबन्धनम्। शुष्मं बलम्। वाक्यम् आख्यातकारकाव्ययम्। धान्यं व्रीह्यादि। अंसं स्कन्धः। शल्यं मेहान्तर्गतं शस्त्रम्। वलयं दन्तादिघटितं कङ्कणम्, समूहश्च। उत्तरीयं परिधानम्॥

**द्रव्यव्यळीकोडुपकुड्यनाट्यकेयूरकान्तारमलातहर्म्यम्।**

**श्मशानसोपानकुसुम्भपण्यमालानकालेयकमद्यमध्यम्॥ ६०॥**

एते नपुंसके। इदं द्रव्यं पृथिव्यादि। व्यळीकं मनोविघातकः। उडुपं तृणादिबन्धः, प्लवश्च। चन्द्रवाचिनोऽस्य पुंस्त्वम्। कुड्यं गृहभित्तिः। नाट्यं नृत्तम्। केयूरमङ्गदम्। कान्तारं सत्रम्, काननमित्यर्थः। अलातम् उल्मुकम्। हर्म्यं वेश्म। श्मशानं पितृवनम्। सोपानमधिरोहणं प्रासादादेः। कुसुम्भ[महारज]तम्। पण्यम्.......। आळानं हस्तिबन्धनस्तम्भः। कालेयकं जावकम्, रक्तचन्दनमित्यर्थान्तरम्। मद्यं माध्वीकादि। मध्यम् अन्तरम्, अन्तः॥

**ऐडूकशालूकवलीकनाकछत्राककिञ्जल्ककशाकमल्कम्।**

**वार्ताकमुर्वारुककन्दुकं कं प्रकाण्डकौपीनमनूकदुग्धम्॥ ६१॥**

एते नपुंसके। इदम् ऐडूकम् अन्तः सास्थिकं कुशम्। शालूकं नीलनलिनम्। वलीकं पटलान्तः। नाकं खं स्वर्गं च। स्वर्गवाचिनोऽस्य पुंस्त्वमपि। छत्राकम् उद्भिन्नो द्रव्यविशेषः। किञ्जल्कं केसरम्। कशाकं पृष्ठास्थि। वार्त्ताकं बहुबीजम्। उर्वारुकं कर्कटी। कन्दुकं गण्डुकम्। कं जलम्। प्रकाण्डं स्कन्धः, शस्त्रं च। कौपीनं गुदम्। अनूकं प्राग्जन्म। दुग्धं क्षीरम्॥

**आकूतपारतनिवीतनिमित्तपित्तवृत्तोपवीतनवनीतघृतामृतानि।**

**द्वैतोक्तभक्तपलितव्रततालवृन्तवृन्ताद्भुतं मरकतं पुततूस्तशुक्तम्॥६२॥**

एते नपुंसके। आकूतम् इङ्गितम्। पारतं रसविशेषः। उपवीतं यज्ञसूत्रं कण्ठलम्बितं निमित्तहेतुः प्रोद्धृते दक्षिणे करे। एवं प्राचीनावीतं वामकर उद्धृते। नवनीतं हैयङ्गवीनम्। घृतं सर्पिः। अमृतं पीयूषम्। द्वैतं नानात्वम्। उक्तम् एकाक्षरं छन्दः। अत्युक्तं द्व्यक्षरं छन्दः। भक्तम् ओदनम्। पलितं निशिताः केशाः। व्रतं नियमः। तालवृन्तं व्यजनम्। वृन्तं पुष्पनिबन्धनम्। अद्भुतमाश्चर्यम्। मरकतं मणिविशेषः। पुतं स्फिक्। तूस्त जरद्वस्त्रखण्डम्। शुक्तं चुक्रम्॥

**प्रादेशान्तं त्रपुसजवसालीकशिल्पानि तल्पं द्वन्द्वं द्वारं कुसुमकुलिशं पापरूपं सपुष्पम्।**

**भ्राष्टं स्तेयं सगुदककुदं विष्टपं बर्हनल्वं पार्श्वं पिञ्छं**

**कटककवचन्यक्षमन्दाक्षमृक्षम्॥६३॥**

एते नपुंसके। इदं प्रादेशान्तं प्रमाणविशेषः अवसानं च। अन्तश्शब्दस्य पुंस्त्वे प्राप्ते नपुंसके वचनम्। त्रपुसं हरीतकविशेषः। जवसं घासः। अलीकं मृषा। शिल्पं कारुकर्म। तल्पं शय्या, दाराश्च। द्वन्द्वं युग्मम्। कुसुमं पुष्पम्। कुलिशं वज्रम्। रूपं चक्षुविषयः। शेषविषयाणां पुंस्त्वमुक्तम्। सपुष्पं सह पुष्पेण वर्तत इति सपुष्प

कुसुमम्। भ्राष्टमम्बरीषः। स्तेयं चौर्यम्। सगुदं गुदेन सह वर्तत इति सगुदम्। गुदं पायुः। ककुदं चिह्नम्, कूटं च। विष्टपं जगत्। बर्हं कलापः। नल्वं शतप्रमाणम्। पार्श्वं शरीरैकदेशः। पिञ्छं कलापः। कटकं करभूषणम्, स्कन्धावारः, पर्वतैकदेशश्च। कवचं वर्म। न्यक्षं कात्स्न्यम्। मन्दाक्षं प्रेम। ऋक्षं भम्॥

**मुकुटशकटकिट्टं रिष्टदिष्टं ललाटं बिसकिसलयसिध्मं काष्ठकुष्ठं सपृष्ठम्।**

**रिणकरणकिरीटं तुत्थसिक्थोक्थतीर्थं शरणलवणनीडं तुण्डभाण्डाण्डकाण्डम्॥ ६४॥**

एते नपुंसके। इदं मुकुटं किरीटम्। शकटम् अनः। किटम् अयःकल्कम्। रिष्टम् अश्रेयः। दिष्टं दैवम्। ललाटम् अ(ळि१ळ)कम्। बिसं मृणाळम्। किसलयं नवाङ्कुरः। सिध्मं कुष्ठविकारः। काष्ठं दारु। कुष्ठं रोगराजः, गन्धद्रव्यविशेषः। सपृष्ठं पृष्ठेन सह वर्त्तत इति सपृष्ठम्। पृष्ठं पार्श्वम्, उपरि च। रिणं (धारणता) ग्राह्यं धनम्। करणं इन्द्रियम्, कारणविशेषः, कारकविशेषश्च। किरीटं मुकुटम्। तुत्थं चाक्षुषद्रव्यविशेषः। सिक्थं मधूच्छिष्टम्। उक्थानि सामविशेषाः। तीर्थं मुनिनिषेवितं जलम्, आगमः, विमानं च। शरणं गृहम्, पारायणं च। लवणं रसविशेषः, सैन्धवादिद्रव्यविशेषः। नीडं खगालयः। तुण्डं चञ्चुः। भाण्डे भाजनम्, अश्वाभरणं च। अण्डं खगादिगर्भधारणं पेशीकोश उच्यते। काण्डं शरः, अवसरः, प्रकरणं च॥

**इत्यदन्ताः।**

**कुङ्कुममांसखतक्ररताम्भश्छिद्रहिरण्यतमोऽब्जमनोऽक्ष्णाम्।**

**पर्णवनाननलोहहलासृक्क्राश्विकचापपुरां च तथाख्याः॥ ६५॥**

एषां कुङ्कुमादीनामाख्यानामान्यपि तद्वन्नपुंसके भवन्ति। कुङ्कुमस्य– इदं कुङ्कुमम्, काश्मीरम्, इत्यादि। मांसस्य- इदं मांसम्, पललम्, पिशितम्, आमिषम्, क्रव्यम्, इत्यादि। खस्य- इदं खमाकाशम्, गगनम, वियत्, विष्णुपदम्, इत्यादि। विहायसः पूर्वमुक्तमेव। तक्रस्य- इदं तक्रं मथितं व्यञ्जनम्। रतस्य- इदं सुरतम्, मैथुनम्, सङ्गम् इत्यादि। अम्भसः- इदम् अम्भः, नीरम्, पानीयम्, सलिलम्, कम्, इत्यादि। जलशब्दोऽनेकार्थत्वादर्थवद्भवति। अप्शब्दः स्त्रियाम्। छिद्रस्य– इदं छिद्रम्, रन्ध्रम्, विवरम्, इत्यादि। हिरण्यस्य- इदं हिरण्यम्, धनम्, सुवर्णम्, रूप्यम्, जातरूपम्, इत्यादि। तमसः- इदं तमः, निशीथम्, तमिस्रम्, अन्धकारम्, ध्वान्तम्,

इत्यादि। अब्जस्य– इदमब्जम्, पङ्केरुहम्, कुशेशयम्, पुण्डरीकम्, सरोजम्, पद्मम्, इत्यादि। मनसः- इदं मनः, चित्तम्, स्वान्तम्, मानसम्, इत्यादि। अक्ष्णः- इदमक्षि, नयनम्, लोचनम्, नेत्रम्, ईक्षणम्, इत्यादि। पर्णस्य- इदं पर्णम्, पलाशम्, दलम्, इत्यादि। वनस्य- इदं वनम्, काननम्, अरण्यम्, इत्यादि। आननस्य- इदम् आननम्, वदनम्, लपनम्, मुखम्, वक्त्रम्, आस्यम्, इत्यादि। लोहस्य- इदं पारशवम्, तीक्ष्णम्, ताम्रम्, सीसम्, इत्यादि। हलस्य- इदं हलम् लाङ्गलम्। सीरशब्दः पुंस्युक्तः। असृजः- लोहितम्, रुधिरम्, आस्रम्, आत्मजम्, क्षतजम्, इत्यादि। काञ्चिकस्य- इदं काञ्चिकम्, सौवीरम्, आरस्तलम्, तुषोदकम्, धान्याम्लम्, इत्यादि। चापस्य- इदं चापम्, कोदण्डम्, कार्मुकम्, इत्यादि। पुरः- इदं पुरम्, पत्तनम, दुर्गम्, कोट्यमित्यादि। साक्षात् पूरशब्दः स्त्रियामुक्तः। चशब्दात् पापस्यानुक्तानि दुरितदुष्कृतपातकादीनि, मञ्जीरस्याङ्गदस्य च नामानि नपुंसके नोक्तानीति चशब्दात्तेषु भवन्ति।

**श्मश्र्वश्रुयातुत्रपुजत्रुदारुकशेरुकुस्तुम्बुरुतुम्बुरूणि।**

**ताल्वालु जीवातु च वास्तुवस्तुमस्तूनि मध्वस्रुजतूनि जानु॥ ६६॥**

एते नपुंसके। इदं श्मश्रु व्यञ्जनम्। अश्रु बाष्पः। यातु रक्षः। त्रषु लोहविशेषः। जत्रु सन्धिः कक्षयोः। दारु काष्ठम्। कशेरु तृणविशेषः। कुस्तुम्बुरु धान्यकम्। ओषधावेष पुंसीत्येके। तुम्बुरु जम्बीरिका। तालु काकुदम्। आलु शाकविशेषः। जीवातु जीवनम्, अन्नम्, औषधं च। वास्तु गृहभूः। वस्तु पदार्थः। मस्तु दधिस्रुतिः। मधु माक्षिकम्। अस्य मासर्तुवाचिनः पुंस्त्वमुक्तम्। अ(स्रु?श्रु) बाष्पः। जतु लाक्षानिर्यासः। जानु अष्ठीवन्। चशब्दस्यानुक्तसमुच्चयार्थत्वात् अन्येऽप्युकारान्ता नपुंसके। इदं तितउ, शिग्रु शोभाञ्जनम्, शलालु गन्धद्रव्यम्॥

**इत्युदन्ताः॥**

**श्लेष्मोष्मतक्षपक्षोक्षपूषाश्मग्रावमज्जतः।**

**नान्तोऽन्यो द्व्यज्युवात्मार्व पाप्ममूर्धाध्वराजतः॥६७॥**

एते नपुंसके। श्लेष्मादिभ्यो योऽन्यो नान्तो नकारान्तो द्व्यच् द्विस्वरः स सर्वो नपुंसको भवति। तद्यथा- इदं लोम, नाम, व्योम, साम, चर्म, वर्म, धर्म, शर्म, प्रेम इत्येवमादयः। अहन्शब्दोऽपि नान्तः "अहन्" (पा०सू० ८-२-६८) इति रेफान्ततामापद्यते। श्लेष्मादयस्तु पुंस्येव। अयं श्लेष्मा कफः। ऊष्मा औष्ण्यम्,

समृद्धिश्च। तक्षा कारुः। पक्षा रोमराजिः। उक्षा वृषः। पूषा रविः। अश्मा पाषाणः, ग्रावा, खनिश्च। मज्जा अस्थिसारः। अस्य स्त्रीत्वमपीच्छन्त्येके। युवा तरुणः। आत्मा द्विविधः- भूतात्मा परमात्मा चेति। अर्वा हयः, कुत्सितश्च। पाप्मा पापम्। मूर्धा शिरः। अध्वा मार्गः। राजा नृपः। राजमज्जादीनां वचनं शब्दार्थ(कता? के) तद्दर्शनात्॥

**पृषज्जगदुदश्विच्च पुरीतच्च यकृच्छकृत्।।**

**स नपुंसकमित्यादि प्रोक्तं पाणिनिनैव च॥ ६८॥**

(पा० सू० २-४-१५–२५, ३०)

एते नपुंसके। पृषद् बिन्दुः। जगत् स्थावरजङ्गमो लोकः। उदश्वित् तक्रम्। तक्रार्थानां नपुंसकत्वेऽपि सिद्धं पुनर्वचनमसन्देहार्थम्। पुरीतत् आन्त्रम्। यकृत् काळमांसम्। शकृद्विष्ठा। एवमादिशब्दा नपुंसके। "स नपुंसकम्" इत्यादीनि प्रोक्तं कथितं भगवता पाणिनिनैव। तच्चेहावबोद्धव्यम्। चशब्दात् भासश्च । स नपुंसकम्- "यस्यायमेकवद्भावो विहितः स नपुंसकलिङ्गो भवतीति" (का०वृ० ५-४-१७)। [जपादिभ्यः काश्मम्] द्विगुः द्वन्द्वश्च, द्विगुरेकवचनम्, द्वन्द्वश्चेति [त्रिलिङ्गम् ] पञ्चगवम्, पञ्चरात्रम्, चतुर्युगम् इत्यादि समाहारद्विगुरेव च॥

**पाणिपादं शिरोग्रीवं हस्त्यश्वं दंशमक्कुणम्।**

**पुत्रपौत्रं श्वचण्डालं भ्रातृभार्यं तृणोपलम्॥ ६९॥**

**कुशकाशं व्रीहियवं द्वन्द्वश्चेत्येवमादिकम् (पा० सू०. २-४-२) ।**

**अधिस्त्र्यधिकुमारीदं पारेगङ्गं खलेयवम्॥ ७०॥**

**एवमाद्यव्ययीभावः (पा०सू० २-४-१८) शेषोऽनुक्तोऽत्र दृश्यते।**

**अन्यस्यार्थे पदस्यैष वर्तमानोऽभिधेयवत्॥ ७१॥**

**प्राक्पदार्थप्रधानस्त्वलिङ्गोऽयं स्यादतोऽन्यथा॥७१॥**

एषोऽव्ययीभावसमासोऽन्यस्य पदस्यार्थे वर्त्तमानोऽभिधेयवद्भवति। अभ्यङ्का गावः। प्रत्यङ्का गावः। अतोऽन्यथायं समासः पूर्वपदार्थप्रधानाच्चेद्भवति तदा लिङ्गं नपुंसकमित्यर्थः। इदम् उपकुम्भम्, अनुगीणम् इत्यादि।

**स्त्रीसभं शलभच्छायमिति तत्पुरुषोऽप्यनञ्।**

**अकर्मधारयस्तस्मिन्नपथं तु नपुंसकम्॥ ७२॥**

नञ्कर्मधारयवर्जितस्तत्पुरुषो नपुंसके। इदं स्त्रीसभम्, इदं शलभच्छायम्। “सभा राजामनुष्यपूर्वा” (पा०सू० २-४-२३) इति नपुंसकत्वम्॥

**॥ इति भट्टभरद्वाजसूनोः पृथिवीश्वरस्य कृतौ हर्षवर्द्धनकृतलिङ्गानुशासनटीकायां नपुंसकलिङ्गप्रकरणम्॥**

## ॥ अथ मिश्रलिङ्गप्रकरणम् ॥

अथ क्रमप्राप्तमर्थवल्लिङ्गमाह-

**सर्वेऽर्थवत्समासेऽमी यथायं सुकटिर्भटः।**

**सुकुचा सुकचा नारी सुक्षीरा गौर्नरोऽनृणः॥ ७३॥**

सर्वे स्त्रीपुन्नपुंसकलिङ्गाः शब्दाः प्रागुक्ताः समस्ताः सन्तः समासेऽर्थवदभिधेयवद्भवन्ति। अर्थेन तुल्यं वर्तत इत्यर्थवत्। यथा- अयं सुकटिर्भटः। कटिशब्दः स्त्रियामुक्तः, समासे अन्यपदार्थत्वात् पुंसि। शोभना कटिर्यस्य सुकटिर्भटः। एवमन्येऽपि- कृतभ्रुकटिः, सन्नद्धभ्रुकटिः, अतनुः, सुशालः पुरुषः, सुकटिः, सुतनु, सुशालं कुलम् इत्यादयः। सुकुचा सुकचा नारीति– शोभनौ कुचौ यस्याः सा सुकुचा नारी। शोभनाः कचाः यस्याः सा सुकचा नारी। कचकुचौ पुंस्युक्तौ समासेऽर्थवत्त्वात् स्त्रियां भवतः। एवं सर्वगुणा स्त्री, निर्गुणं कुलमित्यादि। सुक्षीरा गौः– शोभनं क्षीरं यस्याः सा सुक्षीरा गौः। अविद्यमानमृणं यस्य स नरोऽनृणः। यस्मादसमासेऽपि क्षीरर्णे नपुंसके कथिते, समासेऽर्थवत्त्वात् स्त्रीपुंसयोर्भवतः। एवमियमयं वा कीलालपाः, अयमियं वा कुमारीदाः, शुभदाः इत्यादि। नपुंसकत्वे त्वेषां ह्रस्वेन भाव्यम्। इदं कीलालपम्, कुमारीदम्, शुभदम्, इत्यादि अकारान्ताः। अधुना इकारान्ताः क्रमेण उच्यन्ते- अयमियं वा ग्रामणीः, सेनानीः, श्रीः, वातप्रमीः। नपुंसके कृतह्रस्वः- इदं ग्रामणिकुलम् इति। एवमन्येऽपीकारान्ताः। इदं सुतनु कुलम्, अयमियं वा दृढमन्युः, सुश्मश्रुर्युवा, ताम्रतालुः स्त्री इत्येवमादयोऽन्येऽप्युकारान्ताः। अयमियं वा खलपूः, यवलूः, नतभ्रूः इत्येवमादयः ऊकारान्ताः। नपुंसके तु कृतह्रस्वाः- इदं खलपुयवलुकुलम् इति। ऋकारान्तानाम् “नद्यृतश्च" (पा०सू० ५-४-१५३) इति समासान्ते कपि कृते अकारान्तता स्पष्टैव। सुकर्तृकः, सुकर्तृका, सुकर्तृकमित्यादि। ऋतादयो न सन्ति तेषु। रैग्लौनौशब्दा ये सन्ति तेषु यथालक्षणम्। इत्यजन्ताः।

अथातो हलन्ताः– ते च प्रायः क्विबन्ताः। अयमियमिदं वा अग्निचित्। एवं त्रिष्वप्येवमादयः सोमसुत्- सासुस्त्रगादयः अन्ये भवन्ति। अमिति लुप्यते। "न विभक्तौ तुस्माः" (पा०सू० १-३-४) इति तवर्गस्मान्ताना लुकि निषिद्धे ये सन्ति ते प्रदर्श्यन्ते- तत्र तवर्गाणां तकारान्ता दर्शिताः। अथ नकारान्ताः प्रदर्श्यन्ते- इयमयं वा सुधामा, सुनर्मा, सुपर्वा, सुधर्मा, सुशर्मेत्येवमादयः। अत्र स्त्रियाम् "ऋन्नेभ्यो ङीप्" (पा०सू० ४-१-५) इति ङीपि प्राप्ते, "मनः" (पा०सू० ४-१-११), "अनो बहुव्रीहेः" (पा०सू० ४-१-१२) इति तस्मिन् प्रतिषिद्धे, "डाबुभाभ्यामन्यतरस्याम्" (पा०सू० ४-१-१३) इति डाप्प्रत्ययः। स यत्रास्ति तत्राकारान्तत्वात् स्त्रीत्वम्। स इहोदाहृत इति। अत्रापि ह्रस्वान्ता नपुंसके- इदं सुनर्मेति। अथासन्ताः- इयमयं वा सुयशाः, सुशिराः इत्येवमादयः। अत्रापि ह्रस्वान्ता नपुंसके–इदं सुयश इति। मकारान्तौ किमिदंशब्दौ सर्वनामत्वात् अर्थवदेवेति॥

**शुच्याद्या असमासेऽपि शुचिः स्त्री ना शुचि द्वयम्।**

**मृदुः स्त्री ना च मृद्वङ्गं नानार्थाश्च शिवादयः॥७४॥**

अर्थवदित्यनुवर्तते। शुचिशब्द आदिर्येषां ते शुच्याद्याः असमासेऽपि केवला अप्यर्थवद्भवन्ति। शुचिः स्त्रीत्यादि। यथा- शुचिः स्त्री, शुचिः ना, शुचि द्वयम्, मृदुः स्त्री, मृदुः ना, मृदु द्वयम्, अङ्गं च। अयमिदं वा पटुः, पटुर्वा स्त्री इत्येवमादयो बहवः। तथान्येऽप्येवं गुणे गुणलिङ्गा भवन्ति इति बोद्धव्यम्। "वोतो गुणवचनात्" (पा०सू० ४-१-४४) इति वा ङीप्प्रत्ययो यत्रास्ति तत्रेकारान्तत्वात् स्त्रीत्वम्। ङ्यभावादिहोदाहृतः। नानार्थाश्च शिवादयः- नानार्था बह्वः शिवादयः स्वार्थवत् भवन्ति। यथा- शिवो हरः, शिवं श्रेयः, शिवा गौरी।

**"शिवा क्रोष्ट्री शिवामलकी को द(कः? क्षः) (कं? किं) शिरोऽम्बु च।**

**भद्रा गौः शं च भद्रं स्यात् कुशलं कुशलो बुधः॥**

**एवं कृत्तद्धितान्तानां लुः स्त्री लूर्ना च लु द्वयम्।**

**नारी पौत्री पुमान् पौत्रो भवेत्पौत्रं नपुंसकम्॥७५॥**

**तथा गुणाश्च सामान्यग्रहणा अभिधेयवत्।**

**चित्रा कथेयं चित्रोऽर्थः चित्रं कर्म तपस्विनाम्॥७६॥**

**अर्थवत्सर्वनामानि स पुमान् यो गुणी भवेत्।**

**स युवा तद्वयं सा स्त्री तत्सुखं यदचिन्तनम्॥७७॥**

**स्यादीषदसमाप्तौ तु बहुप्रकृतिलिङ्गकः।**

**यथा बहुगुडा द्राक्षा बहुद्राक्षं बहुर्घृतः॥ ७८॥**

एवमादिस्पष्टार्थत्वाद्दर्शितं बोद्धव्यम् ॥

**॥ अथाविष्टलिङ्गशब्दाः।।**

**आविष्टलिङ्गशब्दास्तु अलिङ्गवदमी यथा।**

**प्रमाणं स्मृतयो वेदा धनं वै दैवतं पतिः॥ ७९॥**

अर्थवदिति निवृत्तम्। आविष्टे स्थितं येषां ते आविष्टलिङ्गशब्दाः। तुशब्दो विशेषद्योतनाय। नैवं ते अर्थवदिति।। यथा अलिङ्गवदाविष्टलिङ्गवत् द्रव्यवद्भवन्ति, स्वभावं न त्यजन्तीत्यर्थः। तान् दर्शयितुमाह– प्रमाणम्, स्मृतयः प्रमाणम्। वेदाः, धनं वेदाः। दैवतम्, पतिः दैवतम्, इत्यादीनि नपुंसकलिङ्गोदाहरणानि । एवमन्येऽपि॥

**॥ अथ पुन्नपुंसकलिङ्गाः।**

अथ पुन्नपुंसकलिङ्गानि दर्शयितुमाह-

**ब्रह्मान्धकारजठरव्रणचूर्णभूर्जवज्रार्धशूलमलपल्वलपल्लवानि"।**

**अर्धर्चगोमययुगन्धरवेषकर्षकार्षापणा निगडतो रणवारपाणाः।। ८०॥**

**गाण्डीवताण्डवतरण्डविटङ्कटङ्कप्रग्रीवशीथुसरकाः समरः कबन्धः।**

**द्वीपः पिनाककपटार्बुदनिष्कमुष्ककासारयूषचषका वृषणामिषौ च॥ ८१॥**

**वर्चस्कवेमवटमाषकगूथयूथमञ्जीरवारकरकक्रकचाणुगेहाः।**

**कंसः शफो मुसलसानु च पद्मशङ्खावब्जौ तु वासररणादि पुमन्त्यलिङ्गाः॥८२॥**

त्रिभिः पद्यैर्विशेषकोऽयम्। एते ब्रह्मादयः पुमन्त्यलिङ्गाः। ब्रह्मणो द्व्यजनन्तत्वान्नपुंसकता प्राप्ता। एवं पुंस्येषां वचनं व्यवस्थितलिङ्गश्च ब्रह्मशब्दो धातरि पुंसि अन्यत्र नपुंसके। अयं ब्रह्मा स्रष्टा। अन्यत्र इदं ब्रह्म वेदः, तपः, शाश्वतं ज्ञानं च। अन्धकारः अन्धकारं वा तमः। जठरः जठरं वा उदरम्। व्रणः व्रणं वा रुक्

क्षतं वा। चूर्णः चूर्णं वा क्षोदः। भूर्जः भूर्जं वा तरुविशेषः। वज्रः वज्रं वा कुलिशम्। अर्धः अर्धं वा दलम्। शूलः शूलं वा [वणिकं] रुजा च। मलः मलं वा पापं रजश्च। पल्वलः पल्वलं वा अल्पजलविकारः। पल्लवः पल्लवं वा प्रवाळम्। अर्धर्चः अर्धर्चं वा ऋचोऽर्धम्। अर्धर्चः पुंसि विधानात्। गोमयः गोमयं वा गोशकृत्। युगन्धरः युगन्धरं वा कूबरः। वेषः वेषं वा आकल्पः। कर्षः कर्षं वा पलचतुर्थांशः। कार्षापणः कार्षापणं वा द्रव्यमात्राख्यः। निगळः निगळं वा अयोमयी दुष्टबन्धनशृङ्खला। तोरणः तोरणं वा देवराजादिद्वारि समुच्छ्रितं दारु। वारः वारं वा वासरः। पाणः पाणं वा कण्टकः। गाण्डीवः गाण्डीवं वा अर्जुनस्य धनुः। ताण्डवस्ताण्डवं वा शम्भुनृत्तम्। तरण्डः तरण्डं वा प्लवः। विटङ्कः विटङ्गं वा कपोतपाळिः। टङ्कः टङ्कं वा दृषद्दारणम्। प्रग्रीवः प्रग्रीवं वा मत्तवारणः। शीथुः शीथु वा मद्यविशेषः। सरकः सरकं वा सर्पकृतविषविशेषः। समरः समरं वा रणम्। कबन्धः कबन्धं वा अशिरस्कः पुमान्। द्वीपः द्वीपं वा पुळिनम्। पिनाकः पिनाकं वा शूलपाणेर्धनुः। कपटः कपटं वा व्याजः। अर्बुदः अर्बुदं वा मासकीलकम्। निष्कः निष्कं वा सुवर्णविकारः। मुष्कः मुष्कं वा। कील इति वा पाठः। कीलः कीलं वा शङ्कुः। कासारः कासारं वा। यूषः यूषण् वा मुद्गादिकृतं व्यञ्जनम्। चषकः चषकं वा। सरकः सरकं वा। वृषणः वृषणं वा कोशः। आमिषः आमिषं वा मांसम्, आलोभनं च। वर्चस्कः वर्चस्कं वा अवस्करः। वेमः वेम वा कुविन्दभाण्डम्। वटः वटं वा न्यग्रोधः [कुलक]भोज्यं च। माषकः माषकं वा अष्टस्वर्णकृतकृष्णलाः। गूथः गूथं वा पुरीषम् । यूथः यूथं वा सङ्घातः सङ्घातं वा। मञ्जीरः मञ्जीरं वा चरणालङ्कारः। वारः वारं वा क्रमो गणश्च। करकः करकं वा पानीयभाजनम्। क्रकचः क्रकचं वा करचक्रम्। अणुर्धान्यजातिः। अणु सूक्ष्मम्। गेहः गेहं वा गृहम्। कंसः कंसं वा मानविशेषः, लोहः, जातिश्च। शफः शफं वा गवादिखुरः। मुसलः मुसलं वा आयुधविशेषः धान्यखण्डनं च। सानुः सानु वा गिरेः समो भूभागः। चशब्दात् कञ्चुकः कञ्चुकं वा वारवाणम्। पद्मशङ्खशब्दौ परिभाषालिङ्गौ दर्शयितुमाह– पद्मशङ्खावब्जौ जलोद्भवौ। तुशब्दो विशेषद्योतनाय। अब्जवाचकौ पद्मशङ्खशब्दौ तु नपुंसके नान्यः। यथा- अयं पद्मः पद्मं वा जलजः।

**"अन्तर्जलगताः पद्माः श्रोतुकामा इवोत्थिताः"।**

**"पद्मानि काकैरिव खण्डितानि"।**

इति। शङ्खः शङ्खं वा कम्बुः। अब्जाविति किम् ? अयं पद्मः शङ्खश्च निधिः। वासरः वासरं वा दिनम्। रणः रणं वा समरः। आदिशब्दोऽन्येषामपि परिग्रहाय। दिङ्मात्रमेव तदिहास्माभिर्दर्शितम्। शेष लक्षणतोऽवधार्यम्॥

## ॥ अथ परिभाषालिङ्गाः ॥

परिभाषालिङ्गान् दर्शयितुमाह-

**सत्त्वं प्राणिनि बह्वर्थे गृहं वर्णोऽक्षरे परम्।**
**सैन्धवं लवणे भूतं पिशाचे स्वं धने तथा॥ ८३॥**

सत्त्वं प्राणिनीति। सत्त्वशब्दः प्राणिनि पुन्नपुंसकलिङ्गः- अयं सत्त्वः इदं सत्त्वं वा प्राणी। अन्यत्र सत्त्वाख्यो गुणः। गृहं बह्वर्थे बहुवचने- इमे गृहा दाराः, गृहाणि वा। बह्वर्थ इति किम्? इदं गृहम्, नपुंसकमेव। वर्णोऽक्षरे परम्- वर्णः वर्णं वा अक्षरम्। अन्यत्र शुक्लो वर्णः। वर्णा ब्राह्मणादयः। वर्णोऽक्षर इति पुंस्त्वनिर्देशात् अक्षरादन्यत्र वर्णः। परमिति वचनात् कृच्छ्रं तपसि पुन्नपुंसकलिङ्गम्। कृच्छ्रः कृच्छ्रं वा तपः। अन्यत्र कृच्छ्रं दुःखं नपुंसक एव। सैन्धवः सैन्धवं वा लवणम्। अन्यत्र सैन्धवोऽश्वः। भूतो भूतं वा पिशाचः। अन्यत्र भूतो जातः, भूतानि पृथिव्यादीनि। स्वः स्वं वा धनम् अन्यत्र स्वा ज्ञातयः, तथा वचनात्।।

**पुंस्याम्राद्याः फले पुष्पे भेषजे तु नपुंसके।**
**आम्रा नम्रास्तथा रम्याश्चन्दना देवदारवः॥ ८४॥**
**सुरभ्याम्रं चन्दनं च देवदारूदरार्त्तिजित्।**
**खजूरं बृंहणं हृद्यं चण्पकं तिलकं तथा॥८५॥**
**वृक्षेष्वाम्रादयः पुंसि बदर्याद्याः स्त्रियां मताः।**
**फलपुष्पौषधाद्यर्थे तेषां ज्ञेयं नपुंसकम्॥ ८६॥**

आम्रादयः शब्दाः पुन्नपुंसकलिङ्गा भवन्ति। तत्र विभागः– एते यदि वृक्षवाचका भवन्ति तदा पुंस्त्वम्। यद्येते फलादिवाचकाः स्युः तदा नपुंसकत्वम्। बदर्याद्याः स्त्रीलिङ्गा वृक्षवाचिनः, औषधादिष्वेव नपुंसकता। आदिग्रहणात् केतक्यामलकीप्रभृतयः। इति पुन्नपुंसकलिङ्गता दर्शिता॥

## ॥ इति पुन्नपुंसकलिङ्गप्रकरणम् ॥

## ॥ अथ स्त्रीपुंसलिङ्गाः।।

इदानीं पुंस्त्रीलिङ्गान् दर्शयितुमाह-

**आणीषुबाहुफणतूणमरीचिमुष्टिगोस्वातियोनितिथिपाटलिसिन्धुसाराः।**
**गण्डूषकन्दरभुजाशनयः कुथश्च पुंस्त्रीध्वजाः कृसरवेतससल्लकाद्याः॥ ८७॥**

एते पुंस्त्रीध्वजाः। यथा- अयमियं वा आणिः अक्षाग्रकीलः। अस्येकारान्तत्वात् स्त्रीत्वे प्राप्ते पुंस्यपि वचनम्। अयमियं वा इषुः शरः। अयमियं वा बाहुः भुजः। फणः फणा वा सर्पशिरोविकारः। तूणः तूणा वा इषुधिः। अयमियं वा मरीचिः। रश्मिः रश्मिवाचिनोऽन्ये पुंस्युक्ताः। अस्योभयमित्येके। अयमियं वा मुष्टिः कराङ्गुलीनां सन्निवेशः, प्रमाणं च। अयं गौः अनड्वान्, इयं गौः महिषी। गोशब्दस्य स्त्रीपुंसयोः स्वरूपभेदादिह वचनमन्येषां च निदर्शनाय। एवमन्या प्राणिजातिः। यथा- अश्वा अश्वी, शुकः शुकी, श्वा शुनी, अहि-कपि-रुरु-वीणु-करेणु-सिंहा-जादिकः। अयमियं वा स्वातिर्नक्षत्रविशेषः। अयमियं वा योनिरुत्पत्तिस्थानम्। अयमियं वा तिथिः प्रतिपदादिः। अयमियं वा पाटलिरोषधिः। अयमियं वा सिन्धुः समुद्रः। अयं सारः, इयं सारी आपानभूमिः कटकश्च। अयं गण्डूषः, इयं गण्डूषा आस्यपूरणिका। अयं कन्दरः इयं कन्दरी। अयं भुजः, इयं भुजा बाहुः। अयमियं वा अशनिः ह्लादिनी। अयं कुथः इयं कुथा (व?प)र्णास्तरणम्, गजाश्वपृष्ठाच्छादनम्। अयं कृसरः इयं कृसरा तिलतण्डुलमिश्रं भोजनम्। अयं वेतसः, इयं वेतसी वानीरजा। अयं सल्लकः, इयं सल्लकी सुगन्धतरुविशेषः। एवमाद्या अन्येऽपि समिच्छिलालिकिष्कवः सटातूलप्रभृतय एवमाद्याः सुबोधाः॥

**एवमेव रथी गन्त्री स्यन्दनस्तु रथो यथा।**
**कृपाणोऽसिः कृपाणी तु क्षुरिकायां पटः पटी॥ ८८॥**

**॥ इति पुंस्त्रीलिङ्गाः ॥**

**॥ अथ स्त्रीनपुंसकलिङ्गाः।।**

अथ स्त्रीनपुंसकलिङ्गान् दर्शयितुमाह-

**स्त्रीनपुंसकयोरर्चिः पीठोडू मन्दिरार्गले।**
**मृणालीकन्दलीस्थालीप्रणालीयुगलादयः॥ ८९॥**

एते शब्दा स्त्रीनपुंसकयोर्भवन्ति। इयमिदं वा अर्चिः दीप्तिः। इसन्तत्वादस्य नपुंसकता प्राप्ता, वचनात् स्त्रीत्वमपि। इयं पीठी इदं पीठम् आसनविशेषः। इयमुडुः इदमुडु नक्षत्रम्। इयं मन्दिरा इदं मन्दिरं गृहम्। मन्दिरा तत्र वारारिति (?)। इयमर्गळा इदमर्गळं द्वारप्रतिबन्धः। इयं मृणाळी इद मृणाळे बिसम्। इयं कन्दळी इदं कन्दळं नवनाळं शाकादेः। इयं स्थाली उखा, इदं स्थलं भाजनविशेषः। इयं प्रणाळी इदं प्रणाळं वारिसरणद्रोणिः। इयं युगळी इदं युगळं युगम्। आदिशब्दस्य

प्रकारवाचित्वादेवम्प्रकारा अन्येऽपि– आस्थानी, आक्रीडं आक्रीडा, शस्त्रं शस्त्री, द्वयं द्वयी, त्रयं त्रयी, नगरं नगरी, पुरं पुरी, इत्येवमादयोऽन्ये। इकारान्तत्वात् स्त्रीत्वम्। नोक्ता लक्ष्यावधारणीया इत्यर्थः॥

**॥ इति स्त्रीनपुंसकलिङ्गाः ॥**

**॥ अथ त्रिलिङ्गाः ॥**

त्रिलिङ्गान् दर्शयन्नाह-

**त्रिषु वाटी पुटी पेटी पात्री नखरमण्डलौ।**
**तटशृङ्खलवल्लूरमठप्रतिसराढकाः॥ ९०॥**
**विषाणीदाडिमीताडीभल्लातकविभीतकाः।**
**कुवला मलकीमुस्तास्त्रिलिङ्गी एवमादयः॥ ९१॥**
**दारस्तल्पो भगोऽङ्कोऽस्त्री मेढ्रश्चापत्यमात्मजः।**
**पोटा द्विलिङ्गमित्यादि प्रोक्तं शब्दार्थभेदतः॥ ९२॥**
**मेढ्राद्यङ्केऽपि गोधादिपिण्डी स्त्रीलिङ्गभाग्ध्वनिः।**
**स्त्रीपुंसभेदः पक्षादावेवं ज्ञेयो मनीषिभिः॥ ९३॥**

एवमादयः शब्दाः त्रिलिङ्गेषु भवन्ति। इयं तटी, अयं तटः, इदं तटं नद्याः कूलम्। शृङ्खला, शृङ्खलः, शृङ्खलम् अयोमयो रज्जुः। वल्लरी, वल्लूरः, वल्लूरं सूकरमांसं शुष्कं वा। मठी मठः मठं धर्मगृहम्। प्रतिसरा प्रतिसरः प्रतिसरं मङ्गलसूत्रम्। आढकी आढकः आढकं मानभाण्डविशेषः। विषाणी विषाणः विषाणम् गवादिशृङ्गम् ++++ वेवं ज्ञेयो मनीषिभिः। एष पूर्वोक्तो लिङ्गनियमः क्वचिदन्यथापि लक्ष्ये दृश्यते। यथा- दारशब्दः पुंस्त्वे बहुत्व एवोक्तः, क्वचित् दारा इति बहुवचनं पुँल्लिङ्गैकवचने च 'गुणवति दारे' इत्यादौ दृश्यते। तल्पशब्दः पुंस्यपि दृश्यते। भगशब्दस्य सामग्र्यादिवाचकस्य तथा मेढ्रशब्दस्याङ्गपर्यायस्य नपुंसके। कचिदङ्गवाचिनोर्द्वयोरपि पुंस्त्वं दृश्यते। तथा मेढ्राद्यङ्केऽपि पुंव्यञ्जनादिचिह्नेऽपि स्त्रीलिङ्गभाग्भवति। भगाङ्का स्त्री, मेढ्राङ्कः पुमानिति। तथापत्यामजशब्दयोर्द्वयोरपि स्त्रीपुंवाचकत्वात् क्वचिदुभयम्। क्वचित् पोटशब्दोऽप्युभयलिङ्गः। एवमादि सुधीभिरवधार्यम्।

**इति त्रिलिङ्गकाः।।**

**अथालिङ्गकाः।।**

**सङ्ख्या ष्णान्ता युष्मदस्मत्कत्यव्ययमलिङ्गकम्।**

**षट् काः षट् के च षट् कानि पञ्च तास्ते च तान्यपि॥९४॥**

**त्वं स्त्री त्वं ना कुलं त्वं चाहं स्त्री नाहमहं कुलम्।**

**कति स्त्रियः कति नराः कति तानि च वा हि दिक्॥९५॥**

ष्णान्ताः षकारनकारान्ताः सङ्ख्याः युष्मदस्मत् कति अव्ययम्, एते शब्दा अलिङ्गा अविशिष्टलिङ्गाः। यथा- षट् का, षट् के, षट् कानि। एवं पञ्च स्त्रियः, पञ्च नराः, पञ्च कुलानि। एवं सप्ताष्टकादयः। युष्मदस्मदोः- त्वं द्वयम्, अहं जनता, अहं जनः, अहं वृन्दम्। कति स्त्रियः, कति नराः, कति कुलानि। उच्चैः स्त्री, उच्चैः पुमान्। उच्चैः कुलमित्यादि। किं स्त्रीपुमानिति? अपत्यम्।

[अहं चेतोवृत्तिः जयः) । पञ्च काः के कान्यत्र, कति तास्ते च तानि। एष उदाहरणमन्येषामिति।।

**बहुत्वे बल्बजा लाजाः कश्मीराः सक्तवोऽसवः।**

**दारा वासोदशा वर्षा आपः सुमनसः समाः॥ ९६॥**

एते बल्बजादयः शब्दा बहुवे बहुवचना भवन्ति। इमे बल्बजा स्त्रीजातयः। इमे लाजाः प्राक् प्रख्याताः। इमे कश्मीराः देशाः। पुँल्लिङ्गशब्दमध्यमपाठात देशो विदेशोऽपि पुँल्लिङ्गो ज्ञेयः। सक्तवः, असवः, दाराः, वासोदशाः। वर्षादयः स्त्रियाम्- इमा वर्षाः प्रावृट्; इमा आपः सलिलम्। इमाः सुमनसः पुष्पाणि; इमाः समा वर्षाणि। एषां नित्यबहुत्वम्। दारशब्दश्चन्द्रस्याबहुत्वे स्त्रियां च॥

**व्याडेः शङ्करचन्द्रयोर्वररुचेर्विद्यानिधेः पाणिनेः**

**सूक्ताँल्लिङ्गविधीन् विचार्य सुगमं श्रीवर्धनस्यात्मजः।**

**श्रव्यं व्यापि च हर्षवर्धन इदं स्पष्टीकृतप्रत्ययं**

**लिङ्गानामनुशासनं रचितवानत्यर्थसंसिद्धये॥ ९७॥**

सूक्तान् लिङ्गविधीन् विचार्य पर्यालोच्य सारं सङ्गृह्य तेभ्यः सुगमं श्रव्यं व्यापि च लिङ्गानुशासनं रचितवान्। अन्यच्च स्पष्टीकृतप्रत्ययं घञन्तादयः प्रत्यया आविष्टाः संहिताः संश्लिष्टाः पृथक्कृत्य स्पष्टीकृता यत्रा। तत्तत्प्रत्ययानां सोदाहरणानां दर्शनात् पृथक्स्पष्टतास्य। तत्र हि पुरुषा स्वल्पाश्रिता मन्दधियः ष्यङ् अङ् नञ ईय

इत्येवमादिषु। किमर्थमिदं तात्पर्यं चेदित्यत आह—अत्यर्थसंसिद्धये। एतत्परिज्ञानार्थिनां तेषामयमर्थः कथमनायासेन सिध्यतामिति लिङ्गं प्रदर्शितम्।।

**॥ इति भट्टभरद्वाजसूनोः पृथिवीश्वरस्य कृतौ हर्षवर्धनकृत-**

**लिङ्गानुशासनटीकायां सर्वलक्षणायां मिश्रलिङ्गप्रकरणं समाप्तम् ॥**

**॥ लिङ्गानुशासनटीका समाप्ता॥ शिवमस्तु ॥**

**रूपेणाप्रतिमः श्रुतेन नसमो वीर्येण पाण्डोः सुतः**
**काव्ये चातिमनोरमः सुकृतिनामासन्नकल्पद्रुमः।**
**जातः सम्प्रति हर्षवर्धन इति प्रख्यातकीर्तिः सतां**
**तेनेयं रचिता मनोरमकृतर्लिङ्गान्विशिष्टीकृता॥**

## ॥ वामनीयलिङ्गानुशासनम् ॥
## (स्वोपज्ञवृत्तिसमेतम्)

**श्रेयांसं शिवमीश्वरं प्रशमिताशेषात्मदोषाशयं**
**विश्वक्लेशविनाशिनं शुभनिधिं नत्वा गुरुं च त्रिधा।**
**यद्व्याडिप्रमुखैः प्रपञ्चबहुलं लिङ्गस्य लक्ष्मोदितं**
**तत्संहृत्य मया यथा निगदितं व्याख्यायते जानताम्॥**

अथ सकलबुधजनाभिमतसाधुशब्दप्रयोगोपयोगि लिङ्गमवश्यमनुशिष्यमतिबहुतरमपि सामान्यविशेषवता लक्षणेनेति कृत्वा तदनुशासनमशेषविघ्नोपशमनाय मङ्गलपूर्वकमभिधीयते।

**सिद्धं विबुधजनेष्टं विदिताखिलवाङ्मयं प्रणम्याप्तम्।**
**लिङ्गानुशासनमहं वच्म्यार्याभिः समासेन॥१॥**

लिङ्गानुशासनमहं वच्मि ब्रवीमि। श्रेयोऽर्थमविघ्नेन च शास्त्रपरिसमाप्तिनिमित्तमिष्टदेवतां सिद्धं प्रणम्य वच्मि। य उपरतसकलव्यापारो विनिहतजननमरणकारणः स सिद्धः प्रणन्तुमिष्टः प्रणामयोग्यत्वाद्विदिताखिलवाङ्मयमिति विशेषितत्वाद्वा। अत एवाञ्जनसिद्धादिव्युदासाय विशेषणमुपादीयते। किंविशिष्टम्। सिद्धं विबुधजनेष्टमिति। विबुधा हेतुः... इष्टः पूजितो यः सिद्धो देवताविशेषः स तथोक्तस्तम्। प्रणम्येति। पुनरपि प्राप्ताष्टगुणैश्वर्यादिमा....। विदिताखिलवाङ्मयमिति। विदितं ज्ञातमखिलमशेषं वाङ्मयं वस्तुजातं येन स तथोक्तस्तं प्रणम्य....। एवमयमिष्टदेवतानमस्कारः सामान्येनोक्तः। साम्प्रतमधिकृतदेवतानमस्कारार्थं प्रतिपादनाय च विशेषणमुपादीयते। आप्तमिति। यो दृष्टेष्टाविरुद्धाविसंवादिवचनोऽत्यन्त-सकललोकहितागमप्रणेता विश्वसनीयः स आप्तः। य एवंविधः सिद्धस्तं प्रणम्येति। अनेनाशेषशास्त्रप्रशास्तृत्वमापादितं भवति। तथा चोच्यते लिङ्गानुशासनमाप्तमिति! स्त्रीपुंनपुंसकलिङ्गस्याधिकृतस्यानुशासनो यः स तथोक्तस्तं प्रणम्य। अथवा लिङ्गं चिह्नं लक्षणं सर्वस्यैव तस्यानुशासनं सिद्धं प्रणम्य लिङ्गानुशासनं शास्त्रं वच्मि कथयाम्यहमिति सम्बन्धः। आवृत्याश्वेतो धावति। "कथेव भारती यस्य" इति यथा तथा लिङ्गानुशासनशब्दः सम्बध्यते। शब्दशास्त्रविवक्षितस्त्रीपुंनपुंसकलिङ्गान्युच्यन्ते तल्लिङ्गमनुशिष्यते निगद्यते येन

तच्छास्त्रं तथोक्तं तदहं वच्मि। तच्च सिद्धमनादिकालव्यवस्थितं साधुशब्दप्रयोगवत्। अथवा सिद्धमसंस्कार्यविसंवादि च तत् वच्मि।अन्यत् विबुधजनेष्टं तत्। विशेषेण विविधा वा बुधाः विबुधाः पण्डितास्तेषां जनः समुदायः तस्य इष्टमभिमतं साधुशब्दप्रयोगोपयोगित्वात्।तच्च विदिताखिलवाङ्मयम्। विविधैः प्रकारैः दितं खण्डितं तत्तनलादिखण्डैः अखिलं वाङ्मयं यस्मिंस्तत्तथोक्तं लिङ्गानुशासनमहं वच्मि। विदितमित्यत्र "यत्क्रियायुक्ताः प्रादयस्तं प्रति गत्युपसर्गसञ्ज्ञका भवन्ति" इति द्यतेः **"अच उपसर्गातः"** (७-४-४७) इति त-आदेशो न भवति। प्रणम्यादाप्तं नमस्यादाराध्याद्देवताविशेषादुपलब्धं लिङ्गानुशासनं वच्मीति। पूर्वाचार्यैर्व्याडिप्रमुखैर्लिङ्गानुशासनं सूत्रैरुक्तं, ग्रन्थविस्तरेण च। अहं पुनरार्याभिर्वच्मि सुखग्रहणार्थम्। वररुचिप्रभृतिभिरप्याचार्यैरार्याभिरभिहितमेव। तदतिबहुना ग्रन्थेनेत्यहं तु समासेन सङ्क्षेपेण वच्मीत्यत उच्यते नमस्कारः।

**नाम नपुंसकलिङ्गं तत्तनलस्तुत्वशब्दपर्यन्तम्।**

**मन्नन्तो द्व्यजुदितमपि सन्तं हल्पूर्वररुयान्तम्॥२॥**

यद्व्युत्पत्तिमन्तरेणैवार्थप्रतीतिकरमनादिसाङ्केतिकमभिधानं तन्नाम पर्यायः रूढशब्द इत्यर्थः। तदिह विशेषणाधिकृतं वेदितव्यम्, नपुंसकलिङ्गं च, आ पुँल्लिङ्गात्। त-त्त-न-ल-स्तु-त्व इत्येते शब्दाः पर्यन्तोऽवसानं यस्य तत्तथोक्तं नाम नपुंसकलिङ्गं भवति। त इति। इदं व्रत नियमग्रहणम्, इदं मतमभिप्रायः, इदं पलितं श्वेतकेशः, क्षतं व्रणम्, अलातमुल्मुकम्। त्त। इदं वृत्तं छन्दोरचना, निमित्तं हेतुः, पित्तं पायुः, चित्तं मनः, वित्तं द्रव्यम्। न। विपिनं वनं, काननमटवी, जघनं पूर्वकटीभागः, आननं मुखम्। ल। शीलं स्वभावः, मूलं प्रसिद्धमेव, जलं सलिलं तोयं, कमलं पद्मम्, उत्पलमिन्दीवरम्। स्तु। इदं वस्तु पदार्थः, इदं मस्तु दध्नो यदधः पानीयं, वास्तु भूमिविशेषः। त्व। इमानि तत्त्वानि पृथिव्यादीनि, इदं सत्त्वं गुणः। नामेति किम्? रचितो ग्रन्थः, कृता स्तुतिः, कृतं कुण्डं, कृतः कटः, कृता शाटिका, गोदोहनः घटः, सुशीलः पुरुष इत्यादि। त्तेति तशब्दसंयुक्तग्रहणात्, रत्नचिह्ने चेति निर्देशाच्च, तत्तनलशब्दाः केवला एव गृह्यन्ते। तेनेह नपुंसकलिङ्गता न भवति। अयमन्तः अवसानं, हस्तः पाणिः, मुहूर्त्तः क्षणः, धम्मिल्लः केशरचना, चिक्खलः कर्दमः। मन्-शब्दोऽन्तो यस्य स मन्नन्तः, द्व्यच् द्वौ अचौ यस्मिन्स द्व्यच्। मन्नन्तो यो द्व्यच्छब्दः स नपुंसकलिङ्गो भवति। इदं साम प्रियं वेदश्च, धाम स्थानं तेजश्च, शर्म सुखं, भस्म

भूतिः। पुँल्लिङ्गनिर्देशान्मन्नन्त इत्यत्र सामान्येन शब्दः परिगृह्यते, न नामैव। तेन प्रियस्य भाव इदं प्रेम, बहूनां भाव इदं भूम। द्व्यजिति किम्? अयं तरीमा कल्पः। सवीमा प्रसवः। द्व्यजुदितमपि सन्तम्। पुँल्लिङ्गं स्त्रीलिङ्गं वा प्रोक्तमपि सकारान्तं द्व्यच् नाम नपुंसकलिङ्गं भवति। इदं यशः कीर्त्तिः, तेजः दीप्तिः, ओजः दीप्तिः बलं च, ओकः स्थानं, यादो जलजन्तुः। द्व्यजिति किम्? अयं दोर्बाहुः, अयमनेहाः कालः। उदितमपि। इदं रक्षः राक्षसः, तमः राहुः। दैवाभिधानत्वात्पुल्लिङ्गमुक्तम्। इदं वयः पक्षी, प्राण्यभिधानात्पुंल्लिङ्गमभिहितम्। नामेति किम्? सौजाः पुरुषः, सौजाः स्त्री। सान्तमेव द्व्यजुदितमपि नपुंसकलिङ्गं भवति। अन्यत्र पुनरनुदितमेव वेदितव्यम्। तेनायं पारापतः पक्षी, शैलः पर्वतः, असनः वृक्षविशेषः, पुत्रः तनयः, शत्रुः अरिः, आर्यः साधुरित्यादि। हल्पूर्वो येभ्यस्ते हल्पूर्वा ररुयशब्दास्तेऽन्ते यस्य तत् , तथोक्तं नाम नपुंसकलिङ्गं भवति। र। गोत्रं कुलं, पात्रं भाजनं, पत्रं पर्णं, वस्त्रं वासः। रु। अश्रु नेत्रवारि, श्मश्रु मुखरोमाणि, जत्रु गलादूर्ध्वम्। य। धान्यं सस्यं व्रीह्यादि, आज्यं घृतं , द्रव्यं धनम्।

**भवनस्य रजतहान्तं चार्थरणापत्यहृदयतालुपुराम्।**

**रान्तं च तनोर्द्वारुडुतमसामव्यक्तलिङ्गोक्तौ॥३॥**

र-ज-त-ह-शब्दाः अन्तो यस्य तत्तथोक्तम्। भवनस्य गृहस्य नाम नपुंसकलिङ्गं भवति च शब्दाद्यथोक्तं च। र। अगारं मन्दिरम्। ज। उटजं मुनिगृहम्। पुनः तशब्दग्रहणमन्यसंसृष्ट-त-शब्दान्तार्थम्। निशान्तम्। ह। गेहं गृहम्। गृहशब्दस्तु अर्द्धर्चादिषु पठ्यते। तेन तद्विशेषणमपि पुँल्लिङ्गेऽपि दृश्यते। अन्तरे गृहाः, अन्तराणि गृहाणि। बाह्याश्चाण्डालादिगृहा इत्यर्थः। चशब्दादुदवसितं भवनं वेश्म धिष्ण्यम्। रजतहान्तमिति किम्? अयमावसथः भवनं, प्रासादः धवलगृहं, मठः यतिनिलयः, आवासः। आलयः। अर्थादीनां यन्नाम तन्नपुंसकलिङ्गं भवति। इदं द्रविणं द्युम्नं, स्वापतेयं वसु, रणं युद्धमम्बरीषं संयत् संयुगं जन्यं प्रधनमायोधनं मृधं सङ्ख्यं समिट् समीकम्। इदमपत्यं तोकम्। प्राणिनो विशेषाणामिति पुँल्लिङ्गं वक्ष्यति तस्यापवादः। हृदयं हृत् मानसं स्वान्तमिति। तालु काकुदं, पुरं नगरम्। रान्तं च तनोः। रशब्दान्तं च, शब्दाद्यथाप्राप्तं च, तनोः शरीरस्य नाम नपुंसकलिङ्गं भवति। इदं शरीरं कडेवरम्। च शब्दाद्यथाप्राप्तं च, वपुः शरीरम्। रान्तं चेति किम्? अयं

कायो देहः। द्वार। इदं द्वारं गोपुरम्, उडु भमृक्षं नक्षत्रं, तमः तिमिरं ध्वान्तम्। अन्धकारशब्दस्तु अर्द्धर्चादिषु पठ्यते। तेन पुँल्लिङ्गेऽपि दृश्यते। “प्रोषितार्यमणं मेरोरन्धकारस्तटीमिव” इति। अव्यक्तलिङ्गोक्तौ। अस्पष्टलिङ्गस्य उक्तावभिधाने यत् प्रयुज्यते तन्नपुंसकलिङ्गं भवति। किं तस्या गर्भे जातम्? यत्तत्रोपपद्यते ग्रामे तदानेयम्। इमानि गोरूपाणि गावो बलीवर्दाश्च समेता उच्यन्ते। इमानि भूतानि सर्वे प्राणिनः। सप्तमीनिर्देशाद्यच्छिष्टैरव्यक्तलिङ्गोक्तौ प्रयुज्यते तन्नपुंसकलिङ्गं भवति, न पुनरव्यक्तलिङ्गाभिधायि नपुंसकं भवति। अन्यथा सुतशिशुगोसिन्धुशब्दानामव्यक्तलिङ्गोक्तौ नपुंसकत्वं प्रयुज्यते।

**दलपलबिलहिमखामृतमयमुखसुखदुःखपुण्यपापविशाम्।**

**प्रसवाभरणविलेयव्यञ्जनफललवणजातीनाम्॥४॥**

दलादीनां नामानि नपुंसकलिङ्गानि भवन्ति। इदं दलं पर्णं बर्हः छदनं पलाशं, पलं मांसं तरसं, बिलं विवरं गह्वरं, हिमं प्रालेयं तुषारं नीहारम्। खमिन्द्रियं गगनं चोच्यते। तद्वयोरपि नाम नपुंसकलिङ्गं भवति। इदं खमिन्द्रियं हृषीकमक्षं, खमम्बरं वियत् विहायः। अमृताभिधानं पीयूषम्। भयं साध्वसम्। भीतिशब्दस्तु भयं भीतिरिति स्त्रियां क्तिनि कृते सिद्ध इति व्युत्पत्त्यपेक्षत्वात् नाम नेष्यते। मुखं तुण्डं, पुष्करं सुरजमुखं, सुखं शर्म जोषं, दुःखं द्वन्द्वं, पुण्यं शुभं भाग्यं, पापमघम्। विशो विष्टाया यन्नाम। पुरीषं शकृत् अशुचि मूथम्। प्रसवग्रहणात् कुसुमस्य यन्नाम तन्नपुंसकलिङ्गं भवति। कुसुमं पुष्पम्। कुसुमत्वं जातिसामान्यं येषां तन्नाम नपुंसकलिङ्गं भवति। इदं तामरसं कुशेशयं पुण्डरीकं कल्हारं कुमुदं चम्पकं मुद्गरकं मुचुकुन्दम्। आभरणं भूषणम्। आभरणजातीनां नाम। केयूरमङ्गदं कटकं, मुकुटं तिरीटं किरीटम्। विलेयजातीनाम्। विलीयत इति विलेयं विलयनं द्रवत्वं, तसामान्यं जातिर्येषां तदभिधानम्। इदं सिक्थं मदनम्। इदं जतु लाक्षा, इदं त्रपु वङ्गं, सीसकं नागं, शुल्बं ताम्रं, लोहं कृष्णमयः, सुवर्णं स्वर्णं, तारं रूप्यकम्। व्यञ्जनजातीनाम्। दधि दुग्धं क्षीरं, तक्रमुदश्वित् कालसेयं, मधु माक्षिकम्। फलादीनां नामानि। कपित्थं दवित्थं पनसं लकुचम्। लवणजातीनां नाम। विडमौद्भिदं रोमकम्। लवणग्रहणाद्यदग्निना विलीयते तन्नपुंसकं भवति, न पुनर्यज्जलेनापि, अन्यथा मृदोऽपि नपुंसकत्वं प्रयुज्यते।

**दार्वश्रौषधजलधनुरुदराजिरशिखरवस्त्रपिच्छानाम्।**

**द्विगुरुपि पात्राद्यन्तः क्रियाव्ययविशेषणश्चैक्ये॥५॥**

दार्वादीनां नाम नपुंसकलिङ्गं भवति। इदं दारु काष्ठम्, अश्रं रुधिरं रक्तं क्षतजम्, औषधं भैषजं, जलं तोयं पानीयं नीरं वारिकं, धनुश्चापं कार्मुकं कोदण्डम्, उदरं जठरं तुन्दम्, अजिरं प्राङ्गणं, शिखरं शृङ्गं कूट, वस्त्रमम्बरमंशुकं प्रावरणं, चीवरं वीरं भिक्षुपरिधानम्। पिच्छं बर्हम्। द्विगुश्च समासः पात्रादिशब्दोत्तरपदः नपुंसकलिङ्गो भवति। क्रियाया अव्ययस्य च यो विशेषणशब्दः स च नपुंसकलिङ्गो भवति। उभावप्यैक्ये एकत्वे भवतः। त्रीणि पात्राणि समाहृतानि त्रिपात्रं, चतुष्पात्रं, त्रिभुवनं, चतुर्युगं, द्विपथं, त्रिपथं, चतुष्पथं, त्रिरात्रम्। क्रियाविशेषणः। मृदु पचति, नीचं गच्छति, लघु आगच्छति। अव्ययविशेषणः। पुरस्ताद्रमणीयं दिग्देशः कालो वा। पुँल्लिङ्गनिर्देशान्नामैव न गुह्यते। तेन सविनयं पृच्छति, सबहुमानमामन्त्रयते।

**छाया सभा बहूनां सङ्घे राजार्थराक्षसादीनाम्।**

**भवने च तत्समासे द्वन्द्वैकत्वाव्ययीभावौ॥६॥**

येषां बहूनां समुदितानां सतां छाया भवति, तेषां सम्बन्धिनी छाया तैश्च सह समासे नपुंसकलिङ्गं भवति। शलभानां छाया शलभच्छायम्, इषुच्छायं, धनुच्छायम्। बहूनामिति किम्? वृक्षस्य च्छाया वृक्षच्छाया वृक्षच्छायम्। नित्यं नपुंसकार्थमिदं वचनम्। तत्समास इति किम् ? शलभानां परमच्छाया। सभाशब्दः सङ्घे वाच्ये येषां च सङ्घस्तैः सह समासेन नपुंसकलिङ्गो भवति। स्त्रीणां सभा स्त्रीसभं, ब्राह्मणानां सभा ब्राह्मणसभं सङ्घ इत्यर्थः। सभा राजार्थराक्षसादीनां भवने च। राजाभिधेयो येषां शब्दानां तेषां सन्बन्धिनी सभा भवने वाच्ये तैश्च सह समासे नपुंसकलिङ्गं भवति। इनस्य सभा इनसभम्, ईश्वरसभं नृपतिसभं भवनं सङ्घो वा। राजार्थानामिति किम्?। राजशब्देन सह समासेऽपि न भवति। राजसभा, जगत्तुङ्गसभा। राक्षसादीनां राक्षसप्रकाराणां सभा सङ्घे भवने च वाच्ये तत्समासे नपुंसकलिङ्गा भवति। राक्षसानां सभा राक्षससभं, पिशाचसभं सङ्घ इत्यर्थः। राक्षससभं भवनम्। द्वन्द्वैकत्वाव्ययीभावौ। द्वन्द्वस्य यदेकत्वमेकवद्भावः स नपुंसकलिङ्गो भवति। पाणिपादम्, मार्दङ्गिकपाणविकम्, हस्त्यश्वं, धवखदिरपलासम्, शशहरिणम्, अहोरात्रम्। अव्ययीभावसमासश्च नपुंसकलिङ्गो भवति।अधिस्त्रि, उपबन्धु। पञ्चनदम्, सप्तगोदावरं, शनैर्गङ्गम्, उन्मत्तगङ्गम्,

लोहितगङ्गम्, इत्यत्र यद्यप्यन्यपदार्थेऽव्ययीभावस्तथापि वाच्यवल्लिङ्गं न भवति, अव्ययीभावसामर्थ्यात्।

**कृतषष्ठ्यन्तसमासे तदादिकथने ह्युपक्रमोपज्ञे।**

**कन्थोशीनरदेशे नाम्न्यव्ययपूर्वकश्च पथः॥७॥**

उपक्रम्यत इत्युपक्रमः। "अकर्तरि च कारके सञ्ज्ञायाम् (३-३-१९)" इति कर्मणि घञ्। उपज्ञायत इत्युपज्ञा। "आतश्चोपसर्गे (३-३-१०६ )" इति कर्मण्येव स्त्रियामङ्। उपक्रमोश्चोपज्ञा च षष्ठ्यन्तेन सह समासे कृते नपुंसके भवतः। तदादिकथने। तस्य उपक्रमस्य उपक्रम्यस्य च प्राथम्यकथने, तस्याश्चोपज्ञाया उपज्ञेयस्य च प्राथम्यकथने गम्यमाने। नन्दस्य उपक्रमाः नन्दोपक्रमाणि मानानि। नन्देन किल प्रथमं मानानि कृतानि। तथा पाणिनेरुपज्ञा पाणिन्युपज्ञमकालकं व्याकरणम्। पाणिनिना प्रथमं कालाधिकाररहितं व्याकरणं कर्तुं शक्यमिति परिज्ञातम्। तथा चन्द्रोपज्ञमसञ्ज्ञकं व्याकरणम्। तदादिकथन इति किम्? देवदत्तोपक्रमः प्राकारः, यज्ञदत्तोपज्ञो रथः। आद्यज्ञानमुपज्ञा। कन्थोशीनरदेशे नाम्नि। कन्थाशब्दः कृतषष्ठ्यन्तसमासः नाम्नि गम्यमाने नपुंसकलिङ्गो भवति, सा चेत् कन्था उशीनरदेशे भवति। सौशमीनां कन्था सौशमिकन्थम्, आह्वरकन्थम्। नाम्नीति किम्? वीरणानां कन्था वीरणकन्था, वीरणरचितः कटः। उशीनरदेश इति किम्? दाक्षीणां कन्था, दाक्षिकन्था। ग्रामस्येयं सञ्ज्ञाऽस्ति, किन्तु उशीनरदेशे स ग्रामो न भवति। अव्ययपूर्वकश्च पथः। पथ इत्येष कृतसमासान्ताच्प्रत्ययः अव्ययपूर्वकः स नपुंसकलिङ्गो भवति। कुत्सितः पन्थाः कापथम्। “ऋक्पूरब्धूःपथामानक्षे (५-४-७४)" इत्यच् प्रत्ययः। “नस्तद्धिते (६-४-१७४)" इति टिलोपः। “कापथ्यक्षयोश्च (६-३-१०४)" इति कोः कादेशः। विरूपः पन्थाः विपथम्, दुष्पथम्। अव्ययपूर्वक इति किम्? जले पन्थाः जलपथः। कृतसमासान्तग्रहणं किम्? शोभनः पन्थाः सुपन्थाः। "न पूजनात् ५-४-६९) इति समासान्तप्रतिषेधः। चशब्दाद्यथाप्राप्तं च पथशब्दस्य लिङ्गं भवति। द्वौ पन्थानौ समाहृतौ द्विपथं, त्रिपथं, चतुष्पथमिति। द्विगुरपि पात्राद्यन्त इति नपुंसकत्वम्। न विद्यते पन्था यत्र स देशः अपथो देशः, साऽटवी अपथा, तद्वनमपथमिति वाच्यवत्परत्वाल्लिङ्गं भवति।

**भावेऽचिन्नणकान्तोऽदन्तो हि समूहभावकर्मार्थः।**

**धर्मार्द्धसारमित्राः स्वाङ्गदलन्यायसुहृदर्थे॥८॥**

भावेऽभिधेये यः शब्दो भवति अदन्तः स नपुंसकलिङ्गो भवति। चकार इद्यस्य स चित्, चिच्च नश्चाणश्च कश्च चिन्नणकास्ते प्रत्यया अन्तो यस्य स तथोक्तः तदन्यप्रत्ययान्तः भावे अकारान्तः नपुंसकलिङ्गो भवति। भसितं छात्रस्य शोभनं भक्तं लब्धं सिद्धं करणं हरणम्। सांराविणं सान्द्राविणमित्यत्र रु शब्दे द्रु गतौ इत्येताभ्यां सम्पूर्वाभ्याम् "अभिविधौ भाव इनुण् (३-३-४४)" इति इनुणप्रत्ययः। वृद्धिरावादेशः। "अणिनुणः (५-४-१५)" इति तद्धितः अण्। आदिवृद्धिरनुस्वारः। "इनण्यनपत्ये (५-४-१५४)" इति प्रकृतिभावः। "अट्कुप्वाङ् (८-४-२)" इति णत्वम्। आसितव्यम्, शयितव्यं, शयनीयं, स्थेयं, स्थातव्यम्। ईषदाख्यं भवं, दुराढ्यं भवमित्यत्र "कर्तृकर्मणोश्च भूकृञोः (३-३-१२७)" इति खल्प्रत्ययः। "अरुर्द्विषदजन्तस्य मुम् (६-३-३७) " इति मुमागमः। देवभूयम्। "भुवो भावे (३-१-१०७) इति क्यप्। भावे चाकर्मकेभ्यः इत्यधिकृत्य तयोरेव कृत्यक्तखलर्था इति भावे विधानम्। अचिन्नणकान्त इति किम्? "एरच् (३-३-५६)"। चयः नयः। "आशिते भुवः करणभावयोः (३-२-४५)" इति खच्। आसितं भवो वर्तते। न इति नङ्ननोः सामान्येन ग्रहणात् "यजयाचयतविच्छप्रच्छरक्षो नङ् (३-३-९०)"। यज्ञः, यत्नः, विश्नः, प्रश्नः, रक्षः। याच्ञा तु दीर्घान्तित्वात् स्त्रीलिङ्गा भवति। "स्वपो नन् (३-३-९१)"। स्वप्नः। णन्त्यादः। "नौ ण च (३-३-६०)" इत्यदो णप्रत्ययः। क। आखूनामुत्थानमाखूत्थो वर्त्तते। पिच्छ इत्यत्र च्छग्रहणाद्भावे कप्रत्ययः। अदन्त इति किम्? कारणा, हारणा, छिदा, भिदा, कृतिः, धृतिः, हृतिः। समूहभावकर्मार्थः। समूहः भावः कर्म चार्थोऽभिधेयं यस्य स तथोक्तः शब्दः अदन्तः नपुंसकलिङ्गो भवति। भैक्षं पादातम्। "भिक्षादिभ्योऽण् (४-२-३८)" इत्यण् प्रत्ययः। राजकं, राजन्यकम् , अश्वीयम्। भावार्थः। श्वेतत्वं श्वैत्यम्, कार्ष्ण्यम्, दार्ढ्यम्। "वर्णदृढादिभ्यः ष्यञ्च (५-१-१२३)" इति ष्यञ्। कर्मार्थः। ब्राह्मण्यम्, आधिपत्यम्। "गुणवचनब्राह्मणादिभ्यः कर्मणि च (५-१-१२४)" इति ष्यञ्। सख्यं स्तेयम्। "स्तेनाद्यन्नलोपश्च (५-१-१२५)" इति यत् नलोपश्च। गौरवं लाघवं मार्दवम्। अन्तेति किम्?। ग्रामता, जनता, बन्धुता, सहायता, गजता, राजता, श्वेतता, रक्तता, ब्राह्मणता। अकारान्ता अमी समूहभावकर्माण्यभिधातुं समर्था नान्यथेति। प्रथिमा, म्रदिमा, गरिमा, लघिमा। "पृथ्व्यादिभ्य इमनिच् वा (५-१-१२२)" इति इमनिच्।

नान्तत्वात् पुँल्लिङ्गता भवति। धर्म-अर्द्ध-सार-मित्र-इत्येते शब्दाः स्वाङ्ग-दल-न्याय्य-सुहृद्-इत्येतेष्वभिधेयेषु नपुंसकलिङ्गा भवन्ति। धर्मशब्दः धर्मसाधने योगादौ वाच्ये। इदं धर्मम्। "तानि धर्माणि प्रथमान्यासन्" (ऋग्वेदः १-१६४-४३)। स्वाङ्ग इति किम्? एष धर्म्मः सनातन इति। अर्द्धशब्दः दले। द्वयोः समप्रविभागे। इदमर्द्धं पिप्पल्याः अर्द्धपिप्पली। अर्द्धहरीतकी। दल इति किम्? सोमस्यार्द्धः सोमार्द्धः। अत्रार्धशब्द एकदेशवचनः। अत एव "अर्धं नपुंसकम् (२-२-२)" इत्येष समासो न भवति। सारशब्दः न्यायादनपेते। इदं सारं न्याय्यम्। तथा "सारं च तत्सङ्ग्रहश्च सारसङ्ग्रहः" इति। न्याय्य इति किम्? अयं सारः प्रधानम्। मित्रशब्दः सुहृदि सख्यौ। इदं मित्रं सखेत्यर्थः। सुहृदिति किम्? अयं मित्रः रविः। मरुद्विशेषाभिधानत्वात् पुँल्लिङ्गत्वं मित्रशब्दस्य। शेषाणामदन्तत्वात् पुँल्लिङ्गता।

**कुहकं चिबुकं लिङ्गं क्रकचं बीजं ललाटशृङ्गाटम्।**

**वटपिटलोष्टकरोटं पीठं पृष्ठं च कुष्ठं च॥९॥**

कुहकादीनि नामानि नपुंसकानि भवन्ति। एषामप्यदन्तत्वात् पुँल्लिङ्गं प्राप्तम्। इदं कुहकम् आश्चर्यम्, चिबुकं हनुः, लिङ्गं मेढ्रः चिह्नं च, क्रकचं करपत्रम्, बीजमङ्कुरं प्रकृतिः। ललाटं प्रसिद्धमेव। शृङ्गाटं त्रिकोणम्, वटं वटकम्, पिटं पिटकम्, लोष्टं मृत्पिण्डखण्डम्, करोटं करोदकम्, पीठं स्थापनम्। पृष्ठं प्रसिद्धमेव। कुष्ठं त्वद्दोषः, द्रव्यविशेषश्च।

**कुण्डाण्डभाण्डकारणशरणमृणक्षूणमुष्णतीर्थोक्थम्।**

**गुदवृन्दकुसीदानि श्राद्धान्ने रत्नचिह्ने च॥१९॥**

कुण्डादीनि नामानि नपुंसकानि भवन्ति। इदं कुण्डं प्रसिद्धमेव। अण्डं जन्तूनां कललाधारः। भाण्डं द्रव्यं भाजनं च, कारणं हेतुः, शरणं गृहावस्थानं तत्परता च, ऋणं देयद्रव्यम्, क्षूणं विकलता, उष्णमातपः, तीर्थं जलावतरणं पुण्यप्रदेशश्च, उक्थं सामवेदः, गुदं पायुः, वृन्दं सङ्घातः, कुशीदं विज्ञानं वाणिज्यादि च, श्राद्धं विधिपूर्वकं ब्राह्मणानां भोजनम्, अन्नमोदनानि। रत्नं प्रसिद्धमेव। चिह्नं लिङ्गम्।

**रूपं तल्पं शिल्पं समीपकूर्पोडुपान्तरीपाणि।**

**बिम्बकुटुम्बे कुङ्कुमसिध्मेध्मयुग्मगुल्मं च॥११॥**

रूपादीनि नामानि नपुंसकानि भवन्ति। रूपमाकृतिः, तल्पं शयनीयम्...दाराश्च, शिल्पं विज्ञानम्, समीपमासन्नता, कूर्पं भ्रुवोर्मध्ये रोम, उडुपं प्लवः, अन्तरीपं जलमध्याश्रयम्, बिम्बमाकृतिस्थानम्, कुटुम्बं भार्यादि, कुङ्कुमं गन्धद्रव्यम्, सिध्मं त्वद्दोषः, इध्मं समित्, युग्मं युगलम्, गुल्मं वीरुत् व्याधिविशेषश्च।

**किशलयशिशिरकुकुन्दरचामरकान्तारतीरदूराणि।**

**वैराक्षरान्तरोषरकिण्वशरावाणि दैवं च॥१२॥**

किसलयादीनि नामानि नपुंसकानि भवन्ति। किसलयं पल्लवः, शिशिरमृतुविशेषः, कुकुन्दरं नितम्बस्थकूपकः, चामरं वालव्यजनम्, कान्तारमटवी, तीरं तटम्, दूरं विप्रकृष्टम्। वैरं प्रसिद्धमेव। अक्षरमकारादिवर्णः, अन्तरं मध्यम्, ऊषरं यत्रोप्तं न प्ररोहति, किण्वं सुरायाः कारणम्, शरावं मृत्पात्रम्, दैवं पुराकृतं कर्म।

**कणिशं बडिशं पलिशं शीर्षं वर्षं च साहसं सबुसम्।**

**पुण्याहं सुदिनाहं यकृत्पुरीतज्जगद्भुवनम्॥१३॥**

कणिशादीनि नामानि नपुंसकानि भवन्ति। कणिशं शाल्यादीनां मञ्जरी, बडिशं मत्स्यग्रहणम्, पलिशं झाटकविशेषः, शीर्षं मूर्द्धा, वर्षं वत्सरः, साहसं दुष्करं कर्म, बुसं धान्यमलः। पुण्यं च तत् अहश्च तत् पुण्याहम्, तथा सुदिनाहम्, "राजाहःसखिभ्यष्टच् (५-४-९१)" इति टच् प्रत्ययः। परवल्लिङ्ग द्वन्द्वे तत्पुरुषे च इति नपुंसकत्वे सिद्धेऽपि नियमार्थं वचनम्। अन्यशब्दपरस्य तत्पुरुषे अहःशब्दस्य कृतटच्प्रत्ययस्य नपुंसकत्वं न भवति, अदन्तत्वात्पुल्लिङ्गं भवति। द्वे अहनी समाहृते द्व्यहः, त्र्यहः, पञ्चाहः, दशाहः, परमाहः, उत्तमाहः। यकृत् कालिजम्, पुरीतत् अन्त्रम्, जगत् लोकः, भुवनं स्वर्गः।

**नीडं गृहशशपूर्वे स्थूणोर्णे गन्धमादनास्थ्यक्षि।**

**सक्थ्यररिकशिपुजानु च कसेरुतोरणबिसार्द्धटच्चाहः॥१४॥**

नीडादीनि नामानि नपुंसकानि भवन्ति। नीडं कुलायः पक्षिणामावासः। गृहशब्दपूर्वः स्थूणाशब्दः शशपूर्वश्च ऊर्णाशब्दः नपुंसके भवतः। गृहस्थूणं शशोर्णम्। गृहस्य स्थूणा शशस्योर्णेति परवल्लिङ्गत्वे प्राप्ते नपुंसकार्थं वचनमिदम्। इदं

गन्धमादनं पर्वतविशेषः। अस्थि पञ्चमो धातुः। "रसासृङ्मांसमेदोस्थिमज्जशुक्राणि धातवः"। इदमक्षि लोचनम्, सक्थि सक्थिकम्, अररि कपाटः, कशिपु ग्रासाच्छादनम्, जानु जङ्घामध्यपर्व, कसेरु कन्दविशेषः, तोरणं भवनादीनां द्वारम्। इदं विसं मृणालमूलम्। अर्द्धं टच्। अर्द्धात्परष्टच् यस्तदन्तशब्दः। अर्द्धं नाव इति विगृह्य "अर्द्धाच्च (५-४-१००)" इति समासान्ते टचि कृते परवलिङ्गत्वे प्राप्ते नपुंसकार्थवचनमिदम्। अर्द्धनावम्। एवमर्द्धखारमित्यत्र "खार्याः प्राचाम् (५-४-१०१)" इति टचि कृते। इदमहः दिवसः। नान्तत्वात् पुँल्लिङ्गे प्राप्ते वचनम्।

॥ इति नपुंसकलिङ्गं समाप्तम् ॥

## पुँल्लिङ्गं स्नदुदन्तोऽप्घञ्क्यन्तोऽस्यगनदाब्धिकूपानाम्।
## स्वर्वज्रपरशुरथमखघनघृणिरदपुष्यवलतानाम्॥१५॥

पुँल्लिङ्गमधिकृतं वेदितव्यम्, आ स्त्रीलिङ्गात्। सकार-नकार-अकार-उकारान्तः शब्दः पुँल्लिङ्गो भवति।सन्तः। अयमनेहाः कालः, दोर्बाहुः। नंतः। धन्वा निर्जलो देशः, प्लीहा व्याधिविशेषः, मूर्द्धा शिरः, मज्जा षष्ठो धातुः। अकारान्तः। नगः धृक्षः पर्वतश्च, नरः, किन्नरः, पुरुषः, देवः, सञ्चयः, चयः। उकारान्तः। तरुः वृक्षः, कारुः शिल्पी, वायुः मरुत्, सेतुः जलबन्धः, केतुः ध्वजः एवमादि। अन्तशब्दग्रहणादनाम्नोऽपि। महिमा महतो भावः, गरिमा गुरोर्भाव इति विगृह्य। अप्घञ्क्यन्तः। अप्घञ्किप्रत्ययान्तः शब्दः पुँल्लिङ्गो भवति। भावेऽचिन्नणकान्तो दन्तो हीति नपुंसकत्वे प्राप्ते अप्घञन्तयोः पुँल्लिङ्गार्थं वचनम्। "ॠदोरप् (३-३-५७)"। दरः गरः प्रकरः लवः प्लवः भवः। घञन्तः। पाकस्त्यागः। अत्राप्घञ्ग्रहणं पूर्वनपुंसकलक्षणबाधनार्थम्। तेन अग्रमुद्धनः यत्र काष्ठानि संस्थाप्य हन्यन्ते। "उद्धनोऽत्याधानम् (३-८०) इत्यपन्तो निपात्यते। "आङ्गि युद्धे (३-३-१३) इत्यप्। आहवः रणम्। "अपघनोऽङ्गम् (३-३-८१) " इति अपघनः हस्तः पादो वा। "मूर्त्तौ घनः (३-३-७७)" इति घन इति काठिन्यमित्यर्थः। संहननं सङ्घातः, उपोद्धातः उद्धातः निघातः उत्पातः। मन्त्रणं मन्त्रः। निकित्यतेऽस्मिन्निति निकेतो वेश्म। अलङ्करणमलङ्कारः आभरणम्, क्लेशनं क्लेशः दुःखम्। सङ्ग्रामः युद्धम्। आदिः निधिः विधिः आधिः उपाधिः जलधिः अब्धिः वालधिः। असि-अग-मद-अब्धि-

कूपानां नाम पुँल्लिङ्गं भवति। अयमसिः करवालः खड्गः, पर्वतः शैलः अद्रिः गिरिः। नदाभिधानम्। भिद्यः, उध्यः, लौहित्यः। अब्धिः समुद्रः उदन्वान्। अयं कूपः प्रधिः उदपानः। स्वर्नामि। अयं त्रिदिवः स्वर्गः। वज्रनाम। दम्भोलिः शतकोटिः पविः वज्रम्। वज्रशब्दस्त्वर्द्धर्चादिषु दृश्यते। तेन

**"स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रः शत्रून् स्वरतोऽपराधात्।"**

**तथा— ["जान्वञ्चितातिहिमलीमसशाटकानां**

**मित्रादपि प्रथमयाचितभाटकानाम्।**

**पुत्रादपि प्रियतमैकवराटकानां ]**

**वज्रं दिवः पततु मूर्ध्नि किराटकानाम्।" इति**

परशुः छिदिः भिदिः, रथः स्यन्दनः चक्री, मखः यज्ञः अध्वरः वितानः , घनः जीमूतः पर्जन्यः, घृणिः रश्मिः, रदः दशनः रदनः, पुष्यः तिष्यः सिध्यः, क्लतः कुशूलः धान्यकोष्ठकः।

ध्वनितरुविषमासासुरवर्णमरुत्प्राणिनां विशेषाणाम्।

धान्यानां रात्रो ह्यसमाहारे दुन्दुभिरनक्षे॥१६॥

ध्वनिनाम ध्वनिविशेषाणां च नाम पुँल्लिङ्गं भवति। अयं ध्वनिः कलकलः कोलाहलः। ध्वनिविशेषाणां नाम। उदात्तः अनुदात्तः स्वरितः धैवतः। तरुः वृक्षः। तरुविशेषनाम। तालस्तमालः रसालश्चूतः आम्रः, अर्जुनः असनः, चन्दनः। विषनाम। हलाहलः मोहनः। मासविशेषाणां नाम। शुचिः शुक्रः नभस्यः। असुरनाम। दैत्यः। विशेषनाम। बलिः नमुचिः। शुचिः। वर्णविशेषः। श्वेतः नीलः लोहितः हरितः। मरुत् देवः। तद्विशेषः। इन्द्रः आदित्यः रविः अग्निः वह्निः। मरुद्वायुश्चोच्यते। तेन तन्नाम विशेषश्च पुंसि भवति। मरुद्वातः। अपानः उदानः पवमानः व्यानः प्रभञ्जनः। प्राणिनो नाम तद्विशेषाणां च नाम पुँल्लिङ्गं भवति। पिता भ्राता जामाता नप्ता, षण्ढः, वर्षधरः, सप्तिः अलि कपिः अहिः बकः कपोतः पारापतः अनडान्। विशेषनाम। दूतः पण्डितः कविः मुनिः यतिः ऋषिः विपश्चित् सुहृत् दुर्हृत् शत्रुः सुतः आर्यः राजा युवा राजन्यः। प्राणिन इत्येकवचननिर्देशाद्बहूनां प्राणिनां समेतानां यन्नाम तदनेन पुँल्लिङ्गं न भवति। इयं श्रेणिः शिल्पसमूहः, इयं परिषत् शिष्टसमुदायः। धान्यानां यन्नाम पुँल्लिङ्गं भवति। शालिः व्रीहिः तिलः। रात्रिशब्दः समासान्ताच्प्रत्ययो गुह्यते। सोऽसमाहारे वर्त्तमानः पुँल्लिङ्गे भवति। अहश्च रात्रिश्चेति विगृह्य

“अहःसर्वैकदेशसङ्ख्यातपुण्याच्च रात्रेः (५-४-८७)" इति टच्प्रत्ययः। "यस्येति च (५-४-१४८)" इति टिलोपः। "अहोरात्राविमौ पुण्यौ"। सर्वरात्रः पूर्वरात्रः मध्यरात्रः वर्षारात्रः दीर्घरात्रः। समाहार इति किम्? अहोरात्रं द्विरात्रं त्रिरात्रं पञ्चरात्रम्। द्विगुरपि पात्राद्यन्त इति नपुंसकता। दुन्दुभिरनक्षे। दुन्दुभिशब्दः अनक्षेऽभिधेये पुँल्लिङ्गो भवति। दुन्दुभिः भेरीविशेषः विषं चोच्यते- अनक्ष इति किम्? इयं दुन्दुभिः अक्षम्- उक्तं च- **"दुन्दुभ्या किल तत्कृतं पतितया यद्द्रौपदी हारिता"।**

**ग्रन्थिकलिकेलिबलिगिरिदृतिराशिं च मौलिकुक्षिपाण्यङ्घि।**

**अञ्जलिहाहाहूहूसङ्केतव्रातपोतपुताः॥१७॥**

ग्रन्थिप्रभृतयः शब्दाः पुँल्लिङ्गा भवन्ति। अयं ग्रन्थिः प्रसिद्ध एव। कलिः कलहः युगं च, केलिः परिहासः, बलिः उपहारः, गिरिः कन्दुकः, दृतिः चर्ममयो जलाधारः, राशिः पुञ्जः। चशब्दः प्राण्यङ्गाप्राण्यङ्गयोर्विभागार्थः। तेनेह ग्रन्थ्यादिपठितो वलिशब्दोऽप्राण्यङ्गः पुँल्लिङ्गो भवति। प्राण्यङ्गस्तु स्त्रीलिङ्गो भवति। इयं वलिः वली। मौलिः शिरश्चूलिका इति। कुक्षिराहाराधारः, पाणिः हस्तः, अङ्घ्रिः पादः, अञ्जलिः करविन्यासः। हाहाहूहू गन्धर्वौ। सङ्केतः प्रसिद्ध एव। व्रातः सङ्घातः, पोतः यानपात्रम्, पुतः स्फिक्। सङ्केतादीनां तान्तत्वान्नपुंसकत्वं प्राप्तम्। पुँल्लिङ्गार्थं वचनम्।

**स्तनवातायनहायनजनौदनाऽभिजनफेनवेमाश्म।**

**श्लेष्मोष्मपाप्मयक्ष्मात्मवर्ध्रमेढ्राश्च मन्त्रयुताः॥१८॥**

एते स्तनादयः पुँल्लिङ्गा भवन्ति। अयं स्तनः कुचः, वातायनो गवाक्षः, हायनः संवत्सरः, जनः लोकः, ओदनः तण्डुलपाकः, अभिजनः कुलीनता, फेनः जलविकारः, वेमा तन्तुवायोपकरणः, अश्मा पाषाणः, श्लेष्मा कफः, ऊष्मा उष्णत्वं, पाप्मा पापम्, यक्ष्मा क्षयरोगः, आत्मा जीवः, वर्ध्रः चर्मतन्तुः, मेढ्रः शेफः, मन्त्रः उँकारादिवर्णरचना। स्तनादीनां नान्तत्वात्, वेमादीनां मन्नन्तत्वात्, वर्ध्रादीनां हल्पूर्वरान्तत्वात्, नपुंसकत्वं प्राप्तम्।

**गर्त्तोऽक्टो निकाय्योऽथाच्छादपटस्तथोत्तरसङ्गः।**

**नूपुरहारकलापा रैकोशस्वार्थविभवाश्च॥१९॥**

गर्त्तादयः पुलिङ्गा भवन्ति। अयं गर्त्तः प्रसिद्ध एव। अवटः श्वभ्रं, निकाय्यः गेहम्, अयमाच्छादनपटः। उत्तरासङ्गः वस्त्रम्, नूपुरः हारः कलापः आभरणजातिः। राः धनम्, कोशः निधिः, स्वः वित्तम् , अर्थः विभवः। चशब्दः पादपूरणार्थः।

बहवश्च सक्तुवल्वजदारालाजाऽसुगृहा दशा वास्त्राः।

नाड्यन आदि जनापः पराणि व्रणयुगपदाङ्गानि॥२०॥

एते शब्दाः पुँल्लिङ्गा भवन्ति। चशब्दाद्बहवश्च भवन्ति। इमे सक्तवः यवचूर्णः। इमे वल्वजाः वीरणरचितकटः। इमे दाराः भार्या लाजा असु इति पृथक्पदकरणात्तत्पर्यायस्यापि पुंस्त्वं बहुत्वं च भवति। इमे लाजा अक्षताः, इमे असवः प्राणाः। इमे गृहा गेहम्। अर्द्धर्च्चादित्वादिदं गृहं गृहे गृहाणि। इमे दशाः वस्त्रस्यावयवभूताः। वास्त्रा इति किम्? इयं दशा वयोऽवस्था। नाडी-अनस्-आदि-जनाप इत्येतेभ्यः पराणि व्रण-युग-पद-अङ्ग-इत्येतानि नपुंसकानि सन्ति पुँल्लिङ्गानि भवन्ति। नाडीव्रणः, अनोयुगः, शकटयुगम्, जनपदः देशः, अपाङ्गं कटाक्षः। एतत्पराणीति किम् ?। शिरोव्रणं शिरोव्रणः, कलियुगं, वस्त्रयुगम्, गोष्पदम्, आस्पदम्, उत्तमाङ्गम्, वराङ्गम्। व्रणं व्रणः युगं पदमङ्गम्। रान्तं चेति चशब्दान्नपुंसकता युगादीनाम्।

**मलखलकपोलकम्बलचषालकल्लोलकालकीलगलाः।**

**तरलप्रवालतण्डुलकललोपलतूलफालपूलनलाः॥ २१॥**

मलादयः शब्दाः पुँल्लिङ्गा भवन्ति। अयं मलः प्रसिद्ध एव। खलः पिण्याकः। मलशब्दसाहचर्यात् खलशब्दो यः मलवाची स पुलिङ्गो भवति। अन्यार्थस्य तु यथाप्राप्तमेव लिङ्गं भवति। इदं खलं धान्यमर्द्दनभूमिः, अयं खलो दुर्जनः, कपोलः गण्डः, कम्बलः ऊर्णामयं प्रावरणम्, चषालः यूपकटकम्, कल्लोलः वीचिः, कालः त्रुट्यादिलक्षणः, कीलः कीलनद्रव्यम्, गलः कण्ठः, तरलः हारमध्यमणिः, प्रवालः अङ्कुरः, तण्डुलः फलान्तः कणः, कललः शुक्रशोणितसमवायः, उपलः पाषाणः, तूलः अर्कादीनां फलान्तर्वस्तु, फालः अयोमयो गोलः, समन्ततो वृतः, पूलस्तृणसङ्घातः, नलः तृणविशेषः।

**पुँल्लिङ्गाधिकारः समाप्तः।**

**स्त्रीलिङ्गं योनिमतां प्राग्दीर्घान्त उदितोऽप्यनुक्त इह।**

**द्रुहलिल्लिदन्तदीधितिजात्याजिद्रदद्युविट्छर्द्दिः ॥ २२ ॥**

स्त्रीलिङ्गमधिकृतं वेदितव्यमा विषकुलिशसंशब्दनादिति। योनिमताम्। योनिर्भगः त्वद्वतां प्राणिनां यदभिधानं तत् स्त्रीलिङ्गं भवति। इयं माता जननी, इयं स्वसा भगिनी, दुहिता सुता, ननान्दा भर्तृभगिनी, याता देवरभार्या, दनुर्दानवमाता, कद्रूः नागमाता, दितिर्दैत्यमाता, योषित् युवतिः, स्त्री भार्या, जाया पत्नी। प्राग्दीर्घान्तः। शब्दः प्राक् पूर्वस्मिन् उदितोऽपि कथितोऽप्यन्यलिङ्गः स्त्रीलिङ्गो भवति। इयं शमी शिंशपा रोहिणी। तरुविशेषत्वात्पुल्लिङ्गमुक्तम्। द्राक्षा तिन्तिडिका। फलजातित्वान्नपुंसकत्वं प्राप्तम्। मल्लिका मालती केतकी। कुसुमजातित्वादेषां नपुंसकत्वमुक्तम्। मक्षिका यूका पिपीलिका। प्राणित्वात्पुंस्त्वमुक्तम्। तथापि दीर्घान्तत्वादनेन स्त्रीत्वं भवति। अन्तशब्दग्रहणादनाम्नोऽपि दीर्घान्तस्य स्त्रीत्वं भवति। व्यावक्रोशी व्यावहारी व्यावचर्ची वर्तते।

"कर्मव्यतिहारे णच् स्त्रियाम् (३-३-४३)" इति णच्। "णचः स्त्रियामञ्" (५-४-१४) इति तदन्तस्य "टिड्ढाणञ्० (४-१-१८)" इति ङीप्। गोत्रा गोसमूहः, रथकट्या, खलिनी। "इनित्रकट्यचश्च (४-२-५१)" इति समूहे प्रत्ययाः। अनुदितोऽपि। दया करुणा, लीला विलासः, माला स्रक्, इयं नौर्द्रौणी। द्यौः द्यावौ द्याव इति गगनार्थो द्योशब्दो विद्यते। प्रागिति किम्? कीलालपाः ग्रामणीः, यवलूः, पुरुष इत्यादौ नित्यं स्त्रीत्वं माभूत्। अत्र हि वाच्यवदनेकलिङ्गार्थो भवति। वक्ष्यति तत्परं लक्षणमनेन न बाध्यते। अनुक्त इह द्रुहलिल्लिदन्त। इहास्मिन् लिङ्गानुशासने यः न उक्तः अन्यलिङ्गः स द्रुशब्दान्तः हलन्त इदन्तः लित्प्रत्ययान्तशब्दः स्त्रीलिङ्गो भवति। इयं दद्रुः त्वग्दोषः, शतद्रुः नदी। अनुक्त इति किम्? हरिद्रुः तरुः, सितद्रुः अब्धिः, शतद्रुः नदः। हलन्तः। इयं त्विट् दीप्तिः, विप्रुट् शीकरः, समित् इध्म, वीरुत् गुल्मम्। इदन्तः। रुचिः तेजः, धूलिः पांसुः, दर्विः पाकघट्टनी, वेदिः यागार्थं भूमिरचनाविशेषः, अहन्तिर्दानम्। लित्। तल्-प्रत्ययान्तः। ग्रामता जनता। अनुक्त इति किम्? अनड्वान् विपश्चित् सुकृत् कविः मुनिः हरिः गिरिः। अन्तशब्दग्रहणादियं भक्तिः कृतिः लब्धिः सिद्धिरित्यादि। प्राङ्ग्रहणनिवृत्त्यर्थमिह ग्रहणम्। तेन परत्रापि यन्नोक्तमन्यलिङ्गं तत् स्त्रीलिङ्गं भवति। अन्यथा अनेकलिङ्गार्थस्य स्त्रीत्वं प्राप्नोति। दीधितिः रश्मिः, जातिः कुसुमविशेषः, इयमाजिः रणम्, इयं दरत् हृदयम्, इयं द्यौः

स्वर्गः गगनं च, इयं विट् पुरीषम्, इयं छर्द्दिः वान्तिः , छर्दिः....... भवति। वैश्यार्थस्तु पुँल्लिङ्ग एष। अयं विट् वैश्यः।

**भाद्वाःपूरुडुकाकुप्रियङ्गुहृत्स्नायुरज्जुचञ्चुतनुः।**

**बहवश्च समासिकतावर्षाप्सुमनोजलोकसोऽप्सरसः ॥ २३।।**

एते भासादयः शब्दाः स्त्रीलिङ्गा भवन्ति। इयं भाः कान्तिः, इयं द्वाः द्वारम्, इयं पूः पुरम्, इयमुडुः भम्। द्वार्-पुरुडुशब्दानां नपुंसकत्वं प्राप्तम्। इयं काकुः उच्चारणविशेषः। हृद् हृदयं, स्नायुः शरीरान्तर्वद्ध्रः, रज्जुबन्धनद्रव्यम्, चञ्चुः पक्षिणां तुण्डम्, तनुः शरीरम्। उकारान्तत्वात्पुंस्त्वं प्राप्तम्। बहवश्च। इमाः समाः वर्षम्, इमाः सिकता वालुका, वर्षा ऋतुविशेषः, इमा आपः जलं, सुमनसो देवाः। बहव इति किम्? सुमनः पुष्पम्। जलौकसः रक्ताकर्षप्राणी। अप्सरसः देवयोषित्। पृथगुपन्यासात् इयमप्सरा इत्येकवचनमपि।

इति स्त्रीलिङ्गाधिकारः समाप्तः।

**विषकुलिशकलत्राणि त्रिविष्टपाभ्रे नपुंसके पर्व्व।**

**प्रसवाश्ववडववाक्छेदगरुदुच्चारवेधसः पुंसि॥२४॥**

एते विषादयः पुँल्लिङ्गा भवन्ति। कुलिशं वज्रम्, इदं कलत्रं भार्या, त्रिविष्टपं स्वर्गः, अभ्रं मेघः। इदं पर्व। नान्तत्वात् पुंस्त्वं प्राप्तम्। प्रसवः कुसुमम्, इमौ अश्ववडवौ इमे अश्ववडवाः, अश्वाश्च वडवाश्चेति द्वन्द्वे कृते परवल्लिङ्गप्राप्तिः भवति। अनुक्रान्तो वाकोऽनयाऽनेन वा नपुंसके.....वा अनुवाकः इत्यत्र "अकर्तरि च कारके सञ्ज्ञायाम् (३-३-१९)" इति नपुंसके घञ् कुर्वन्ति। तदुभयथा....अयं छदः पर्णम्, अयं गरुत् पिच्छम, अयमुच्चारः पुरीषम्, "मातुरुच्चार एव सः"। इति यथा....समाप्तम्।

**विंशत्याद्येकार्था स्त्रियां तु नित्यं नपुंसकेऽदन्ता।**

**सङ्ख्या शतादिरिष्टा द्वित्याद्यर्थे च सङ्ख्यायाम्॥२५॥**

विंशत्याद्या सङ्ख्या एकार्था भवति एकवचनान्ता प्रयुज्यते। सङ्ख्येये......यां च वर्तमाना। विंशत्या पुरुषैः कुटुम्बैर्वा। एवं त्रिंशत् चत्वारिंशत् पञ्चाशत् षष्टिः सप्ततिः अशीतिः नवतिः। अदन्ता शतादिसङ्ख्या नित्यं नपुंसके भवति। शतं पुरुषाः शतं स्त्रियः शतं कुलानि। एवं सहस्रम् अयुतं नियुतम्। अदन्तेति किम् ? इ...... क्षा, इयं कोटी, अयं शङ्कुः सङ्ख्या। इष्टेतिग्रहणं छन्दः पूरणार्थम्।

द्वित्वाद्यर्थे च सङ्ख्यायाम्। विंशत्याद्या शताद्या च सङ्ख्या सङ्ख्यायां वर्तमाना द्वित्याद्यर्थे भवति। च शब्दादेकार्था च भवति। पुरुषाणां विंशतिः। द्वे विंशती तिस्रो विंशतयः, पुरुषाणां शतं द्वे शते त्रीणि शतानि। एवमादि।

**स्त्रीलिङ्गनपुंसकयोरानन्तोत्तरपदो द्विगुश्चार्चिः।**

**षष्ठ्यादिपदाच्छायाशालासेनासुराः सनिशाः ॥ २५ ॥**

आकारान्तमनन्तं चोत्तरपदं यस्मिन् द्विगौ स तथोक्तो द्विगुः समासः स्त्रीलिङ्गे नपुंसके च भवति। पञ्चखट्वाः समाहृताः पञ्चखट्वी पञ्चखट्वम्। "ह्रस्वो नपुंसके (१-२-४७)" इति ह्रस्वः। दशमाली दशमालम्। अनन्तोत्तरपदः। पञ्चतक्षी पञ्चतक्षम्। अत्र वक्तव्यादेव नकारलोपः। अनो नलोपश्च। शतराजी शतराजम्। अर्चिश्च स्त्रीनपुंसकयोर्भवति। इयमर्चिः इदमर्चिः। षष्ठ्यादिपदाच्छाया। षष्ठ्यन्तं पूर्वपदं यस्याश्च्छायायाः सा स्त्रीलिङ्गे नपुंसके च भवति। वृक्षस्य च्छाया वृक्षच्छायं वृक्षच्छाया, पर्वतच्छाया पर्वतच्छायम्। पक्षे नपुंसकत्व विधीयते। तथा षष्ठ्यादिपदाः। शालासेनासुरानिशाशब्दाः स्त्रीलिङ्गनपुंसकयोर्भवन्ति। गोशाला गोशालं, क्षत्रियसेना क्षत्रियसेनं, यवसुरा यवसुरम्, भूतनिशा भूतनिशम्।

**पुँल्लिङ्गस्त्रीलिङ्गा मरीचिमणियष्टिमुष्टियोन्याणिः।**

**त्रुटिमषिपाटलिशाल्मलितरणिश्रोण्यूर्मयो बस्तिः॥२६॥**

एते मरीच्यादयः शब्दाः पुँल्लिङ्गाः स्त्रीलिङ्गाश्च भवन्ति। अयं मरीचिः इयं मरीचिः रश्मिः, अयं मणिः इयं मणिः माणिक्यम्, अयं यष्टिः इयं यष्टिः अवष्टम्भनदण्डः, इयं मुष्टिः अयं मुष्टिः अङ्गुलिसङ्कोचः, अयं योनिः इयं योनिः प्रसिद्ध एव, अयमाणिः शकटकीलिका, अयं त्रुटिः इयं त्रुटिः काललेशः, अयं मषिः इयं मषिः। एवं पाटलिः शाल्मलिः तरणिः श्रोणिः नितम्बः ऊर्मिः बस्तिः।

**अरणीषुधीषुतिथयः समृत्यु कर्कन्धुबाहुकण्डु तथा।**

**सञ्ज्ञा बहुलं वाच्यवदशरन्नित्यं ह्यनेकलिङ्गार्थः॥२७॥**

अरण्यादयः शब्दाः पुँल्लिङ्गस्त्रीलिङ्गा भवन्ति। अरणिः अग्निमन्थनकाष्ठम्। एवमिषुधिः भस्त्रा। क्यंतत्वात्पुंस्त्वं प्राप्तम्। इषुः शरः। तिथिः प्रतिपदादिषु। कर्कन्धुबाहुकण्डुशब्दाः सह मृत्युशब्देनोभयलिङ्गा भवन्ति। अयं कर्कन्धुः बदरीकं दुःपाकस्थानम्, बाहुर्भुजः, कण्डुर्गात्रघर्षणे। वाच्यवत्। वाच्यमभिधेयं यल्लिङ्गं सञ्ज्ञायाः तेन तुल्यं सञ्ज्ञाशब्दो बहुलं भवति। शरयुः..........। श्रीकण्ठो नाम देशः,

मालवको नाम देशः, मथुरा नाम नगरी, कन्यकुब्जं नामनगरम्।........शार्दूलविक्रीडितम्। उपचित्रकम्। पदचतुरुर्द्धं नाम वृत्तम्। केषांचित् न भवति। वरेन्द्राः तीरभुक्तिर्नाम देशः। कौङ्कणं कश्मीरं नाम देशः। शालुकिनी लिङ्गाषाढी नाम ग्रामः। तैलावटं श्रीभवनं नाम ग्रामः। मालिनी स्रग्धरा आपीडः पणव इति नाम वृत्तम्। क्वचिद्वचनव्यत्ययः। गोदौ नाम ह्लदौ तयोरदूरभवो ग्रामः गोदौ ग्रामः। पञ्चालो नाम देशः। खलतिकं नाम वनानि, खलतिकस्य पर्वतस्यादूरभवानि। क्वचिल्लिङ्गवचनव्यत्ययः। वरणानामदूरभवं नगरं वरणाः नगरम्। अशरन्नित्यं ह्यनेकलिङ्गार्थः। न एकमनेकं लिङ्गमर्थोऽभिधेयं यस्य शब्दस्य स वाच्यवद्भवति, नित्यं शरदं वर्जयित्वा। क्षीरं पिबतीति क्षीरपाः स्त्री ना कुलं वा। एवं ग्रामणीः यवलूः। अयं काष्ठभित् कुठारः, इयं काष्ठभित् वासी, इदं काष्ठभित् करपत्रम्। आत्मम्भरिः पुरुषः, आत्मम्भरिः स्त्री कुटुम्बं वा, दाक्षिः पुमान् स्त्री कुलं वा। श्रीमान् पुमान्, श्रीमती स्त्री, श्रीमत् कुलम्, धर्ममनाः पुमान्, स्त्री कुलं वा, शुद्धमतिः ना स्त्री कुलं वा, स ना, सा स्त्री, तत् कुलम्। द्वौ नरौ, द्वे स्त्रियौ, द्वे कुले। श्वेतः पटः, श्वेता पटी, श्वेतं वस्त्रम्। अयं सिन्धुः अब्धिः, इयं सिन्धुः, अयं गौ रश्मिः इयं गौः भूमिः, अयं किष्कुः इयं कुष्कुः वितस्तिः हस्तः, अयं करेणुः हस्ती हस्तिनी वा। शरदिति किम्? इयं शरत् ऋतुविशेषः वर्षं च। हलन्तत्वात् स्त्रीलिङ्गमेव भवति। नित्यग्रहणं बहुलनिवृत्त्यर्थम्।

**स्वत आमलकबिभीतकतटभल्लातकहरीतकास्त्रिषु ति(हि)।**

**ङ्यन्ताः स्त्रियामथान्ताः शृङ्खलसविषाणनखरवल्लूराः॥२८॥**

एते आमलकादयः शब्दाः, स्वत एव नाभिधेयवशात्, त्रिष्वपि लिङ्गेषु भवन्ति। स्त्रियां ङीप्प्रत्ययान्ता भवन्ति। आमलकः आमलकी आमलकं, बिभीतकः बिभीतकी बिभीतकम्, तटः तटी तटम्, भल्लातकः भल्लातकी भल्लातकम्, हरीतकः हरीतकी हरीतकम्। शृङ्खलादयः शब्दाः स्त्रियामथान्ताः आकारान्ता भवन्ति। शृङ्खलः शृङ्खला शृङ्खलम्, विषाणः विषाणा विषाणम्, नखरः नखरा नखरम्, वल्लूरः वल्लूरा वल्लूरम्।

**परवल्लिङ्गं द्वन्द्वे तत्पुरुषे च द्विगौ हि वाच्यमिव।**

**अर्थान्ते च प्राद्यलमापन्नप्राप्तपूर्वे च॥२९॥**

द्वन्द्वे समासे यत् परपदे लिङ्गम्, समासेऽपि तद्भवति। इमौ मयूरीकुकुट्टौ, इमे कुक्कुटमयूर्यौ, इमे न्यग्रोधशिंशपे, इमौ शिंशपान्यग्रोधौ। तत्पुरुषे च। यत् परपदे लिङ्गं तद्वत् समासेऽपि लिङ्गं भवति। अर्द्धं पिप्पल्याः अर्द्धपिप्पली, अर्द्धहरीतकी, राजपुरुषः, राजदारिका, नीलोत्पलम्। द्विगौ हि वाच्यमिव। द्विगौ हि समासे वाच्यमिव लिङ्गं भवति। असमाहारार्थ आरम्भः। पञ्चसु कपालेषु संस्कृतः पुरोडाशः पञ्चकपालः, दशकपालः। परवल्लिङ्गत्वं प्राप्तम्। अत्र अर्थान्ते च तत्पुरुषे वाच्यमिव लिङ्गं भवति। ब्राह्मणार्थ ओदनः, ब्राह्मणार्थी शिखरिणी, ब्राह्मणार्थं पक्वान्नमिति। प्रादि-अलम्-आपन्न-प्राप्त-पूर्वे च तत्पुरुषे वाच्यमिव लिङ्गं भवति। निर्गतः कौशाम्ब्याः निःकौशाम्बिः निःखट्वः, अतिनु काष्ठम्। परवल्लिङ्ग प्राप्तम्। अलं जीविकायै अलंजीविकः पुरुषः, आपन्नो जीविकाम् आपन्नजीविकः, एवं प्राप्तजीविकः।

**दृश्यन्तेऽर्द्धर्चाद्याः नपि पुंसि च शङ्खपद्ममम्भोजे।**

**भूतो ग्रहेऽथ लवणे सैन्धवमित्यनुदितं जनाज्ज्ञेयम्॥३०॥**

अर्द्धर्चप्रभृतयः शब्दाः नपि पुंसि च दृश्यन्ते। इदमर्द्धर्चम्। अर्द्धर्चः। अर्द्धमृच इति विगृह्य "ऋक्पूरब्धूःपथामानक्षे (५-४-७४)" अप्प्रत्यये कृते परवल्लिङ्गत्वं प्राप्तम्। एवं गोमयः कषायः कार्षापणः कुतपः कपाटं गृहः वज्रः अन्धकार इत्यादयः। दृशिग्रहणं प्रयोगानुस्मरणार्थम्। शङ्खपद्ममम्भोजे। शङ्खपद्मशब्दौ अम्भोजे जलजे वाच्ये नपुंसके पुंसि च भवतः। इदं शङ्खम्, अयं शङ्खः। इदं पद्मम्, अयं पद्मः। अम्भोज इति किम्? अयं शङ्खः अयं पद्मः निधिः।भूतो ग्रहे। भूतशब्दः ग्रहे पिशाचे वाच्ये उभयलिङ्गो भवति। इदं भूतम्, अयं भूतः पिशाचः। ग्रह इति किम् ?। एतानि भूतानि पृथिव्यादीनि। भूतः पुरुषः, भूता स्त्री, भूतं कुलम्। अथ लवणे सैन्धवम्। लवणेऽभिधेये सैन्धवमित्येतन्नाम उभयलिङ्गं भवति। इदं सैन्धवम् , अयं सैन्धवः, लवणम्। लवण इति किम् ?। सैन्धवः अश्वः, सैन्धवी स्त्री, सिन्धौ भवमिति विग्रहः। नित्यं पुँल्लिङ्गानां यो नपुंसके प्रयोगो दृश्यते, यश्च नित्यं नपुंसकानां पुँल्लिङ्गे प्रयोगो दृश्यते, स अर्द्धर्चादित्वाद्द्रष्टव्यः। इत्यनेन प्रकारेण यन्मया न उदितं न कथितं तज्जनाद्विशिष्टलोकात् ज्ञेयमवगन्तव्यमिति।

**व्याडिप्रणीतमथ वाररुचं सचान्द्रं जैनेन्द्रलक्षणगतं विविधं तथाऽन्यत्।**

**लिङ्गस्य लक्ष्म हि समस्य विशेषयुक्तमुक्तं मया परिमितं त्रिदशा इहार्याः॥३१॥**

**अव्यापि संशयि गतार्थमनिष्टसङ्गि लिङ्गानुशासनमिहाज्ञतया मया यत्।**

**प्रोक्तं हि किञ्चिदविचार्य तदार्यवर्यैः संस्कार्यमस्ति यदि कार्यमुतावधीर्यम्॥३२॥**

**लिङ्गानुशासनमिदं कृतमुन्नतेन शुभ्रैर्गुणैः कविहितं भुवि वामनेन।**

**बुद्धाऽखिलं विमलशब्दगतप्रमेयं नातः परं शुभतरं स्फुटमस्ति लोकाः॥३३॥**

इति लिङ्गानुशासनवृत्तिः समाप्ता।

संवत् १२७३ श्रावणवदि ८ रवौ लिङ्गवृतिपुस्तका लिखितेति।

## आचार्यवररुचिविरचितो लिङ्गवृत्तिविचारः

यावान् कश्चि[त्रान्त-]शब्दोऽत्र नपुंसके तु बोद्धव्यः। यावानिति परिमाणवाचि शब्दः। कश्चिदित्यनिर्दिष्टनामधेयः। त्र अन्ते यस्य स त्रान्तः। शब्द्यन्तेऽनेनार्था इति शब्दः। अभिलप्यन्त इत्यर्थः। स च शब्दश्चतुर्विधः- जातिशब्दः, गुणशब्दः, क्रियाशब्दः, यदृच्छाशब्दः। तत्र जातिशब्दो गौरश्वः पुरुषो हस्ती शकुनिः ब्राह्मण इत्येवमादयः। गुणशब्दे नीलः शुक्लो हरित इत्येवमादयः। क्रियाशब्दः पचति, पठति, गच्छतीत्येवमादयः। यदृच्छाशब्दो डित्थ डवित्थ आवाडवतु इत्येवमादयः।

स त्रान्तः शब्दो निर्दिश्यते नपुंसके तु बोद्धव्यो ज्ञातव्यः। तुशब्दोऽवधारणे, नपुंसकमिति न स्त्री न पुमान्, उभयहीन इत्यर्थः।

**स्तनकेशवतो स्त्री स्याल्लोमशः पुरुषः स्मृतः।**

**उभयोरन्तरं यच्च तदभावे नपुंसकम् ॥** इति।

तद्यथा- इदं शास्त्रम्, वस्त्रम्, पवित्रम्, गोत्रम्, मात्रम्, सूत्रम्, होत्रम्, नेत्रम्, पात्रम्, पौत्रम्, नक्षत्रमित्येवमादयः। यद्येवं तदा सर्वेषामेव वान्तानां नपुंसकता स्यादित्याशङ्क्याह- अन्यत्र हि **वृत्र-मित्र-पुत्र-मन्त्रेभ्यः आम्नायात्।**

अन्यत्र हीत्यादि कथमेतज्ज्ञेयमित्याशङ्क्याह- आम्नायात्। आम्नायः आचार्यक्रमपाठः, पूर्वाचार्योपदेशः।

अथ के आचार्याः? हरिहरहिरण्यगर्भादयः। तेषामाम्नायात् पाठात् वृत्रादयः पुंसि भवन्ति। तद्यथा- अयं वृत्रो दानवः, अयममित्रो रिपुः, अयं पुत्रः सुतः, अयं मन्त्रो होमवाक्यो वेदः। हिशब्दोऽनुक्तसमुच्चयार्थः। तेन च्छत्र-च्छात्र-विष्णुमित्रादीनां पुँल्लिङ्गता सिद्धा भवति। अयं च्छत्रो नर्तकः आतपत्राणस्य च्छत्रशब्दस्यनपुंसकलिङ्गतैव भवति। इदं च्छत्रं वर्षातपत्राणम्, अयं च्छात्रोऽध्येता, अयं विष्णुमित्रः पुरुषः कश्चित्।

यात्रा मात्रा भस्रा दंष्ट्रा विद्यात् स्त्रियां वरत्रा च। यात्रा मात्रेति एतान् शब्दान् स्त्रियां विद्यात् जानीयादित्यर्थः। तद्यथा- इयं यात्रा देवकुलगमनपूजार्था, इयं मात्रा अक्षरावयवः स्तोकश्च, इयं भस्रा लौहधमनी, इयं दंष्ट्रा दशनविशेषः, इयं वरत्रा चर्म त्रिगुणीकृता रज्जुः।

ईदूदन्तमप्यच्चैकाच्छरद्दरदृषत्प्रावृषश्चैव। ईदूदन्तमिति ईच्च ऊच्च ईदूतौ तावन्ते यस्य तदिदं शब्दरूपसिद्धमीदूदन्तम् अन्तशब्दः प्रत्येकमभिसम्बद्धयते। एकोऽच् यस्य तदेकाच् एक-स्वरमित्यर्थः। ईदूदन्तं यच्च एकाच् प्रातिपदिकं तत् स्त्र्यधिकारात् स्त्रियां भवति। तद्यथा- इयं स्त्री योषित्, इयं श्रीलक्ष्मीः प्रभुशक्तिश्च, इयं भ्रूः अक्ष्णोरुपरि रेखा, एकाजिति किम्? इति मा भूत् सेनानी, ग्रामणीः, शरदादयोऽपि। शब्दाः स्त्रियां भवन्ति। इयं शरद् ऋतुः, इयं दरत् श्रीर्वा स्थानम्, इयं दृषत् शिला, इयं प्रावृट् जलदसमयः। चकारः समुच्चयार्थः। एवकारोऽवधारणे।

**स्थूणोर्णे स्त्रीयोगे गृहे शशपूर्वयोर्नपुंसकता।** स्थूणा च उर्णा च स्थूणोर्णे स्त्रीयोगस्तस्मिन् स्तः स्त्रीलिङ्गे भवत इत्यर्थः। इयं स्थूणा काष्ठमयी द्विकण्डिका, इयम् उर्णा मेषलोम। तयोरेव स्थूणोर्णयोर्यथासङ्ख्यं गृहशशपूर्वयोर्नपुंसकता। यथा- इदं गृहं स्थूणम्, इदं शशोर्णं गृहशशपूर्वयोरिति किम्? इह मा भूत् शालायाः स्थूणा इयं शालास्थूणा।

सर्वस्याक्षिनाम्नो जलनाम्नश्चैवमुक्त्वापः सर्वस्याक्षिनाम्न इति। नपुंसकतेति वर्त्तते। सर्वशब्दो निरवशेषवाची। सर्वम् अक्षिनाम जलनाम च नपुंसके भवति। अक्षिनाम तावद् इदं चक्षुः लोचनं नेत्रं दर्शनम् ईक्षणं नयनमित्येवमादयः। जलपर्यायः, इदं जलम् अम्भः तोयम् अम्बु विषं नीरं वारि कबन्धम् उदकं तरलम् अमृतमित्येवमादयः। जलवाचित्वादपशब्दस्यापि नपुंसकत्वं प्राप्नोतीत्यत आह अपः परित्यज्य अपशब्दं वर्जयित्वेत्यर्थः। अस्य हि स्त्र्यधिकारात् स्त्रीलिङ्गता भवति, बहुवचनान्तता च सदैव इमा आपः।

जलकुसुमनाम सर्वं नपुंसकं स्यात् पद्मं विभाषा। जलकुसुमनाम सर्वं नपुंसकमिति जलकुसुमनामानि तेषां पर्यायाः। सर्वं नपुंसकलिङ्गं निरवशेषं भवति। यद्यथा- इदं कमलं पङ्कजं सरोरुहं कोकनदं तामरसं कुशेशयं विसप्रसूनं कुमुदम् इन्दीवरम् उत्पलं कुवलयं कह्लारम् अब्जं सौगन्धिकमित्येवमादयः। इदं पद्मम् अयं पद्मः, जलकुसुमनाम इति नपुंसके प्राप्ते पद्मशब्दस्य विभाषा क्रियते। उक्तञ्च

**वसन्ते शीतभीतेन कोकिले न वने रुतम्।**
**अन्तर्जलगता पद्माः श्रोतुकामा इवोत्थिताः ॥**

अब्भ्रादृते अम्बुदाख्याः पुंसि केशनखदन्तसञ्ज्ञाश्च। अब्भ्रादृते ऋतेशब्दो वर्जनार्थे वर्तते। अब्भ्रशब्दमेकं वर्जयित्वा त्यक्त्वा अम्बुदा मेघास्तेषां समाख्याः सञ्ज्ञाः पर्याया इत्यर्थः। तेऽम्बुदाख्याः शब्दाः पुंसि भवन्ति। यद्यथा- इमे अम्बुदाः

मेघाः पयोधराः घनाः जीमूताः शीतकाः बलाहकाः नीरदाः कन्धरा इत्येवमादयः। अब्भ्रशब्दस्य तु नपुंसकता इदमब्भ्रम्। केशनखदन्तसञ्ज्ञाश्च। सञ्ज्ञाशब्दः प्रत्येकमभिसम्बध्यते। केशपर्यायवाचका नखपर्यायवाचका दन्तपर्यायवाचकाश्च ये शब्दाः, ते पुंसि भवन्ति; केशसञ्ज्ञास्तावद् इमे केशाः कचाः शिरसिजाः शिरोरुहाः मूर्द्धजाः इत्येवमादयः।

नखसञ्ज्ञाः इमे नखा कररुहाः करजाः मदनाङ्कुशा इत्येवमादयः। दन्तसञ्ज्ञाश्च इमे दन्ताः दशनाः द्विजा इत्येवमादयः। कण्ठस्तनबाहूनां सञ्ज्ञा पुंसि। कण्ठस्तनबाहूनामिति कण्ठसञ्ज्ञकाः, स्तनसञ्ज्ञकाः, बाहुसञ्ज्ञकाश्च पुंसि भवन्ति। तद्यथा- अयं कण्ठः गल इत्येवमादयः। स्तनसञ्ज्ञाश्च अयं स्तनः कुचः पयोधर इत्येवमादयः। बाहुसञ्ज्ञाश्च भुजः तरणः वरणः चालन इत्येवमादयः। स्त्रियां भवेद् ग्रीवा, कण्ठसञ्ज्ञकत्वाद् ग्रीवाशब्दस्यापि पुंसि योगो प्राप्नोतीत्यत आह- स्त्रियां भवेद् ग्रीवा स्यादित्यर्थः। इयं ग्रीवा शिरोधरा कन्धरा इत्येवमादयः।

टक्यललाटांशोदरजठरजत्रूणि नपुंसकानि स्युः। टक्यललाटांशोदर इति। टक्यादयः शब्दाः नपुंसकलिङ्गे स्युर्भवेयुरित्यर्थः। तद्यथा- इदं टक्यं पार्श्वयोर्यष्टिः। इदं ललाटं भ्रूवोरुपरि स्थानम्, इदमंसं स्तनोपरि स्थानम्, इदमुदरं कुक्षि, इदं जठरम्, इदं जत्रु वक्षःस्कन्धसन्धिः।

उर्मिध्वन्यञ्जलयः पुंसि स्युः कपोलगुल्फसञ्ज्ञाश्च उर्मिध्वन्यञ्जलय इति उर्मिश्च ध्वनिश्च अञ्जलिश्च ते उर्मिध्वन्यञ्जलयः। एते शब्दाः पुंसि भवन्ति।

अयमुर्मिस्तरङ्गः, अयं ध्वनिः शब्दः, अयमञ्जलिः करपुटिः । ओष्ठकपोलगुल्फसञ्ज्ञाश्च सञ्ज्ञाशब्दः प्रत्येकमभिसम्बध्यते। ओष्ठश्च कपोलश्च गुल्फश्च ते ओष्ठकपोलगुल्फाः, तेषां सञ्ज्ञा पर्यायास्ते पुंसि भवन्ति। अयमोष्ठः दन्तच्छदः, अयं कपोलः गण्डः करट इत्येवमादयः। गुल्फसञ्ज्ञाश्च अयं गुल्फः, पादसन्धिः घूट इत्येवमादयः। घञे रूजदोरबहुलमन्धकारश्च।

घञ एरच्च दोरश्च घन्निति घञ्प्रत्ययः यदरुजाविश्स्पृशो घञित्येवमादिना प्रकरणेन विहिता इति येन विधिस्तदन्तस्य इति घञ्प्रत्ययान्ताः शब्दाः पुंसि भवन्ति। तद्यथा- अयं पादः, रोगः, वेशः, स्पर्शः पाकः, त्यागः, भोगः, प्रसादः, भेदः, च्छेदः, दाहः, दोषः, प्रकारः, विकारः, निकार इत्येवमादयः।

एरजिति, इवर्णान्तादच्प्रत्ययः, अयं जयः, नयः। तथा अप्रत्ययान्ताः पुंसि भवन्ति। तत्र ऋकारान्तात्। अयं करः, वरः, तरः, शरः, नरः, हर इत्येवमादयः।। ऊवर्णान्ताद् अयं लवः, भवः, पव इत्येवमादयः।

घञन्तत्वाद् अन्धकारशब्दस्यापि नित्यं पुँल्लिङ्गता प्राप्नोत्यत आह- बहुलमन्धकारश्च। अन्धकारशब्दो बहुलं पुँल्लिङ्गो भवति, बहुलं विकल्पेन भवतीत्यर्थः। इदमन्धकारम्, अयमन्धकारः। तथा चोक्तम्-

**नेहागमोऽस्ति शलभस्य न मारुतस्य स्नेहक्षयोऽपि न भवेत्प्रथमे प्रदोषे।**

**उद्बुद्धनूपुररवप्रतिबोधितेन पारावतेन पतता कृतमन्धकारम् ॥**

प्राण्यङ्गमिदन्तं वस्ति कुक्षिपाणीं विमुच्य सर्वं स्त्री। प्राण्यङ्गमिदन्तमिति। प्राणो वायुः, सोऽस्यास्तीति प्राणी, तस्याङ्गम् इदन्तं इकारोऽन्ते यस्य तदिदन्तं तत्सर्वं स्त्रीलिङ्गं भवति। तद्यथा इयं कटिः श्रोणिः, इयमङ्गुलिः पार्ष्णिरित्येवमादयः। वस्तिकुक्षिपाणीनामपि प्राण्यङ्गत्वादिदन्तत्वाच्च स्त्रीलिङ्गसमावेशे प्राप्ते तथोद्धार क्रियते। एतान् विमुच्य वर्जयित्वेत्यर्थः। पुंसीत्यधिकारादेते पुँल्लिङ्गा भवन्ति। तद्यथा- अयं वस्तिः गुदमार्गः, अयं कुक्षिरुदरम्, अयं पाणिर्हस्तः। जङ्घा शिरा स्नुषा नासिका चूडा वसश्चैव। जङ्घा शिरा इत्यादयः शब्दाः स्त्रियां भवन्ति। तद्यथा- इयं जङ्घा जानुनोरधस्तात् पादयोरुपरिष्टाच्च। इयं शिरा देहधारिणी, इयं स्नुषा पुत्रवधूः, इयं नासिका गन्धधारिणी, इयं चूडा शिखा, इयं वसा शोणितविकारः स्नेहश्च।

श्रक् श्रुक् स्फिक् त्वग्वाग्योषितो हि विद्यात् स्त्रियां द्यु नावौ च।

श्रक् श्रुक् स्फिक् त्वक् वाक् योषित् इत्येते शब्दाः स्त्रियां भवन्ति। इयं श्रक् माला, इयं श्रुक् यज्ञोपवीतकरणभाण्डम्, इयं स्फिक् कटिप्रदेशः, इयं त्वक् बहिश्चर्म, इयं वाग् वाणी, इयं योषित् अबला।

द्यौश्च नौश्च द्युनावौ स्त्रियां भवतः। इयं द्यौः स्वर्गः, इयं नौस्तरणिः। हिशब्दः पादपूरणे दीधितिमेकां मुक्त्वा रश्म्यभिधायिनस्तु पुंस्येव। दीधितिमेकां मुक्त्वा रश्मिवाचकाः शब्दाः पर्याया ये ते पुंसि भवन्ति, इमे रश्मयः, प्रग्रहाः, किरणाः, अंशवः, पादाः, मयूखाः, अभीषवो गभस्तयः, धृणय इत्येवमादयः।

दीधितिशब्दः स्त्र्यधिकारात् स्त्रियां भवति। इमा दीधितयः। तुशब्दः पादपूरणे। एवकारोऽवधारणे। तेन सान्तस्य नपुंसकत्वम्। इदं तेजः महः रोचिः।

मूर्द्धक्षमज्जतक्षश्लेष्मात्माश्वश्मयुवपूषभीरहितं सर्वं द्वयक्कं नान्तं नपुंसक पुंसि वा भवेद् ब्रह्मा।।

मूर्द्धोक्षमज्ज इति मूर्द्धन् उक्षन् तक्षन् मज्जन् श्लेष्मन् आत्मन् श्वन् अश्मन् युवन् पूषन् इत्येतैः शब्दैः रहितं वर्जितं यदन्क्कं द्विस्वरं यत् नान्तं प्रातिपदिकं तत् सर्वं नपुंसकलिङ्गं भवति। इदं चर्म कर्म वर्म धर्म शर्म भस्म साम लोम इत्येवमादयः।

मूर्द्धादयो नान्ता द्व्यच्काः, अतस्तेषां नपुंसकता स्यादिति प्रतिषेधः कृतः। अयं मूर्द्धा शिरः उक्षा वृषभः मज्जा सारः तक्षा वार्द्धकिः, अयं श्लेष्मा धातुविकारः अयं श्वा कुक्कुरः, अयमात्मा शरीरस्थः, अयमश्मा शिला, अयं युवा तरुणः, अयं पूषा आदित्यः। पुंसि वा भवेद् ब्रह्मा द्व्यच्कत्वात् नान्तत्वात् ब्रह्मन् शब्दस्य नपुंसकतायां प्राप्तायां ब्रह्मशब्दस्य वा नपुंसकलिङ्गता भवति। इदं ब्रह्म वेदः अध्यात्मा च, अयं ब्रह्मा प्रजापतिः। यद्येवं द्व्यच्कन्नान्तन्नपुंसकलिङ्गं भवति। एवं सति राजन् शब्दस्यापि नपुंसकता स्यात् पुंस्यन्तर्भावो लुप्तोऽस्य द्रष्टव्यः। तेन राजन् शब्दस्य नपुंसकताऽभावः पुंस्त्वञ्च भवति।

त्रुटि सीमा सन्ध्या रात्रयः स्त्रियां धूलिवेणिखार्यश्च। एते त्रुट्यादयः स्त्रियां भवन्ति। इयं त्रुटिः स्वल्पम्, इयं सीमा ग्राममर्यादा, इयं सन्ध्या दिनावसानम्, इयं रात्रिः शर्वरी, इयं धूलिः पांशुः, इयं वेणिः केशरचना, इयं खारी परिमाणविशेषः।

पुंसि निशीथो ज्योत्स्ना दया शलाकाः- स्त्रियां नित्यम्। पुंसि निशीथ इति। अयं निशीथः प्रदोषः, ज्योत्स्नादयः स्त्रियां भवन्ति। इयं ज्योत्स्ना चन्द्रप्रभा, इयं दया करुणा, इयं शलाका लौहमयी। नित्यग्रहणं विभाषा निवृत्त्यर्थम्। पुंयोगे कर्णहनू। पुंसो योगः पुंयोगः, तस्मिन् पुंयोगे कर्णहनू भवतः। अयं कर्णः श्रोत्रं कुन्ती पुत्रश्च। अयं हनुः कपोलप्रदेशः।

नपुंसके श्मश्रु जानुगुदश्च। श्मश्रु-जानु-गुदशब्दा नपुंसके भवन्ति। इदं श्मश्रुमुखैकदेशलोमनिचयः। इदं जानु जङ्घा मध्यम्, इदं गुदमपानम्।

एकाभिधानता स्यादश्राश्रुणोर्नित्यम्। अभिधीयतेऽनेनेत्यभिधानम्। एकञ्च तदभिधानञ्चेत्येकाभिधानम्, तस्य भाव कर्म वा एकाभिधानता।

अश्राश्रुणोर्नित्यं सततमित्यर्थः। नपुंसकलिङ्गता भवति। इदमश्रं रुधिरम्, इदमश्रु नयनजलम्, एक एवार्थे नित्यवचनं पूर्वत्रानित्यबाधार्थम्। घुसकिरुपसर्गपूर्वः पुंस्यन्योपपदो वैषो स्त्री। घु इति **'दाधा घ्वदाप्'** (पा० १।१।२०) इति षण्णां धातूनां घुसञ्ज्ञाविहिता सह किना वर्त्तत इति सकिः। **'उपसर्गे घोः किः'** (पा० ३।३।९२) इति किप्रत्ययो गृह्यते, उपसर्गसञ्ज्ञा प्रादयः उपसर्गाः क्रियायोग इति उपसर्गाः पूर्वो यस्य स एव पुंसि भवति। तद्यथा- अयमाधिः निधिः प्रणिधिः सन्धिः आधिरित्येवमादयः। अन्योपपद एवं कर्मण्यधिकरणे किः प्रत्ययः। अयमम्भोधिः उदधिः, जलधिः, तोयनिधिरित्येवमादयः।

इषौ इषुशब्दो वा स्त्री। अयमिषुधिः, इयमिषुधिः तूणीरः। येभ्यो नङ् धातुस्तान्नपुंस्युक्तान् याच्ञां विना विद्धि। येभ्यो धातुभ्यो नङ्प्रत्ययः तान्नपुंस्युक्तान् विद्धि जानीहि। याञ्चामेकां वर्जयित्वा। यजयाचयतविच्छप्रच्छरक्षो निङिति नङ्प्रत्ययः। अयं यज्ञः ऋतुः यत्नः विश्वः प्रश्नः रक्षः। एवं तर्हि याच्ञा शब्दस्यापि नङन्तत्वात् पुंस्त्वं स्यादित्यत आह- याच्ञां विनेति याच्ञाशब्दः स्त्र्यधिकारात् स्त्रियामेव भवति। इयं यात्रा प्रार्थना।

तनुकायशरीराणि स्त्रीपुंनपुंसकेषु विजानीयात्। एतान् शब्दान् स्त्रीपुंनपुंसकेषु विजानीयात्। तद्यथा- इयं तनुः अयं कायः, इदं शरीरम्।

दधिसक्थ्यस्थीनि स्युर्नपुंसके। दधि सक्थि अस्थि इत्येते शब्दाः नपुंसके स्युः भवेयुरित्यर्थः। इदं दधि क्षीरविकारः। इदं सक्थि भ्रुवोर्मध्यदेशः इदमस्थि शरीरस्य। स्त्रियां कक्षा स्त्रियां भवेदित्यर्थः। इयं कक्षा बाहुमूलम्।

अन्यच्च-

**जघनाभरणे स्त्रीणां करीणामप्यबन्धने।**

**अवस्थासु च हर्म्यादेर्नित्यं कक्षा व्यवस्थिता॥**

असनोप्सरोविरहितमन्यद्व्यच्कमसन्तमे वा पुंसि स्यात्। सुमनसः अप्सरस इत्येताभ्यां विरहितं वर्जितमित्यर्थः। अस् अन्ते यस्य तदिदमसन्तं न विद्यते द्वावचावस्य तद् द्व्यच्कं बह्वचमसन्तं स्याद् भवेदित्यर्थः। यथा- अयमङ्गिराः, अयं चन्द्रमाः, अयं स्थूलशिराः, अयं पुरुरवाः, अयं दुर्वासाः, अयं पृथुयशाः इत्येवमादयः। सुमनोऽप्सरसो स्त्र्यधिकारात् स्त्रियामेव भवतः। इमाः सुमनसः कुसुमानि इमाः अप्सरसो देवस्त्रियः।

द्व्यच्कं नपुंसकमन्यत्र वैजरसः द्व्यच्कमसन्तं नपुंसक भवति। तद्यथा- इदमोजः, तेजः, वर्चः, यशः, शिरः, उरः, वक्षः, श्रोतः, चेतः, रेतः, पयः, तपः, अम्भः, जरस् शब्दस्यापि नपुंसकता प्राप्नोत्यत आह– अन्यत्र वैजरसः नपुंसकता प्रकृता पुँल्लिङ्गात्। अन्यत्र जरसशब्दो भवति स्त्रियां। इयं जरा वृद्धभावः पुंसि क्षुर-खुर-बिन्दु-इक्षु-मणि-कील-केलि-कलि-वलयः एते शब्दाः पुंसि भवन्ति। तद्यथा- अयं क्षुरो नापितोपकरणम्, अयं खुरः पशुपादः, अयं बिन्दुः विसर्जनीयावयवः, जलकणश्च, अयमिक्षुः शस्यजातिः, अयं पायुः अपानम्, अयं मणिः रत्नम्, अयं कीलः शङ्कुः, प्रकारश्च, अयं केलिः हासः, रसश्च, अयं कलिः, कलहः, अयं बलिः दैत्यः, देवोपहारश्च।

निध, सङ्घोद्धो, पघ्नौघ, विघ्नं, घर्मार्घ वर्णाश्च, एते निघादयः पुंसि भवन्ति। तद्यथा- अयं निघः पर्वतः, अयं सङ्घः समूहः, अयमुद्धः प्रशस्तः, अयमुपघ्नः आश्रयपर्वतः, अयमोघः नदीवेगः पुरुषावष्टभ्यश्च, अयं विघ्नः कर्मविघातश्च, अयं घर्मः निदाघः, अयमर्घः पूजा मूल्यविशेषः, वर्णाः हरित-पीत-शुक्लादयः, ब्राह्मणादयश्च। अकारादीनि चाक्षराणि च।

पण-गुण-गण-कण-शोणाः, कीण, फण, घूण, शाण, बाण, चूर्णाः पुंसि। पणादयः पुंसि भवन्ति। अयं पणः विंशतिगण्डकः, अयं गुणः सञ्ज्ञारूपः शुक्लादिः, पटादिश्च, अयं गणः सङ्घातः, अयं कणः लवः परमाणुः अन्तविकारश्च, शोणो नदः इषल्लोहितश्च अयं कीणो निकषः, अयं फणः भुजभोगः, अयं घूणः कीटः, अयं शोणः पाषाणविकारः, अयं वाणः शरः असुरश्च, पुष्पिका च, चूर्णः शकलः खण्डखण्ड इत्यर्थः।

नपुंसके श्वभ्र-तृण-खण्डानि एतानि नपुंसकानि जानीयात्। इदं श्वभ्रं गर्तः, इदं तृणं गृहाच्छादनद्रव्यम्, इदं रणं युद्धम् ऋणमुद्धारम्, अधमवर्णश्च। नित्यं हि पुंसि पन्था वाष्पोष्माध्वान एव च विज्ञेयाः एते शब्दाः पुंसि भवन्ति। पुँल्लिङ्गा ज्ञेया बोद्धव्याः। अयं पन्थाः मार्गः, अयं वाष्पोऽश्रु, अयमुष्मा दीप्तिः, अयमध्वा मार्गः।

वीणा, तूणा, घोणास्तु विद्यात् स्त्रियां नियतम्। एतान् शब्दान् स्त्रियां निश्चितं विद्यात् जानीयात्। इयं वीणा वाद्यविशेषः, इयं तूणा इषुधिः, इयं घोणा नासिका अश्वमुखश्च, इयं घृणा दया छर्दिश्च। तुशब्दः पादपूरणे।

अन्नन्तमकर्तरि तन्नपुंसके स्त्रियामेव यौ भावे गपौतौ पुंस्युक्तौ मन्यु मृत्यु च। अन् अन्ते यस्य तदिदमनन्तम् अकर्तरि। अन्प्रत्ययान्तं यत् प्रातिपदिकं तन्नपुंसके विद्धि जानीहि। नपुंसके भावे क्त इत्यनुवर्तमाने ल्युट् चेति ल्युट् 'युवोरनाकौ' (पा० ७।१।१) इत्यनादेशः। इदं वचनं पानम्, आसनम्, भोजनम्, प्राशनम्, प्रसानम्, बाणम्, शासनम्, अधिकरणम्, वारणमित्येवमादयः। अकर्तरि किम्? इह मा भूत् 'नन्द्यादिभ्यो ल्युः' नन्दनः, रमणः, जननः, ज्वलनः, पतनः, कुलदमनः, सङ्कर्षणः, मधुसूदनः, जनार्दन इत्येवमादयः। विध्यसिः स्त्रियामेव। एवकारोऽवधारणे। तथा-अक्रोशे नयनिरिति णिप्रत्ययः। अयमभोजनिः, अकरणिः, अखादनिः. अभरणिः, अहननिः, अनशनिः, अवसनिरित्येवमादयः।

यौ भावेणापोतौ पुंस्युक्तौ मन्यु मृत्यु च णच् अप्च तौ णापौ यौ भावे। विहितौ पुंसि भवतः। णौ चेति णप्रत्ययः। अयं न्यादः उपनिवेशः। उपसर्गोऽप् इति अप्प्रत्ययः। निघसः, सङ्घसः, प्रघसः–मन्यु मृत्यु पुंसि भवतः। अयं मन्युः क्रोधः, मृत्युर्नाशः।

पट-पुट-कट-कूट-घट-वण्ट-वाट-जूट-वटः हि पुंस्युक्ताः। अवट खट पट किराट कीटाः। एते पटादयः शब्दाः पुंसि भवन्ति।

अयं पटः प्रावरणः, पुटः पत्रस्य, अयं कटः तृणस्य, अयं कुटः कुम्भः, अयं घटः कलशः, अयं वण्टः फलनिबन्धनम्, अयं वाटः गृहावरणम्, अयं जूटः केशबन्धः, अयं वटो वृक्षविशेषः; अवटः कूपः, खटः शिरसि प्रहारः। पट्टो राजप्रासादः, किराटो वणिक् कीटः कृमिः।

कूटतटयोर्नपुंसकता। कूटतटौ नपुंसके भवतः। इदं कूटं शस्य द्रव्यस्य, इदं तटं नदी कूलम्।

घण्टाजटासटानां प्रथमा प्रकृतिर्वयाशिफानां। स्वर्न्नाम्नां पुंयोगेऽस्ति त्रिविष्टपं स्यादुभयहीनम्।

एते घण्टादयः शब्दाः स्त्रियां भवन्ति। प्रथमा प्रकृतिः स्त्रीलिङ्गमित्यर्थः। इयं घण्टा गवादीनां शोभार्थं वाद्यविशेषः, इयं जटा केशविशेषः, सटा सिंहकेसरः, वया मेदः, शिफा कन्दः शिखाग्रम्। अयं स्वर्गः स्वर्गादिना भवति। त्रिविष्टपशब्दस्यापि पुँल्लिङ्गता प्राप्नोतीत्यत आह-त्रिविष्टपं स्यादुभयहीनं न स्त्री न पुमान्, नपुंसकमित्यर्थः। इदं त्रिविष्टपं स्वर्गः।

संवत्सरगिरिमासार्णवर्त्तुदेवासुराभिधानानान्नित्यं स्यात् पुंयोगः शरासिपङ्कारिनाम्नाञ्च अभिधानशब्दः प्रत्येकमभिसम्बध्यते। संवत्सराभिधायिनां शब्दानां संवत्सरपर्यायाणां पुंयोगः स्याद्भवेदित्यर्थः। असुरपर्यन्तपर्यायाणां संवत्सराभिधायिनां तावद् अयं संवत्सरः, हायनः, वत्सर इत्येवमादयः।

गिरिपर्यायाणाञ्च– अयं गिरिः, अद्रिः, पर्वतः, शिलोच्चयः, अचलः, शैलः, महीध्रः, महीधरः, भूधरः, गोत्रः, धराधरः, शिखर इत्येवमादयः।

मासाभिधायिनाम्- अयं मासः, द्विपक्षः मासविशेषोऽपि पुंसि कार्तिकः मार्गशीर्षः पौषः माघः फाल्गुन इत्येवमादयः।

अर्णवाभिधायिनाम्- अयमर्णवः, समुद्रः, सागरः, सरित्पतिः इत्येवमादयः।

ऋत्वभिधायिनाम्- अयमृतुर्वसन्तः, ग्रीष्मः, हेमन्त इत्येवमादयः।

देवाभिधायिनाम्- अयं देवः, सुरः, आदित्यः, अमरः।

असुराभिधायिनाम्- इमे असुराः, दैत्या दानवा इत्येवमादयः।

शराभिधायिनाम्- काण्डारोपाः मार्गणा इत्येवमादयः।

असिपर्यायाणाम्- अयमसिः, खड्गः, मण्डलाग्रः, करवालः निस्त्रिंशः, ऋष्टिरित्येवमादयः।

पङ्कपर्यायाणाम्- अयं पङ्कः, जम्बाल इत्येवमादयः।

अरिनाम्नाम्- अयमरिः, शत्रुः, वैरी, रिपुः, विपक्षः, अमित्रः, सपत्नः, दुष्कृतः, जिघांसुरित्येवमादयः।

भाः कण्डूकशारज्विष्टकाश्च नित्यं भवन्ति। इयं भाः दीप्तिः, कण्डू पामा, कशा दमनी, लता रज्जुः गुणमयी, इष्टका पक्वमृत्तिका, इषीका वीणा यष्टिका च।

विद्युद्दिग्भूम्यभिधानन्तु वन्दिसरिताञ्च विज्ञेयं विद्युदादीनामभिधानञ्च स्त्रियाञ्च भवति। तद्यथा- इयं विद्युत्, चञ्चला, तडित्, शतह्रदा, क्षणनुभा, सौदामिनी, ऐरावतीत्येवमादयः।

दिगभिधायिनां तावद् इयमाशा, दिक्, काष्ठा, ककुप, विदिगित्येवमादयः।

भूम्यभिधायिनाम्- इयं भूमिः पृथ्वी, वसुमती क्ष्मा क्षमा इत्येवमादयः।

वल्ल्याभिधायिनाम्- इयं वल्ली, लता, व्रततिः प्रतानिनीत्येवमादयः।

सरिदभिधायिनाम्-इयं सरित्, नदी, कुल्या स्रवन्टी, धुनी, आपगा, कर्षुरित्येवमादयः।

छायासुरानिशाबालुकाश्च स्त्रियां स्युश्चमुकथैराश्च। छायादयः शब्दाः स्त्रियां स्युः। इयं च्छाया वृक्षादेः श्रुतिबन्धः। इयं सुरा मदिरा निशा रात्रिः, बालुका सिकता, चमूः सेना, कथा आलापः, इराजलभूमिश्च।।

आपत् सम्पत् प्रतिपत् विपत् समित् विप्रुषश्चैव। एते शब्दाः स्त्रियां भवन्ति। तद्यथा- इयमापत् व्यसनम्, सम्पत् धनम्, विपत् धनादिनाशजनितदुःखम्, प्रतिपत्तिथिः, समित् यज्ञकाष्ठम्, विप्रुट् बिन्दुः।

कुश-कूबर-कुञ्जाङ्कुरकुठारकुन्दकुतुपाहि पुंस्युक्ताः। एते शब्दाः पुंसि लिङ्गे कथिताः। तद्यथा- अयं कुशो दर्भः, अयं कुबरो रथस्य युगन्धरप्रदेशः, कुञ्जो गहनम्, अङ्कुरो बीजोद्भवः, कुठारः परशुः, कुन्दः पुष्पजातिः, कुतुपः चर्ममयं तैलपात्रं कालविशेषश्च।

कुलकूलकुङ्कुमानि तु नपुंसकान्येव जानीयात्। एतानि नपुंसकानि जानीयात्। तुशब्दः पादपूरणे, एवकारोऽवधारणे। तद्यथा- इदं कुलं द्विजातीनाम्, इदं कूलं नदीतटम्, कुङ्कुमं काश्मीरम्।

लोहमुखपर्णसञ्ज्ञावनधनसञ्ज्ञाश्च नपुंसके। सञ्ज्ञाशब्दः प्रत्येकमभिसम्बध्यते। लौहादिसञ्ज्ञका नपुंसके भवन्ति। इदं लौहं कालायसं मृण्मयम्, इदं मुखं वदनं लपनं तुण्डमाननमित्येवमादयः। इदं पर्णं पत्रं पलाशमित्येवमादयः। इदं वनम् अरण्यं काननं विपिनं गहनमित्येवमादयः। धनं द्रविणं वस्वित्यादयः।

सीरार्थौ शब्दौ पुंसि भवतः। अयं सीरो लाङ्गुलम्, अयमर्थो द्रव्यम्।

अटवी तुक्ता स्त्रियामेव। इयमटवी वनम्।

राशिपलाण्डूकमण्डलुगडूतुलमुहूर्त-परशु-शङ्कूनां दृतिसीधुकङ्कटानां पुंसि गदितः प्रयोगो हि। एते शब्दाः पुँल्लिङ्गे गदिताः। अयं राशिः निचयः, पलाण्डूः लशुनजातिः, कमण्डलुः कुण्डिका, अयं गडूः ग्रीवागण्डः, अयं तुलः कार्पासस्य रोमनिचयः, अयं मुहूर्तः कालविशेषः, अयं परशुः कुठारः, अयं शङ्कुः कीलः, दृतिश्चर्ममयः, अयं सीधुः मद्यम्, कण्टकः कवचम्।

शाला माला वेला दोला फेना शिला तुला लीला सेना पालि बलि दद्रुवागुराश्च स्त्रियामुक्ताः। एते शब्दाः स्त्रियां कथिताः। तद्यथा- इयं शाला गृहविशेषः, इयं माला स्रक्, वेला मुहूर्त्तः अह्नः समुद्रस्य च, इयं दोला क्रीडासाधनम्, फेना भुक्तोज्झितम्, शिला अश्म, तुला शताख्यं मानम्, लीला विदग्धचेष्टा, सेना हस्त्यश्वरथपदातिसमुदायः। पालिः पङ्क्तिः, प्रदेशश्च, बलिः कर उपहारश्च, दद्रुः कुष्ठविशेषः, वागुरा मृगबन्धनी रज्जूः।

पाताल-जाल-मल-खल-कपाल-शेवाल-शील-नाला-निची-रची-वर-क्यिन्ति च विद्धि तृतीयाप्रकृतिकानि। अथ का तृतीयाप्रकृतिः तृतीयस्थाने नपुंसकस्य दृष्टत्वाद् नपुंसकानि तृतीयाप्रकृतीनि पातालादीनि विद्धि जानीहि। इदं पातालम्, इदं रसातलम्, जाले मत्स्यबन्धनं गवाक्षश्च, मलं पापम्, खलं व्रीहीणां मर्दनस्थानम्, कपालं मस्तकम्, अस्थिखण्डम्, शैवालं जलसम्भवम्, शीलं विनयक्रमः, नालं पद्मादीनाम्, चीरं जीर्णं वस्त्रम्, चीवरं भिक्षुप्रावरणम्, वियदाकाशम्।

खण्ड-नितम्ब-क्षुप-शुल्क-सानुवर्गाङ्क-पूग-शङ्खरथाः। पुंसि स्युर्जघनाम्बरफल-मृणाङ्कानि विमुच्येते शब्दाः पुंसि भवेयुरित्यर्थः। जघनादीनत्यक्त्वा। तद्यथा अयं खण्डः वनम्, नितम्बः कटिप्रदेशः, क्षुपः राजा बलश्च, विटपश्च शुल्कः पघेट्टादि व्ययं सानुः पर्वतैकदेशः, वर्गो गणः, अङ्कं चिह्नम्, पूगः क्रमुकः, शङ्खः समुद्रोद्भवः, रथः स्यन्दनः नपुंसकाधिकाराद् जघनादयो नपुंसके भवन्ति। तद्यथा- इदं जघनं कटिप्रदेशः, अम्बरमाकाशं वस्त्रञ्च, फलं वृक्षादीनां मूलम्, शिफा अङ्गमवयवश्च।

क्षीरोदधिनवनीत-वर्ष-कुण्डाण्ड-घृत-भग-गगनानि विद्यान्नपुंसकान्योदनश्च पुंसि स्त्रियां ज्या च। एतानि क्षीरादीनि नपुंसकानि विजानीयात्। तद्यथा- इदं क्षीरं दुग्धम्, उदश्वित् तक्रम्, नवनीतं दधिविकारः, वर्षः संवत्सरः, कुण्डं पेयादिपात्रम्, अण्डं बीजादिप्रादुर्भावः, घृतमाज्यम्, भगं योनिः, गगनमाकाशम्, ओदनस्तु पुंसि भवति। अयमोदनो भक्तं स्त्रियां ज्या च ज्या धनुषो गुणः।

विषसञ्ज्ञाः पुंसि विषं तु नपुंसके स्यात् स्त्रियां तिथिर्वोक्तः विषसञ्ज्ञाः पुंसि भवन्ति। हालाहलः, कालकूटः, ब्रह्मपुत्रः। विषं तु नपुंसकं स्यात्, इदं विषम्। तिथिशब्दो विभाषास्त्रीलिङ्गो भवति पुँल्लिङ्गश्च। तद्यथा— इयं तिथिः, अयं तिथिः।

अतिथिस्तु पुंसि शकृन्नवनीतशोणितानीतरप्रकृतौ। अतिथिशब्दः पुंसि भवति। अयमतिथिः अभ्यागतः।

शकृदित्यादीनि इतरप्रकृतौ नपुंसके भवन्ति। इदं शकृत् पुरीषम्, नवनीतं घृतम्, शोणितं रुधिरम्। मुक्त्वा दीनाह्नी दिवसनामानि पुंसि स्त्रियां त्विड्डूतारा। दिनाह्नी वर्जयित्वा येऽन्ये दिवसपर्यायास्ते पुंसि भवन्ति। तथा अयं दिवसः, वासरः, घस्रः, सूर्याङ्क इत्येवमादयः। दिनाह्नी नपुंसके भवतः। इदं दिनम् अह्नः स्त्रियां त्विड्डूताराः त्विडाकय स्त्रियां भवन्ति। इयं त्विट् दीप्तिः, इयमूड्डः नक्षत्रम्, इयं तारा नक्षत्रम् एव।

पानयुगं पुंस्युक्तः स्त्रियां समाश्चैव वर्षाश्च। पानस्य युगः पानयुगः स पुंसि भवति। अयं पानयुगः पानसमयः। पानयुगग्रहणमन्ययुगनिवृत्यर्थम्। तेनेदं कलियुगम्। स्त्रियां भवति समावर्षाश्च नित्यं बहुवचनान्तयोः प्रयोगः बहुवचननिर्देशात् इमा समाः, इमा वर्षाः। एवकारोऽवधारणे। भवन्ति नपुंसकयोगः सङ्ख्यापूर्वस्य रात्रिशब्दस्य। सङ्ख्यापूर्वो रात्रिशब्दः पुँल्लिङ्गो भवति। एकरात्रं द्विरात्रं चतूरात्रं एवमादयः। ससमासस्य तु तस्यैव पुंसि योगं विजानीयात्। सह समासेन वर्त्तत ससमासः, ससमासस्य तु रात्रिशब्दस्य पुंसि योगं विजानीयात्। सर्वरात्रः वर्षारात्रः अर्द्धरात्रः।

पुरमधुजगन्ति विद्यान्नपुंसके वा स्त्रियां भवेदर्च्चिः। पुरादीनि नपुंसके विजानीयात्। इदं पुरं नगरम्, इदं मधु क्षौद्रम्, जगद् विश्वम्, अर्च्चिः शब्दस्य स्त्रियां भवति वा। इयमर्च्चिः, इदमर्च्चिः।

त्वतलौ नपुंसके स्त्रीविधौ यथासङ्ख्यं द्रष्टव्यौ। ब्राह्मणस्य भावः ब्राह्मणत्वं ब्राह्मणता। एवमिदं शूद्रत्वमेषा शूद्रता।

अहन्शब्दः सङ्ख्यादिः पुँल्लिङ्गो भवति। अयमेकाहः, द्व्यहः, त्र्यहः, पञ्चाहः, सप्ताहः। सङ्ख्यादिरिति किम्? पुण्याहं प्रत्यहम्।

रुत्वन्ताः पुंसि कशेरु-दारु-जतु-वस्तु-मस्तुभिस्त्यक्ता रहिताः ग्रन्थिप्रस्ताः पुंसि स्युर्भवेयुरित्यर्थः। तद्यथा- अयं सेरुः खड्गश्च, हृणम्, भरुः भर्ता, मरुः निर्ज्जलो देशः, चरुर्मन्त्रपूतपाकः, शत्रुः रिपुः, तरुर्वृक्षः, रुरुर्मृगः, मेरुः पर्वत इत्येवमादयः। अयं केतुः उत्पातः, सेतुर्बन्धः, हेतुः कारणम्, तन्तुः पटाकृतिः, धातुः श्लेष्मादिः, भूवादिः, गैरिकश्च।

कशेरुप्रभृतयस्तु नपुंसके भवन्ति। इदं कशेरुः भूसम्भवम्, इदं दारु काष्ठम्, जतुला वरतु राज्यप्रबन्धहेतुः, मस्तु दधिसम्भवम्।

ग्रन्थि-प्रस्थौ पुंसि भवतः। अयं ग्रन्थिः पर्व, प्रस्थः परिमाणम्।

इमुष्यस्यान्नपुंसकता इषन्तानां मुसन्तानां ष्यञन्तानां च नपुंसकता स्यात्। इदं सर्पिः घृतम्, हविर्देवान्नम्, इदं वपुः शरीरम्, आयुर्जीवितपरिमाणम्, धनुः शस्त्रम्। ष्यञ्ग्रहणेन वर्णदृढादिभ्यः ष्यञिति गृह्यते। तेन 'ब्राह्मणादिभ्यः' इति इदं सौकुमार्यं सौजन्यं कार्ष्ण्यं दार्ढ्यमित्यादि।

पुंसि स्त्रियाञ्च पाटलि-गोमुष्ट्यशनिर्बाहुसिन्धुमणयः एते शब्दाः पुंसि भवन्ति। अयं पाटलिः, इयं पाटलिः, अयं गौः, इयं गौः, अयं मुष्टिः, इयं मुष्टिः, अयमशनिः, इयमशनिः, अयं बाहुः, इयं बाहुः, अयं सिन्धुः, इयं सिन्धुः, अयं मणिः इयं मणिः।

आशीद्धूः पूःक्षुत्तृड्गरः स्त्रियां मुद्रुषौ चापि एते चापि स्त्रियां भवन्ति। इयमाशीः इष्टाशंसा, इयं धूः भारः, अक्षाग्रकीलकश्च, इयं पूः पुरी, इयं क्षुत् बुभुक्षा, तृट् तृष्णापि पासा च गीर्वाणी, मुत् हर्षः, रुट् रोषः, रोगश्च।

शीकर-तुषार-तुष-वुष-बुद्बुदकेनौषतण्डुलाः पूगाः स्युः पुंसि। एते शब्दाः पुंसि भवेयुः। शीकरोऽम्बुकणः, तुषारो हिमसंहतिः, तुषो धान्यस्य, वुषः कडङ्गरः, बुद्बुदो जलस्य फेनः, समुद्रस्य ओषोऽवश्यायः, तण्डुलो धान्यस्य, अपूपः पिष्टकस्य।

अस्रिमुक्ताऽजिदर्विसिकताः स्त्रियामुदिताः। एते शब्दाः स्त्रियामुदिताः उक्ता इत्यर्थः। तद्यथा इयमस्रिः पङ्क्तिः, मुक्ता रत्नम्, आजिर्युद्धम्, दर्वी भक्तसाधना सिकता बालुका।

अजिनाजिरशैवाललमृणालतुहिनोडुपाज्यशस्यम्। द्वारास्पदकाष्ठानि च नपुंसकान्येव पटलञ्च एते शब्दाः नपुंसके भवन्ति तद्यथा- इदमजिनं चर्म, अजिरमङ्गणम्, शैवालं जलसभावम्, ललं सुवर्णभाजनम्, मृणालं पद्मनालम्, तुहिनं तुषारः, उडुपं प्लवः, आज्यं घृतम्, शस्यं व्रीहिः, द्वारं गृहस्य, आस्पदमाज्ञा, काष्ठमिन्धनञ्च, पटलं गृहस्य तिमिरान्धता च। एवकारोऽवधारणे।

त्रिषु ण्यक्षेष्विन्द्रियसञ्ज्ञा ये तान्नपुंसके विद्धि। शेषाः पुंसि प्रोक्ताः स्त्रीपिष्टाद्याश्च निपीसाः त्रिषु पक्षेषु मध्ये इन्द्रियसञ्ज्ञकमक्षं नपुंसके विद्धि जानीहि। इदमक्षमिन्द्रियम्, शेषास्त्वक्षा पुंस्युक्ताः, अयं देवानामक्षः त्रिशकटाः।

श्रीपिष्टाद्याश्च निर्यासाः पुंसि भवन्ति। अयं श्रीपिष्टः सर्जरसः, गुग्गुलुः हिङ्गुरित्येवमादयः।

विंशतिरानवतेः स्त्री। विंशतिप्रभृतय आनवतिपर्यन्ताः स्त्रियां भवन्ति। तद्यथा- इयं विंशतिः, त्रिशत्, चत्वारिंशत्, पञ्चाशत्, षष्टिः, सप्ततिः, अशीतिः, नवतिः।

नपुंसके तालुहृदयकुड्यानि। एतानि नपुंसके भवन्ति। इदं तालुवदनैकदेशः। हृदयं जीवितस्थानम्, कुड्यं भित्तिः।

पार्श्व-कुकुन्दर-किणु-तलधनलवणराष्ट्राणि चावेहि। एतानि नपुंसकानि अवेहि अवगच्छेदित्यर्थः। इदं पार्श्वं शरीरस्य, कुकुन्दरं नितम्बकूपद्वयम्। किणु द्रव्यम्, तलमधः, धनं द्रविणं लवणं द्रव्यं राष्ट्र जनपदस्थानम्।

क्रोडा घाटा जिह्वा शिरोधरा शष्कुली स्पृहा माया विद्धि स्त्रियाम्। एतान् स्त्रियां विद्धि जानीहि। इयं क्रोडा अङ्कः, घाटा ग्रीवाप्रदेशः, जिह्वा रसना, शिरोधरा ग्रीवा, शष्कुली भक्ष्यं द्रव्यम्, माया जनवञ्चना।

व्रजस्कन्ध-शोक-चूडास्तु पुंस्युक्ताः। एते शब्दाः पुंसि भवन्ति। अयं व्रजो मार्गः, स्कन्धोंऽसः, शोको दुःखम्, चूडा उष्णद्रव्यम् अम्लद्रव्यञ्च।

शाखा शिफा कला मेखला लेखा च राजिपङ्क्ती च। स्नायुश्रद्धोल्काः अपि स्त्रियां सखट्वा त्रेताः। एते शब्दाः स्त्रियां भवन्ति। इयं शाखा वृक्षस्य, शिखा चूडा कला विज्ञानं मेखलाञ्च। लेखा रेखा, राजिर्वनस्य, पङ्क्तिर्द्विजातीनाम्, स्नायुः शरीरस्य, श्रद्धा आदरः, उल्का आकाशोत्पातः, ज्वाला च। खट्वा शयनीयम्, त्रेतायुगम् अग्नित्रयञ्च।

भय-बीज-सिध्मपदबर्ह-शुक्र-तक्र-सुखदुःखशिखराणां
विद्यान्नपुंसकमसृगित्येतस्य तु सदैव। एते नपुंसके भवन्ति। तद्यथा इदं भयं त्रासः, बीजमङ्कुरोत्पत्तिकारणम्, सिध्म कुष्ठविशेषः, पदं स्थानम्, बर्हं मयूरपिच्छम्, शुक्रं रेतः, तक्रं मथितम् सुखं भोगः, दुःखं पीडा, शिखरं शृङ्गम्, असृक् रक्तम्।

सदैवेति वचनाद् भयादीनां नपुंसकव्यभिचारः पुंस्त्वञ्च भवति। अयं भयः।

पाषाणोपलशृङ्गारमस्तकस्तवकरूपं त्यक्त्वा शब्दरसस्पर्शगन्धादयश्चोक्ताः सदा पुंसि। एते पाषाणादयः शब्दाः पुंसि भवन्ति। तद्यथा अयं पाषाणः उपलः शिला, शृङ्गारो विदग्धता, प्रस्तः प्रतिमा, भृङ्गारः सुवर्णमयः कलशः, मस्तकः शिरः, स्तवकः पुष्पोच्चयः, शब्दो ध्वनिः, रसो माधुर्यादिः, स्पर्शो मृदुककंशादिः, गन्धो नासिकाग्राह्यः कुसुमादेः, रूपं नपुंसकलिङ्गं भवति। इदं रूपं चक्षुर्ग्राह्यम्।

शेषर-यूप-पुरोडाश-कूप-सूप-लव-शष्य-धर्म-शपवासोदशाः दाराः पुंसि बहुता चैषाम्। एते शेषरादयः शब्दाः पुंसि भवन्ति। अयं शेषरः पुष्पसङ्घातः, उत्सवो वा, यूपः यज्ञकाष्ठं, पुरोडाशो यज्ञपिष्टकः, कूपोऽवटः, सूपो व्यञ्जनम्, लवोऽल्पम्, पुष्पो बालतृणम्, धर्म उपवासादिः, शपो वेश्म, वासांसि वस्त्राणि। तेषां दशाः दाराश्च पुंसि भवन्ति। बहुत्वञ्चैषां सदा भवति। इमे वासा दशाः वस्त्रान्तसूत्रम्, इमे दाराः स्त्रियः वास इति, किं दशा अवस्था?

मांसविवराभिधानं नपुंसके विद्धि तीर्थ-तुण्डे च। मांसाभिधानं विवराभिधानञ्च तीर्थतुण्डे च नपुंसके विद्धि जानीहि। तद्यथा- इदं मांसं पललं क्रव्यमामिषमित्यादि, इदं विवरं बिलम्, च्छिद्रं रन्ध्रं कुहरं शुषिरमित्येवमादयः। इदं तीर्थं पुण्यस्थाने तक्रम्।

यवमाषाद्या व्रीह्यः पुंसि प्रियङ्गुश्च स्त्रियामेव। तद्यथा- इमे माषाः यवाः मुद्गाः कुलत्था गोधूमाः कलायाः तिलाः मसूराः सर्षपाः प्रियङ्गुः स्त्रियामेव। पल्लव उक्तः पुंसि नपुंसके किसलयं स्त्रियां लाक्षा। पल्लवशब्दः पुंसि भवति। अयं पल्लवः, नपुंसके किसलयं स्यात्। इयं लाक्षा जतु च।

ऋग्रोचना तथा पिण्डका च कण्डुः क्षपा चैव। एते ऋगादयः स्त्रियां भवन्ति। इयमृक् वेदः, रोचना गोपित्तं पिण्डिका प्राण्यङ्गं कण्डूः खर्जूः क्षपा रात्रिः।

कलल-कफ-पूय-कल्माष-कल्क-कम्प-गेह-मखलौहित्या-झर्ज्जर-पुङ्ख-चखालाः पुंसि कटाह-मत्स्यौ च। एते शब्दाः पुंसि भवन्ति। यथा- अयं कललो गर्भाशयः, कफः श्लेष्मा। पूयः शोणितविकारः, कुल्माषः मत्स्यजयः, कल्कः सर्षपादीनां चूर्णम्, कल्पः कालपरिमाणम्, गेहो गृहम्, मखः यज्ञः, लौहित्यो रागविशेषः झर्ज्जरो वादित्रविशेषः, पुङ्खः शरस्य, चषालो यूपाग्रम्, कटाहो लोहभाजनम्। मत्स्या मीनाः।

शरपलनतल्पसद्म-वलि-शामिषाशि-निमित्त-पित्त-चित्तानि। किल्विष-वृजिने चैते नपुंसके पीठपाठौ च। एते शब्दाः नपुंसके भवन्ति। इदं शवं मृतकस्य शरीरम्, पललं मांसम्, तल्पं शयनीयम्, सद्म निवासः, बलिशं मत्स्यवेधनम्, आमिषं मत्स्यमांसम्, निमित्तं कारणम्, पित्तं धातुविकारः।

चित्ते मनः किल्विषं पापं वृजि सङ्कुटिलं पीठमासनं पातकं। बल्वजलाजासूनां पुंयोगः स्याद्बहुवचनञ्च। एते शब्दाः पुंसि भवन्ति। बहुवचनञ्च तेषां सदैव भवति। एते बल्वजाः तृणजातिः, लाजा भृष्टधान्यादिः, असवः प्राणाः।

स्थल-शाद्वल-शिविवाणान्नपुंसकत्वम्। एते शब्दाः नपुंसके भवन्ति। इदं स्थलमरण्यप्रदेशः, शाद्वलं हरिततृणम्, शिविरं कण्ठकस्थानम्।

स्त्रियां पृतना च। पृतनाशब्दः स्त्रियां भवति। इयं पृतना सेना।

ईर्ष्या रुचिः स्फुलिङ्गा शय्या निःश्रेणि कोटि कुटी वाणी पेशी वरूथिनी च स्त्रियां कुथा नालिका कन्था च। ईर्ष्यादयः शब्दाः स्त्रियां भवन्ति। इयमीर्ष्या अक्षमा, रुचिः दीप्तिः, अभिलाषो वा, स्फुलिङ्गा वह्निकणाः, शय्या शयनीयम्, निःश्रेणी

आरोहिणी, कोटिः सङ्ख्या, कुटी गृहम्, वाणी वाक्, पेशी मत्स्यस्य, वरूथिनी सेना, कुथा उणी, कृता नालिका कालपरिमाणञ्च, कन्था जीर्णवासः कुड्यञ्च।

नाड्युपपदं व्रणं पुंसि पक्ष-जलपांशु-कन्दुकलशाश्च नाडीपूर्वं व्रणं पुंसि भवति। अयं नाडीव्रणः नाड्युपपद इति। किं इदं दुष्टव्रणम्। पक्षादयः पुंसि भवन्ति। अयं पक्षः शुक्लः पतत्रञ्च जनो लोकः। पांशुश्चूर्णम्, कन्दुः कन्दूकपाकस्थानम्, कलशो घटः।

पञ्जर-पलित-द्वन्द्वाक्षराणि विद्यादितरजातौ पञ्जरादीनि इतरजातौ नपुंसके विद्यात् जानीयात्। इदं पञ्जरं शकुनिबन्धनम्, पलितः शुक्लकेशः, द्वन्द्वं वैरम्। अक्षरं वर्णः।

मेधा सेना निद्रा तन्द्रा तन्त्र्यश्च स्त्रियां समंजिष्ठाः स्युर्मदिरा मन्दुरा कृशरे च दुन्दुभिश्चाक्षे। मेधादयः शब्दाः स्त्रियां भवन्ति। इयं मेधा ग्रहणशक्तिः, रसना मेखला जिह्वा च, निद्रा सुषुप्तिः, तन्द्रा आलस्यम्, तन्त्री वाद्यप्रवृत्तिः। मञ्जिष्ठा रागद्रव्यम्, मदिरा सुरा, मन्दुरा वाजिशाला, कृशरा तिलयवागूः, दुन्दुभिश्चाक्षे या दुन्दुभिरथेषु दीव्यते अक्षग्रहणमवादित्रसम्बन्धिनित्यार्थं वाद्यं दुन्दुभिः। अयं दुन्दुभिरित्यर्थः।

धान्य-विदलां-शुक-वितान-वलय-रत्न-मिथुन-श्मशानानि सह विसतिमिरैर्विद्यान्नपुंसका-न्यभ्रखे चैव। एते शब्दाः नपुंसके भवन्ति। इदं धान्यं शस्यम्, विदलं मुद्गादीनाम्, अंशुकं वस्त्रम्, वितानं वस्त्रमयमावरणम्, वलयं सुवर्णादीनाम्, रत्नं मणिः, मिथुनं स्त्रीपुंसद्वन्द्वम्, श्मशानं मृतकस्थानम् विसं पद्ममूलम्, तिमिरं तमः, अग्रं श्रेष्ठं प्रधानमित्यर्थः। खमाकाशम्।

पुजाद्रिकोणकरीष-कषाय-तरल-पिण्याकगर्भदर्भाब्भ्राः पुंस्युक्ताः। एते शब्दाः पुंसि भवेयुः। अयं पुजः सङ्घातः, अयमद्रिः पर्वतः, कोणो गृहादीनाम्, करीषो गोमयविकारः, कषायो रसविशेषः, तरलो हारमध्यमणिः, पिण्याकः तिलविकारः, गर्भः उदरम्, दर्भः कुशः, अब्भ्रो बालः।

पत्तन- शुल्बचापनाम्नां नपुंसकता। पत्तनादीनां पर्याया ये ये शब्दाः तेषां नपुंसकता। इदं पत्तनं नगरमधिष्ठानं पुरमित्यादि। शुल्बं म्लेक्षमुखम् औदुम्बरमित्यादि। चापं धनुः, कार्मुकं शरासनमित्येवमादयः।

विडवर्णा स्त्रीज्ञेया। सास्ना वीथ्यौ च नाविभेर्यौ च। मञ्जूषा गण्डूषा मूषा परिषद्गुहाश्चैव। विट्शब्दो यदाऽवर्णोऽर्थस्तदा स्त्रियां भवति। इयं विट् विष्ठा, अवर्णा इति किम्? अयं विट् वैश्यः, तृतीयो वर्ण इत्यर्थः।

सास्नादयः स्त्रियां भवन्ति। इयं सास्ना गलकम्बलः, वीथी गृहावयवः, नीवी मूलधनम्, भेरी वाद्यविशेषः। इयं मञ्जूषा काष्ठमयी, गण्डूषा हस्तस्थजलम्, मूषा सुवर्णधमनिका, परिषद् जनसमूहः, गुहा पर्वतस्य।

तृष्णा कृपा पताका रथ्या कृषयः सकाकिण्यः एला प्रतिशिरा स्त्रियां धारा च नेमिश्च। एते तृष्णादयः शब्दाः स्त्रियां भवन्ति। इयं तृष्णा पिपासा, कृपा दया, पताका चिह्नम्, रथ्या मार्गः, कृषिर्वैश्यवृत्तिः। काकिणी पणचतुर्थभागः, एला सुगन्धद्रव्यम्, प्रतिशीरा तिरस्करणी, धारा ऊर्णामयी पर्वतस्य च रेखा, नेमिः चक्रपिण्डिका।

चत्वर-युगल-छल-चेल-खोल-धिस्यार्गलान्तर-शफानी विद्धि नपुंसकभावं पण्यस्य च पिच्छपलयोश्च। चत्वरादीनां नपुंसकताभावं विद्धि जानीहि। इदं चत्वरं चतुःपदम्, युगलं युग्मम्, छलं व्याजः, चेलं वस्त्रभागः, खोलं भग्नभाण्डम्, धिस्यं गृहाः, अर्गलं द्वारादिपिधानम्, अन्तरं छिद्रम्, शफं खुरः, पण्यं विक्रेतव्यम्, पिच्छं मयूरस्य, पलं चतुःकर्षप्रमाणम्।

रय-मण्डप-कपाल-नरक-गुड-मणि-मेढ्र-दर्दुर-कुशूलाः युग्माकाश-व्रत-शृङ्गवर्जिताः पुंसि मञ्चश्च। एते शब्दाः पुंसि भवन्ति। अयं रयो वेगः, मण्डपो जनाश्रयः, नरकः अवाच्यादिः असुरविशेषश्च, कपालः मस्तकः भिक्षाभाजनं वा, गुड इच्छुविकारः मणिः रत्नम्, मेढ्रः शिश्नः, दर्दुरो भेकः, कुशूलो धान्यादिस्थित्याधारः, युग्माकाशव्रतशृङ्गवर्जिताः त्यक्ताः।

युग्माकाशादयस्तु नपुंसके भवन्ति। इदं युग्मं युगलम्, आकाशं नभः, व्रतं नियमः, शृङ्गं विषाणं पर्वतस्य च, मञ्चश्च काष्ठादिकृतः।

स्तूपालक्तक-कर्पास-सूर्य-कूर्पाससारथितरङ्गाश्च। अलक-समुद्गर-वाहक-नूपुरकङ्कणयुताः पुंसि। एते शब्दा पुंसि भवन्ति। स्तूपो राशिः, अलक्तकः पादादिरङ्गद्रव्यम्, कर्पासः सूत्रोपकरद्रव्यम् सूर्यो रविः, कूर्पासः आङ्गिकम्,

सारथिः सुतः, तरङ्गः कल्लोलः, अलकः केशरचना, समुद्गः सम्पुटकः, वराटः कपर्दकः, नूपुरः पादाभरणम्, कङ्कणः कटकम्।

सैन्यायुधनगर-मङ्गल-वृत्त-हरिताल-बिम्ब-मुकुट-कुड्मलानि विद्धि तृतीयाप्रकृतौ। सैन्यादीनि तृतीयाप्रकृतौ नपुंसके विद्धि जानीहि। तद्यथा- इदं सैन्यं रणम्, आयुधमस्त्रम्, मङ्गलं प्रशस्तम्, नगरं पुरम्, वृन्तं पुष्पफलमूलं व्यञ्जनञ्च, हरितालं प्रसिद्धमेव, बिम्बं प्रतिरूपम्, मुकुटं शिरोभूषणम्, कुड्मलं कलिका।

पुंस्यवसथोद्गीथौ च। अवसथोद्गीथशब्दौ पुंसि भवतः। अयमवसथः परिव्राजकः, अयमुद्गीथः साम।

दर्पणमृदङ्गजठराः पुंस्युक्ताः कुन्तकृपाणधूमाश्च। एते पुंस्युक्ताः। अयं दर्पणः आदर्शः, मृदङ्गः मुरजः, जठरः कुक्षिः, कुन्तः प्रासः, कृपाणः खड्गः, धूमः अग्निसम्भवः।

व्रात-ह्रद-दण्डाङ्कुशकटाक्षसङ्ग्रामविटपाः पुंस्युक्ताः। व्रातादयः शब्दाः पुंसि भवन्ति। अयं व्रातः सङ्घः, ह्रदः सरः, दण्डः आलगुडः, अङ्कुशः शृणिः, कटाक्षः अपाङ्गदृष्टिः, सङ्ग्रामो युद्धम्, विटपो लतागुल्मः, पामा स्त्रियां निगदिता।

वेमा वै पुसि कुणप-कूर्च्यौ च। पामा स्त्रियां कथिता। इयं पामा कण्डूः, अयं वेमा तन्तुवायदण्डः, कुलयः मृतशरीरम्, कूर्च्यः श्मश्रु।

कन्दर-यूथ-प्रोथ-वंशरेणुध्वजाश्च। कन्दरादयः शब्दाः पुंसि भवन्ति। अयं कन्दरः पर्वतैकदेशः, अयं यूथः सङ्घातः, प्रोथोऽश्वस्य नासिकाविवरयोरुपरिप्रदेशः, वंशो वेणुः, रेणुः पांशुः, ध्वजः केतुः।

हेला काञ्ची लाला सुधा मुधा वेणी च स्त्रियाम्। एते शब्दाः स्त्रियां भवन्ति। इयं हेला अनादरः, काञ्ची मेखला, लाला श्लेष्मविकारः, सुधा अमृतम्।

मुधा क्षुधा वेणी केशरचना हानि ग्लानि वापी विपणी शाटी स्वाहा। एते शब्दाः स्त्रियां भवन्ति। इयं हानिरपचयः, ग्लानिः शक्तिः, वापी पुष्करणी, विपणी पण्यवीथिका, शाटी पेठालिका, स्वाहा मन्त्रावसानं वह्निजापा।

पुंसि स्यात् प्राग्वंशस्त्रिष्वपि लिङ्गेषु शृङ्खलं विद्धि। प्राग्वंशशब्दः पुंसि भवति। अयं प्राग्वंशः यज्ञकुटी। शृङ्खलं त्रिष्वपि लिङ्गेषु विद्धि जानीहि। अयं शृङ्खलः, इदं शृङ्खलम्, इयं शृङ्खला।

चमस-स्तम्भ-निदाघ-पशु-शूक-पिटकाश्च पुंस्युक्ताः। एते शब्दाः पुंस्युक्ता गदिताः। अयं चमसः सोमपात्रम्, अयं स्तम्भः प्रसिद्धमेव, निदाघो घर्मः, पशुर्गवादिः। शूको धान्यादीनां पिटकः परिमाणद्रव्यं गण्डो वा।

वल्कल-कुण्डल-हिम-चिह्न-खलीनक-कुद-शुल्क-शकलानि। तीरोदूखल-कवचानि चैव विद्यादितरजातौ। एतानि नपुंसके विजानीयात्। इदं वल्कलं वृक्षत्वक्, कुण्डलं कर्णभूषणम्, हिमं तुहिनम्, चिह्नमङ्कः, खलीनं करिका, ककुदं वृषभस्य, शुल्कं गुल्मस्थानम्, शकलं खण्डः, तीरं नदीकुलम्, ऊदुखलं धान्यक्षोदनम्, कवचं सन्नाहः।

लक्ष्मीमनःशिलोपानहः स्त्रियां स्थाण्वणुज्वराः पुंसि। लक्ष्म्यादयः स्त्रियां भवन्ति। इयं लक्ष्मीः श्रीः, मनःशिला धातुद्रव्यम्, उपानत् पनहिका।

स्थाण्वादयः पुंसि भवन्ति। अयं स्थाणुः महादेवः, अणुः सूक्ष्मः, ज्वरो रोगः।

केदारखण्डमुशलाश्च पुंसि कपाटश्च। एते शब्दाः पुंसि भवन्ति। अयं केदारः क्षेत्रम्, खण्डः इक्षुविकारः, मुशलो धान्यक्षोदनविकारः, कपाटः द्वारपिधानम्।

मण्डल-केसर-भाण्डोत्तरोयसोपानकल्मषाघानिप्राद्येवान्तं नपुंसके सह कुटुम्ब-पुलिनाभ्याम्। एते मण्डलादयः शब्दा नपुंसके भवन्ति। इदं मण्डलं सूर्यस्य, केसरं किञ्जल्कम्, भाण्डं सूपकारद्रव्यम्, उत्तरीयं प्रावरणम्, सोपानम् अधिरोहणिका, कल्मषं पापम्, अघं पापमेव।

प्रशब्दा निरलशब्दो नपुंसके भवति। इदं प्रान्तमन्त एव अनुपसर्गोऽन्तशब्दः पुँल्लिङ्ग एव पर्यन्तवचनः। सह कुटुम्बः पुलिनाभ्यामित्येते नपुंसके भवतः। इदं कुटुम्बं पोष्यवर्गाः, इदं पुलिनं द्वीपम्।

स्थाली सभा जराणां स्त्रीत्वच्छव्यास्थल्याश्च वीचिगदयोगश्च। स्थल्याच्छल्याः कट्याः समञ्जयी वल्याश्चैव जानीयात्। स्थाल्यादीनां स्त्री भवति। इयं स्थाली रन्धनादिभाजनम्, सभा गोष्ठी, जरा वृद्धत्वम्, स्थाली उच्चो निर्जनो

देशः, वीचिः तरङ्गः, गदः गण्डः, छविः लावण्यम्, कटिः श्रोणिः, मञ्जरी वृक्षस्य, वल्ली लता।

शिल्पच्छर्द्यान्नशमल-मरकत-पलाल-कृच्छ्राणि। मन्दिर-ऋच्छे च नपुंसके। एते शब्दाः नपुंसके भवन्ति। इदं शिल्पं कलादिकं कर्म, इदं छर्द्दं रोगविशेषः, इदमन्नं भक्ष्यद्रव्यम्, शमलममेध्यम्, मरकतं रत्नम्, पलालं धान्यानाम्, कृच्छ्रं कष्टम्, मन्दिरं गृहम्, ऋच्छं द्रव्यम्।

स्त्रियां मन्दुरा। मन्दुराशब्दः स्त्रियां भवति। इयं मन्दुरा वाजिशाला।

कल्क-कृमि-मुन्यङ्गार-वप्रग्रह-होमर्षि-यक्ष्मरेफाः। मण्डकरण्ठवरण्डाश्च पुंसि शपथाद्युरीपौ च। एते शब्दाः पुंसि भवन्ति। अयं कल्कः यापः दम्भश्च द्रव्यदूषक तृणादि वा, कृमिः कीटः, मुनिः तपस्वी, अङ्गारः काष्ठस्य, वप्रः केदारः, ग्रहः उपरागः, होमो मन्त्राहुतिः, ऋषिस्तापसः, यक्ष्मा रोगविशेषः, रेफो वर्णविशेषः, मण्डः अन्नविकारः, करण्डः कुशभाजनम्, वरण्डः काष्ठविशेषः, शपथः प्रत्ययकारणम्, अद्युरीपो भ्रास्तम्।

मथुरा तनु तनूवर्त्तिनी सूची यवागू शिङ्गिका शर्क्कराः स्त्रियां पुंसि तर्कश्च। मथुरादयः शब्दाः स्त्रियां भवन्ति। इयं मथुरा नगरी, तनुः शरीरम्, तनूस्तदेव वर्त्तिनो प्रत्यन्तं सूचीमूलपापस्य, शिङ्गिका पशोः पुरीषविकारः, शर्करा गुडविकारः।

तर्कः पुंसि भवति। अयं तर्कः ऊहः, चशब्दः पादपूरणे। वल्मूरविषाणयोः स्त्रीत्वं भवेत्। पल्वलं स्यात्। त्रित्वमिति लिङ्गत्रयम्। इयं वल्मूरा, अयं वल्मूरः, इदं वल्मूरम् उत्तप्तमांसम्, इयं विषाणा, अयं विषाणः, इदं विषाणं शृङ्गमित्यर्थः। पल्वलं तृतीयं नपुंसकमित्यर्थः। इदं पल्वलम् अल्पसरः।

शकटः शरकुतूहलशराववृन्दानि नपुंसकानि जानीयात्। एतानि नपुंसके भवन्ति। इदं शकटं यानम्, इदमुशीरं वीरणमूलम्, कुतूहलं कौतूहलम्, शरावं मृण्मयभाजनम्, वृन्दं समूहः।

यूकोल्का शुक्त्योषधिर्वर्त्ति भ्रुकुटयः स्त्रियामुदिताः। इयमुल्का सङ्घातयुद्ध दग्धकाष्ठं च, यूका शिरः कृमिः, शुक्तिर्जलसम्भवा, ओषधिः फलपाकान्तवृक्षविशेषः, वर्त्तिः दीपस्य, भ्रुकुटिः भ्रूविक्षेपः पुष्परचना च।

वाल्मीक्यध्वरनिर्यूह-व्यूह-मुस्तकाः पुंसि कुम्भश्च। वाल्मीकिः ऋषिः मृत्कूटश्च, अयमध्वरो यज्ञः, निर्यूहश्चन्दुशालिका, व्यूहः समूहः, मुस्तको घनः, कुम्भो घटः।

केयूर-वलय-तूपीङ्गानि नित्यं नपुंसके विद्धि गवाक्षश्च पुंसि। एतानि नपुंसके विद्धि जानीहि। इदं केयूरं बाहुभूषणम्, इदं वलयमलङ्कारः, तूर्यं वाद्यम्, अङ्गदं बाहुभूषणम्। गवाक्षः पुंसि च, अयं गवाक्षः वातायनम्।

श्मामा स्त्रियां भुशुण्डी भाण्डी च। एते शब्दाः स्त्रियां भवन्ति। इयं श्यामा लता रात्रिश्च, भुशुण्डी आयुधम्, भाण्डी भिन्दिपालः।

भवत्यपजनोपदमङ्गपदं पुंसि नित्यममनिञ्च। अपशब्दोपपदेनाङ्गशब्दः, जनशब्दोपपदेन पदशब्दः पुंसि भवति। अयमपाङ्गः नेत्रप्रान्तः, जनपदो देशः।

पृथ्वादिभ्य इमनिच् अन इत्यनुवर्त्तमाने इति टिलोपः, **'र ऋतो हलादेर्लघोः** (पा०६।३।१६१) इति रेफादेशः। इमनिच्प्रत्ययान्तः पुंसि भवति। अयं प्रतिथिमा प्रदिमा गीला लघिमा अणिमा द्रढिमा इत्येवमादयः। वंक्षण-कोष्ठभ्रेषाश्च सह निपातोपसर्गाश्च पुंसि। एते शब्दाः पुंसि भवन्ति। अयं वंक्षणः उरूस्थानम्, कोष्ठोऽन्तर्जठरम्, अन्तर्गृहञ्च, भ्रेषो न्यायः, निपातश्चादिः। उपसर्गः प्रादिः।

स्युर्णणञ्ययनच्छढण्यट्वुञञस्तु यदि भावे कर्मणि तदेषां नियतं नपुंसके जानीहि। ण अण् अञ् य यनच्छढक् वुञ् अञ् इत्येते प्रत्ययाः भावे कर्मणि यदि स्युः भवेयुः, तदा तदन्तानां नपुंसकत्वं जानीहि। यथा **'हायनान्तयुवादिभ्यो णः'** (पा० ५।१।१३०) द्वि हायनस्य भावः कर्म वा इदं द्वैहायनं त्रैहायनम्। यूनो भावः कर्म वा यौवनम् **'नस्तद्धिते'** (पा० ६।४।१४४) इति लोपे प्राप्ते 'अनः' इति प्रकृतिवद्भावः।।

एवं स्थाविरं वार्द्धकम् इणन्ताः लघुपूर्वादित्यणमृदोर्भावः कर्म वा मार्दवं लाघवं गौरवम् आर्जवम्।

प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञ्। उष्ट्राणां भावः कर्म वा इदमौष्ट्रम् आश्वं गार्दभं, वयो वचनात् कौमारम् उद्गात्रादेः औद्गात्रम् औन्नेत्रं सौभाग्यं सौभार्यम्। **'सख्युर्यः'** (पा० ५।१।१२६) इति यः प्रत्ययः। सख्युर्भावः कर्म वा सख्यं

स्तेनाद्यन्नलोपः। स्तेनस्य भावः कर्म वा स्तेयम्। होत्रादिभ्यश्छः इदं होत्रीयं पोत्रीयं **'कपिज्ञात्योर्ढक्'** (पा० ५।१।१२७) कपेर्भावः कर्म वा कापेयम्, ज्ञातेयम्।

**'पत्यन्तपुरोहितादिभ्यः' (**पा० ५।१।१२८) यक्। बृहस्पतेर्भावः कर्म वा बार्हस्पत्यम्। **'योपधाद्गुरुपोत्तमाद्वुञ्'** (पा० ५।१।१३२) रमणीयस्य भावः कर्म वा रामणीयकम्। **'द्वन्द्वमनोज्ञादिभ्यश्च'** (पा० ५।१।१३३) इति वुञ्, पैतापौत्रकम् आहिनकुलम्, आहारवहारकम्, आहोरूप्यकं कल्याणरूप्यकम्, प्रेयोरूप्यकम् इत्येवमादिनपुंसके द्रष्टव्यम्।

व्रजशूलौ वा पुंसि नपुंसकञ्च। मृधं कृत्याशब्दो भवति प्रागुद्दिष्टयोर्यत्पर तदेव। ब्रण-शूल इत्येतौ वा पुंसि भवतः नपुंसके च। अयं व्रजः इदं व्रजम्, अयं शूलः इदं शूलम्, रुद्रायुधं रोगो वा। इदं मृधं युद्धम्।

कृत्याशब्दो भवति प्रागुद्दिष्टयोर्यत् परं तदेव। अथ परं कतमल्लिङ्गं मुतस्त्रीलिङ्गः कृत्याशब्दः स्त्रीलिङ्गो भवतीत्यर्थः। इयं कृत्या मृत्युः।

कम्बल-तोमर-मुकुलकुटुङ्गकानां पुंस्त्वम्। एते शब्दाः पुंसि भवन्ति। अयं कम्बलः ऊर्णामयः, अयं तोमरः शरः प्रहरणञ्च, अयं मुकुलः कुड्मलम्, अयं कुटुङ्गको यानम्। भस्राशब्दः स्त्रियां भवति। इयं भस्रा रिक्तघटः चर्मविकारश्च। आकारान्तेकारान्तं स्त्री स्थावरजङ्गमं भवेन्नित्यम्।

आकारान्तम्, इकारान्तञ्च यत् स्थावरं जङ्गमं तत्सर्वं स्त्रीलिङ्गं भवति। अकारान्तञ्च यत् स्थावरम्। इयं गङ्गा यमुना। इकारान्तञ्च यत् स्थावरं सरस्वती शरावती। आकारान्तञ्च जङ्गमं यद् इयं देवता, इयं यज्ञदत्ता, बालिका मक्षिका। इकारान्तं जङ्गममपि कुमारी गौरी ब्राह्मणी हस्तिनी। क्वचिदूकारान्तं विद्यात्। ऊकारान्तं स्थावरं स्त्रीलिङ्गं भवति। इयं जम्बूः, कर्कन्धूः, जङ्गममपि श्वश्रूः। क्वचिदिति किमयं कटश्रूः पुरुषः।

योनिशब्दो वा पुंसि भवति स्त्रियाञ्च। अयं योनिः, इयं योनिः गुह्यस्थानम्।

**वाग्विषयस्य महतः सङ्क्षेपत एव लिङ्गविधिरुक्तः।**

**यन्नोक्तमत्र सद्भिस्तल्लोकत एव बोद्धव्यम्।।**

**॥ इत्याचार्यश्रीवररुचिकृता लिङ्गवृत्तिः समाप्ता ॥**

**॥ अथ वररुचिलिङ्गविशेषविधिः ॥**

यावान् कश्चित्त्रान्तः शब्दोऽत्र नपुंसके हि बोद्धव्यः।
वर्ज्यं हि पुत्रमन्त्रश्चित्रानेवं गरित्रं च॥१॥
यात्रामात्राभस्त्रादंष्ट्रा विद्यात् स्त्रियां वरत्रां च।
ईदूदन्तं यच्चैकाच् शरद्दरद् दृषत् प्रावृषश्चैव॥२॥
स्थूणोर्णे स्त्रीयोगे स्तो गृहशशपूर्वयोर्नपुंसकता।
सर्वस्याक्षिनाम्नो जलनाम्नश्चैवं मुक्त्वापः॥३॥
जलकुसुमनाम सर्वं नपुंसकं स्यात्पद्मस्तु विभाषया।
अभ्रादृतेऽम्बुदाख्या हि केशनखदन्तसञ्ज्ञाश्च॥४॥
कण्ठस्तनबाहूनां सञ्ज्ञाः पुंसि स्त्रियां भवेद् ग्रीवा।
पृष्ठललाटांसोदरजत्रूणि नपुंसकानि स्युः॥५॥
ऊर्मिध्वन्यञ्जलयः पुंस्योष्ठकपोलगुल्फसञ्ज्ञाश्च।
घञ्चैरच्च ऋदोरप् च स्याद् बहुलमन्धकारश्च॥६॥
प्राण्यङ्गमिदन्तं वस्तिकुक्षिपाणीन् विमुच्य सर्वं स्त्री।
जङ्घा शिरा स्नुषा नासिका च चूडा वसा चवै॥७॥
स्रक्स्रुक्स्फिक्त्वग्वाग्योषितो हि विद्यात् स्त्रियां द्युनावौ च।
दीधितिमेकां मुक्त्वा रश्म्यभिधानं तु पुंस्येव॥८॥
मूर्धोऽक्षतक्षमज्जश्लेष्मात्माश्मयुवपूषभी रहितम्।
सर्वं द्व्यच्कं नान्तं नपुंसकं पुंसि वा भवेद् ब्रह्मा॥९॥
त्रुटिसीमासन्ध्यारात्रयः स्त्रियां धूलिवेणिखार्यश्च।
पुंसि निशीथो ज्योत्स्ना दया शलाका स्त्रियां नित्यम्॥१०॥
पुंयोगे कर्णहनू नपुंसके श्मश्रुजानुगुदशब्दाः।
एकाभिधानता स्यादस्राश्रुणोर्नित्यम्॥११॥
घुः सकिरुपसर्गपूर्वकः पुंस्यन्योपपदश्च वेषुधिः स्त्री।
येभ्यो नङ् तान् पुंस्युक्तान् याच्ञां विना विद्धि॥१२॥
तनुकायशरीराणि स्त्रीपुंनपुंसकेषु जानीहि।

दधिसक्थ्यस्थीनि स्युर्नपुंसके स्त्री तु कक्षा स्यात्॥१३॥

सुमनोऽप्सरोरहितमद्व्यच्कमसन्तं तु पुंसि स्यात्।

द्व्यच्कं पुनर्नपुंसकं प्रकृतादन्यत्र वै जरसः॥१४॥

पुंसि क्षुरखुरबिन्द्विक्षुपायुमणिकीलकेलिकलिबलयः।

निघसङ्घोद्घोपघ्नौघविघ्नघर्मार्घवर्णाश्च॥१५॥

पणगुणगणकणशोणाः किणफणघुणशाणबाणचूर्णाश्च।

नित्यं हि पुंसि पन्था बाष्पोष्माध्वानश्च विज्ञेयाः॥१६॥

नपुंसके श्वभ्रतृणरणर्णानि।

वीणातूणाघोणाघृणास्तु नियतं स्त्रियां विद्यात्॥१७॥

यदनान्तमकर्तरि तन्नपुंसके विद्ध्यनिः स्त्रियामेव।

यौ भावे णापौ तौ पुंस्युक्तौ मन्युमृत्यू च॥१८॥

पटपुटकटकुटघटचण्टवाटजूटवटा हि पुंस्युक्ताः।

अवटखटपट्टकिराटकीटाश्च कूटतटयोश्च नपुंसकता॥१९॥

घण्टाजटासटानां प्रथमा प्रकृतिर्वसाशिफानां च।

स्वर्नाम्नां पुंयोगस्त्रिविष्टपं स्यादुभयहीनम्॥२०॥

संवत्सरगिरिमासार्णवर्तुदेवासुराभिधानानाम्।

नित्यं पुंयोगः स्याच्छरासिपङ्कारिनाम्नां च॥२१॥

भाः कच्छुकशारज्जिवष्टकाश्च नित्यं स्त्रियामिषीका च।

विद्युद्दिग्भूम्यभिधानं वल्लीसरितां च विज्ञेयम्॥२२॥

छायासुरानिशावालुकाः स्त्रियां स्युश्चमूकथेराश्च।

आपत्सम्पद्विपत्प्रतिपत्समिद्विप्रुषश्चैव॥२३॥

कूशकूबरकुञ्जाङ्कुरकुठारकुन्दकुतुपा हि पुंस्युक्ताः।

कुलकूलकुङ्कुमानि तु नपुंसकान्येव जानीयात्॥२४॥

लोहमुखपर्णवनधनसञ्ज्ञाश्च नपुंसके प्रोक्ताः।

सीरार्थौ पुंस्युक्तावटवी तूक्ता स्त्रियामेव॥२५॥

राशिपलाण्डुकमण्डलुगडुतूलमुहूर्तपरशुशङ्कूनाम्।

दृतिसीधुकङ्कटानां पुंसि च गदितः प्रयोगो हि॥२६॥
शाला माला दोला वेला फेला शिला तुला लीला।
सेनालिपालिवलिददद्रुवागुराश्च स्त्रियामुदिताः॥२७॥
पातालजालमलखलकपालशैवालशीलनालानि।
चीवरचीरवियन्ति च विद्धि तृतीयप्रकृतिकानि॥२८॥
मुण्डनितम्बक्षुपगुल्मसान्वङ्कवंशपूगशङ्खरथाः।
पुंसि स्युर्जघनाम्बरफलमूलाङ्गानि च विमुच्य॥२९॥
क्षीरोदश्विन्नवनीतवर्षकुण्डाण्डघृतभगगनानि।
विद्यान्नपुंसकान्योदनश्च पुंसि स्त्रियां ज्या च॥३०॥
विषसञ्ज्ञा पुंसि विषं नपुंसके स्यात् स्त्रियां तिथिर्वोक्ता।
अतिथिः पुंसि शकृन्नीतशोणितानीतरप्रकृतौ॥३१॥
मुक्त्वा दिनाहनी दिवसनाम पुंसि स्त्रियां त्विडुडुताराः।
यानयुगः पुंस्युक्तः स्त्रियां समाश्चैव वर्षाश्च॥३२॥
भवति नपुंसकयोगः सङ्ख्यापूर्वस्य रात्रिशब्दस्य।
ससमासस्य तु तस्यैव पुंसि योग विजानीयात्॥३३॥
पुरमधुजगन्ति विद्यान्नपुंसके वा स्त्रियां भवेदर्चिः।
त्वतलौ नपुंसकस्त्रीविधावहः पुंसि सङ्ख्यादिः॥३४॥
रुत्वन्ताः पुंसि कशेरुदारुजतुवस्तुमस्तुभिस्त्यक्ताः।
सग्रन्थिप्रस्था इसुस्ष्यत्रन्तानां नपुंसकता॥३५॥
पुंसि स्त्रियां च पाटलिगोमुष्ट्यशनिबाहुसिन्धुमणयः।
आशीर्धूः पुर्क्षुत्तृड्गिरः स्त्रियां मुद्रुषौ च॥३६॥
शीकरतुषारतुषबुद्बुदफेनौ सतण्डुलापूपाः।
पुंसि स्युरालिमुक्ताजिदर्विसिकताः स्त्रियामुदिताः॥३७॥
अजिनाजिरशैवलनलमृणाळतुहिनोडुपाज्यसस्यानि।
द्वारास्पदकाष्ठानि च नपुंसकान्येव पटलं च॥३८॥
त्रिष्वप्यक्षेष्विन्द्रियसञ्ज्ञा या तां नपुंसके विद्धि।

शेषाः पुंसि प्रोक्ताः श्रीपिष्टाद्याश्च निर्यासाः॥३९॥

विंशतिरा नवतेः स्त्री नपुंसके तालुहृदयकुड्यानि।

पार्श्वकुकुन्दरविण्यतललवणराष्ट्राणि चावैहि॥४०॥

क्रोडाघाटाजिह्वाशिरोधराशष्कुलीस्पृहामाया।

विद्धि स्त्रियां शाखा शिखा कला मेखला रेखा राजिपङ्क्ती च॥४१॥

स्नायुश्चद्धोल्काश्च स्त्रियां खट्वा भवेत्त्रेता।

ताणा वाणा प्राणा विश्वाणा सङ्क्रुणा विकोणा च॥४२॥

भयबीजसिध्मपदबर्हशुक्रतक्रसुखदुःखशिखराणाम्।

विद्यान्नपुंसकत्वमसृगित्यस्य च सदैव॥४३॥

पाषाणोपलशृङ्गारप्रस्थभृङ्गारमस्तकस्तबकाः।

रूपं भुक्त्वा शब्दस्पर्शरसगन्धादयश्चोक्ताः सदा पुंसि॥४४॥

शेखरयूपपुरोडाशकूपसूपलवशष्पाः।

धर्ममयवासोदशादाराः पुंसि बहुता चैषाम्॥४५॥

मांसविवराभिधानं नपुंसके विद्धि तीर्थतुण्डे च।

यवमाषाद्याः पुंसि प्रियङ्गवश्च स्त्रियामेव॥४६॥

पल्लव उक्तः पुंसि तु नपुंसके किसलयं स्त्रियां लाक्षा।

ऋग्रोचना पिण्डिका कण्डूः क्षपा चैव॥४७॥

कललकफपूयकल्माषकल्ककल्पगेहमखलौहित्याः।

जर्जरपुङ्खचषालाश्च पुंसि कटाहमत्स्यौ च॥४८॥

शवपलकतल्पसद्मबडिशामिशनिमित्तपित्तचित्तानि।

किल्बिषवृजिने च तथा नपुंसके पीठपापे च॥४९॥

बल्बजलाजासूनां पुंयोगः स्याद् बहुत्वं च।

स्थलशाड्वलशिबिराणां नपुंसके स्त्रियां पृतना॥५०॥

ईर्ष्या रुचिः स्फुलिङ्गा शय्या (निःश्रेणी) कोटिः कुटी वाणी।

पेशी वरूथिनी च स्त्रियां कुथा नाडिका कन्था॥५१॥

नाड्युपपदं व्रणं पुंसि वृक्षजनपांसुकन्दुकलशाश्च।

पञ्जरपलितद्वन्द्वाक्षराणि विद्यादितरजातौ॥५२॥

मेधारसनानिद्रातन्द्रातन्त्र्यः स्त्रियां समञ्जिष्ठाः।

मदिरामन्दुराकृसरे स्यातां चाक्षदुन्दुभिश्च॥५३॥

धान्यविदलां शुकवितानवलयरत्नमिथुनश्मशानानि।

बिसतिमिराण्यपि विद्यान्नपुंसकान्यग्रखे चैव॥५४॥

पुञ्जाद्रिकोणकरीषकषायपिण्याकगर्भदर्भाभाः।

पुंसि स्युः पत्तनशुल्बचापनाम्नां नपुंसकता॥५५॥

विडवर्णा स्त्री ज्ञेया सास्नावीथ्यौ च नीविभेर्यौ च।

मञ्जूषा गण्डूषा मूषा परिषद् गुहा चैव॥५६॥

तृष्णाकृपापताकारथ्याकृषयश्च काकिणी चैव।

एते स्त्रियां भवन्ति प्रतिसीरा धारा च नेमिश्च॥५७॥

वर्तुलयुगलच्छलचेलखोलधिष्ण्यार्गलशफानाम्।

विद्धि नपुंसकभावं पण्यस्य च पिच्छपलयोश्च॥५८॥

रयमण्डपनरककपाला गुडमणिमेढ्रदर्दुरकुसूलाः।

युग्माकाशव्रतशृङ्गवर्जिताः पुंसि मञ्चश्च॥५९॥

स्तूपालक्तककर्पाससूर्यकूर्पासससारथितरङ्गाः।

अलकसमुद्गवराटकनूपुरकङ्कणाः पुंसि॥६०॥

सैन्यायुधमङ्गलनगरवृन्तहरितालबिम्बमुकुटकुड्मलानि।

विद्धि तृतीयप्रकृतौ पुंस्यवसथस्तथोद्गीथः॥६१॥

दर्पणमृदङ्गजठराः पुंस्युक्ताः कुन्तकुतपधूमाश्च।

व्रातह्लददण्डाङ्कुशकटाक्षसङ्ग्रामविटपाश्च॥६२॥

पामा स्त्रियां निगदिता पुंसि वेमा कुणपकूर्चौ च।

कन्दरयूथप्रोथाश्च वंशरेणुध्वजाश्चैव॥६३॥

केदारखण्डप्रशमाश्च पुंसि नित्यं कपाटश्च।

हेला काञ्ची लाला सुधायुधाः स्युः स्त्रियां प्रवेणी च॥६४॥

हानिर्ग्लानिर्वापीविपणीशार्यश्च वै तथा स्वाहा।

लक्ष्मीमनः शिलोपानहः स्त्रियां स्थाण्वणुज्वराः पुंसि॥६५॥

पुंसि स्यात्प्राग्वंशस्त्रिषु लिङ्गेषु शृङ्खलं विद्धि।

चमसस्तम्भनिदाघपशुशूकविटकाश्च पुंस्युक्ताः॥६६॥

वल्कलकुण्डलहिमचिह्नखलीनककुदगुह्यशुल्कशकलानि।

तीरोलूखलकवचानि च विद्यादितरजातौ॥६७॥

मण्डलकेसरभाण्डोत्तरीयसोपानकल्मषाघानि।

प्रादेरन्तं च नपुंसके सह कुटुम्बपुलिनाभ्याम्॥६८॥

स्थालीसभाजराणां स्त्रीत्वं स्थाल्याश्च वीचिगदयोश्च।

छविकठ्योर्मञ्जर्या वल्याश्चैवं विजानीयात्॥६९॥

शिल्पं छर्दिस्त्वन्नं शमलं मरकतपलालकृच्छ्राणि।

मन्दिररिक्थे नपुंसके मन्दुरां तु स्त्रियां विद्धि॥७०॥

कल्ककृमिमुन्यङ्गारवप्रग्रहहोमर्षियक्ष्मरफोः।

मण्डकरण्डवरण्डाश्च पुंसि शपथाम्बरीषौ च॥७१।।

मथुरा तनूस्तनूर्वर्तिनी सूची यवागूः।

सरणीनिकाशाशर्कराः स्त्रियां पुंसि तर्कश्च।।७२।।

बन्धुरविषाणयोस्त्रिकं भवेत्पल्वलं तृतीयं स्यात्।

शकटोशीरकुतूहलशरावबृन्दानि जानीहि॥७३॥

यूकोल्काशुक्त्योषधिवर्तिभ्रुकुटयः स्त्रियामुदिताः।

वाल्मीक्यध्वरनिर्यूहमुस्तकाः पुंसि कुम्भश्च॥७४॥

केयूरतलतूर्याङ्गदानि नित्यं नपुंसके विद्धि।

पुंसि गवाक्षः श्यामा स्त्रियां च भाण्डी भुशुण्डी च॥७५॥

भवतोऽपजनोपपदावङ्गपदौ पुंसि नित्यमिमनिच्च।

वङ्क्षणकोष्ठभ्रेषाश्च सह निपातोपसर्गाभ्याम्॥७६॥

स्थाविरादीनामणञ्यत्छढक्यक्वुञस्तु यदि भावे।

कर्मणि वा स्युस्तदैषां नियता नपुंसकता॥७७॥

व्रजशूलौ पुंसि नपुंसके च मृधम्।

कम्बलतोमरमुकुलकन्दुकाः पुंसि भस्त्रा स्त्री॥७८॥

आकारेकारान्तं स्थावरं जङ्गमं स्त्रियां भवेन्नित्यम्।

क्वचिदूकारान्तमपि प्रोक्तं वा पुंसि योनिः स्यात्॥७९॥

वाग्विषयस्य च महतः सङ्क्षेपत एष लिङ्गविधिरुक्तः।

यन्नोक्तमत्र सद्भिस्तल्लोकत एव बोद्धव्यम्॥८०॥

**॥ इति**

**श्रीमदखिलवाग्विलासमण्डितसरस्वतीकण्ठाभरणानेकविशरणश्रीनरपतिसेवित-**
**विक्रमादित्यकिरीटकोटिनिघृष्टचरणारविन्दाचार्यवररुचिविरचितो**
**लिङ्गविशेषविधिः समाप्तः**

## ॥ अथ शाकटायनकृतं लिङ्गानुशासनम् ॥

## ॥ नपुंसकलिङ्गप्रकरणम् ॥

नब्व्यच्सन्तमवेधोजरस्तथा मन्नकर्त्तरि त्रान्तम्।
त्वाद्या त्वाद्बहुलं घ्यप्क्तानखभावोऽव्ययीभावः॥१॥

द्वन्द्वैकत्वं सङ्ख्याव्ययपूर्वपदः पथोऽथ तत्पुरुषो-।
ऽनकर्मधारयो बहुलेभ्यश्छाया सभा शाला॥२॥

राजार्थराक्षसादेरराज्ञ आदावुपक्रमोपज्ञम्।
सञ्ज्ञायां कन्थोशीनरेषु सेना सुरा छाया॥३॥

शाला निशा च वोर्णास्थूणे शशगृहपरे सुदिनपुण्यात्।
एकाच्चाहो रात्रः सङ्ख्यायाः किल युगमयाने॥४॥

फलभेदनयनजलवनधनान्नहललोहविवरमांसधनु-।
र्जलकुसुमशुल्बपत्तनरणमुखदलरुधिरनामानि॥५॥

दध्यस्थिसक्थिजत्रुश्मश्वस्रास्रश्रुवस्तुमस्तुजतु।
त्रपुतालुजानुदारुकशेरुस्वादूनि वस्वर्थे॥६॥

चिबुकांशुकशुल्कोल्मुकशालूकप्रातिपदिकमकुटतटम्।
पिटवटतिरीटलोष्टकरोटललाटानि शृङ्गाटम्॥७॥

तुण्डाण्डभाण्डकुण्डं पर्णसृणं लवणतोरणोष्णरणम्।
पीठोक्थरिक्थकाष्ठं पृष्ठाजिनजघनदिनतुहिनम्॥८॥

सोपानभुवनकाननमिथुनलवनगगनवेतनं वृजिनम्।
कठिनश्मशानशासनरत्नविपिननिम्नचिह्नानि॥९॥

तलभं त्रिविष्टपं भं रूपोडुपशिल्पतल्पपुष्पाणि।
पापसमीपपरीपान्तरीपयुग्मेध्मसिध्मानि॥१०॥

गुल्माध्यात्मं कुङ्कुमहिमकिसलयहृदयमिन्द्रियं वलयम्।
प्रालेयमुत्तरीयप्रान्तप्रत्यन्तराष्ट्राणि॥११॥

द्वाराग्रवक्रतक्रस्फाराजिरचीरतीरकेयूरम्।
क्षिप्रक्षुद्रश्वभ्रक्रूराम्बरनीरद्वाराणि॥१२॥

रन्ध्रं चीवरकेसरमुदरान्तरजठरगह्वरकुटीर-।

छिद्रककुन्दरपञ्जरमन्दिरचत्वरशरीराणि॥१३॥

वैराक्षरपुष्करचामराभ्रशिशिरशिबिरं तनौ शुक्रम्।

पनसांससाहसबिसं पीयूषपुरीषकल्माषम्॥१४॥

शीर्षं जोषं किल्बिषमिन्द्रियमक्षं पृषद्ध्रसदुदश्वित्।

वियता जगच्छकृद्यकृदलातपित्तं व्रतं वृत्तम्॥१५॥

नवनीतनिमित्तानृतरजतामृतपलितमरकतं वित्तम्।

शवबडिशविश्वकुलिशाङ्गददैवगुदास्पदाकाशम्॥१६॥

द्वन्द्वसुखदुःखबर्हश्राद्धाङ्गशरावपार्श्वकिण्वानि।

भयलिङ्गवर्षभगपदबिम्बकुटुम्बानि शफवृन्दम्॥१७॥

शिक्यं मद्यं धान्यं सत्यापत्याज्यपण्यधिष्ण्यानि।

सस्यं कुड्यं कुप्यं मूल्याघखकव्यकाव्यानि॥१८॥

हर्म्यं तूर्यं सैन्यं पिच्छकवचबीजनामरोमाणि।

यादो लान्तशतादीनि धातुनैकाधिकरणं च॥१९॥

सारं न्याय्ये धर्ममपूर्वनिमित्ते समे विभागेऽर्धम्।

## ॥ अथ पुँल्लिङ्गप्रकरणम् ॥

असमाहारे द्वन्द्वः पुंसि भवेदश्ववडव इति॥२०॥

णघञज्घननङ् घोः किरिमा विषवातारिपङ्कनिर्यास-।

स्वर्गसुरासुरवत्सरऋतुमाससमुद्रपुरुषाहः॥२१॥

कण्ठोष्ठकेशदन्तस्तनगुल्फकपोलनखभुजात्माभ्र-।

क्रतुमानखड्गगिरिशररश्म्यभिधानानि धान्यानि॥२२॥

कटणथनपभमयरषसशब्दनसोतो हरिद्रुरुद्रुर्मुत्।

अर्घो वेमैकेषां विड्वणिजौ दुन्दुभिग्रन्थी॥२३॥

पाण्यञ्जलिमणिसारथिदृत्यृषिवस्त्यतिथिकुक्षिरविराशिं।

ध्वनिमुनिकलिबलिकेलिक्रिमिकपिकविवह्निवृष्ण्यग्नि॥२४॥

शङ्खौघशङ्कुपुङ्खतरङ्गमृदङ्गाः समुद्गयुगपूगाः।

मञ्चध्वजगजपुञ्जा नाडीव्रणबल्बजा लाजाः॥२५॥

ह्लदकन्दकुन्दबुद्बुदजनपदशब्दान्तकुन्तदूतमठाः।

धूर्तमुहूर्त्तव्राता हस्ताहवपुस्तसङ्ग्रामाः॥२६॥

गण्डकरण्डवण्डाः षण्डः शुण्डः शिखण्डगुडमण्डाः।

गेहस्तम्बनितम्बाः कफरेफकटाहनिर्यूहाः॥२७॥

आत्माश्मानौ पाप्मा श्लेष्मोष्मस्कन्धबन्धदारार्थाः।

सीरौदनरात्राह्नाहापाङ्गाः पल्लवो मेढ्रः॥२८॥

वृत्रामित्रछात्राः पुत्रो मन्त्रो दशास्तु वस्त्रस्य।

वंशांशपुरोडाशप्राग्वंशास्तण्डुलस्तरलः॥२९॥

कम्बलचषाल[भृ]मलकललतालकुसूलदेवला वृषलः।

मुसलोपलरैकीलास्तूलो वाक्प्रभृतयश्च॥३०॥

**॥ अथ स्त्रीलिङ्गप्रकरणम् ॥**

ईदूदन्तं स्त्री स्त्रीभूविद्युद्वल्लिदिक्सरिन्नाम।

गायत्र्यादीत्प्राण्यङ्गं नौस्तल्मिन्यनि स्त्र्युक्ताः॥३१॥

विंशत्याद्या नवतेः प्रियङ्गुसरयूडुतनुकुहुस्नायु।

रज्जूरुधेनु दुन्दुभिरक्षे रुचिशानिखनिमेनि॥३२॥

कुटितुटिदीधितिकाकणिरात्रिछविनीविवेणिपेश्यतश्रि।

राज्याजिदर्विपङ्क्तिप्रवेणिनिश्रेणिकृषिकोटि॥३३॥

धूलिवलिनालिशष्कुलिपाल्योषधिशक्तिशुक्तिकिकिवेदि।

स्थालीवापीवर्तिविपणिकाञ्चीवीचिवीथि दरी॥३४॥

मारी, भेरी सूची वाण्यटवी भारती मुषुण्डी ज्या।

माण्ड्यालि मञ्जरी खारी लक्षा मानिका शम्या॥३५॥

जङ्घा पामा सीमा सिरा गदा नासिका शिखा ज्योत्स्ना।

वीणा तूणा घोणा तृष्णा कृष्णा घृणा धिषणा॥३६॥

शाला माला वेला दोला फेला तुला शिला लीला।

हेला लाला त्रेतैला रथ्या मन्दुरा मधुरा॥३७॥

मदिरा कृसरा रसना शिरोधरा वागुरा सुरा वर्षाः।
प्रतिसरया प्रतिसिरया शर्करया वालुका सिकता॥३८॥
आरा हारा कारा तारा धारा भिदा छिदा मेधा।
रेखा विदा गुहावपवसाक्षियाक्षिपमृजा लेखा॥३९॥
चूडा पीडा क्रोडा घाटा घण्टा जटा सटा खट्वा।
यात्रा मात्रा भस्त्रा दंष्ट्रा ग्रीवा वरत्रेरा॥४०॥
छाया माया पेया दया बलाका कशेष्टकेषीका।
सुक्ता भम्भा सेना समा सभा पिण्डिका पृतना॥४१॥
जिह्वा स्पृहा स्फुलिङ्गा मञ्जिष्ठा रोचना कुथा कन्था।
मञ्जूषा गण्डूषा मूषा सास्ना स्नसा रास्ना॥४२॥
शाखा शिखा शलाका कक्ष्या स्वाहा स्वधा सुधा गोधा।
यूकोकोल्का कक्षा क्षपा निशा मेखला लाक्षा॥४३॥
योग्या लता पताका शरद्दरद्दृषदुपानहः सम्पत्।
विपदापत्प्रतिपत्संसत्परिषत्समित्क्षुन्मुत्॥४४॥
संयत्प्रावृड्-विप्रुट्तृट्-त्विड्नुड्-विड्वणिक्सुमनसाशीः।
भाग्छर्दिर्गीर्धूः पूर्द्यौर्द्वार्वाक्त्वक्स्फिग्रुक्स्त्रक्स्त्रुक्॥४५॥
पात्रादिवर्जितादन्तोत्तरपदको द्विगुः समाहारे।
अन्नाडन्तान्तो वा, नपुंसकं, ङेऽर्थसो गुणिवत्॥४६॥

**॥ अथ स्त्रीपुंसलिङ्गप्रकरणम् ॥**

स्त्रीपुंसेऽशनियोनिश्रोण्यूर्मिगविषुधिमणतरण्यरणि।
तुटियष्टिमुष्टिपाटलिमरीचिमषिवस्तिशाल्मलयः॥४७॥
कर्कन्धुसिन्धुबाह्विषु कण्ड्वाणी मृत्युकिष्कुतिथिरेणु।

**॥ अथ स्त्रीक्लीबलिङ्गप्रकरणम् ॥**

अपत्यतद्धितोऽर्चिः स्त्रीरपि,

**॥ अथ पुन्नपुंसकलिङ्गप्रकरणम् ॥**

नपि पुंसि चार्धर्चः॥४८॥

मधुसीधुकमण्डलुसक्तुसानु षष्टीषुरेणुदार्वपरे।
मोदकतटाकमस्तकसरकाढककण्टकानीकम्॥४९॥
वर्चस्कटङ्कचषकपिटकशाकपिनाकशूकवल्मीकम्।
तण्डकविटङ्कनिष्कफलकपङ्काः कल्कशुल्के च॥५०॥
मूषिकनिदाघमञ्चकनखपुङ्खविडङ्गशृङ्गमुद्योगः।
व्रजकुञ्जकूर्चपुच्छध्वजकपटकवाटकुटकूटाः॥५१॥
कर्वटकिरीटपिष्टं कवटावटनिकटशकटमठनीडाः।
दण्डाण्डमण्डखण्डा कुक्कुटदृढकाण्डरणचरणाः॥५२॥
कर्षापणबाणव्रणसुवर्णतृणवर्णवारवाणानि।
द्रोणस्वर्णौ भूषणतोरणमपराह्णघृतभूताः॥५३॥
वृत्तक्ष्वेलितलोहितपलितैरावतशतायुतप्रयुताः।
बुस्तवसन्तौ हस्तः पुस्तो यूथद्वियूथौ च।।५४।।
गूथप्रोथौ तीर्थः ककुदार्बुदयोधमौषधकबन्धौ।
अष्टापदायुधदिनस्थानासननलिनपुलिनानि॥५५॥
खलिनसमानद्वीपिनचन्दनशतमानमानशयनानि।
स्तेनापिधानयौवननिधनविमानौदनवितानाः॥५६॥
उद्यानयानकुणपकुतपविटपं शूर्पमण्डपद्वीपाः।
बिम्बं जृम्भं सङ्गमदाडिमगुल्माश्रमक्षेमाः॥५७॥
ब्रह्मोद्यामं हेमकुसुमकुट्टिमकर्मनामलोमहिमम्।
गोमयकषायमलयाव्ययवलयहिरण्यकवियानि॥५८॥
सङ्ख्यारण्यं शल्यं विहारपुरचक्रतोमराङ्गाराः।
क्षीरान्धकारशेखरशिखरोशीरातिखरवप्राः॥५९॥
प्रतिसरसहस्रराष्ट्रं वज्रसमरतिमिरपारवारार्द्राः।
कान्तारजठरकन्दरशरीरकेदारदरवस्त्रम्॥६०॥
सूत्रं पात्रं पत्रच्छत्रपवित्राणि वक्त्रनेत्रमलाः।
मण्डलतमालवल्कलमृणालनलमुसलबलवालाः॥६१॥

शूलपलालचषालोत्पलखण्डलपूलशकलफलमुकुलाः।
नीलप्रवालकुण्डलशालकमलशीलमूलानि॥६२॥
मङ्गलनिगलकपाला हलतैलविशालपार्श्वपात्रीवाः।
रावशरावौ सैन्धवपूर्वप्रग्रीवगाण्डीवाः॥६३॥
काशाकाशकुशाङ्कुशकोशकलशकर्षवर्षविषयूषा-।
मिषमाषकरीषरसाम्बरीषकासनिर्यासे-॥६४॥
त्कसचमसकासमासोपवासदिवसानृकंसगृहपटहाः।
देहोऽप्सु शङ्खपद्मौ स्वतो द्विधैतेऽर्थतः केचित्॥६५॥

**॥ अथ त्रिलिङ्गप्रकरणम् ॥**

त्रिषु शृङ्खलवल्लूरविषाणहरीतकविभीतकामलकाः।
भल्लातकतटपात्राः, परलिङ्गं द्वन्द्वतत्पुरुषे॥६६॥
अतिवर्त्तन्ते स्वार्थे प्रत्ययकाः प्रकृतिलिङ्गवचनानि।
प्रकृतिर्न निवासादिषु, हरीतकीत्यादिका व्यक्तिम्॥६७॥
वचनं तु खलतिकादिर्बहुविषयोत्तरपदं समासेऽनुः।
साम्याद्गुणवचनानामाश्रयतो लिङ्गवचनानि॥६८॥
स्त्रीपुन्नपां सहोक्तौ परं न डतियुष्मदस्मदन्संख्याः।
लिङ्गे सुङ्धात्वव्ययवाक्यमवचनं च बहुलमिदम्॥६९॥
वाग्विषयस्य तु महतः सङ्क्षेपत एष लिङ्गविधिरुक्तः।
यन्नोक्तमत्र सद्भिस्तल्लोकत एव विज्ञेयम्॥७०॥

**॥ शाकटायनकृतं लिङ्गानुशासनं समाप्तम् ॥**

# सन्दर्भग्रन्थविवरणम्

## ❖ सन्दर्भग्रन्थविवरणम्

✓ **(क)प्राथमिकानि स्रोतांसि**


- **अग्निपुराणम्** (हिन्दी अनुवाद सहित), वेदव्यासः, अनुवादकद्वयम् – तारिणीशझाः, घनश्यामत्रिपाठी, हिन्दी साहित्य सम्मेलन : प्रयाग, 1998
- **अथर्ववेद-संहिता** (प्रथमो भागः), सम्पादक – के.एल्.जोशी, परिमल पब्लिकेशन : दिल्ली, 2009
- **अभिज्ञानशाकुन्तलम्** (जीवानन्दविद्यासागरभट्टाचार्येण विरचितया तदात्मजाभ्यामाशु-बोधविद्याभूषण-नित्यबोधविद्यारत्नाभ्याम्प्रतिसंस्कृतया टीकयाऽभिनवसमालोचनया च समलङ्कृतम्), कालिदासः, वाचस्पत्ययन्त्रालयः : कलिकाता, 1914
- **अभिधानचिन्तामणिः**, हेमचन्द्राचार्यः, व्याख्याकारः - हरगोविन्दशास्त्री, चौखम्बा-विद्याभवनम् : वाराणसी, 1964
- **अर्थसङ्ग्रहः** (अर्थालोकार्थालोकलोचनव्याख्यायुतः), लौगाक्षिभास्करः, व्याख्याकारौ – पट्टाभिरामशास्त्री वाचस्पतिमिश्रश्च, चौखम्भा पब्लिशर्स : वाराणसी, 2005
- **अलङ्कारसर्वस्व,** रुय्यक, व्याख्याकार - रेवाप्रसादद्विवेदी, चौखम्बासंस्कृतसंस्थानम् : वाराणसी, 2002
- **अष्टाध्यायी** (चन्द्रलेखा-हिन्दीव्याख्यायुताऽनेकोपयोगिविषयैरुपबृंहिता सूत्रपाठ-सूत्र-वार्त्तिकोदाहरणानां सूच्या चान्विता) प्रथमद्वितीयभागयुता, पाणिनिः, व्याख्याकारः - ईश्वरचन्द्रः, चौखम्बा- संस्कृत प्रतिष्ठान : दिल्ली, 2009
- **ईशादि नौ उपनिषद्** (शाङ्करभाष्यार्थसहित), गीताप्रेस गोरखपुर : गोरखपुर, 2011
- **ईशादिविंशोत्तरशतोपनिषदः** (उपनिषच्छान्तिपाठ-पाठान्तर-टिप्पण्यादि-समलङ्कृताः), सम्पादकः – नारायणरामाचार्यः, निर्णयसागरमुद्रणालयः : मुम्बई, 1948
- **उत्तररामचरितम्**, भवभूतिः, व्याख्याकारः – कपिलदेवद्विवेदी, रामनारायणलाल विजयकुमार : इलाहाबाद, 2007

- **ऋग्वेद-संहिता** (सायणाचार्यविरचित-माधवीयवेदार्थप्रकाशसहिता, प्रथमो भागः), सम्पादकः – मोक्षमूलरभट्टः, चौखम्बा संस्कृत सीरिज आफिस : वाराणसी, 1966
- **ऋग्वेद-संहिता** (सायणाचार्यविरचित-माधवीयवेदार्थप्रकाशसहिता, द्वितीयो भागः), सम्पादकः – मोक्षमूलरभट्टः, चौखम्बा संस्कृत सीरिज आफिस : वाराणसी, 1966
- **ऋग्वेदभाष्यभूमिका** (शारदाहिन्दीव्याख्याऽन्विता), सायणः, व्याख्याकारः – शारदा-चतुर्वेदी, कृष्णदास अकादमी : वाराणसी, 1984
- **औचित्यविचारचर्चा** (प्रभासंस्कृतहिन्दीव्याख्याद्वयोपेता), क्षेमेन्द्रः, व्याख्याकारः - वज्रमोहनझाः, चौखम्बाविद्याभवनम् : वाराणसी, 2013
- **कादम्बरी** (चन्द्रकलाविद्योतिनीव्याख्याद्वयोपेता), व्याख्याकारः - कृष्णमोहनशास्त्री, बाणभट्टः, चौखम्बासंस्कृतसंस्थानम् : वाराणसी, 1982
- **काव्यप्रकाशः**, मम्मटः, व्याख्याकारः – विश्वेश्वरः, सम्पादकः – डॉ. नरेन्द्रः, ज्ञानमण्डल लिमिटेड्, वाराणसी, 1960
- **काव्यप्रकाशः** (झलकीकरोपनाम्ना भट्टवामनाचार्येण विरचितया बालबोधिन्याख्यटीकया समन्वितः), मम्मटः, भाण्डारकर-प्राच्यविद्या-संशोधन-मन्दिरम् : पुणे, 1983
- **काव्यप्रकाशः,** मम्मटः, व्याख्याकारः - श्रीनिवासशास्त्री, साहित्य भण्डार : मेरठ, 1960
- **काव्यमाला** (तृतीयो गुच्छकः), सम्पादकद्वयम् – दुर्गाप्रसादः काशीनाथशर्मा च, निर्णयसागर प्रेस : मुम्बई, 1899
- **काव्यमाला** (चतुर्थो गुच्छकः), सम्पादकद्वयम् – दुर्गाप्रसादः काशीनाथशर्मा च, निर्णयसागर प्रेस : मुम्बई, 1937
- **काव्यमाला** (त्रयोदशो गुच्छकः), सम्पादकद्वयम् – केदारनाथशर्मा वासुदेवशर्मा च, निर्णयसागर प्रेस : मुम्बई, 1916
- **काव्यमीमांसा** (प्रथमाध्यायमारभ्य पञ्चमाध्यायपर्यन्ता), राजशेखरः, टीकाकारः सम्पादकश्च – रमाशङ्करत्रिपाठी, मोतीलाल बनारसीदास : वाराणसी, 1973

- **काव्यमीमांसा** (प्रकाशहिन्दीव्याख्योपेता), व्याख्याकार - गङ्गासागर राय, चौखम्बा विद्याभवन : वाराणसी, 2010
- **काव्यादर्श** (प्रसादिनी व्याख्या सहित), दण्डी, व्याख्याकार - शिवनारायणशास्त्री, परिमल पब्लिकेशन्स : दिल्ली, 1988
- **काव्यालङ्कारः** (श्वेताम्बरजैनपण्डितनेमिसाधुकृतटिप्पणसमेतः काव्यमालाशृङ्खलाया-म्प्रकाशितश्च), रुद्रटः, सम्पादकद्वयम् – दुर्गाप्रसादः काशीनाथशर्मा च, निर्णयसागर प्रेस : मुम्बई, 1886
- **काव्यालङ्कार-सार-संग्रह एवं लघुवृत्ति**, राममूर्तित्रिपाठी, हिन्दीसाहित्यसम्मेलनम् : प्रयागः, 1966
- **काव्यालङ्कारसूत्रवृत्तिः** (गोपेन्द्रतिप्पलभूपालविरचितया कामधेन्वाख्यया व्याख्यया समुद्भासिता), वामनः, सम्पादकः – श्रीकृष्णसूरिः, श्रीवाणीविलाससमुद्रयन्त्रालयः : श्रीरङ्गनगरम्, 1909
- **काशिकावृत्तिः** (सोमलेखाहिन्दीव्याख्यायुता, प्रथमो भागः), ईश्वरचन्द्रः, चौखम्बा संस्कृत प्रतिष्ठान : दिल्ली, 2010
- **किरातार्जुनीयम्**, भारविः, व्याख्याकारः - बदरीनारायणमिश्रः, चौखम्बासुरभारती-प्रकाशनम् : वाराणसी, 2015
- **कुमारसम्भवम्** (मल्लिनाथसूरिविरचितया सञ्जीवनीसमाख्यया व्याख्यया समेतम्), कालिदासः, सम्पादकः प्रकाशकश्च – अविनाशचन्द्रमुखोपाध्यायः : कलिकाता, 1894
- **कुवलयानन्दः**, अप्पयदीक्षितः, टीकाकारः - भोलाशङ्करव्यासः, चौखम्बाविद्याभवनम् : वाराणसी, NA
- **तर्कसङ्ग्रहः** (दीपिकाव्याख्योपेतस्तथा च हिन्दीव्याख्यासहितः), अन्नम्भट्टः, व्याख्याकारः - शेषराजशर्मा, चौखम्बा सुरभारती प्रकाशन : वाराणसी, 2011
- **तर्कसङ्ग्रहः** (न्यायबोधिनीसहितः), अन्नम्भट्टः, टीकाकारः - आनन्दझाः, सीता-साहित्य-सदनम् : काशी, 1957

- **तर्कभाषा** (तर्करहस्यदीपिकाहिन्दीव्याख्या विभूषिता), केशवमिश्रः, चौखम्बा संस्कृत सीरिज : वाराणसी, 1953
- **ध्वन्यालोकः** (दीधितिसंस्कृतहिन्दीव्याख्योपेतः), आनन्दवर्धनाचार्यः, व्याख्याकारः - शोभितमिश्रः, चौखम्बा संस्कृत सीरीज ऑफीस : वाराणसी, वि०सं० 2035
- **ध्वन्यालोकः** (अभिनवगुप्तविरचितया व्याख्ययाऽनुगतः), आनन्दवर्धनः, सम्पादकद्वयम् – दुर्गाप्रसादः, वासुदेवशर्मा च, निर्णयसागरमुद्रणालयः : मुम्बई, 1928
- **नलचम्पूः**, त्रिविक्रमभट्टः, सम्पादकः - श्रीनन्दकिशोरशर्मा, चौखम्बा संस्कृत सीरिज ऑफिस : वाराणसी, 1989
- **नाट्यशास्त्रम्** (व्याख्याद्वयोपेतम्) प्रथमो भागः, भरतः, सम्पादको हिन्दीव्याख्याकारश्च – पारसनाथद्विवेदी, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः : वाराणसी, 1992
- **निरुक्तम्** (प्रथमद्वितीयाध्याययुतम्), यास्कः, सम्पादकः – उमाशङ्करशर्मा ऋषिः, चौखम्बा विद्याभवन : वाराणसी, 2004
- **नैषधीयचरितम्** (नैषधीयप्रकाशव्याख्यासहितम्), श्रीहर्षः, टीकाकारः - नारायणभट्टः, सम्पादकः – नारायणराम आचार्यः, चौखम्बा विद्याभवन : वाराणसी, 2005
- **न्यायदर्शनम्** (न्यायभाष्यसहितं दुण्ढिराजशास्त्रिव्याख्यासमन्वितञ्च), अक्षपादः, चौखम्बासंस्कृतभवनम् : वाराणसी, 2007
- **न्यायमञ्जरी**, जयन्तभट्टः, सम्पादकः - सूर्यनारायणशर्म्मशुक्लः, चौखम्बा संस्कृत सीरिज आफिस : बनारस, 1936
- **न्यायभाष्यम्** (सुदर्शनाचार्यकृतप्रसन्नपदव्याख्यय संवलितम्), वात्स्यायनः, सम्पादकः - द्वारिकादासशास्त्री, बौद्ध भारती : वाराणसी, 1998
- **पण्डितराजजगन्नाथग्रन्थावली** - प्रथमभागान्विता (विमर्शमयी बालक्रीडाहिन्दीव्याख्या-सहिता) , जगन्नाथः, व्याख्याकारः - मधुसूदनशास्त्री, कृष्णदास अकादमी : वाराणसी, 1992

- **पदवाक्यरत्नाकरः** (यदुनाथमिश्रकृतगूढार्थदीपिकासंवलितः), गोकुलनाथोपाध्यायः, सम्पादकः – नन्दिनाथमिश्रः, सम्पूर्णान्दसंस्कृतविश्वविद्यालयः, 1998
- **परमलघुमञ्जूषा,** नागेशभट्टः, व्याख्याकारः - लोकमणिदहालः, चौखम्बासुरभारती : वाराणसी, 2006
- **पाणिनीयव्याकरणमहाभाष्यम्** (श्रीमन्नागेशभट्टविरचितभाष्यप्रदीपोद्योतोद्भासितेन श्रीमदुपाध्यायकैयटप्रणीतेन भाष्यप्रदीपेन समुल्लसितम्) – प्रथमं खण्डम्, सम्पादकः – भार्गवशास्त्री, चौखम्बा संस्कृत प्रतिष्ठान : दिल्ली, 1987
- **पाणिनीयव्याकरणमहाभाष्यम्** (श्रीमन्नागेशभट्टविरचितभाष्यप्रदीपोद्योतोद्भासितेन श्रीमदुपाध्यायकैयटप्रणीतेन भाष्यप्रदीपेन समुल्लसितम्) चतुर्थं पञ्चमञ्च खण्डे, सम्पादकः – भार्गवशास्त्री, चौखम्बा संस्कृत प्रतिष्ठान : दिल्ली, 1988
- **पाणिनीयव्याकरणमहाभाष्यम्** (श्रीमन्नागेशभट्टविरचितभाष्यप्रदीपोद्योतोद्भासितेन श्रीमदुपाध्यायकैयटप्रणीतेन भाष्यप्रदीपेन समुल्लसितम्) – षष्ठं खण्डम्, सम्पादकः – दधिरामशर्मा, चौखम्बा संस्कृत प्रतिष्ठान : दिल्ली, 1988
- **पाणिनीया-शिक्षा** (शाम्भवी-अनुश्रुतिव्याख्यासंवलिता), पाणिनिः, राजस्थानी ग्रन्थागार : जोधपुर, 2004
- **प्रौढमनोरमा** (पञ्चसन्धिप्रकरणम्), श्रीमद्भट्टोजिदीक्षितः, व्याख्याकारः - द्वारिकाप्रसादद्विवेदी, भारतीयविद्यासंस्थानम् : वाराणसी, 2012
- **ब्रह्मपुराणम्** (हिन्दी अनुवाद सहित), वेदव्यासः, अनुवादक – तारिणीशझा, हिन्दी साहित्य सम्मेलन : प्रयाग, 1993
- **भट्टिकाव्यम्** (काव्यमर्मविमर्शिकाख्यसंस्कृतहिन्दीव्याख्योपेतम्, चतुर्दशादि-द्वाविंशसर्गपर्यन्तम्), भट्टिः, व्याख्याकारः – गोपालशास्त्री “दर्शनकेशरी”, सम्पादकः – गोपालदत्तपाण्डेयः, चौखम्बा सुरभारती प्रकाशन : वाराणसी, 1983
- **मत्स्यपुराणम्**, आनन्दाश्रमः संस्कृतग्रन्थावलिः : पुण्याख्यपत्तनम् (पुणे), 1981

- **मनुस्मृतिः** (हिन्दीभाषाऽनुवाद-टिप्पण-विषयसूची-श्लोकसूची-विस्तृतभूमिकासहिता), मनुः, अनुवादकः – गिरिजाप्रसादद्विवेदी, एम्.एल्. भार्गव नवल किशोर प्रेस : लखनऊ, 1917
- **महाभारत** (प्रथम खण्ड, आदिपर्व), वेदव्यास, गीताप्रेस : गोरखपुर, 1988
- **महाभारत** (द्वितीय खण्ड, वनपर्व), वेदव्यास, गीताप्रेस : गोरखपुर, 1988
- **महाभारत** (तृतीय खण्ड, उद्योगपर्व), वेदव्यास, गीताप्रेस : गोरखपुर, 1988
- **महाभारत** (चतुर्थ खण्ड, कर्णपर्व), वेदव्यास, गीताप्रेस : गोरखपुर, 1987
- **महाभारत** (पञ्चम खण्ड, शान्तिपर्व), वेदव्यास, गीताप्रेस : गोरखपुर, 1988
- **मुद्राराक्षसम्** (विमला-संस्कृतहिन्द्यङ्ग्रेजी-व्याख्यादिविभूषितम्), विशाखदत्तः, व्याख्याकारः – जगदीशचन्द्रमिश्रः, चौखम्बा विद्याभवन : वाराणसी, 1972
- **न्यायसिद्धान्तमुक्तावली** (किरणावलीटीकोपेता), विश्वनाथपञ्चाननभट्टाचार्यः, व्याख्याकारः- कृष्णवल्लभाचार्यः, चौखम्बासंस्कृतसंस्थानम् : वाराणसी, वि०सं० 2063
- **मेघदूतम्** (चन्द्रकलासंस्कृतहिन्दीव्याख्योपेतम्), कालिदासः, व्याख्याकारः - शेषराजशर्मा, चौखम्बाविद्याभवनम् : वाराणसी, 2015
- **यजुर्वेद-अथर्ववेदभाष्यम्,** व्याख्याकारः - बुद्धदेवविद्यालङ्कारः, गोविन्दराम हासानन्द : नई दिल्ली, 2008
- **याज्ञवल्क्यस्मृतिः** (मिताक्षरा टीका), विज्ञानेश्वरः, व्याख्याकारः - गङ्गासागररायः, चौखम्बासंस्कृतप्रतिष्ठानम् : दिल्ली, 2011
- **योगदर्शनम्,** पतञ्जलिः, व्याख्याकारः- सुरेशचन्द्रः श्रीवास्तवः, चौखम्बा-सुरभारती-प्रकाशनम् : वाराणसी, 2012
- **रघुवंशम्** (मल्लिनाथकृतसञ्जीवनीसमेतम्), कालिदासः वासुदेवशर्मा, निर्णयसागरमुद्रणालयः : बॉम्बे, 1929

- **रत्नावली** (प्रकाशटीकोपेता) श्रीहर्षदेवः, टीकाकारः - रामचन्द्रमिश्रः, चौखम्बा संस्कृत सीरिज, वाराणसी : 1953
- **रसगङ्गाधरः** (प्रथमो भागः), जगन्नाथः, व्याख्याकारः – मदनमोहनझाः, चौखम्बाविद्याभवनम् : वाराणसी, 2015
- **रसगङ्गाधरः** (द्वितीयो भागः), जगन्नाथः, व्याख्याकारः – मदनमोहनझाः, चौखम्बाविद्याभवनम् : वाराणसी, 2015
- **रसगङ्गाधरः** (तृतीयो भागः), जगन्नाथः, व्याख्याकारः – मदनमोहनझाः, चौखम्बाविद्याभवनम् : वाराणसी, 2012
- **राधानयनद्विशती**, मोहनमिश्रः, संस्कृतव्याख्याकारः – बालकृष्णमिश्रः, कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयः : दरभङ्गा, 1988
- **लघुशब्देन्दुशेखरः** (बालबोधिनीव्याख्यासहितः), नागेशभट्टः, व्याख्याकारः – सत्यनारायणमूर्त्तिः, राष्ट्रियसंस्कृतविद्यापीठम् : तिरुपतिः, 2007
- **लघुसिद्धान्तकौमुदी**, वरदराजः, व्या०- डॉ०सत्यपालसिंहः, शिवालिकप्रकाशनम् : दिल्ली, 2013
- **लिङ्गवचनविचारः** (ललिताख्यहिन्दीव्याख्यानोपेतः), दीनबन्धुझा, सम्पादकोऽनुवादकश्च – श्रीधरत्रिपाठी, मिथिलासंस्कृतविद्यापीठ : दरभङ्गा, 1990
- **वक्रोक्तिजीवितम्** (सुधा-संस्कृतहिन्दीव्याख्याद्वयोपेतम्, प्रथमोन्मेषः), राजानककुन्तकः, व्याख्याकारः - परमेश्वरदीनपाण्डेयः चौखम्बा सुरभारती प्रकाशन : वाराणसी, 1994
- **वराहपुराणम्**, वेदव्यासः, सम्पादकः - खेमराज कृष्णदास, वेङ्कटेश्वरमुद्रणालयः : मुम्बई 1897
- **वाक्यपदीय-ब्रह्मकाण्डः** (वेदानन्दझाविरचितानन्दासूर्यमायाटीकात्रयसंवलितः), भर्तृहरिः, मन्दाकिनी संस्कृत विद्वत् परिषद् : दिल्ली, 2002

- **वाक्यपदीयम्** (हेलाराजविरचितया प्रकाशव्याख्यया रघुनाथशर्म-विरचितयाऽम्बाकर्त्रीव्याख्यया च विभूषितम्, तृतीयकाण्डम्, द्वितीयो भागः), भर्तृहरिः, सम्पादकः – रघुनाथशर्मा, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः : वाराणसी, 1997
- **वाक्यपदीयम्** (हेलाराजविरचितया प्रकाशव्याख्यया रघुनाथशर्म-विरचितयाऽम्बाकर्त्रीव्याख्यया च विभूषितम्, तृतीयकाण्डम्, तृतीयो भागः), भर्तृहरिः, सम्पादकः – रघुनाथशर्मा, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः : वाराणसी, 2000
- **वेणीसंहारम्** (प्रबोधिनीप्रकाशसंस्कृतहिन्दीव्याख्योपेतम्), व्याख्याकारः – रामदेवझा-मैथिलः, चौखम्बा अमरभारती प्रकाशनम् : वाराणसी, 1982
- **वेदान्तसारः** (सारबोधिनी-विमलासंस्कृतहिन्दीव्याख्योपेतः), सदानन्दः व्याख्याकारः – गजाननशास्त्रिमुसलगांवकरः, चौखम्बा कृष्णदास अकादमी : वाराणसी, 2011
- **वैदिक-स्वर-बोध**, व्रजबिहारी चौबे, कात्यायन वैदिक साहित्य प्रकाशन : होशियारपुर, 2004
- **वैयाकरणभूषणसारः** (हरिवल्लभकृतदर्पणव्याख्यासंवलितः सुबोधिनीहिन्दी-व्याख्योपेतश्च), हिन्दीव्याख्याकारः - चन्द्रिकाप्रसादद्विवेदी, चौखम्बा संस्कृत प्रतिष्ठान : दिल्ली, 2013
- **वैयाकरणसिद्धान्तकौमुदी** (वासुदेवदीक्षितप्रणीतबालमनोरमाटीकया समलङ्कृता दीपिकाऽऽख्यहिन्दीव्याख्यया च समन्विता), भट्टोजिदीक्षितः, सम्पादकः – गोपालदत्तपाण्डेयः, चौखम्बा सुरभारती प्रकाशन : वाराणसी, 2001
- **व्यक्तिविवेकः**, राजानकश्रीमहिमभट्टः, टीकाकारः – रेवाप्रसादद्विवेदी, चौखम्बा-संस्कृतभवनम् : वाराणसी, वि०सं० 2073
- **व्युत्पत्तिवादः**, गदाधरभट्टाचार्यः, भाष्यकारः - हरिनारायणतिवारी, चौखम्बा विद्याभवन : वाराणसी, 2004
- **शतकावलिः**, सम्पादकः - जीवानन्दविद्यासागरः, सत्य प्रेस : कलकत्ता, 1874
- **शतकसंहिता**, शिवदत्तशर्माचतुर्वेदः, शारदा संस्कृत संस्थान : वाराणसी, 1999

- **शाबरभाष्यम्** (विवेकहिन्दीव्याख्यासमन्वितम्), शबरस्वामी, व्याख्याकारः – गजानन-शास्त्रिमुसलगांवकर, चौखम्बा संस्कृत सीरिज आफिस : वाराणसी, 2004
- **शिवराजविजयः** (ऐतिहासिकोपन्यासः) अम्बिकादत्तव्यासः, टीकाकारः - रामजीपाण्डेयः, प्रकाशकः - प्रणेतृप्रौत्रः स्वर्गीयश्रीराधाकुमारव्यासतनयः श्रीकृष्णकुमारव्यासः : काशी, 1981
- **शिवशतकम्** (पदार्थप्रकाशिकाऽऽख्यव्याख्यया सनाथितम्), गोकुलनाथोपाध्यायः, सम्पादकः - रमाकान्तपाण्डेयः, राष्ट्रियसंस्कृतसंस्थानम् : नई दिल्ली, 2010
- **शिशुपालवधम्** (मल्लिनाथसूरिकृतया सर्वङ्कषाऽऽख्यया व्याख्यया समुपेतम्), सम्पादकद्वयम् – दुर्गाप्रसादः शिवदत्तश्च, निर्णयसागरमुद्रणालयः : मुम्बई, 1939
- **शुक्लयजुर्वेदकाण्वसंहिता** (सायणभाष्योपेता, उत्तरविंशतिः), मुख्यसम्पादकः – भागीरथ-प्रसादत्रिपाठी, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः : वाराणसी, 1978
- **शृङ्गारप्रकाशः** (साहित्यप्रकाशाख्यो प्रथमो भागः), भोजराजः, सम्पादकः – रेवाप्रसाद-द्विवेदी, इन्दिरागान्धिराष्ट्रियकलासंस्थानम् : नवदेहली, 2007
- **श्रीभार्गवराघवीयम् ,** जगद्गुरुरामभद्राचार्यः, द्वितीयसङ्गणकीयसंस्करणम्, 2013
- **श्रीमद्भगवद्गीता** (संस्कृतहिन्दीश्रीराघवकृपाभाष्यसहिता, प्रथमखण्डः), वेदव्यासः, भाष्यकारः – स्वामिरामभद्राचार्यः, श्रीतुलसीपीठ सेवान्यास : सतना, 1998
- **श्रीमद्भगवद्गीता** (संस्कृतहिन्दीश्रीराघवकृपाभाष्यसहिता, द्वितीयखण्डः), वेदव्यासः, भाष्यकारः – स्वामिरामभद्राचार्यः, श्रीतुलसीपीठ सेवान्यास : सतना, 1998
- **श्रीमद्भागवतमहापुराणम्**, वेदव्यासः, चौखम्बा सुरभारती प्रकाशन : वाराणसी, 1998
- **श्रीमद्वाल्मीकीय रामायण** (हिन्दी-अनुवाद सहित, द्वितीय खण्ड), वाल्मीकिः, गीताप्रेस : गोरखपुर, 2001
- **श्रीशिवमहापुराणम्** , वेदव्यासः, सम्पादकः – ब्रह्मानन्दत्रिपाठी, चौखम्बा संस्कृत प्रतिष्ठान : नई दिल्ली, 2009

- **श्लोकवार्त्तिकम्** (न्यायरत्नाकरव्याख्यान्वितम्, द्वितीयो भागः), कुमारिलभट्टः, सम्पादकः - गङ्गानाथझा, चौखम्भासंस्कृतप्रतिष्ठानम् : दिल्ली, 2009
- **षड्दर्शनसूत्रसङ्ग्रहः** (मीमांसा-वेदान्त -साङ्ख्य-योग-न्याय-वैशेषिकाणाम्), सङ्ग्रहकर्त्ता सम्पादकश्च- जे.एल. गुप्तः, चौखम्बासंस्कृतप्रतिष्ठानम् : दिल्ली, 2012
- **सरस्वतीकण्ठाभरणम्** (रामसिंहविरचितया तृतीयपरिच्छेदान्तया जगद्धरविरचितया च चतुर्थपरिच्छेदटीकया सनाथीकृतम्), भोजराजः, सम्पादकः – केदारनाथशर्मा वासुदेवशर्मा च, निर्णयसागरमुद्रणालयः : मुम्बई, 1934
- **सर्वदर्शनसङ्ग्रहः** (दर्शनाङ्कुराभिधया व्याख्यया समेतः), सायणमाधवाचार्यः, निर्णय-सागरमुद्रणालयः : मुम्बई, 1924
- **साहित्यकौमुदी,** बलदेवविद्याभूषणः, सम्पादकः - ब्रह्ममित्र अवस्थी, गङ्गानाथझा-केन्द्रीयसंस्कृतविद्यापीठम् : प्रयागः, 1981
- **साहित्यदर्पणः** (सविमर्श-शशिकला-हिन्दीव्याख्योपेतः), विश्वनाथकविराजः, हिन्दी-व्याख्याकारः – सत्यव्रतसिंहः, चौखम्बा विद्याभवन : वाराणसी, 2010
- **साङ्ख्यकारिका** (अशोकदा-संस्कृतव्याख्योपेता), ईश्वरकृष्णः, सम्पादको व्याख्याकारश्च – प्रमोदकुमारशर्मा, जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृतविश्वविद्यालयः : जयपुरम्, 2007
- **साङ्ख्यतत्त्वकौमुदी,** वाचस्पतिमिश्रः, चौखम्बाविश्वभारती : वाराणसी, वि०सं० 2035.
- **सिद्धान्तकौमुदी** (जिनेन्द्रसरस्वतीरचिततत्त्वबोधिनीटीकया संवलिता जयकृष्णविहित-सुबोधिन्या अनेक्व्यटीकया समुपेता च), भट्टोजिदीक्षितः, सम्पादकः – भार्गवशास्त्री, निर्णयसागरमुद्रणालयः : मुम्बई, 1942
- **सिद्धान्तशिखामणिः**, शिवयोगिशिवाचार्यः, हिन्दीव्याख्याकारः – राधेश्यामचतुर्वेदी, शैव भारती शोध प्रतिष्ठान : वाराणसी, 1998
- **सिद्धान्तशिरोमणिः** (सूर्यप्रभा-हिन्दीटीकासहितः), भास्कराचार्यः, व्याख्याकरः – सत्यदेवशर्मा, चौखम्बा सुरभारती प्रकाशन : वाराणसी, 2011

- **सूतसंहिता** (संहितात्मक-शिस्कन्दपुराणान्तर्गता माधवाचार्यप्रणीत-तात्पर्यदीपिका-समन्विता च, प्रथमो भागः), वेदव्यासः, सम्पादक – स्वामी महेश्वरानन्द गिरि, श्रीदक्षिणा-मूर्त्ति मठ प्रकाशन : वाराणसी, 1999
- **स्तोत्ररत्नावली**, गीताप्रेस : गोरखपुर, 2009
- **स्वप्नवासवदत्तम्**, भासः, सम्पादकः - वनेश्वरपाठकः, सुबोध ग्रन्थमाला कार्यालयः : राँची, 1990-91
- **हरविजयम्**, रत्नाकरः, सम्पादकः - दुर्गाप्रसादः, चौखम्बासंस्कृतसंस्थानम् : वाराणसी, NA
- **History of Classical Sanskrit Literature**, M.Krishnamachariar, Tirumalai-Tirupati Devasthanams Press : Madras, 1937


✓ **(ख) द्वितीयकानि स्रोतांसि**


- **नामलिङ्गानुशासने पाणिनीयप्रभावः**, जानमद्दिरामकृष्णः, राष्ट्रियसंस्कृत-विद्यापीठम्, तिरुपतिः, 2005
- **भारतीय शास्त्र और शास्त्रकार**, लेखकद्वय – मृदुला त्रिपाठी तथा गिरिजाशङ्कर शास्त्री, चौखम्बा संस्कृत भवन : वाराणसी, 2012
- **नागेशभट्ट का व्याकरणदर्शनचिन्तन** (परमशिशुभ्मञ्जूषा के सन्दर्भ में), प्रकाशचन्द्र ए. किशोराणी, हंसा प्रकाशन : जयपुर, 2009

- **नैषधीयचरितम् की शास्त्रीय मीमांसा**, रामबहादुर शुक्ल, ईस्टर्न बुक लिंकर्स, दिल्ली, 2005
- **वैदिक साहित्य और संस्कृति**, उदयनाथ झा, विद्यानिधि प्रकाशन : दिल्ली, 2013
- **वैदिक साहित्य का इतिहास**, प्रभा कुमारी अग्रवाल, प्रकाशन केन्द्र : लखनऊ, NA
- **व्यक्तिविवेकविमर्शः**, रामकुमारशर्मा, राष्ट्रिय संस्कृत साहित्य केन्द्र : जयपुर, 2008
- **व्याकरणतन्त्र का काव्यशास्त्र पर प्रभाव**, हरिराम मिश्र, ईस्टर्न बुक लिंकर्स : दिल्ली, 1994
- **सूतसंहिता मीमांसा** (स्कन्दपुराणान्तर्गत "सूतसंहिता" का समीक्षात्मक अध्ययन), रमाकान्तझा, चौखम्बा विद्याभवन : वाराणसी, 2005
- **संस्कृत काव्यशास्त्र का आलोचनात्मक इतिहास**, रेवाप्रसाद द्विवेदी, कालिदास संस्थान, वाराणसी, 2007
- **संस्कृत भाषा और साहित्य**, भगवतीलाल राजपुरोहित, शिवालिक प्रकाशन, दिल्ली, 2004
- **संस्कृत वाङ्मय का बृहद् इतिहास** (चतुर्थ खण्ड - वेद), सम्पादक – राधावल्लभ त्रिपाठी, उत्तर प्रदेश संस्कृत संस्थान : लखनऊ, 1997
- **संस्कृत वाङ्मय का बृहद् इतिहास** (चतुर्थ खण्ड - काव्य), सम्पादक – राधावल्लभ त्रिपाठी, उत्तर प्रदेश संस्कृत संस्थान : लखनऊ, 1997

- **संस्कृत वाङ्मय का बृहद् इतिहास** (सप्तम खण्ड), सम्पादक – राधावल्लभ त्रिपाठी, उत्तर प्रदेश संस्कृत संस्थान : लखनऊ, 1997
- **संस्कृत वाङ्मय का बृहद् इतिहास** (पञ्चदश खण्ड - व्याकरण), सम्पादक – गोपालदत्त पाण्डेय, उत्तर प्रदेश संस्कृत संस्थान : लखनऊ, 2001
- **संस्कृत व्याकरण शास्त्र का इतिहास** (छात्रोपयोगी संस्करण), युधिष्ठिर मीमांसक, सम्पादक – रामनाथ त्रिपाठी शास्त्री, चौखम्भा पब्लिशर्स : वाराणसी, 2006
- **संस्कृत शास्त्रों का इतिहास**, बलदेव उपाध्याय, चौखम्बा विद्याभवन : वाराणसी, 1994
- **संस्कृत साहित्य का आलोचनात्मक इतिहास**, रामजी उपाध्याय, चौखम्बा विद्याभवन : वाराणसी, 1993
- **संस्कृत साहित्य का इतिहास**, वाचस्पति गैरोला, चौखम्बा विद्याभवन : वाराणसी, 1960

✓ **(ग) शोधपत्रपत्रिकाऽऽदयः**

- **गोकुलनाथकृतशिवशतकस्थशास्त्रतत्त्वमीमांसा** (शोधप्रबन्धः), एम्.फिल्., विशिष्टसंस्कृताध्ययनकेन्द्रम्, जवाहरलालनेहरूविश्वविद्यालयः, 2014
- **पाणिनीये प्रत्ययानां वाचकत्वद्योतकत्वविचारः**, एस्.टी.के.एस्.रङ्गाचार्यालुः, सारस्वती सुषमा, वर्षाङ्कः – 46/3-4, पृष्ठाङ्कः – 201-205
- **लिङ्गतत्त्वनिर्णयः**, वृजकिशोरत्रिपाठी, *सारस्वती सुषमा*, वर्षाङ्कः – 52/1-2, पृष्ठाङ्कः – 96-106
- **लिङ्गतत्त्वविमर्शः**, सुब्रह्मण्य-अय्यरः, *सारस्वती सुषमा*, वर्षाङ्कः – 2/1-4, पृष्ठाङ्कः – 41-47
- **शब्दमाश्रित्य व्यवहारपथमागतानां लिङ्गानां निर्णयः**, सभापत्युपाध्यायः, *सारस्वती सुषमा*, वर्षाङ्कः – 18/3, पृष्ठाङ्कः – 1-12
- **सुप्तिङ्वचननिर्णयः**, रामप्रसादत्रिपाठी, *सारस्वती सुषमा*, वर्षाङ्कः – 37/1-4, पृष्ठाङ्कः – 75-83

✓ **(घ) कोशग्रन्थाः**

- **अमरकोशः** (सटिप्पणरामाश्रमीत्याख्यसुधा-धराव्याख्याद्वयोपेतः), अमरसिंहः, हिन्दीव्याख्याकारः – श्रीमन्नालालः अभिमन्युः, चौखम्बा विद्याभवन : वाराणसी, 2011

- **वाचस्पत्यम्** (षड्भागान्वितम्), सङ्कलकः संशोधकश्च – तारानाथतर्कवाचस्पति-भट्टाचार्यः, चौखम्बा संस्कृत सीरिज आफिस : वाराणसी, 1962
- **शब्दकल्पद्रुमः** (पञ्चभागसमन्वितः), चौखम्बा संस्कृत ग्रन्थमाला : वाराणसी, 1967
- **संस्कृत वाङ्मयकोश** (प्रथम खण्ड ), सम्पादक – श्रीधर वर्णेकर, भारतीय भाषा परिषद्, लोकभारती प्रकाशन : इलाहाबाद, 1988
- **संस्कृत साहित्य-कोश**, राजवंश सहाय, चौखम्बा विद्याभवन : वाराणसी, 2002
- **संस्कृत हिन्दी कोश**, वामन शिवराम आप्टे, मोतीलाल बनारसीदास पब्लिशर्स : दिल्ली, 1996
- **हलायुधकोषः** (अभिधानरत्नमाला), हलायुधः, सम्पादकः - जयशङ्करजोशी, उत्तप्रदेश-हिन्दीसंस्थानम् : लखनऊ, 1993


✓ **(ङ) अन्तर्जालस्रोतांसि**


I. http://sa.wikisource.org/wiki
II. http://www.questia.com/search/sanskrit-literature
III. http://www.enacademic.com/
IV. http://dsal.uchicago.edu/dictionaries/apte/
V. http://groups.google.com/group/bvparishat/topics
VI. http://kjc-fs-cluster.kjc.uni-heidelberg.de/dcs/index.php?contents=abfrage
VII. http://www.bhartiyashodh.com/
VIII. http://www.scribd.com/search?query=Sanskrit+Vangmaya+Ka+Brihat+Ithas
IX. http://www.vedakosh.com/